४०४

द्रु.पु. श्री. स.ख.

हिमवत्खण्ड

...कि विद्यापीठ-पुरुष

चतुर्थ सप्ताह

① अध्याय - ३४ तारीख ६५ = ११

② " ५१ " ६० = १२

③ " ६६ " ८६ = २१

४ " × ५५१ " १८५ = ३५

६८

४४
३४
११

५०-६०

८५
६६
४०

११
५५१
५१५
५५१
×३४

२०
११
११
३४
७५

[illegible] यापीठ-पु[illegible]

१६१५४

कदम्बं च तथा सूर्यं सर्वान्वृक्षान्सुरांशकान् ॥१४॥
ततो देवा महेशानं स्तुत्वा नेमुः पुनः पुनः ।
विज्ञापयन्तदीशानं परिभवं सदात्मनः ॥१५॥

देवा ऊचुः ।

ईशान सर्वशर्वेश रक्ष रक्ष इहागतान् ।
शरणं प्रापितानस्मान्स्वर्गात्परामवा विभो ॥१६॥
(भवतः सुवरं लब्ध्वा हिरण्यकशिपुर्बली) ।
हिरण्यकशिपू राज्यं चकार चामरावतीम् ।
युद्धेस्माँस्तत्र विद्राव्य लुण्ठितं नन्दनं वनम् ॥१७॥
किं कुर्वामः क गच्छाम इति कृत्वा हरीश्वर ।
पादुकायां तवेशान आगताः शरणं विभो ॥१८॥
भवतः सुवरं लब्ध्वा हिरण्यकशिपुर्बली ।
विद्राव्यास्मान्युधि स्वर्गात्सुखं राज्यं चकार सः ॥१९॥

शर्व उवाच

अवश्यं विबुधास्तेन प्राप्तव्यं तपसः फलम् ।
तपसोन्तेऽस्य भगवान्वधं विष्णुः करिष्यति ॥२०॥
लोहशस्त्रैर्न वध्याश्च दैत्यास्ते तपसौजसः ।
अस्थ्युद्भूतैश्च शस्त्रास्त्रैर्वध्याः स्युस्ते न संशयः ॥२१॥
अतः पूर्वोत्तरे शैले दूरे द्विनियोजने ।
सुन्दराख्ये तपस्वी वै दधीचिर्नाम तप्तवान् ॥२२॥
अर्चति सुन्दरीं देवीं सर्ववन्द्यां हि किंशुकैः ।
सुन्दराख्ये महातीर्थे स स्नात्वोपचितैः स्तवैः ॥२३॥
गत्वा तत्र तदस्थीनि याच्यन्तां तं सुरोत्तमाः ।
तदस्थ्युद्भवच्छस्त्रात्ते पलायिष्यन्ति सांप्रतम् ॥२४॥

स्कन्द उवाच ।

श्रुत्वा तद्वचनं देवा जग्मुर्यत्र घटोद्भव ।
दधिचीं ददृशुस्तत्र तप्तवन्तं सुदुःकरम् ॥२५॥
उपागत्य सुरास्तत्र दधीचिं मुनिसत्तमं ।
शिरोभिस्ते प्रणम्यादौ ऊचुर्मधुरयन्मुनिम् ॥२६॥

देवा ऊचुः ।

नमस्ते मुनये चार्य सर्वसत्त्वानुकम्पिने ।
शरण्यान्रक्ष रक्षास्मान् शंकटस्थान्महामुने ॥२७॥

दधीचिरुवाच ।

स्वागतास्त्रिदशा यूयं किमर्थं समिहागताः ।
शंकटस्थाः कथं देवाः कस्माच्च वदतात्रमे ॥२८॥

देवा ऊचुः ।

हिरण्यकशिपू राज्यं चकार चामरावतीम् ।
विद्राव्यास्मान्भृशं युद्धे त्रिशत्कोटिरथैर्वृतः ॥२९॥
इत इहागता दान्त ज्ञात्वा रुद्रमुखाच्च्युतं ।
त्वां जीवमपि दातारं परोपकारिणं वयं ॥३०॥
अस्थीनि तव दान्त त्वां याचितुं समिहागताः ।
यदि कृपा तवास्मासु स्वर्गालयेषु दीयताम् ॥३१॥

दधीचिरुवाच ।

एकस्यार्थे बहून् हत्वा लभेच्च बहु पातकं ।
बहूनां हेतवे हत्वा नैकं लभेच्च पातकम् ॥३२॥
पांचभौतिकमंगोयं क्षणविध्वंसिनः सुराः ।
अतो दास्याम्यहं देहं युष्मदुद्धारणाय वै ॥३३॥

स्कन्द उवाच ।

इत्युक्त्वार्यो दधीचिश्च मोक्षदं तीर्थसुन्दरम् ।
गत्वा तत्र हि योगेन पंचत्वमाप्नुयाद्ध्रुवम् ॥३४॥
ततस्त्वष्टा तदस्थीनि प्रतिगृह्य च सांप्रतम् ।
प्रधौतवांश्च तत्तीर्थे शस्त्रास्त्राणि चकार च ॥३५॥
गदां पाशं तथा वज्रं शक्तिं शरांश्च मुद्गरं ।
ब्राह्मयं पाशुपतं वैष्णव्यं चकार बहुशो बहु ॥३६॥
ततो ब्रह्मा च संकल्प्य देवेभ्यो ददौ हि तदा ।
ब्राह्मयं स्वयं गृहीत्वा च समंत्रं च पृथक् पृथक् ॥३७॥
पाशुपतं शिवायादौ विष्णवे वैष्णवं पुनः ।
इंद्राय च ददौ वज्रं मह्यं च शक्तिमुत्तमाम् ॥३८॥
शस्त्रास्त्राणि समादाय सन्तुस्ते तीर्थसुन्दरे ।
ततो देव्यालये गत्वा ववन्दुस्तत्र सुन्दरीम् ॥३९॥
संस्तुत्य बहुभिः श्लोकैः परिक्रम्य पुनः पुनः ।
प्रार्थयन्तिस्म तां देवीं स्वर्गस्थानं वरं च ते ॥४०॥
ततो वरान्प्रलब्धास्ते ययुः स्वर्गं हि सांप्रतं ।
सिंहनादं तदा चक्रुर्वाद्यानि ज्यास्वनं तथा ॥४१॥

स्कन्द उवाच

ततः शुक्रश्च मेधावी तत्सर्वं ज्ञातवान्ध्रुवं ।
लब्धवन्तो वरं देव्याः शस्त्रास्त्राणि च तत्तथा ॥४२॥

शुक्र उवाच ।

हिरण्यकशिपो दैत्याः शृणुध्वं मे वचांसि च ।
लब्धवराः सुराः देव्याः हर्षात्समागता ह ॥४३॥
सामर्षाश्चा गता देवा वर्णिनोस्थ्युद्भवायुधाः ।
स्थातव्यं नात्र भोदैत्याःपलायध्वं च साम्प्रतं ॥४४॥
देव्या वरं समालब्ध्वा यतो देवाश्च सायुधाः ।
हनिष्यन्ति च सैन्यं न अवश्यं दानवाः खलु ॥४५॥
संग्रामे पतितानां नो नलभेद्धि बलं यतः ।
नमंत्रं नौषधं चात्र न बुद्धिर्न पराक्रमम् ॥४६॥

स्कन्द उवाच ।

तस्मिन्कालेऽमराः सर्वे रुरुधुरमरावतीम् ।
ववर्षुश्च शरासारान् शरवत्संप्रेरितैः शरैः ॥४७॥
अन्धीभूते महायुद्धे अलक्ष्यन्तिस्म ते मिथः ।

जघानेन्द्रश्च वज्रेण कोटिकोटिश्च दानवान् ॥४८॥
देवा जघ्नुश्च तच्छस्त्रैः कोटिकोट्यसुरांस्तथा ।
दिक्पाला दानवान् जघ्नुर्वायुवेगेन पातयन् ॥४९॥
ततो दैत्यमहासेनाः शीघ्रं त्यक्त्वाऽमरावतीम् ।
दैत्यराजं पुरोधाय स्वाश्रमं दुद्रुवुस्तदा ॥५०॥
तच्छस्त्रास्त्रैरसह्यैस्तानर्दमानान्भयावहान् ।
हिरण्याक्षोऽब्रवीच्छीघ्रं पथि व्रजंश्च दानवान् ॥५१॥

हिरण्याक्ष उवाच ।

भो भो दैत्या महाशूरा हिरण्यकशिपोर्बले ।
अधर्मस्था वयं च स्युः सग्रामाद्य पराङ्मुखाः ॥५२॥
न प्रेचेहं स्वकं राज्यमुपालम्भसमन्वितः ।
विनायुद्धं पुनर्दैत्याः कठोरं सह विष्णुना ॥५३॥
अथाहं सह सैन्यं च हनिष्यामि जनार्दनम् ।
गत्वा यत्रास्थितं गूढं प्रेचे राज्यं स्वकं ततः ॥५४॥

स्कन्द उवाच ।

अंगीकृत्य तदेत्येवं हिरण्याक्षो महासुरः ।
ययौ यत्र महाविष्णुः कौशिक्याश्च तटे स्थितः ॥५५॥
वराहपर्वते कूटे वराहरूपधृग् विभुः ।
तत्र गत्वाशु दैत्येशः सिंहनादं ननाद च ॥५६॥
श्रुत्वा विष्णुश्च तन्नादं दध्मौ शंखं महास्वनं ।
शंखस्वनैः श्रवापेयैर्मूर्छितः क्रोधतोऽसुरः ॥५७॥
युयुधतुर्महायुद्धं विष्णुदैत्यौ परस्परं ।
दिव्यवर्षशतं पूर्णं शस्त्रास्त्रैः घोररणैर्धुने ॥५८॥

हिरण्याक्ष उवाच ।

मत्तो भयादिहागत्य तिष्ठसि त्वं रहो हरे ।
वराहरूपमास्थाय विविक्ते निर्ज्जने गिरौ ॥५९॥
न घ्नन्ति दानवाः कोलं रहसि वा पशुं युधि ।
इति कृत्वा हृदा विष्णो सुखं तिष्ठसि कोलधृक् ॥६०॥
इदानीं सान्वयं त्वां वै हनिष्यामि च सत्वरं ।
हत्वा निष्कण्टकं राज्यं भोक्ष्यामि रुद्रवत्सुखेन ॥६१॥

वराह उवाच ।

किं वल्गसे महामूढ मिथ्यावादं ममाग्रतः ।
पातालं ते प्रयान्तिस्म मिथ्यावादं वदन्ति ये ॥६२॥
नाहं भयाच्च ते मूढ वराहरूपमास्थितः ।
जगतां धारणार्थाय लोकसंरक्षणाय च ॥६३॥

स्कन्द उवाच ।

इत्युक्त्वा च महाविष्णुर्वराहरूपधृक्तदा ।
कोटिसूर्य्यप्रतीकाशं शीघ्रं चक्रं समाददे ॥६४॥
ततो युद्धे वराहोऽसौ चक्रेण सूर्यवर्च्चसा ।
शिरो जहार कायात्तद्धिरण्याक्षस्य सत्वरम् ॥६५॥

ततश्च देवा सुमुखं हि चक्रु-
विनाश्य शत्रुं सततं सुराज्यम् ।
सहस्रवर्षं त्रिदिवे च शक्रो
मुमोद देवैः सह विप्र शच्या ॥६६॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे हिरण्याक्षवधो नामैकत्रिंशोऽध्यायः ॥३१॥

अगस्त्य उवाच ।

भगवञ्छ्रोतुमिच्छामि भूयो ब्रह्मविदांवर ।
सफलं वद मे देव त्वत्कथाय च सांप्रतम् ॥१॥
कामरूपस्य महात्म्यं सुन्दरीपर्वतस्य च ।
वराहाद्रेश्च माहात्म्यं कौशिक्याश्चोद्भवं तथा ॥२॥

स्कन्द उवाच ।

शृणु भक्त प्रवक्ष्यामि महात्म्यं सुन्दरीगिरेः ।
तच्छ्रवणात्प्रपूयन्ते देहान्तात्स्वसंस्थिताः ॥३॥
ब्रह्मणा च कृतं शैलं यथा सौन्दर्य्यधातुना ।
नानारत्नसमाकीर्णं अनर्धीयं सरोवरम् ॥४॥
सर्वद्रुमलताकीर्णं नानापुष्पोपशोभितं ।
हिरण्यवल्लिभिर्युक्तं सर्वर्तुसंभवैः फलैः ॥५॥
राजमानं महाशैलं सर्वसौन्दर्यशोभितं ।
सर्वलोकमनोहार्यं नाना रत्नमहोज्ज्वलम् ॥६॥
प्रेदया शैलं च सौन्दर्य्यमादिशक्तिर्हि सुन्दरी ।
स्थानं चक्रे मुदा पूर्वं समागत्याम्बराच्चिरं ॥७॥
परिवारैः समं देवी योगिनीभिर्विराजते ।
देवैः सिद्धैः सगन्धर्वैर्मुनिभिर्नित्यसेविता ॥८॥
देवीपादार्घसंभूता तस्माच्च सुरसुन्दरी ।
मोक्षवती नदी श्रेष्ठा सुन्दराद्रिस्रवत्सरा ॥९॥
तयोः सुसंगमे तीर्थे सुन्दराख्ये पवित्रके ।
तत्रार्णसेचनाल्लोकः सौन्दर्य्यमाप्नुयात्ततुम् ॥१०॥
देवो वाप्यसुरो वापि मर्त्यः पशुस्तथा मुने ।
तत्र स्नात्वा गिरिं धीमान् आरोहति हि सुन्दरम् ॥११॥
सर्वपापैर्विनिर्मुक्तो ब्रह्महत्यादिपातकैः ।
सर्वसौन्दर्य्ययानस्थः स याति परमां गतिम् ॥१२॥
स्नातकस्तत्र शैलेन्द्रं समारुह्य प्रदर्शनम् ।
भक्त्या करोति यो देव्यास्तस्य पुण्यफलं शृणु ॥१३॥
अश्वमेधसहस्राणि वाजपेयशतानि च ।
हिरण्यशतं तुलानांमेतेषां यत्फलं लभेत् ॥१४॥
सकृद्दर्शनमात्रेण स्नात्वा तीर्थे महाफलं ।
तत्फलं प्राप्य देहान्ते मोक्षं संलभते हि सः ॥१५॥

कश्चिन्म्लेच्छः पुरा मुक्तः कण्डुर्नाम धनुर्धरः ।
मृगयां गतवांस्तत्र अलब्ध मृगकोपकृत् ॥१६॥
महाष्टम्यां स तत्तीर्थे जलं पाय्य गिरिं गतः ।
देवर्षिसेवितां देवीं ददर्शाद्रौ हि सुन्दरीम् ॥१६॥
ज्ञानमुद्दर्शनाद्देव्या निष्पापस्तां ननाम वै ।
धनुस्त्यक्त्वा विरक्तोऽसौ वव्रे वरं हृदीप्सितम् ॥१८॥

कण्डुरुवाच ।

देवि मां कुरु भूपेशं भोक्ष्ये येन सुखानि तत् ।
ततस्त्वत्सेवको भूत्वा विचरामि यथासुखम् ॥१९॥

स्कन्द उवाच ।

एवं याच्य वरं म्लेच्छो भक्त्या देवीं ननाम हि ।
उवाच च गणा देव्या वरदानाय मंगला ॥२०॥

योगिन्युवाच ।

स्वर्गं वा कांक्षसे पुत्र भूतिं वा भुवि दुर्लभाम् ।
अवश्यं प्राप्यते तद्धि देवीप्रदर्शनाद्वरम् ॥२१॥

कण्डुरुवाच ।

नाहं यास्याम्यहं स्वर्गं भुक्त्वा भोग्यरसं विना ।
ततो यास्याम्यहं मातर्देव्याः पादाब्जसेवनम् ॥२२॥

स्कन्द उवाच ।

इति श्रुत्वा वचस्तस्य मङ्गला सासुमायया ।
विमुह्यंतं तदागत्य तिरश्चकार सुन्दरीम् ॥२३॥
सोपि गतः स्वकं स्थानं तद्वृत्तान्तं सुविस्मृतः ।
तत्प्रभावान्मुने म्लेच्छो भुक्त्वा म्लेच्छाधिपः सुखम् ॥२४॥
सहस्रवत्सरान्ते स ज्ञानयुक्तो नृपोत्तमः ।
सस्मार सुन्दरीं भक्त्या मनसेच्छन् हि तत्पदं ॥२५॥
गिरिमारोहमाणं तं समास्थाय विमानके ।
निन्युः शिवपुरं शैवाः सदेहं पुष्पवर्षयन् ॥२६॥
तस्य पूर्वोत्तरे भागे हयग्रीवो जनार्दनः ।
समास्ते शैलराजे वै कल्किरूपो घटोद्भव ॥२७॥
अन्ते कलियुगस्यार्य स्तद्रूपं धृतवान्हरिः ।
संहर्तुं प्राणिनः सर्वान् भूय एकार्णवाय च ॥२८॥
विष्णुधारा नदी श्रेष्ठा विष्णुस्नानेन संभवा ।
पुण्यां नदी तयोर्योगे विष्णुतीर्थमुदाहृतम् ॥२९॥
तत्र स्नात्वा हयग्रीवं भक्त्या प्रेक्षति यो नरः ।
सर्वपापैर्विनिर्मुक्तः स याति परमां गतिम् ॥३०॥
तत्रैव च महालिङ्गं यः पश्यति नरोत्तमः ।
विधूय सर्वपापानि रुद्रलोकं स गच्छति ॥३१॥
यश्चैतदध्यायमृषे शृणोति,
प्राधाय चित्तं लभते ह्यजस्रं ।
रूपं च लक्ष्मीं तनयं प्रभुत्वं,
जयं तथायुः परमं हि चान्ते ॥३२॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे सुन्दरशैलमाहात्म्यं नाम द्वात्रिंशोऽध्यायः ॥३२॥

❀ ❀ ❀

स्कन्द उवाच ।

कामाचलस्य माहात्म्यं प्रवक्ष्याम्यधुना मुने ।
तस्य श्रवणमात्रेण तीर्थकोटिफलं लभेत् ॥१॥
ब्रह्मणा च कृतं शैलं कामेनोत्तममंचितं ।
देवं मनोहरं दिव्यं सर्वभूतसुखावहम् ॥२॥
नानाधातुसमाकीर्णं नानारत्ना करोज्ज्वलम् ।
हिमवतो वरं शृंगं धातुतेजोमयं गिरीम् ॥३॥
वृक्षैर्हरिरुमयैर्युक्तं तमाभिश्च तथाविधैः ।
निकुञ्जै राजितं दिव्यं परमं मेरुसंज्ञितम् ॥४॥
नानापुष्पैः प्रफुल्लैश्च स्थलपद्मैः प्रशोभितं ।
मयूरकोकिलैर्भृङ्गैर्जीवजीवैश्च सारसैः ॥५॥
आलोक्यं योगमाया सा शैलराजं मनोहरं ।
अवतीर्य मुदा व्योम्नस्तत् कूटे ह्यवसत्सुखम् ॥६॥
मुमोद च महादेवी तच्छेखरे रहः सदा ।
ब्रह्मपुत्रस्तदाऽगस्त्य तत्रान्तरे ववाह वै ॥७॥
देव्यास्तत्र रहः सानु त्वं जानीहि घटोद्भव ।
सा कामरूपिणी निद्रा प्रत्यक्षा तत्र तिष्ठति ॥८॥
गत्वार्च्चति मुने धीमान् भक्त्या नानोपहारकैः ।
सकृदपि च कामाख्यां तस्य पुण्यफलं शृणु ॥९॥
कोटिजन्मार्जितैः पापैर्मुच्यते तत्क्षणान्नरः ।
तस्य नेत्रार्जितैर्भूयो वाक्कायमानसार्जितैः ॥१०॥
धनधान्यैः समायुक्तो दारापुत्रैश्च किङ्करैः ।
नरेन्द्राणां सुखं लब्ध्वा भुनक्तीह सुखं बहु ॥११॥
देहान्ते च पुरे शैवे परात्परं सुखात्सुखम् ।
पितृन् कुलानि चोद्धृत्य दिव्ययानेन गच्छति ॥१२॥
योगधारा नदी श्रेष्ठा ब्रह्मपुत्रनदस्तथा ।
तयोः सुसंगमेऽगस्त्य योगतीर्थमुदाहृतम् ॥१३॥
रुद्रेणैव कृतो योगस्तत्राप्लुत्य च भस्मना ।
तत्रैव स्थापितं लिंगं स्वहस्तेन सुखं परम् ॥१४॥
तत्र स्नात्वा दिवं यान्ति योगं प्राप्य सुदुश्चरम् ।
देवगन्धर्वदैत्याश्च यो वा को वा नरोपि वा ॥१५॥
ब्रह्मपुत्रनदस्नात अश्वमेधफलं लभेत् ।
स्नात्वार्च्चति शिवां तत्र संसृतिं न लभेन्मुने ॥१६॥
योगकुण्डे नरो धीमात्स्नात्वा योगीश्वरो भवेत् ।

ब्रह्मणा च कृतो योगः कुण्डं निर्माय वै पुरा ॥१७॥
तत्र जप्तं हुतं दत्तं तत्सर्वमक्षयं भवेत् ।
स्नात्वाऽर्च्चयति शिवां यो वै स एव मुक्तिभाजनम् ॥१८॥
मोहनाकर्षणोच्चाटं वश्योच्चाटनमारणं ।
तत्र स्नात्वा जपाद्देव्यां तत्सर्वं सिद्धिमाप्नुयात् ॥१९॥
मयेनैव पुरा लब्धं तत्र मायां महासुरीं ।
देव्याः प्रसादतस्तां वै यया संमोहितं जगत् ॥२०॥
संवरेण तथा धीमन् लब्धा मायां पुरा च तां ।
भक्त्याऽऽराध्य च कामाख्यां यया संमोहितो हरिः २१
ब्रह्मा विष्णुश्च रुद्रश्च लब्धवन्तो वरोत्तमान् ।
जगतां मोहिनीं मायां तामाराध्य सुभक्तितः ॥२२॥
योगकुण्डे मुदा स्नात्वा यस्तन्मंत्रं जपेत्सुधीः ।
प्राप्नोति सोपि तां सिद्धिं देव्याः प्रसादतः खलु ॥२३॥
ब्रह्मा देवीं सुभक्त्यैव तपश्चक्रार तत्र च ।
कुण्डं विधाय योगेन योगकुण्डस्ततः स्मृतः ॥२४॥
योगेश्वरं महालिंगं भक्त्या पूजति तत्र च ।
मूर्खो ज्ञानविहीनो वा सोऽपि योगीश्वरो भवेत् ॥२५॥
यावत्यो योषितः सर्वास्तत्र तिष्ठन्ति सर्वदा ।
ताः सर्वा कामरूपिण्यो योगिन्यश्च न संशयः ॥२६॥
स्नात्वा तत्र महामायां योऽर्च्चयति भक्तिपूर्वकम् ।
न पुनर्जायते योनौ योगी मोक्षमवाप्नुयात् ॥२७॥
भस्माद्रिशेखरे लिङ्गं भस्मेश्वरं हि योऽर्च्चयति ।
पुनर्जन्म परित्यज्य गच्छति परमं शिवं ॥२८॥
आसीद्वेश्या पुरागस्त्यय सुकेशी नाम विश्रुता ।
वैश्यपुत्री च धर्मिष्ठा सुस्वरा गीततत्परा ॥२९॥
माहात्म्यं मीनराजस्य श्रुत्वा काश्यां यथोदितं ।
उज्जयिनीं घटोद्भूत परित्यज्य पतिं गृहम् ॥३०॥
तीर्थराजे हि सा स्नात्वा उमेश्वरमपूपुजत् ।
भक्त्या च माघशुक्लायां नवम्यां हि विनिद्रका॥३१॥
ययाचे मनसा देवीं संपूज्य विधिवन्मुहुः ।
त्यक्तनिद्रा निशायां सा वरं सर्वाङ्गसुन्दरीम् ॥३२॥
देवि सुसुन्दरीं मां त्वं कुरु लोकविमोहिनीं ।
विमुह्यन्तां नरैर्देवैर्मां प्रेक्ष्याऽर्घ्य परैः पुनः ॥३३॥
यावज्जीवं सुखं भुक्त्वा युवभिः सुन्दरैः सह ।
ततोऽमरावतीं गत्वा तत्र मुंक्ष्येऽमरैः समम् ॥३४॥
एतद्वरं च मे देहि देवेशि भक्तवत्सले ।
सर्वपापानि मे मातः संहराद्य विनाशिनि ॥३५॥

स्कन्द उवाच ।

एवं प्रार्थ्य वरं देव्याः स्नातका सा प्रहर्षिता ।
देव्याः प्रभावं तत्तीर्थान्प्रेक्ष्य सर्वाङ्गसुन्दरी ॥३६॥
काश्यां सा प्रययौ सार्द्धं युवभिः क्रीडयन्पथि ।
मुहुर्मुहुः प्रेक्षकास्ते बालवृद्धाश्च मध्यमाः ॥३७॥
ददद्रत्नानि वासांसि मण्डनानि प्रलोभयन् ।
तस्यै तया समं क्रीडां चिक्रीडू रसिका मुहुः ॥३८॥
सङ्गीतैः रूपसौन्दर्य्यैर्गुणैर्नो दासवत्सदा ।
देहान्ते तां नयन्दूता देव्या इन्द्रपुरीं मुने ॥३९॥
तत्र रेमे सुखं सश्चदेवगणैः समं हि सा ।
सहस्राब्दं सुखं व्याप्य कौतूहलैर्घटोद्भव ॥४०॥
सुधर्मायां स्थितं शक्रं सा प्रेक्ष्य मोहसंयुता ।
तया तदन्तिकं गत्वा गीतरसैः प्रसेविताः ॥४१॥
कामातुरां तदा शक्रः तां प्रेक्ष्यांशु रुपान्वितः ।
शक्रं बिब्बोकयुक्ता सा ह्यालिंगितुं समुद्यता ॥४२॥
किङ्करेभ्यस्त्वरा शक्रो व्याचष्ट वचनं तदा ।
निःसारय अत एनां पृथिव्यां पातय ध्रुवम् ॥४३॥
प्रगृह्य त्वरितं दूताः सुकेशीं शक्रदेशकाः ।
आनीय पृथिवीं ते तां चिक्षिपुः कुतृणं यथा ॥४४॥
सा च दुःखातुरागस्त्य क्रन्दमाना रसान्तरे ।
किं करोमि क्व गच्छामि इति चिन्ताकुला मुहुः ॥४५॥
दशाब्दान्ते हि काश्यां साशृणोद्विप्रवक्त्रतः ।
कामरूपस्य माहात्म्यं मनः कामफलप्रदम् ॥४६॥
सापि त्यक्त्वा पुनः काशीमगमन्नीलपर्वतं ।
संस्मृत्य पादुकां देव्या लिप्सुकामा हि मानसम् ॥४७॥
ब्रह्मपुत्रे हि सा स्नात्वा योगकुण्डे तत पुनः ।
देव्यालयं मुदा भक्त्या द्वारं नत्वा न्यवीविशत् ॥४८॥
आदाय मनसीन्द्रं सा दासत्वेन पतिं मुने ।
इति संचिन्त्य देवेशीमपूपुजत्सर्मर्हणैः ॥४९॥
महाष्टमीं समारभ्य दशम्यां तमपूपुजत् ।
जपार्च्चनैर्हि सा देवीं त्रिविधैर्निशि जाग्रती ॥५०॥
देवि मे देहि शक्रं तं दासत्वेन पतिं सति ।
येन निर्व्यासितन्मातः स्वर्गात्स्वच्छरणं गताम् ॥५१॥
तदिति प्रार्थ्यमानायां प्रवस्यायां शिवां निशि ।
आययुः कामरूपिण्यो विमानपाणयो मुने ॥५२॥
आस्थाय तां विमाने ताः सांगा निन्युर्वियत्पथं ।
ईषे शुक्लदशम्यां वै देव्याः प्रसादतः सुखम् ॥५३॥
शक्रोऽपि तन्निशायां च कामातुरो हि तां स्मृतः ।
अवोचद्वचनं कष्टी आमंत्र्य बृहतांपतिम् ॥५४॥

शक्र उवाच ।

त्वत्पादाब्जं नमस्येहं नमस्ते गुरु-दैवत ।
अद्य मे मथते स्वान्तं मदनेन भृशं शरैः ॥५५॥
या मया निःसृता स्वर्गाद्भूत्वा व्याधी शरैश्च सा ।

निहन्ति मां कुरूपायं तां विनाहं न जीवये ॥५६॥
गुरुरुवाच।
गच्छ शक्र ध्रुवं भक्त्या नीलाचलं शिवाप्रियं।
तत्र गमनमात्रेण मनःकामं प्रलभ्यते ॥५७॥
स्मरन्नर्चय तां वन्द्य कामाख्यां भक्तितो मुहुः।
तस्या स्मरणमात्रेण दुर्लभं यद्ध्रुवं लभेत् ॥५८॥
स्कन्द उवाच।
ततः प्रीतो गुरुं नत्वा वज्रायुधो ययौ मुदा।
ऐरावतसमारूढो भक्त्या विचिन्त्य तां शिवाम् ॥५६॥
न्योम्नि ददर्श शक्रस्तां वाह्यमानां हि तद्गणैः।
सूर्य्यसन्निभयानस्थां भूषणैर्भूषितां वराम् ॥६०॥
नृत्यगीतैश्च वाद्यैस्तां सेवितां योगिनीगणैः।
चामरैर्धूयते शश्वत् पुष्पासारैर्यथेश्वरीम् ॥६१॥
प्रणम्य त्रिविधैः शक्रो योगनिद्रां तदा मुहुः।
मेने कृतार्थमात्मानं हृदा देव्याः प्रसादतः ॥६२॥
हर्षगद्गदवाक्तस्यै परिरभ्य ह्युवाच तत् ॥६३॥
शक्र उवाच।
स्वागतं भो प्रिये भद्रे प्रियंवदे चिरं दिवि।
त्वां विनेमां तनुं शुष्कां दृष्ट्वाऽमृतैः प्रसिञ्चय ॥६४॥
सुकेश्युवाच।
मा स्पृश पुरुहूतार्य (द्य) मे निःसृतामिमां तनुं।
यस्यां लब्धवरः पूर्वं तामेव व्रज कैतव ॥६५॥
शक्र उवाच।
मैवं वद सुकेश्यार्य्ये अद्यप्रभृति सुन्दरि।
शच्यास्त्वयार्द्धशय्यायां शयतां वै समं मया ॥६६॥
वहेऽहं च तवानुज्ञां शपे सुकेशि सुन्दरि।
कामाग्निभस्मदेहं मां त्वमृतैः प्रसिंचय ॥६७॥
स्कन्द उवाच।
एवं संमानितेन्द्रेण अप्सरसां गरीयसी।
कामाख्यायां वरं लब्ध्वा भवेदद्यापि कुंभज ॥६८॥
इत्येतत्कथितं स्वल्पं कामेश्वर्याः प्रसंशनम्।
वराहाद्रेश्च माहात्म्यं वक्ष्यामि ते च तच्छृणु ॥६६॥
धनं यशांसि प्रचुरं च वित्तं,
सुतं सुजायां निगदप्रतीकं।
विद्यां तथायुः प्रलभेद्धि मर्त्यो,
अध्यायमेतच्च शृणोति यस्मात् ॥७०॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे कामाख्यामाहात्म्यं नाम त्रयस्त्रिंशोऽध्यायः ॥३३॥

—❀❀❀—

स्कन्द उवाच।
प्रचकार पुरा धाता सर्वधातुमयं गिरिं।
एकयोजनविस्तारं तस्य कूटे हरोत्तमन् ॥१॥
जाम्बूनदमयं कूटं सर्वरत्नोपशोभितम्।
सर्वधातुसमायुक्तं गुहाकन्दरशोभितम् ॥२॥
नानाद्रुमलताकीर्णं सर्वपुष्पैर्विराजितं।
हिरण्यराजतैः पुष्पैर्भ्रमरमयूरभृङ्गकैः ॥३॥
दिव्यरम्यं महाशैलं सर्वलोकमनोहरं।
निर्झरैश्च जलोद्भूतैर्द्वितीयो हिमवानिव ॥४॥
तत्रैव भगवान्विष्णुः कोलरूपं दधार सः।
धरण्युद्धारणार्थाय तस्माद्वराहपर्वतः ॥५॥
कौशिकी सह संभूय ववाह तदधोऽनिशं।
उमायाः स्वेदसंभूता सर्वैनसःप्रणाशिनी ॥६॥
कोका नाम महाशैलस्तत्कन्दरसमुद्भवा।
तस्मात्कोकेति विख्याता पुण्यतरा नदी वरा ॥७॥
तयोः सुसंगमे तीर्थे वराहतीर्थमुत्तमं।
ईप्सितदं च सर्वेषामिति विद्धि घटोद्भव ॥८॥
तत्र करोति यः स्नानं भक्त्या च विधिवद्यथा।
विमुक्तः सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥६॥
श्राद्धं करोति तत्तीरे पितृलोकाभिवांछिते।
मोदयन्सपितॄन्सर्वान्पितृलोकं प्रगच्छति ॥१०॥
तत्रैव यत्कृतं कर्म्म तत्सर्वमक्षयं भवेत्।
शुभाशुभं घटोद्भूत एतत्सर्वं न संशयः ॥११॥
त्रियोजनं समाख्यातं वराहक्षेत्रमुत्तमं।
चतुर्दिक्षु गिरेस्तस्य जानीयात्क्षेत्रमोक्षदम् ॥१२॥
एतन्मध्ये च यावन्त्यो जलधाराः समुद्भवाः।
ताः सर्वा वरतीर्थाः स्युस्तासु स्नात्वा दिवं व्रजेत् ॥१३॥
नरः स्नात्वा च कौशिक्यां समारोहति तं गिरिं।
अश्वमेधफलं साग्रं प्रलभेद्धि पदे पदे ॥१४॥
वराहपर्वते कूटः ब्रह्महृदः सुनिर्म्मितः।
ब्रह्मणा च पुरा सम्यक्सर्वतीर्थोत्तमोत्तमः ॥१५॥
तस्मिन्तीर्थे महापुण्ये पवित्रे विधिनिर्मिते।
मर्त्यः करोति यः स्नानं ब्रह्मत्वमाप्नुयाद्ध्रुवम् ॥१६॥
तत्र स्नात्वा समर्च्चन्ति वराहं विष्णुमव्ययं।
भक्तियुक्ताश्च ये मर्त्यास्तेषां पुण्यफलं शृणु ॥१७॥
मोहकंचुकनिर्मुक्ता ज्ञानकंचुकसंवृताः।
समुद्धृत्य पितॄन्मातॄन्दशपूर्वान्दशापरान् ॥१८॥
सूर्य्यायुतप्रतीकाशैर्विमानैर्देवसेवितैः।
विष्णुकन्याकरोद्धूतैश्चामरैश्च प्रधूयकैः ॥१६॥
गीतवाद्यमहोल्लासैरप्सरोगणसेवितैः।

संगीतनटनैर्दिव्यैः किंकिणीजालमंडितैः ॥२०॥
शंखचक्रगदापद्मान्सम्यक् धृत्वा चतुर्भुजैः ।
विष्णुलोकं प्रगच्छन्ति विष्णुलाञ्छनलाञ्छिताः ॥२१॥
पुण्यात्मानो हि तद्यानैर्गच्छन्ति विष्णुलोककं ।
सप्तद्वीपान्परिभ्रम्य संदर्श्य विविधं पुरम् ॥२२॥
भुवनानि च सप्तानि ते चालोक्य हि सर्वशः ।
सदेहाश्च मुदायुक्ताः प्राप्यन्ते परमं पदम् ॥२३॥
विमुक्ता बहवो म्लेच्छा ज्ञानधर्मविवर्जिताः ।
तत्र दर्शनमात्रेण वराहं विष्णुविग्रहम् ॥२४॥
तस्माच्चोत्तरशृङ्गे च वराहरूपविष्णुना ।
लिंगमाराधितः पूर्वं स्वयंभुवं च भक्तितः ॥२५॥
वाराहेशस्ततः ख्यातो धरण्युद्धरणाय च ।
ततो वरं हरिर्लब्ध्वा दधार धरणीं पुरा ॥२६॥
तस्य दर्शनमात्रेण बहुपापैर्युतोऽपि वा ।
विधूय सर्वपापानि रुद्रलोकं समगच्छति ॥२७॥
यः प्रपूजति तं लिंगं तन्मंत्रैर्भक्तिपूर्वकं ।
न पुनर्जायते भूमौ परं शिवं स गच्छति ॥२८॥
अगस्त्य उवाच ।
केन प्रकाशितं देवं वराहं विष्णुरूपिणं ।
को मुक्तश्च महासेन वद मे भक्तवत्सल ॥२९॥
स्कन्द उवाच ।
आसीद्ब्रह्मपुरी नाम नगरी लोकविश्रुता ।
गंगायमुनयोर्मध्ये बहुविप्रैश्च सेविता ॥३०॥
तस्यां कश्चिद्द्विजश्चासीद्विष्णुशर्मेति विश्रुतः ।
ब्रह्मकर्मसमायुक्तः सर्वविद्याविशारदः ॥३१॥
कश्चित्काले विरक्तोऽभूद्गृहस्थोऽपि महामतिः ।
निरगच्छद्गृहाद्विप्रः परित्यज्य प्रियाप्रियम् ॥३२॥
परिभ्रम्य च तीर्थानि मेदिन्यां यानि सर्वशः ।
काश्यां श्रुतः स विप्रेभ्यः कौशिक्याश्च प्रशंसनम् ॥३३॥
श्रुत्वा तस्या हि माहात्म्यमतिहर्षितवान्द्विजः ।
स्नातुं मनो दधे धीरो ह्यगमत्कौशिकीतटम् ॥३४॥
ततोऽगमत्स कौशिक्यां सन्तीर्य्य सुरनिम्नगां ।
तस्यां सस्नौ मुदा पूर्वं विष्णुभक्तिश्च मंत्रवित् ॥३५॥
ततस्तं ददृशुर्म्लेच्छाः स्नात्वा जप्तं हि निर्ज्जने ।
मांसाशिनो गृहीत्वा च तत्र हन्तुं समुद्यताः ॥३६॥
भिल्लुर्नाम महाव्याघ्रः सर्वान्म्लेच्छान्न्यपेधयत् ।
हन्तुं समुद्यतान्दृष्ट्वा स्नातकं द्विजसत्तमम् ॥३७॥
भिल्लुरुवाच ।
रे रे म्लेच्छाः शृणुध्वं मे वचनं हितभाषितं ।
न हन्तव्यश्च युष्माभिः स्नातकोऽयं महामतिः ॥३८॥
विरक्तो हि भ्रमंश्चैको रूपवान्निर्धनस्तथा ।
हत्वा किं प्राप्यतेऽस्माभिर्वहं चेज्जीर्णसत्रणम् ॥३९॥
एतस्मै वरविप्राय पुत्रीं दास्यामि चाद्य च ।
ततो मम गृहे म्लेच्छा दासत्वेन प्रतिष्ठतु ॥४०॥
स्कन्द उवाच ।
ततो निषेध्य सर्वांस्तान्भिल्लुर्म्लेच्छांस्तदा मुने ।
समानयद्गृहं तं च वाचा मधुरयन् मुहुः ॥४१॥
ततो भिल्लुवरो म्लेच्छो ददौ तस्मै द्विजन्मने ।
पुत्रीं सुवदनीं नाम्नीं विवाहविधिना मुने ॥४२॥
द्विजोऽपि निःप्रयत्नोऽभूद्वृकाणां च मृगो यथा ।
कश्चित्कालान्तरे विप्र पुत्रवाँश्चाभवन्मुने ॥४३॥
संगदोषात्तदा सोऽपि सर्वाहारी द्विजोऽभवत् ।
मृगया वृत्तिभिः कश्चित्कालं निनाय हायनान् ॥४४॥
कार्तिके मासि विप्रेश पूर्णिमायां निशान्तरे ।
मृगयाश्रमसंश्रान्तो सुष्वाप सुसुखं द्विजः ॥४५॥
तदा ब्राह्मे मुहूर्त्ते च नानानादं शृणोति सः ।
मृदङ्गतालवाद्यानामुद्भवं गीतसुस्वरम् ॥४६॥
ततोऽपृच्छत्प्रियां विप्रः श्रुत्वा नादं तदद्भुतं ।
श्रवणैश्च सुखं पेयं बहुवाद्योद्भवं शिवम् ॥४७॥
विष्णुशर्मोवाच ।
प्रिये सुवदने चाद्य किमद्भुतं भवेन्निशि ।
बहुवाद्योद्भवं नादं गीतं च सुखदोद्भवम् ॥४८॥
भेरीणां च मृदंगानां जलजानां च निःस्वनम् ।
नर्त्तकनूपुराणां च संमिश्रितं रवं प्रिये ॥४९॥
अत्यद्भुतं महानादं बहुकोलाहलं महत् ।
एतच्छैलोपरि प्राच्यां प्रिये वद हि तच्च यत् ॥५०॥
सुवदन्युवाच ।
द्वादश्यां प्रतिमासं च कोलाहलं महाद्भुतं ।
प्रिय भवेत्सदा नादमेतद्ब्राह्मे मुहूर्त्तके ॥५१॥
नृत्यंति चाप्सरः सर्वा गीतवाद्यैश्च तैस्तथा ।
वराहाग्रे मुदा भर्त्तश्चावर्षत्पुष्पसन्ततिः ॥५२॥
तत्रापि च न गन्तव्यं गिरिशृङ्गे भयंकरे ।
द्रष्टुं तं कश्च सामर्थ्यो गंता चेद्धि विलीयते ॥५३॥
यो यो गच्छति शृङ्गेऽद्रेः स सोऽपि न निवर्त्तते ।
एवं प्रिय विलीयन्ते बहुम्लेच्छाः स्म तत्र च ॥५४॥
तदादिश्च प्रभो कोऽपि गच्छतिस्म कदापि न ।
त्वयाऽपि च न गन्तव्यं यदि जीवितुमुत्सहे ॥५५॥
स्कन्द उवाच ।
समाकर्ण्य ततो विप्रो भार्य्याया वचनं तदा ।
द्रष्टुमियेष शैलेन्द्रे वराहं विष्णुमव्ययम् ॥५६॥

प्रातःकाले समुत्थाय गच्छतिस्म सकौशिकीं ।
तस्यां च विधिवत्स्नात्वा सन्तर्प्यर्षीन्सुरान्पितॄन् ॥५७
ततः समारुहद्विप्रो वराहाद्रिं मुदायुतः ।
ॐ नमस्ते वराहाय इति मंत्रं पठन्पदे ॥५८॥
ददर्श तत्र देवेशं वराहं ब्रह्म चाव्ययं ।
सर्वदेवावतारैश्च वराहैः संवृतं मुने ॥५९॥
तत्र ह्रदं ददर्शादौ सर्वतीर्थोत्तमोत्तमम् ।
तत्र स्नात्वा द्विजः पूर्वं गच्छतिस्म तदालयम् ॥६०॥
वराहरूपिणं देवं विप्रोऽदर्शन्महाद्भुतं ।
नृत्यगीतैः सुरैर्भक्त्या अप्सरोभिः प्रसेवितम् ॥६१॥
अपूपुजत्ततो विप्रो विष्णुं वराहरूपिणं ।
परिक्रम्य पुनर्भक्त्या अष्टाङ्गैश्च ननाम तं ॥६२॥
वराह उवाच ।
वरं वरय हे भक्त भक्त्या ते तोषितं च मां ।
लीयन्तेस्म मयि म्लेच्छा अज्ञानान्मां हि दर्शनात् ॥६३॥
हे वत्स ते वरं दास्ये सर्ववरोत्तमोत्तमम् ।
भवत्विन्द्रो भवानार्य युगानामेकसप्ततिम् ॥६४॥
ततः कालावसाने त्वं मोक्षं च प्राप्नुयात्पुनः ।
मयि लीनाच्च हे भक्त मम देहो न संशयः ॥६५॥
स्कन्द उवाच ।
तस्मिन्काले विमानं च अवततार पुष्करात् ।
विष्णुकन्यासमायुक्तं बहुपारिषदैर्वृतम् ॥६६॥
शंखचक्रगदापद्महस्तैर्बिभ्रच्च कौस्तुभम् ।
विप्रमारोहयत्तत्र विष्णुमिवापरं गणैः ॥६७॥
दिवि दुन्दुभयो नेदुः पुष्पवृष्टिर्ववर्ष च ।
साध्विति वादिनः सिद्धा गन्धर्वपतयो जगुः ॥६८॥
ततोऽनयन्गणा विष्णोर्विष्णुलोकं सनातनं ।
कालादिन्द्रोऽभवद्विप्र एकयुक्सप्ततीयुगम् ॥६९॥
पत्नी च तस्याऽभिचुकोप तस्मै,
अमेध्यहस्ताशु तत प्रविष्टा ।
दृष्ट्वा च देवं च वराहरूपं
स्नातुं च नद्या अगमच्च तीरे ॥७०॥
इति श्रीस्कन्दपुराणे हिमवत्खण्डे वराहक्षेत्रवराह-
माहात्म्यं नाम चतुस्त्रिंशो ऽध्यायः ॥३४॥

—❀❀❀—

३५

अगस्त्य उवाच ।
किमकुर्वंस्तदा स्कन्द विष्णुं विना दिवौकसः ।
सुरलोके हरौ तत्र कोलरूपं समाश्रिते ॥१॥
कथमाराधितो देवैः कोलरूपी हरिस्तदा ।
एतच्छ्रोतुमनाः सोऽहं त्वयि सर्वविदे विभो ॥२॥

स्कन्द उवाच ।
हिरण्याक्षे हते दैत्ये विष्णुना कोलरूपिणा ।
साधुसाध्विति कृत्वाऽशु तत्राययुः सुरर्षयः ॥३॥
ब्रह्मेश्वरौ हरिः शक्रो दिक्पालसोमभास्कराः ।
परित्यज्य स्वकांल्लोकान्विष्णुशैलं समाययुः ॥४॥
प्रणेमुस्त्रिदशा विष्णुं कोलरूपं मुहुर्मुहुः ।
वक्त्रैर्वेदान्पठन् ब्रह्मा दण्डवत्पातयं तनुम् ॥५॥
भगवते वराहाय एतन्मंत्रं धिया पठन् ।
तत्पूर्वं नमश्चान्ते नेमुर्देवर्षयो मुहुः ॥६॥
सेविरे त्रिदशा भक्त्या कोलावतारकं मुदा ।
तत्षोडशोपचारैश्च ब्रह्मादयो घटोद्भव ॥७॥
गन्धर्वाप्सरसो नृत्यैर्भेरीमृदङ्गतालकैः ।
ऋषयः स्वस्तिवाक्यैस्तं स्ववृत्तिभिः प्रसेविरे ॥८॥
ववर्ष पुष्पवृष्टिश्च नेदुर्दुंदुभयो मुहुः ।
लाजासारं तथा व्योम्नो दिव्यधूपैः प्रधूपयन् ॥९॥
ददृशुरमरा विष्णुं कोलरूपान्महत्तरान् ।
तन्महीध्ररसव्याप्तान्कोटिमर्व्बुदसंख्यकान् ॥१०॥
शंखचक्रायुधान्दिव्यान्गंधमाल्यैस्तदर्चितान् ।
यज्ञरूपांस्तदा देवाः प्रेक्ष्य तान्मुमुहुर्भृशम् ॥११॥
प्रेक्ष्यैवं विश्वरूपान्ते चेतः संस्मृत्य तत्पदाः ।
क्षणाप्तचेतसोऽगस्त्य तुष्टुवुः कोलरूपिणे ॥१२॥
देवा ऊचुः ।
ॐ नीलमेघाभदेवाय वराहाय नमो नमः ।
तडिद्विलेखकांगाय नतास्मस्तेनिशं हरे ॥१३॥
सितोग्रदंष्ट्ररूपाय चक्राङ्कांकितशोभिने ।
सूर्याभघुर्घ्वराहाय प्रणताःस्मो हि सन्ततं ॥१४॥
वेदाङ्गपादयूपाय दर्भरोमांकदेहिने ।
अग्निजिह्वाय देवाय नताः स्म चरणं तव ॥१५॥
तुण्डश्रुवाज्यनासाय सोमघोषाय ते नमः ।
मंत्रसंध्यांचिताङ्गाय यज्ञरूपाय वै नमः ॥१६॥
त्रैलोक्योद्धारणार्थाय एतद्रूपं विधारिणे ।
पवित्रांगावताराय नताःस्म परमाय च ॥१७॥
देहाय देहिने देहाश्रितसत्वाय शंभवे ।
चैतन्याय विवेकाय जगतां साक्षिणे नमः ॥१८॥
कोषस्थाय च कोषाय वर्णरूपाय वै नमः ।
अनाहताय नादाय सर्वदानाय ते नमः ॥१९॥
मनोधीचित्तकोषांशोऽज्जृंभकेन्द्रियवर्ष्मिणे ।
यच्चैतन्यद्दढा विद्या निवर्त्यानन्दकारिणे ॥२०॥
ब्रह्मानन्दाय पूर्णाय सदानन्दाय वै नमः ।
कैवल्यानन्दरूपाय चिदानन्दाय ते नमः ॥२१॥

१५१५४

यस्य दर्शनमात्रेण कैवल्यं प्राप्नुयान्नृपः ।
नित्यानन्दं प्राप्नुवन्ति तस्मै देवाय ते नमः ॥२२॥
स्कन्द उवाच ।
एवं स्तुत्वा सुरास्तस्मै प्रणेमुर्दण्डवन्मुहुः ।
ब्रह्मा विज्ञापयामास वृत्तान्तं सुरसङ्घतः ॥२३॥
ब्रह्मोवाच ।
भगवंस्त्वां विना शश्वत् क्लिष्टामहे त्रिविष्टपे ।
विविधोऽपद्रवैर्देव अनड्वाहंविनेव गाः ॥२४॥
पातुमर्हसि तातेश ऊर्ध्वलोकेऽद्यतो हि नः ।
नैव त्याज्यं च नो लोकमभित्रजन् पुनीहि तत् ॥२५॥
स्कन्द उवाच ।
निशम्य वचनं विष्णुः सुरवक्त्रेरितं स्तवम् ।
देवास्त्वं खलु तुष्टात्मा पचदेहमदर्शयत् ॥२६॥
प्रत्यादिष्टामरान्विष्णुर्वराहरूपधृङ्मुने ।
तत्स्तुतिर्भक्तिहर्षात्मा शंखचक्रोद्यतो विभुः ॥२७॥
वराह उवाच ।
नाहं व्रजेऽमरा नाकं त्यक्त्वैतन्मत्प्रियं गिरिम् ।
नो लोकाधिकृतस्थानं सत्यं सत्यं वदाम्यहम् ॥२८॥
ब्रह्मन् प्राक्त्वत्कृते शैले धरण्युद्धारणाय च ।
पश्यतैतत्तनुं यूयं धरणीधरनामकं ॥२९॥
पूर्वमवततारांहमादिवराहमीरितम् ।
रुद्राराधनसंभूतमिमं देहं प्रपश्यत ॥३०॥
शुक्लोयं धर्मरूपोऽहं लोकसंस्थापनाय च ।
पश्यतावतारमिमं लक्ष्मीं शक्तिसिमां पुरः ॥३१॥
कोपाद्विनिःसृतः शैलात्कोषो नाम ममामराः ।
हिरण्याक्षार्दकं ब्रह्मन्प्रपश्यैतत्कलेवरं ॥३२॥
येन पूर्ववरं दत्तं मत्स्वान्तवाञ्छितं परम् ।
पंचमं पश्यताद्यं मदाराधितं च शंकरं ॥३३॥
वाराहीसंश्रितं स्थानं मच्छैलकिंशुकैः शिवम् ।
ममापि वन्दनं चास्तु तस्मै प्रणमतामराः ॥३४॥
गौरीस्वेदोद्भवां पुण्यां महादुष्कृतनाशिनीम् ।
संभूय सप्तभिर्व्राहामादिगंगां प्रपश्यत ॥३५॥
यस्या दर्शनमात्रेण भूरिपापैः प्रमुच्यते ।
यदंभःस्पर्शनात्कश्चिदाजन्मार्जितकिल्विषैः ॥३६॥
स्नानात्परत्रजैनोभिर्विमुक्तो मानवोऽमराः ।
शताश्वमेधजं प्राप्य मम लोकं गमिष्यति ॥३७॥
संगमेस्याश्च मत्तीर्थं कोपोदकादिगंगयोः ।
भविष्यति न सन्देह अद्यतः शक्रकारणात् ॥३८॥
आदिगंगासमं तीर्थं नास्ति ब्रह्मन्रसातले ।
सप्तधारायुता गंगा कौशिक्य इति संशिताः ॥३९॥
स्नायते यत्र कुत्रापि आदिगंगोदके शिवे ।
वाजपेयाश्वमेधानां फलं विन्दन्ति मानवाः ॥४०॥
त्रिवारं स्नायते भाग्यान्मत्तीर्थे भुक्तिभाग्यदि ।
मां पश्यत्याशु जन्मानि विहाय मत्प्रतीकधृक् ॥४१॥
मत्तीर्थे मद्गिरिं स्नात्वा आरोहणं करिष्यति ।
पदे पदेऽश्वमेधानां फलं लप्स्यति मानवः ॥४२॥
कार्त्तिकीपूर्णिमायां यो मकरस्थे च संक्रमे ।
तत्पूर्णेन्दौ च मत्तीर्थे स्नातकस्य फलं शृणु ॥४३॥
वाजपेयाश्वमेधानां फलं लप्स्यति मानवः ।
इहलोके सुखं भुक्त्वा गमिष्यति ततः परम् ॥४४॥
कल्पकोटिसुखी स्वर्गे ततो राजा भविष्यति ।
हव्यकव्यार्च्चनासक्तः सर्वपापैर्विवर्जितः ॥४५॥
करिष्यति यदि श्राद्धं मत्तीर्थे चाक्षयं भवेत् ।
कुलकोटिं समुद्धृत्य तुष्टा याति परां गतिम् ॥४६॥
आप्लाव्य योहि कौशिक्यां गौरीशैलं प्रपश्यति ।
इह लोकार्जितैः पापैः समुक्तो नात्र संशयः ॥४७॥
प्रणमति ततः स्नात्वा गौरीशैलं शिवां च माम् ।
शताश्वमेधजं प्राप्य सुखी याति परां गतिम् ॥४८॥
स्नाता पश्यति मां यो हि इहामुत्रजकिल्विषैः ।
विमुक्तो भुक्तिभाक्सद्यो मम लोकं गमिष्यति ॥४९॥
यो मामर्हति पूजाभिरपि भक्तिविवर्जितः ।
मच्छैलांल्लंघयित्वा तमुद्धरिष्ये सविग्रहं ॥५०॥
स्नायते ब्रह्मकुण्डे यस्तव लोकं गमिष्यति ।
सर्वयोन्युद्भवैः पापैर्विमुक्तो नात्र सशयः ॥५१॥
हव्यकव्यार्च्चनं सर्वमक्षयं च भविष्यति ।
ब्रह्मन्नेतद्ध्रदे सत्यं कोटिकोटिगुणं फलं ॥५२॥
स्नात्वा यस्त्वत्कृते कुण्डे पश्यत्यजशिवं च माम् ।
मोचयन्गर्भवासं तमुद्धरिष्ये सविग्रहं ॥५३॥
ये ये पश्यन्ति मां लोकाः स्नानज्ञानार्चनैरपि ।
वर्जिताः पामरा विप्रा उद्धरिष्ये जनांश्च तान् ॥५४॥
मद्दर्शनं च लोकानां दुर्लभञ्च भविष्यति ।
कलौ प्राप्ते विधातोऽत्र म्लेच्छानां च विमर्दनात् ॥५५॥
उषित्वा पंचरात्रं ये मत्प्रियेऽद्रौ सकृन्नराः ।
वराह इति वदयन्ते उद्धरिष्ये च तानहं ॥५६॥
ये मां पर्वसु पश्यन्ति उषित्वा सावका इह ।
कौशिक्यां मद्वपुर्भाजो भविष्यन्ति दिवौकसः ॥५७॥
कलौ प्राप्ते भविष्यामि म्लेच्छगणार्दनद्रवः ।
न त्यदयामि तथाप्येतं मत्प्रियमचलं विधे ॥५८॥
स्कन्द उवाच ।
एवमाकर्ण्य धाताऽसौ वराहरूपिणो वचः ।

मुमुदे विश्वसृक्देवा मुनयो देवयोनयः ॥५९॥
विष्णुं प्रत्यर्च्य धाताशु सुरेभ्यश्चाब्रवीदिति ।
अत्रावतरिष्यामि कोलरूपेण निर्ज्जराः ॥६०॥
इत्युक्त्वा द्रुहिणो देवान्कौशिक्यां स्नापयन्मुनीन् ।
अवततार तच्छैले कोलरूपेण कुम्भज ॥६१॥
अवतस्तुं सुरास्तत्र शक्राद्यो मुदान्विताः ।
कोलरूपेण तच्चिह्नैर्विष्णुं प्रसेविरे ततः ॥६२॥
कौशिक्यां मुनयः स्नात्वा रविर्दिक्पतयो विधुः ।
गिरिं क्रमन्नमन् विष्णुं मकरस्थे रवौ ह्रदे ॥६३॥
ददर्श तद्ध्रदे शक्रः स्नात्वा वराहमर्चयन् ।
युवतीं सुन्दरीं गेहं प्रत्यायान्तीं गणावृतां ॥६४॥
मुमोह द्युपतिस्तत्र सुन्दरीं प्रेक्ष्य तां भृशम् ।
इन्द्रं तादृशमालोक्य पप्रच्छ नारदो वचः ॥६५॥

नारद उवाच ।

ते चागतकिं सूत्रामन्मूर्च्छया त्वं समूर्च्छितः ।
तद्वार्त्तां वद नो देव प्रतीकारो भविष्यति ॥६६॥

इन्द्र उवाच ।

कासौ वरांगना देवी मत्स्वान्तं हृत्य गच्छति ।
विमानेनाम्बरेणाशु स्नात्वा हरिं प्रवन्दिनी ॥६७॥

तद्रूपपीयूष-सुशीतलेष्ट-
प्रोन्मत्तनेत्र-भ्रमराकुलाङ्गः ।
तद्देहसंस्पर्शसमुत्सुकात्मः
प्रोन्मत्त-कर्म्मेन्द्रियचित्तवर्गः ।

नारद उवाच ।

हिमवदात्मजः कोकस्तस्य पुत्रीं विदुर्हि तां ॥६८॥
कोकानाम्नीं वरारोहां स्वर्णकूटप्रियांवृषा ।
सा गच्छति पितुर्गेहं पितरौ नमितुं मुदा ॥६९॥
प्रियालयं विहायाद्य परिवारैः समायुता ।

स्कन्द उवाच ।

निशम्य वचनं शक्रो मुनिवक्रेरितं द्रुतं ॥७०॥
यत्रैकान्ते ययौ कोका तत्या समागमोत्सुकः ।
कतिचिदन्वगच्छत्तत व्याचष्ट निर्ज्जने पथि ॥७१॥
कोके सुन्दरि देवीति निवर्त्तय क्षणं गतिम् ।
इत्याकर्ण्य वचः कोका निवर्त्य तं वरेक्षणं ॥७२॥
यावल्लक्ष्यं समायातं कोसौ कोसाविति ब्रुवन् ।
तावद्ययौ मुने जिष्णुस्तस्यांतिकं च सांत्वं ॥७३॥
सखीपरिजनं सर्वं तन्मायया विमोहयन् ।
तर्प्यतां सौरतं सौख्यं मम-चित्त-सुखप्रिये ॥७४॥
ब्रुवन्नेवं वृषा तस्यै आश्रितुमुत्सुकोऽभवत् ।

साऽपि मुग्धवती तत्र कामार्ताऽभो मुखी ह्रिया ॥७५॥
प्रेक्ष्य शक्रमियेषाशु सुरतिमब्रवीत्तदा ।

कोकोवाच ।

स्वागतं ते प्रियाद्यात्र पप्रच्छ सुरतिं च मे ॥७६॥
त्वद्वाणाशुगविद्धोन्मथनोन्मत्तजडांगिनी ।
शून्याश्रमं रहश्चासीत्पश्यतां मन्मनोहर ॥७७॥
अत्रैव काम्यते कामं भवता सह सांत्वनम् ।

शक्र उवाच ।

कनिखंगाश्रमं चैवननात्र क्रीडयावहे ॥७८॥
शपिष्यति रुषाविष्टो नः कामं तत्र च प्रिये ।
तत्र कंकगुहायां च गच्छ देव्यग्रतः खलु ॥७९॥
तस्यां रहसि तत्कामं आवां संक्रीडयावहे ।

कोकोवाच ।

अतिज्यायान्मुनिश्चासौ सर्वेन्द्रियैर्विवर्जितः ॥८०॥
किंकरिष्यति नः क्रुद्धो दुर्बलो हीनलोचनः ।
अत्रैव कामये कामं प्राणहर यथासुखं ॥८१॥
गमिष्यामि नचान्यत्र अस्मादुपवनाद्बहिः ।

स्कन्द उवाच ।

कामार्त्ता शक्रमित्युक्त्वा संगृह्य तत्करं ध्रुवं ॥८२॥
अविशत्पुष्पशय्यायामृष्याश्रमान्तिके कुशे ।
कुशकार्य्यं समुत्सृज्य उदतिष्ठन्मुनिद्रुतं ॥८३॥
आकर्ण्य तद्वचस्तत्र स्नानादेव कृतोद्भवम् ।
शप्तुं च सहसा कोकां रुषाविष्टो मुनिर्मुने ॥८४॥
इत्याचष्ट वचोऽरण्ये प्रदर्शयन्त्स्वविग्रहम् ।

ऋषिरुवाच ।

अवजानासि मां यस्मादसति भर्तृवंचके ॥८५॥
व्यभिचारापरावेऽत्र स्वकृतं भुंक्ष्व चायतः ।
परप्रियेण सार्द्धं या क्रीडति खलु लालसैः ॥८६॥
पतिष्यत्याशु सा कष्टे गुरुविप्र विलंघनात् ।
संध्योपासनपूतन्तदनादृत्य जलाशयम् ॥८७॥
त्वंचासति ततश्चात्र तरंगिणी भवान्निशम् ।

स्कन्द उवाच ।

शापोद्यतं मुनिं प्रेक्ष्य प्रणनाम मुहुर्वृषा ॥८८॥
कोकां त्यज्याशु दुद्राव स्थानान्तरं च वेपथुः ।
कोका शीर्णाभवत्तत्र सतोयलवणो यथा ॥८९॥
भूत्वा तरंगिणी शापात्स्वच्छाम्बुः प्रववाह सा ।
नदीभूतां मुनिः कोकांप्रेक्ष्य दयापरो ऽभवत् ॥९०॥
पवित्री भव कल्याणीत्याशिषं स ददौ पुनः ।
देवर्षयो मुदा सस्नुः कोका तोयेषु सन्ततं ॥९१॥
ततः पूरा भवन्नित्यं कौशिकी संगमात्पुन ।

शृण्वन्ति धीराः सततं महात्म्यं,
वराहरूपस्य गिरेश्च नद्योः ।
सत्संभवं तत्र फलं च गत्वा,
लभन्ति कुत्रापि समाश्रयन्ते ॥६२॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे वराहमाहात्म्यं नाम पञ्चत्रिंशोऽध्यायः ॥३५॥

—❀—

३६

अगस्त्य उवाच

चित्रं मे जायते स्वान्ते इदानीं च षडानन ।
प्रसादात्ते समाकर्ण्य कौशिक्याश्च समुद्भवम् ॥१॥
देव्याः स्वेदाच्च संभूताः कौशिक्यः सप्त तत्कथं ।
श्रोतुमिच्छाम्यहं भूयो वद मे शंकरात्मज ॥२॥

स्कन्द उवाच ।

श्रुतां च यन्मया पूर्वमुमेश्वरमुखाच्चवार्त्तां ।
देव्या यच्चरितांवार्त्तां कौशिक्याश्च समुद्भवम् ॥३॥
तत्सर्वं च वदिष्यामि शृणु मुने यथाऽभवत् ।
पुरा वार्त्ता उमा देव्याः सर्व्वलोकपवित्रता ॥४॥
दक्षक्रुद्धा पुरा देवी सन्त्यज्य च कलेवरं ।
ससर्ज्ज पुनरात्मानं मेनायां सा घटोद्भव ॥५॥
ततो हिमालयः शैलो मुमोदाशु सविग्रहः ।
अभिप्रेक्ष्यात्मजां दिव्यां सर्वोन्नतसुसुन्दरीम् ॥६॥
विमुच्य स्वगलाद्धारं नानारत्नेषु निर्म्मिलं ।
स मेनायै प्रसूतायै ददौ तस्यै ध्रुवं मुदा ॥७॥
ततश्चाहूया सप्तर्षीनाज्ञापयत्तदा गिरिः ।
सँस्कारयन्त भो आर्य्या पुत्रीं मे कुलभूषणाम् ॥८॥
मम मातामहोऽगस्त्य हर्षैः पूरितमानसः ।
ददौ दायानि विप्रेभ्यो वासोरत्नानि हाटकम् ॥९॥
कोटिसंख्या गवां वित्तं विभूषणं विभूषयत् ।
कपिलानां हि विप्रेभ्यो ददौ वत्सतरीयुता ॥१०॥
ततः सप्तर्षयोऽगस्त्य संस्कृत्य तां च बालिकां ।
प्रचक्रुरभिधानं ते बालिकायाः यथोचितम् ॥११॥
पर्वतस्य हिमाद्रेर्य्या प्रियापत्या सुलक्षणा ।
सा पार्वतीति भूयाद्वै त्रिषु लोकेषु विश्रुता ॥१२॥
इतिनामाभिधानं च कृत्वाशु ऋषयस्ततः ।
गतास्ते बद्रिकाहार्य्यं विष्णोः स्थानं मुदान्विताः ॥१३॥
प्रत्यहं प्रत्यहं धीमन्वर्द्धमाना च पार्वती ।
पंचवर्षाऽभवत्सार्य्या त्रैलोक्याधिकसुन्दरी ॥१४॥
रेमे सा कौतुकैर्नित्यं वालुकाभिश्चकन्दुकैः ।
विद्यानां पारगा देवी मनीषी भक्तिमान्गुरौ ॥१५॥
कश्चित्काले ततो गौरी पित्रोश्च सम्मतोद्यमा ।
सेवयंश्च महादेवं तपःस्थं तत्र संस्थिता ॥१६॥
तपस्थितेन रुद्रेण दग्धं पुष्पायुधं ततः ।
स्वयं ददर्श गौरी सा आक्रोशयत्सुरांस्तदा ॥१७॥
शर्वो मुंजाचलं त्यक्त्वा ययौ कैलाशमीश्वरः ।
ततो भवन्निराशार्थ्या हरं प्रति तदा मुने ॥१८॥
तत उमा तपः कर्त्तुं मनोदधे महामनाः ।
समाधायेति वै स्वान्ते न चान्यथाशिवं लभेत् ॥१९॥
कदाचिद्दिवसे गौरी अपृच्छन्मातरं परं ।
धर्मं च स्वेच्छयाकर्त्तुमुपवासं सुदुश्चरम् ॥२०॥

पार्वत्युवाच ।

मातरिच्छाम्यहं कर्त्तुं निरशनं व्रतं परं ।
आज्ञापयाशु तन्मह्यं यतस्तेषां फलं लभेत् ॥२१॥
ईश्वरस्य पुरा दृष्टं कठोरं सुतपो मया ।
ममापि विद्यते कामः सर्वकामदुवाघृतम् ॥२२॥
तपसा लभ्यते ह्यर्थं सुराज्यं तपसा परम् ।
भुक्तिमुक्तिसमैश्वर्य्यं गरीयश्च ततस्तपः ॥२३॥

स्कन्द उवाच ।

श्रुत्वा मेना सुतायास्तद्वचनं चाप्रियं तदा ।
पंचवर्षवयो यस्या लेभे चित्रं भयोद्वहम् ॥२४॥
सान्त्वयामास भूयस्तां मधुरयन्मधुश्रुवैः ।
माधुर्यवाक्यवाचोभिः पुत्रीं मधुरभाषणीम् ॥२५॥
उवाच वचनं मेना परिरभ्याशुवत्सला ।
आश्चर्य्यगद्गदोक्तेन पुत्रीं स्नेहवती च सा ॥२६॥

मेनोवाच ।

धर्मे तिष्ठतु मा पुत्री पंचवर्षं वयस्तव ।
सुकोमलश्च देहोऽयं क्षुत्पिपासाः कथं सहेत् ॥२७॥
पाञ्चभौतिकदेहानामसह्यं दुस्तरं तपः ।
उपवासं व्रतं गाढं तन्मे वद कथं सहेत् ॥२८॥
ईश्वरेण कृतं यत्तत्तपो वा धर्मसंस्थितिं ।
तस्यैव सहते देहो दुःखं यस्मादयोनिजः ॥२९॥

उमोवाच ।

मातरेवं न वक्तव्यं कटुकं वचनं हि मे ।
ये प्रस्थिताः सुधर्मेषु नापेक्षन्ते कलेवरम् ॥३०॥
पांचभौतिकदेहानां यातनायैव केवलं ।
विषयासक्तनिष्ठानां शिवस्थानां शुभाय च ॥३१॥
व्रतधर्मनिषेधानां विहायेषु तथैवच ।
तेषु पराङ्मुखानां हि नरकं प्रोक्तमक्षय्यम् ॥३२॥
तपोधर्मेषु निष्ठानां विग्रहमचलं भवेत् ।
यं सेव्यते तपोभिर्वैकर्त्तुर्व्वश्यो भवेत्परम् ॥३३॥

मत्स्वान्ते विद्यते मातः सेवितुं हरपादुकां ।
मृत्युंजयोपि मह्यं हि मद्वाञ्छां दास्यति ध्रुवम् ॥३४॥

स्कन्द उवाच ।

इत्युक्त्वा प्रययौ देवी व्रतं कर्तुं च सत्वरं ।
प्राग्भागे नीलकण्ठस्य शृंगे महति शीतले ॥३५॥
जया च विजया चैव धर्मशीला तथापरा ।
ताभिः समं च शर्व्वाणि सख्नौतीर्थे शिवात्मना ॥३६॥
ततः कूटं समारुह्य सर्वोन्नते समुच्छ्रिते ।
अगम्ये सर्वसत्वानां दैवतैरपि निर्ज्जने ॥३७॥
चकार तां विमुह्यर्ग्यां नानाव्रतं सुदुष्करं ।
उमादेवी हि सर्वात्मा शर्वाराधनतत्परा ॥३८॥
स्थित्वा पूर्व्वाऽग्नेये भागे तुङ्गकूटे चकार सा ।
सुकठोरं तपो गौरी तस्माद्गौर्य्यचलः श्रुतः ॥३९॥
एकाशनं तथा नक्तं कुर्वती धर्मचकार सा ।
पर्वणि फलमूलानि खादत्योकसमां पुनः ॥४०॥
चान्द्रायणं कठोरं च पक्वान्नान्यभक्षयत् ।
दूर्वाशनं जलाहारंत्वब्दं चकार सा यथा ॥४१॥
ततः कृच्छ्रातिकृच्छ्राणि सा कुर्वत्यनिलाशनं ।
प्रचकार चतुर्थाब्दं पंचवर्षं ततः परम् ॥४२॥
धूम्रपानं ततो गौरी शर्वात्मातच्चकार सा ।
अधोमुखी तदा भूत्वा वृक्षेऽवलंब्यपादुके ॥४३॥
लक्षवर्षाणि यत्कृत्यं सुकठोरं तपोऽमरैः ।
तद्भवान्या कृतं सम्यक् पञ्चवर्षेण कुम्भज ॥४४॥
विमोहयंश्च लोकान्वै पितरं मातरं शिवा ।
पंचाब्दमपि तद्भूत्याः पंचाहमिव मेनिरे ॥४५॥
एवं कृत्वा तपस्तीव्रं यावद्दशाब्दमंबिका ।
समाप्यतद्व्रतंगौरीविप्रेभ्योदक्षिणां ददौ ॥४६॥
दत्वादायमृषिभ्यःसाताभिःसमंमुदाशिवा ।
ततोगमत्पुनर्गेहंववंदुःपितरं गुरु ॥४७॥
ददतुराशिर्षतस्मैपितरौह्यचलन्तदा ॥४८॥

नानाव्रतं तत्र चकार भूयः,
सा सर्वमासं सततं हि गौरी ।
वक्ष्याम्यहं ते शृणुदान्त तद्वै,
नूनं विधानं विविधं यथा त्वम् ॥४९॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे उमातपसिद्धिर्नाम षट्त्रिंशोऽध्यायः ॥३६॥

—❀❀❀—

36

स्कन्द उवाच ।

आषाढे मासि संप्राप्ते लिंगसंस्थाप्य पार्थिवम् ।
उमादेव्युग्रनामानमानर्च्च विविधार्हणैः ॥१॥
एकभक्तं ततो धीमन् उमादेवी च भोजनं ।
भूरिखंडाज्यसम्मिश्रान्सक्तून्नक्तं चकार च ॥ २ ॥
गोमयं च ततः प्राश्य सर्वयज्ञफलप्रदं ।
अभूज्जितेन्द्रिया नेमी शिवपूजनतत्परा ॥ ३ ॥
पौर्णमास्याममावास्यां चतुर्दश्यष्टमीषु च ।
प्रतिपदि च संक्रांत्यां नवम्यां च विशेषतः ॥ ४ ॥
निराहारा ततो भूत्वा सर्वपर्वसु यत्नतः ।
भक्त्योपहारैर्दिव्यैरपूपुजन्महेश्वरम् ॥५॥
शालिपिष्टमयं गेहं चकार सुन्दरं ततः ।
सर्वबीजरसैर्युक्तं सम्पूर्णसुभलक्षणम् ॥ ६ ॥
गृहोपकरणैर्युक्तं मुसलोलूखलादिभिः ।
सर्वरत्नादिगोऽश्वाऽद्यैर्दासीशय्याऽऽयलंकृतम् ॥७॥
एतैः पिष्टमयैः सर्वैः प्रदीपाद्युपशोभितम् ।
सर्वभक्षसमाकीर्णं गन्धमाल्यैरलंकृतम् ॥ ८ ॥
श्वेतरक्तासितैः पञ्चैर्ध्वजैर्वस्त्रैः सुशोभितं ।
चतुर्विधेन संयुक्तं वलिना सर्षपेण तु ॥ ९ ॥
आषाढे पूर्णमास्यां वै गृहं स्थाप्य शिवाग्रतः ।
सर्वोपकरणोपेतं प्रणिपत्य निवेदितम् ॥१०॥
ततो व्रतावसाने सा विप्रान्भोजयते सुखं ।
ददौ गोमिथुनं भक्त्या शिवमुद्दिश्य दक्षिणाम् ॥११॥
सर्पिषा पूर्णपात्रं च पयसा मधुना तथा ।
ददौ वासांसि विप्रेभ्यो जलपूर्णघटं पुनः ॥१२॥
यज्ञसूत्रं सुवर्णं च करकांश्च फलोत्तमान् ।
ददौ भक्त्या च विप्रेभ्यः शिवमुद्दिश्यशैलजा ॥१३॥
एवं संस्कृत्य सा देवी आषाढे मासि सुव्रतं ।
प्रदक्षिणं विधायाद्यं स्तोत्रं चकार भावतः ॥१४॥
ततश्चश्रावणे सर्वं संस्थाप्य लिंगमैश्वरं ।
अपूपुजन्मुदा युक्ता नानोपहारपूजनैः ॥१५॥
ततोऽभक्षच्च पिण्याकं प्रणिवेद्य हराय च ।
निशासु सुव्रता गौरी सकृत्सकृद्धि भक्तितः ॥१६॥
क्षीरषष्टिकभक्तान्सा भुनक्तिस्म मुदा निशि ।
निवेद्यादौ हरायाशु ब्राह्मणाय तथा पुनः ॥१७॥
भूत्वा ततो निराहारा सर्वपर्वसु यत्नतः ।
उपहाराच्चनैर्भक्त्या मुदा शर्वमपूपुजत् ॥१८॥
(चतुर्विधं सुनैवेद्यं निवेदतिस्म भक्तितः) ।
श्रावणे पूर्णमास्यां च चकार तिलपर्वतम् ।
बहुशृंगसमायुक्तमुमा देवी मुदान्विता ॥१९॥
शैलं तिलमयं विप्र संकीर्णं सर्वधातुभिः ।
बहुकांचनसंयुक्तं पताकाध्वजशोभितं ॥२०॥
एवं कृत्वा च तच्छैलं निवेदयति भक्तितः ।

उमा देवी च शर्वाय गन्धमाल्यार्च्चनैर्युतं ॥२१॥
प्रणिपत्य पुनः शर्वं सा देवी भक्तिपूर्व्वकम् ।
परिक्रम्य ततो भूयस्तुष्टाव हि पुनः पुनः ॥२२॥
अभोजयत्ततो विप्रान्भूरिभोजनकांक्षितान् ।
शिवमुद्दिश्य भक्त्या च दक्षिणाश्च ददौ पुनः ॥२३॥
सुवर्णालंकृता कृष्णां ददौ गोमिथुनं पुनः ।
त्रिंशत्पलं हिरण्यं च दक्षिणां च द्विजन्मने ॥२४॥
वासोयुग्मं ददौ गौरी विप्राय सुसितं नवं ।
यज्ञसूत्रं पुनश्छत्रं भानुवृष्टिनिवारकम् ॥२५॥
ददौ भूयो महादेवी करकांश्च समूलकान् ।
मोदकान्विविधाँश्चैव शिवमुद्दिश्य सर्वशः ॥२६॥
एवं कृत्वा व्रतं देवी श्रावणे मासि कुम्भज ।
विधिपूर्वं समं सख्या व्रतं भूयः प्रचक्रमे ॥२७॥
प्राप्ते भाद्रपदे मासि संस्थाप्य लिङ्गमुत्तमं ।
गन्धोपहारपूजाभिस्त्र्यम्बकाख्यमपूजत् ॥२८॥
निवेद्य त्र्यम्बकायादौ उमादेवी महाव्रता ।
एकभक्तं निशायां हि भुनक्तिस्म निरन्तरम् ॥२९॥
हुतशेषं ततो धीमन् विल्वपत्रं पवित्रकं ।
अभोजयन्निशायां सा वृक्षमूलाश्रिता दिवा ॥३०॥
निराहारा ततो भूय उमाभूदद्रिकन्यका ।
सर्वपर्वसु यत्नेन शुचिः शिवार्च्चने रता ॥३१॥
ततो भाद्रपदे पूर्णे पूर्णिमायां घटोद्भव ।
चकार गिरिजा देवी शालिमयं च पर्वतम् ॥३२॥
शृङ्गवृन्दैः समायुक्तं सर्वधातुविभूषितं ।
सपताकध्वजैर्युक्तं गंधमाल्यैः प्रपूजितम् ॥३३॥
वस्त्रप्रवेष्टितं दिक्षु सितवितानशोभितं ।
एवं निर्म्माय शैलं सा निवेदतिस्म शूलिने ॥३४॥
प्रणिपत्य ततो भूयस्त्र्यम्बकमीश्वरं विभुं ।
पर्य्यक्रामत्तदा भक्त्या तुष्टाव लोकसुन्दरी ॥३५॥
अभोजयत्ततो गौरी शिवभक्तान्द्विजान्मुने ।
अन्नं चतुर्विधं पूर्णं भूरिभोजनभावयन् ॥३६
गोमिथुनानि विप्रेभ्यो दक्षिणाश्च ददौ पुनः ।
शिवमुद्दिश्य भक्त्या च तिलोदककुशैर्मुने ॥३७॥
ददौ वासोयुगान्यार्य्या विप्रेभ्यो हि कराकुलां ।
यज्ञसूत्राणि पूतानि उपानहौ नरोत्तमान् ॥३८॥
कृत्वैवं विधिवद्धर्म्ममुपोष्य सर्वपर्वसु ।
पूजतिस्मेश्वरं देवी ववाञ्छे चान्यमासि तत् ॥३९॥
प्राप्ते चाश्वयुजे मासे लिंगं सस्थाप्य पार्थिवन् ।
अपूपूजन्मुदा गौरी भक्त्या पचोपचारकैः ॥४०॥
ततोऽप्राशद्धृत पूतमकरोन्नक्तभोजनं ।
विनिवेद्येश्वरायार्य्या भक्तिपूर्व्वं स्वयं पुनः ॥४१॥
तण्डुलोदकमादाय पत्रपुटेन चापिवत् ।
मुदा युक्तेश्वरात्मा सा भक्त्या शेषदिनेषु वै ॥४२॥
सर्वपर्वसु पूतेषु पक्षयोरुभयोरपि ।
निराहारा च सा भूत्वा महेश्वरमपूपुजत् ॥४३॥
ततश्चाश्वयुजे मासे पूर्णायां पूर्णिमादिने ।
सुवर्णवस्त्रसयुक्तं चकार धान्यपर्वतम् ॥४४॥
नानारत्नसमाकीर्णं बहुशृङ्गप्रकल्पितम् ।
गन्धमाल्योपरिक्षिप्तं फलमूलैः प्रशोभितम् ॥४५॥
एवं निर्म्माय चादाय गौरी धान्यगिरिं ततः ।
प्रणिपत्येश्वरायाशु निवेदतिस्म पूजनैः ॥४६॥
कृत्वा प्रदक्षिणं रुद्र भक्तिपूर्वं मुहुर्मुहुः ।
तुष्टाव त्रिविधं गौरी नम्रा ननाम नाम च ॥४७॥
शिवभक्तांस्ततो विप्रान्भोजयतिस्म शैलजा ।
अन्नं चतुर्विधं भूरि भावयंश्चमुहुर्मुहुः ॥४८॥
गोमिथुन ददौ भूयः शिवमुद्दिश्य धीमते ।
भक्तिपूर्वं तदा गौरी जाम्बूनदं च दक्षिणाम् ॥४९॥
यज्ञसूत्रं च वासांसि कटकांश्च समूलकान् ।
ददौ विप्राय भक्त्या च शिवः प्रीतोभवत्विति ॥५०॥
लवणप्रतिमां भूयः कृष्णाजिनं तथाविधं ।
ददौ भक्त्या च विप्रेभ्यः शिवमुद्दिश्य हर्षिता ॥५१॥
एवं कृत्वाश्विने मासि उपवासव्रतानि च ।
चकांक्षे चान्यमासे सा व्रतोपवासपूजनम् ॥५२॥
कार्त्तिके रुद्रनामानं संस्थाप्य विधिवत्पुनः ।
अर्च्चतिस्म तदा गौरी नानोपहारपूजनैः ॥५३॥
गन्धैः पुष्पैश्च धूपैः सा दीपमालासुशोभनैः ।
पायसैरन्यनैवेद्यैर्दध्योदनैरपूजयत् ॥५४॥
ततोप्राशयदार्य्या सा दधि च पायसं पुनः ।
विनिवेद्य च रुद्राय भक्तिपूर्वेण सन्ततम् ॥५५॥
घृतक्षीरोदनं गौरी भुनक्तिस्म निशासु च ।
फलमूलानि भक्त्या वै रुद्राय विनिवेद्य च ॥५६॥
गुडाज्यमिश्रपिण्याकं मासान्ते विनिवेद्य सा ।
रुद्राय समभुंजीत स्वयं गौरी व्रतस्थिता ॥५७॥
ततः पर्वसु सर्वेषु सूपोषिता हि शैलजा ।
रुद्रपूजारता नित्यं रुद्रध्यानेषु तत्परा ॥५८॥
ततो मासे च पूर्णे वै पूर्णिमायां मुदान्विता ।
पर्वतं मेरुनामानं चकार रत्नसंयुतम् ॥५९॥
सर्वधातुसमायुक्तं सर्वबीजरसादिभिः ।
सर्वधातुसमायुक्तं सर्वरत्नोपशोभितम् ॥६०॥
शृंगैश्च बहुभिर्युक्तं वितानच्छत्रशोभितं ।

गन्धैर्माल्यैस्तथा धूपैः प्रदीपैश्चापि शोभितम् ॥६१॥
तस्य मूर्ध्नि शिवं धृत्वा सह देव्या तथाऽमरैः ।
शालिपिष्टमयं कृत्वा सायुधैश्च सवाहनैः ॥६२॥
एवं निर्म्माय शैलेन्द्रं तं विनिवेद्य शैलजा ।
रुद्रस्य दक्षिणे भागे अपूपूजन्महोत्सवैः ॥६३॥
रुद्रभक्तांस्ततो विप्रान् संभोजयद्यथासुखं ।
चतुर्विधानि चान्नानि भावयन्ती यथेप्सितान् ॥६४॥
विप्रेभ्यो गां ददौ द्वंद्वयुग्मं सदक्षिणां पुनः ।
युग्म युग्म च वासांसि यज्ञसूत्रंस्वकृत्तितम् ॥६५॥
शर्कराज्यप्रमिश्रं च पिण्याकमोदकं तथा ।
विप्रेभ्यः प्रददौ गौरी करकांश्च समूलकान् ॥६६॥
तिलकांचनसम्मिश्रान्द्विजातिभ्यो ददौ पुनः ।
सर्वं सा शिवमुद्दिश्य प्रीतश्चास्तु शिवस्ततः ॥६७॥

स्कन्द उवाच ।

संप्राप्ते मार्गशीर्षे च व्रतारम्भं चकार सा ।
सिद्धतीर्थे उमाकुण्डे स्नात्वा हि सर्वदाद्रिजा ॥६८॥
संस्थाप्य पार्थिवं लिङ्गं पूजतिस्म महोत्सवैः ।
भक्त्या पंचोपचारैः सा जागरणैर्निशासु च ॥६९॥
निशां प्रति ततो गौरी एकभक्तं चकार वै ।
यवान्नं पयसा युक्तं सगुडाज्यं नवान्नकम् ॥७०॥
निवेद्य शंकरायादौ नित्यं चाभोजदद्रिजा ।
रुद्रध्यानरता नित्यं तत्प्रलब्धाय तत्परा ॥७१॥
सर्वपर्वस्वभूद्गौरी निराहारा जितेन्द्रिया ।
शंकरात्मा समं सख्या जागर्त्तिस्म निशासु च ॥७२॥
ततः पूर्णे च मासे सा पूर्णिमायां शुभानना ।
चकार वृषभं शुभ्रं शालिपिष्टमयं शुभम् ॥७३॥
गन्धमाल्यैरलंकृत्य भूषणैर्भूषितं च तं ।
निवेदयति रुद्राय पुरो देशे कपालिनः ॥७४॥
संपूज्य विधिवल्लिंगं पंचोपचारकैर्मुदा ।
परिक्रम्य ततो गौरी भक्त्या तुष्टाव तं पुनः ॥७५॥
ततश्चाभोजयद्विप्रान्हविष्यान्नं घृताप्लुतं ।
यवान्नं पयसा युक्तं भूरिभोजनतत्परान् ॥७६॥
कपिलाः सन्ददौ भक्त्या सुवर्णदक्षिणां मुदा ।
कुशोदकैर्द्विजातिभ्यो भक्तिपूर्वं शिवात्मना ॥७७॥
शिवमुद्दिश्य तस्माच्च प्रीयतां भगवाञ्शिवः ।
इति वाक्यं विधायाशु ददौ गोपुच्छं तत्करे ॥७८॥
ददौ वासांसि विप्रेभ्यो यज्ञसूत्राणि डल्लकैः ।
करकान्मोदकान्भक्त्या लवणानि विधानतः ॥७९॥
ब्राह्मणेभ्यो दरिद्रेभ्यः सुवर्णानि च भूरिशः ।
रुक्मयज्ञोपवीतानि ददौ कारुण्यकात्मना ॥८०॥
चतुर्विधानि भोज्यानि यथेप्सितानि भूरिशः ।
ददौ च फलमूलानि शर्कराज्यदधीनि च ॥८१॥
मार्गशीर्षे महामासे कृत्वा चैतद्व्रतं पुनः ।
इयेष चान्यमासे सा व्रतं कर्त्तुं शिवात्मना ॥८२॥

सा मार्गशीर्षेतिवरे हि गौरी,
कृत्वा व्रतं भूतिकरं च भूयः ।
कर्त्तुं च वाञ्छां गिरिशस्य चक्रे,
पौषे च मासे व्रतकं फलाढ्यम् ॥८३॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे गौरीव्रते
सप्तत्रिंशोऽध्यायः ॥३७॥

—❀❀❀—

३८ स्कन्द उवाच ।

पौषे मासे च संप्राप्ते शम्भुनामानमीश्वरं ।
स्थाप्यार्च्चतिस्म गौरी वै पंचोपचारकार्च्चनैः ॥१॥
नैवेद्यं यावकं प्रस्थं क्षीरसिद्धं घृताप्लुतम् ।
निवेदयति भक्त्या सा चतुर्विधैश्च शंभवे ॥२॥
अप्राश्यच्च स्वयं गौरी शालिगोधूमगोरसान् ।
निशासु असकृत्सख्या सार्द्धं निरन्तरं मुदा ॥३॥
निराहारा ततश्चाभूत्सर्वपर्वसु यत्नतः ।
शिवार्चनरता नित्यं शंभुध्याने च तत्परा ॥४॥
ततः पौषे प्रपूर्णे च पूर्णिमायां महाव्रता ।
निर्ममे पिष्टमयं शूलं पात्रे चास्थाय ताम्रके ॥५॥
गन्धपुष्पैरलंकृत्य वितानध्वजशोभितम् ।
निवेदयति तं गौरी अभ्यर्च्चेशं च शूलिने ॥६॥
अभोजयत्ततो विप्रानष्टौ भोज्यान्यथेप्सितान् ।
यावकान्क्षीरसिद्धान्सा गुडदध्याज्यमोदकान् ॥७॥
प्रददौ गाश्च विप्रेभ्यो भूयश्च रुक्मदक्षिणाः ।
प्रीयतां भगवान्मेऽजः वदन्तीतिधियाद्रिजा ॥८॥
दासीदासयुतं गेहं [illegible]ध्याधान्यधनान्वितं ।
वस्त्रालंकारभाण्डाढ्यं ददौ विप्राय शैलजा ॥९॥
लवणैः पुरुषं भूयः सुवर्णेनांकितं मुदा ।
तिलकाञ्चनमादौ च ददौ दीनाय वाक्यतः ॥१०॥
ईन्धनानि ततो गौरी शीतार्त्ताय कृशांगिने ।
घृतेन पूर्णं पात्रं च ददौ भक्त्या शिवात्मना ॥११॥
रुक्मयज्ञोपवीतानि वासांसि कम्बलानि च ।
उपानहौ तथा छत्र ददौ गौरी द्विजन्मने ॥१२॥
करकान्मोदकान्भूयः फलमूलाढ्यडल्लकान् ।
अन्नं चतुर्विधं दिव्यं ददौ दीनाय च द्विजे ॥१३॥
कृत्वैव पौषमासे सा मनोरथकरं व्रतं ।

इयेष चान्यमासे च व्रतं कर्त्तुं महामनाः ॥१४॥
प्राप्ते माघे वरे मासे संस्थाप्य पार्थिवं मुदा ।
पदार्थैर्बहुभिर्देवी पूजयति महेश्वरम् ॥१५॥
पंचोपचारकैर्दिव्यैर्घृतं कंबलपूजनैः ।
अर्च्चतस्मि तिलैरर्घ्यं ददौ च तिलयावकान् ॥१६॥
तिलधेनुं गुडाज्याढ्यसम्मिश्रतिलमोदकान् ।
कृशरं सर्पिषायुक्तं पायसं स्म निवेदति ॥१७॥
एकभक्तं सदा नक्तं भुनक्तिस्मालिभिः समं ।
कृशरां घृतसंयुक्तां यावकं पायसं मुदा ॥१८॥
पिण्याकं शर्कराज्याक्तं सघृतं तिलयावकं ।
उष्णं पयो गुडैर्मिश्रं पत्रपुटेन सा पपौ ॥१९॥
निवेद्य विधिवद्गौरी महेश्वराय भक्तितः ।
निरन्तरं च तत्सर्वं भुनक्तिस्मालिभिः सह ॥२०॥
सर्वपर्वसु सा गौरी निराहारा त्वभूत्पुनः ।
रुद्रध्याने रता नित्यं तत्पूजने हि तत्परा ॥२१॥
पूर्णे मासे च माघे सा आवेद्य घृतकम्बलं ।
संस्कृत्यापूजदीशानं पूर्णिमायां महोत्सवैः ॥२२॥
लिंगं पिष्टमयं कृत्वा दीपमाल्योपशोभितं ।
माल्योपकरणैर्युक्तं निवेदयति शूलिने ॥२३॥
कृष्णं गोमिथुनं गौरी शिवमुद्दिश्य संददौ ।
सुवर्णं च मुदा भक्त्या दरिद्राय द्विजन्मने ॥२४॥
अभोजयत्ततो विप्रान्भावयन्त्यमिताशनान् ।
कृशरान्पायसान्साज्यान्गुडंक्षीरं यथेप्सितम् ॥२५॥
यावकान्तिलसंयुक्तान्तथा च तिलमोदकान् ।
प्रज्ज्वाल्य चेन्धनौघं सा प्रतापयद्द्विजाञ्छुचीन् ॥२६॥
संपूज्य विधिवद्गौरी विप्रेभ्यश्च ददौ पुनः ।
वासांसि यज्ञसूत्राणि करकान्मोदकान्मुदा ॥२७॥
सर्वरत्नमयं शैलं हिरण्यपात्रसंस्थितं ।
दिव्यवस्त्रं समाच्छाद्य ददौ दीनद्विजन्मने ॥२८॥
तिलपात्रं पुनर्गौरी बहुहिरण्यमिश्रितम् ।
आच्छाद्य पट्टवस्त्रेण ददौ निस्वद्विजन्मने ॥२९॥
प्रीयतां भगवान् रुद्रः सततं मे महाप्रभुः ।
वदन्तीति धिया गौरी भक्त्या च सर्वकर्मसु ॥३०॥
एवं कृत्वा व्रतं माघे सर्वसौभाग्यदायकं ।
भूय इयेष सा गौरी अन्यमासे व्रतोत्तमम् ॥३१॥
संप्राप्ते फाल्गुणे मासे आनर्च्च सा महेश्वरं ।
संस्थाप्य पार्थिवं लिङ्गं पंचोपचारपूजनैः ॥३२॥
निवेदयति गौरी च क्षीरोदनं च मोदकान् ।
श्यामाकं क्षीरनीवारं गुडाज्यसंयुतान्तिलान् ॥३३॥
एकभक्तं स्वयं गौरी अकरोत्सखिभिः सह ।
श्यामाकक्षीरनीवारान् तिलानप्राशयन्निशि ॥३४॥
निराहारा त्वभूद्गौरी सर्वपर्वसु यत्नतः ।
ईशार्च्चने रता नित्यं तद्ध्याने च परायणा ॥३५॥
पूर्णमासे ततो गौरी पूर्णिमायां महोत्सवैः ।
आनर्च्च विधिवद्रुद्रं दीपमालाप्रपूजनैः ॥३६॥
कृत्वा गौरी महास्नानं पैष्टीं सुप्रतिमां ततः ।
गन्धमाल्यैरलंकृत्य रुद्रायास्थापयत्पुनः ॥३७॥
भोज्यानभोजयद्विप्रान्शिवमुद्दिश्य शैलजा ।
श्यामाकक्षीरनीवारान्गुडाज्यमिश्रितान्तिलान् ॥३८॥
पायसं मधुना युक्तं घृतेन चोपरिप्लुतं ।
भक्त्या हिरण्यवासांसि ततस्तेभ्यो निवेदयत् ॥३९॥
गाश्च कृष्णाः पयस्विन्यः दक्षिणाः कनकं पुनः ।
तिलोदककुशैर्गौरी दरिद्रेभ्यो ददौ मुदा ॥४०॥
शय्याश्च यज्ञसूत्राणि करकायुक्तडल्लकान् ।
तैलोद्वर्त्तनपात्राणि ददौ गौरी हि भक्तितः ॥४१॥
तैलपात्रं हिरण्याक्तं लवणं च तथाविधं ।
कांस्यपात्रं घृतैः पूर्णं ददौ दीनविपश्चिते ॥४२॥
प्रीयतां मे शिवो नित्यं भगवान्भूतभावनः ।
स्मरन्तीति धिया गौरी अभून्निष्ठा च कर्म्मसु ॥४३॥
एवं कृत्वा व्रतं दिव्यं सर्वेप्सितं फलप्रदं ।
पुनरियेष धर्मं सा कर्त्तुमन्ये च मासि वै ॥४४॥
प्राप्ते चैत्रे वरे मासि भक्त्या गौरी निरन्तरं ।
संस्कृत्य पार्थिवं लिंगं आनर्च्च विविधार्हणैः ॥४५॥
निवेदतिस्म नैवेद्यं यवांश्च भर्ज्जितांस्तथा ।
पिष्टकं पयसा युक्तं करकांश्च समूलकान् ॥४६॥
ततोऽप्राश्यत्स्वयं गौरी यवांश्च भर्ज्जितान्मुदा ।
पिष्टकं क्षीरसंयुक्तं करकांश्च निशासु च ॥४७॥
अभूद्गौरी निराहारा सर्वपर्वसु संयमा ।
स्थाण्वर्च्चने सुनिष्ठा वै जपध्यानेषु तत्परा ॥४८॥
ततः पूर्णे च तन्मासे पूर्णिमायां प्रयत्नतः ।
समानर्च्य शिवं सम्यक्पंचोपचारपूजनैः ॥४९॥
लिङ्गं पिष्टमयं कृत्वा पूज्य पंचोपचारकैः ।
पानीयं विधिवद्भक्त्या निवेदतिस्म शूलिने ॥५०॥
शिवभक्तान् द्विजान्सम्यग्भवाय यथायथासुखं ।
यवान्नं पयसायुक्तं भूरिभोजनभावयत् ॥५१॥
ददौ गाः कपिलास्तेभ्यः पयस्विन्योऽद्रिजा मुदा ।
हिरण्यदक्षिणा भक्त्या शिवमुद्दिश्य वाक्यतः ॥५२॥
ददौ वासांसि दीनेभ्यो युग्म युग्मं च नूतनं ।
करकाण्डल्लकान् रत्नान् हिरण्ययज्ञसूत्रकान् ॥५३॥
हिरण्यनिर्मितं विम्बं सूर्य्यस्य शैलजा पुनः ।

चन्द्रविम्बं ददौ तस्मै रौप्येन सुविनिर्मितम् ॥५४॥
विद्रुमं च हिरण्यं च विल्वफले हीरण्मये ।
ललाटं चैव सौवर्णं ददौ कर्णौ हिरण्यकौ ॥५५॥
हिरण्यवृत्तकं दिव्यं सर्वरत्नफलान्वितं ।
ददौ विप्राय दीनाय दक्षिणां च हिरण्यकम् ॥५६॥
प्रीयतां भगवान् रुद्रो वदन्तीति धियाद्रिजा ।
भक्त्या सर्वं च विप्रेभ्यः शिवमुद्दिश्य संददौ ॥५७॥
एवं वरं व्रतं कृत्वा सर्वसौन्दर्य्यभूतिदं ।
भूय इयेष सा गौरी अन्यद्व्रतं च भूतिदम् ॥५८॥
प्राप्ते मासे च वैशाखे शिवं संस्कृत्य पार्थिवं ।
आनर्च्च गिरिजा भक्त्या पंचोपचारपूजनैः ॥५९॥
पंचामृतेन गौरी सा पंचगव्येन शंकरं ।
निवेदतिस्म तस्मै च पंचोपचारभूरिशः ॥६०॥
गौरी तदालिभिः सार्द्धमकरोन्नक्तभोजनं ।
शाल्यन्नं पयसा युक्तं भुनक्ति संयतेन्द्रियाः ॥६१॥
गोष्ठशायी शिवध्यायी निशासु चैकवस्त्रधृक् ।
निवेद्य विधिवच्चान्नं कुशोदकं ततः पपौ ॥६२॥
निराहारा ह्यभूद्गौरी सर्वपर्वसु निश्चितं ।
संपूज्य विधिवल्लिङ्गं सूपचारैर्महोत्सवैः ॥६३॥
सिते पक्षे तृतीयायां रोहिण्यर्क्षेण संयुते ।
ददौ दानानि विप्रेभ्यः शिवमुद्दिश्य सर्वशः ॥६४॥
कलधौतं तथा चान्नं घृतपूर्णं च पात्रकं ।
क्षौद्रयुक्तान्तिलान्गौरी ददौ विप्राय भूरिशः ॥६५॥
तिलकांचनपात्रं च तथा लवणपूपकं ।
उदकुंभं ततो गौरी विप्रेभ्यः प्रददौ पुनः ॥६६॥
रुक्ममयज्ञोपवीतानि क्षौमवस्त्राणि सा ददौ ।
दण्डच्छत्राणि दीनेभ्यः उपानहश्च भक्तितः ॥६७॥
विप्रानभोजयद्गौरी भूरिभोजनभावयन् ।
हिरण्यानि ददौ भूयः शिवमुद्दिश्य भक्तितः ॥६८॥
संपूर्णे मासि वैशाखे पूर्णिमायां महोत्सवे ।
पंचोपचारपूजाभिः शिवमानर्च्च सा मुदा ॥६९॥
तण्डुलाढकपिष्टेन कृत्वा कैलाशपर्वतं ।
देवीशानसमायुक्तं सर्वधातुविभूषितम् ॥७०॥
कन्दरैर्निचितं चित्रैर्लवणप्रस्थसंयुतं ।
रसैः सर्वैश्च संयुक्तं ददौ रुद्राय पूज्य च ॥७१॥
ततो विप्रान्समाहूय अजुहोत्तन्मुखेषु सा ।
पायसान्घृतसंयुक्तान्भक्त्या गोक्षीरशर्करान् ॥७२॥
ततो गौरी च विप्रेभ्यो गाः श्वेतालंकृता ददौ ।
मिथुनं मिथुनं स्वर्णं त्रिंशत्त्रिंशत्पलं पुनः ॥७३॥
एवं च शिवमुद्दिश्य कृत्वा च व्रतमुत्तमम् ।
इहलोके परत्रे च सर्वसौभाग्यदायकम् ॥७४॥
भूय इयेष सा गौरी अन्यद्व्रतं महोत्सवैः ।
मनसेप्सितदं धर्मं शिवस्य भूतिदं पुनः ॥७५॥
प्राप्ते मासि वरे ज्येष्ठे लिङ्गं कृत्वा च पार्थिवं ।
पशुपतिं समानर्च्चं पंचोपचारपूजनैः ॥७६॥
सम्पूज्य विधिवल्लिंगं निवेदतिस्म शूलिने ।
शाल्यन्नं पयसामिश्रं शर्कराघृतसंयुतम् ॥७७॥
एकं भक्तं ततो गौरी निशासु चाकरोन्मुदा ।
शाल्यन्नं पयसा धौतमाज्यक्षीरेण संयुतम् ॥७८॥
गवां कोटिप्रदानस्य यत्पुण्यं तत्फलप्रदम् ।
निराहारा ततश्चाभूत्सर्वपर्वसु यत्नतः ॥७९॥
ध्यात्वा पशुपतिं देवं तत्पूजने हि तत्परा ।
ततोऽकरोत्तृतीयायां पञ्चाग्निव्रतमुत्तमम् ॥८०॥
निराहारा दिवामध्ये ध्यायमाना स्वयं मुहुः ।
तस्याः स्वेदसमुद्भूता द्विसप्ताश्चापगाऽभवन् ॥८१॥
कौशिक्यो लोकपाविन्यो गण्डक्यश्च तथैवच ।
ततो विप्रान्समुदाहूय होमं चक्रे मुखाग्निषु ॥८२॥
तेषां पंचविधान्नानि सुवर्णं च प्रदापयत् ।
भूयः शुक्लदशम्यां च भौमवारेण संयुते ॥८३॥
हस्तर्क्षसंयुतायां च ददौ दानानि शैलजा ।
गाश्चाश्वान्तिलधेनूंश्च सा ददौ तिलकांचनम् ॥८४॥
उदकुम्भांश्च विप्रेभ्यः पचरत्नैश्च संयुतान् ।
ददौ सर्वान्द्विजातिभ्यः शिवमुद्दिश्य शैलजा ॥८५॥
चतुर्विधानि चान्नानि भोजयन्तीयथेप्सितान् ।
ततः पूर्णे च तन्मासे पूर्णिमायां महोत्सवैः ॥८६॥
पंचोचारकैः शम्भुमभ्यपूज्य यथाविधि ।
शीतोदकेन संस्नाप्य दिव्यचन्दनभूषितम् ॥८७॥
पुष्पदामस्वयं कृत्य तालवृन्तेन साव्यजत् ।
नैवेद्यं पुरतो धृत्वा भक्त्या ध्यानस्थिताऽभवत् ॥८८॥
लेह्यं चोष्यं तथा खाद्यं पेयं चैव चतुर्विधम् ।
कृत्वा पिष्टमयं लिङ्गं सवेदिवस्त्रवेष्टितम् ॥८९॥
पुष्पमालासमाकीर्णं पंचोपचारसंयुतम् ।
आनीय विधिवद्भक्त्या शिवस्य च पुरो मुदा ॥९०॥
संपूज्य तं च रुद्राय निवेदति स्म शैलजा ।
जागरं चाकरोद्गौरी सर्वयामेषु चिन्तिता ॥९१॥
तत्क्रोडैलब्धुकामा सा गीतवाद्यमहोत्सवैः ।
निमंत्रितान्समाहूय विप्रान्तन्मुखवह्निषु ॥९२॥
जुहोतिस्माद्रिजा भक्त्या पंचविधयथेप्सितम् ।
समभ्यर्च्य च तान्गौरी ददौ वासांसि दक्षिणा ॥९३॥
सुवर्णं गाश्च विप्रेभ्यस्तालवृन्तानुपानहः ।

घृतपूर्णप्रदीपांश्च यज्ञसूत्रोपभाजनान् ॥६४॥
करकोंडल्लकानिक्षुन्विप्रेभ्यः प्रददौ शिवा ।
एवं व्रतं कृतं गौर्य्या सर्वलोकहिताय च ॥६५॥
विवाहो न भवेद्यावच्छिवांगभक्तितत्त्वभूत् ॥६६॥

यच्च व्रतं मे चरितं ह्युमायाः
प्रोक्तं च रुद्रेण पुरा हिमाद्रौ ।
श्रुत्वा मुखात्तत्कथितं मया ते,
स्त्रीणां च धर्म्मं परमं हि विद्यात् ॥६७॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे उमाव्रतकथनं नामाष्ट-
त्रिंशोऽध्यायः ॥३८॥

अगस्त्य उवाच ।
देव तव प्रसादाद्वै श्रुतमुमाव्रतं मया ।
तस्या दानोपवासांश्च स्त्रीणां भवेद्व्रतोत्तमम् ॥१॥
भूयः श्रोतु च वाञ्छामि त्वत्तो ब्रह्मविदांवरात् ।
व्रतानां चैव दानानां माहात्म्य वद मेऽधुना ॥२॥
स्कन्द उवाच ।
तिथिनक्षत्रराशीनां दिनानां च तथैव च ।
सर्वेषामात्मरूपा सा ज्ञायतां हि त्वया मुने ॥३॥
तथापि चरितं धर्म्मं तया लोकहिताय च ।
सर्वात्मरूपया देव्या संसारस्थितये पुनः ॥४॥
येषु येषु च कालेषु स्नानदानोपवासकान् ।
चकार गिरिजा श्रेष्ठस्तत्तत्कालोऽभवन्मुने ॥५॥
स्नानदानोपवासेषु तस्याः प्राप्ताश्च ये तदा ।
तिथ्यहोराशिनक्षत्राः सुश्रेष्ठास्ते भवन्ति वै ॥६॥
ततः प्रभृति चाद्यापि गौरीव्रताद्द्विजोत्तम ।
भूता भवन्ति ते सर्वे सर्वकर्म्मफलप्रदाः ॥७॥
तेषां वच्मि फलान्यद्य पक्षयोरुभयोरपि ।
अन्यान्यं चैव योगानां कर्म्मणां च पृथक् पृथक् ॥८॥
पूर्णमासी च सक्रांतिश्चतुर्दश्यष्टमी तथा ।
नवमी च त्वमावास्या गरिष्ठा पक्षयोर्द्वयोः ॥९॥
तिथयोऽपि वरा धीमन् रहिता योगराशिभिः ।
गरिष्ठाश्च भवेयुस्ताः सर्वधर्मफलप्रदाः ॥१०॥
उमाया नवमी प्रीता हरस्य तिथिरष्टमी ।
तयोरन्योन्यमिश्रेण महापुण्यतमास्मृता ॥११॥
तस्यां दत्तं हुतं चैव स्नातं जप्तं तथार्चनं ।
सर्वेषां च द्विजश्रेष्ठ तत्सर्वमक्षयं भवेत् ॥१२॥
ये प्रकुर्वन्ति सत्कर्म संक्रान्त्यां तद्बहुगुणं ।
रव्यहर्युक्तसप्तम्यां कोटिकोटिगुणं भवेत् ॥१३॥
तस्यां दानैः पुनः सूर्य्यो रुद्ररूपः प्रतुष्यति ।
जपस्नानोपवासैश्च तुष्यन्ति सर्व्वदेवताः ॥१४॥
तस्यां च स्नानमात्रेण सूर्य्यतुल्यो भवेन्नरः ।
युगकोटिशतं चान्ते सूर्य्यलोके महीयते ॥१५॥
पूर्णे सोमे च सौम्येह्नि रोहिण्यां संयुते यदि ।
तुष्यन्ति सुकृतैर्नृणां सोमादिसर्वदेवताः ॥१६॥
तस्मिन्स्नात्वार्चितं दत्तं हव्यं कव्यं कृतं च यत् ।
सोमात्मकैर्नरैर्भक्त्या तत्सर्वं,चाक्षयं स्मृतम् ॥१७॥
तस्मिन्दिने नरः स्नात्वा अर्च्चोपोष्यं करोति यः ।
सर्वपापैर्विनिर्मुक्तः सोमतुल्योत्र कांतिभिः ॥१८॥
देहान्ते ह्यमरैश्चासौ सोमयानस्थ आर्द्रयन् ।
युगकोटिशतं दिव्यं सोमलोके महीयते ॥१९॥
अष्टम्यामार्द्रयुक्तायां सोमाह्वासंयुतेपुनः ।
ईश्वरवल्लभायां च च्छिनत्ति सकलैनसः ॥२०॥
तस्यां च स्नानमात्रेण स तुष्यति सदा हरः ।
सर्वपापैर्विनिर्मुक्तो धर्मकश्चेत्पुनः किमु ॥२१॥
तस्यां यत्पूजनं दत्तं हव्यं कव्यं जपं तथा ।
संयुतायां च मूलेन तत्सर्वमक्षयं भवेत् ॥२२॥
यश्च स्नायी तदष्टम्यां यः करोति शिवार्च्चनं ।
कल्पकोटिशतं साग्रं रुद्रलोके महीयते ॥२३॥
महापुण्यं चतुर्दश्यां युक्तायामार्द्रया पुनः ।
स्नानमात्रेण लोकानां तुष्यन्ति सर्वदेवताः ॥२४॥
तस्यां दानार्च्चनं सर्वं हव्यकव्यजपं तथा ।
अन्येषु यत्कृतं तद्धि कोटिकोटिगुणं भवेत् ॥२५॥
तस्यां स्नानेन मर्त्यो वै सर्वपापैः प्रमुच्यते ।
शिवार्च्चनरतानां च शृणु वच्मि महाफलम् ॥२६॥
ब्रह्महत्यादिकैः पापैर्मुच्यंते तत्क्षणान्नराः ।
सर्वैः कुलैः समायुक्ता गच्छन्ति दिवि चोत्तमे ॥२७॥
यः पुण्यायाममावास्यां युतायामिन्दुनापि वा ।
स्नानं दानं हुतं जप्तं करोति चाक्षयं लभेत् ॥२८॥
यः करोति च दर्शेह्नि शिवार्चनं महोत्सवैः ।
कल्पकोटिशतं दिव्यं रुद्रलोके महीयते ॥२९॥
बहुपुण्यां नवम्यां च मूलेन संयुतेपि वा ।
देव्याः सुप्रीतियुक्तायां यत्कर्म चाक्षयं भवेत् ॥३०॥
तस्यां स्नानार्च्चनोपोष्यंदत्तजप्तहुतानि च ।
ये कुर्वन्ति च धीमन्तस्तेषां पुण्यफलं शृणु ॥३१॥
अश्वमेधसहस्राणि वाजपेयस्तथाविधः ।
पृथिव्यां यानि दत्तानि सर्वतीर्थेषु यत्फलम् ॥३२॥
एतत्पुण्यं सुखं लब्ध्वा गच्छन्ति शिवसन्निधौ ।
कोटिकोटिशतं कल्पं शिवलोके प्रमोदते ॥३३॥

मार्गकृष्णतृतीयायां व्रतोपोष्यं करोति या ।
पुष्यर्क्षेण प्रयुक्तायां तस्याः पुण्यफलं शृणु ॥३४॥
भ्रूणहत्यादिपापैः सा मुक्ता लब्ध्वा मनोरथान् ।
सूर्यसन्निभयानेन मुदा गच्छत्युमापुरे ॥३५॥
पौषेऽष्टम्यां चतुर्थ्यां च युक्तायां च बुधेन वै ।
आर्द्रायां च प्रयुक्तायां सन्तुष्यत्यद्रिजा भवात् ॥३६॥
तस्यां दत्तं हुतं जप्तमुपोष्य व्रतपूजनं ।
यया कृतं मुदा भक्त्या तस्याः पुण्यफलं शृणु ॥३७॥
सर्वपापैर्विनिर्मुक्ता धनधान्यसमायुता ।
अविधवा सुतैर्युक्ता भवेज्जन्मनि - जन्मनि ॥३८॥
देहान्तेऽर्काभयानेन पतिपुत्रान्वयान्विता ।
कल्पकोटिशतं दिव्यमुमालोके वसेन्मुदा ॥३९॥
माघे सिते चतुर्दश्यां पचम्यां च तथैव च ।
या करोति व्रतं दानं तस्याः पुण्यफलं शृणु ॥४०॥
पातकैश्चातिपापैश्च विमुक्ता सा पुनर्मुने ।
सर्वसौभाग्यसयुक्ता अविधवा भवेदिह ॥४१॥
रुद्रदूतैश्च देहान्ते याने दशार्कसन्निभे ।
आस्थाय सान्वयां तां च वाहान्ते तद्रथोत्तमैः ॥४२॥
गीततालमृदङ्गैश्च प्रोद्धूयश्चामरैर्मुहुः ।
नीयन्ते तामुमालोकं मोदयंश्च प्रसेवयन् ॥४३॥
स्वाराधयन्नुमादेवीं पतिपुत्रसमायुता ।
कोटिकल्पसहस्राणि उमालोके महीयते ॥४४॥
फाल्गुने नवमी शुक्ला मृगेणैव समन्विता ।
देवानां चैव सर्वेषां प्रीतिदाभूत्सदा मुने ॥४५॥
दानधर्मकृतानाञ्च तस्यां स्त्रीणां विशेषतः ।
देव्याः प्रीतिकरायां हि शृणु वच्मि फलं महत् ॥४६॥
इहलोके सुरूपा सा भर्तृपुत्रसमन्विता ।
सेव्यते सान्यनारीभिः भवेद्भर्तुः प्रिया भृशम् ॥४७॥
सर्वपापैर्विनिर्मुक्ता मयूरयानसंस्थिता ।
सान्वया यात्युमालोके कल्पकोटिशतंवसेत् ॥४८॥
शनिसूर्यगुरुज्ञेन पुनर्वसुवृषेण च ।
अष्टमीसंयुता चैत्रे तैर्युक्तापि त्रयोदशी ॥४९॥
या करोति व्रतोपोष्यं तिथयश्च तयोः सदा ।
शिवार्च्चनरताया च तस्याः पुण्यफलं शृणु ॥५०॥
पातकादिमहापापैर्मुच्यते सा सुखी भवेत् ।
रूपसौन्दर्य्यमाप्याशु प्रभोः सुप्रेयसी भवेत् ॥५१॥
देहान्ते वंशसंयुक्ता यानेन सूर्य्यवर्च्चसा ।
समागत्य ह्युमालोकं कोटिकल्पं सुखं वसेत् ॥५२॥
वैशाखे मासि शुक्ले च तृतीयायां करोति या ।
स्नानोपवासदानानि धर्मोमाप्रीतये सदा ॥५३॥

दानोपवासधर्माणि कर्तुस्तस्याः फलं शृणु ।
अपीह बहुपापात्मा पातकैः सा प्रमुच्यते ॥५४॥
भवेन्मधुरवाणी सा विशालाक्षी च कामिनी ।
सर्वाङ्गसुन्दरी वेत्री पुत्रवती पतिप्रिया ॥५५॥
ततः फलानि देहान्ते लब्ध्वा सा चाक्षयं च तत् ।
सान्वया परिवारैश्च यानं चारोहति ध्रुवम् ॥५६॥
अर्कायुताभयानेन सा प्रगच्छत्युमापुरं ।
हर्षाढ्या सर्वलोका वै धन्याधन्येति वादयेत् ॥५७॥
कल्पकोटिशतं दिव्यमुमालोके वसेन्मुदा ।
प्रसेवयन्तुमां देव्याः श्रीपादुकामहोत्पलम् ॥५८॥
ज्येष्ठशुक्लचतुर्दश्यां हस्तर्क्षेण च संयुते ।
करोति प्रीतये देव्याः स्नानदानोपवासकान् ॥५९॥
व्रतस्थायास्त्रिया विप्र पुण्यं शृणु वदामि ते ।
भ्रूणहत्यादिपापैः सा दशपापैः प्रमुच्यते ॥६०॥
द्वादश्यां चैव पंचम्यां पूर्णमास्यां तथैव च ।
या करोति व्रतं दानं तस्याः पुण्यं विशेषतः ॥६१॥
तुङ्गकुचा तु गौराङ्गी तुङ्गघ्राणा वराक्षिणी ।
विम्बोष्ठी च वरौ कर्णौ कुशला सौरतेषु सा ॥६२॥
रम्भोरू च कृशाङ्गी च चन्द्रानना पतिप्रिया ।
पद्महस्ता सुदन्ती च मधुवाणी सदा भवेत् ॥६३॥
देहान्तेऽर्काभयानेन सा प्रगच्छत्युमापुरं ।
कल्पकोटिशतं दिव्यं वसेदुमां प्रसेवयन् ॥६४॥
आषाढ़े शुक्लपंचम्यामेकादश्यां तथैव च ।
पौर्णमास्यां व्रतं दानं या करोति परायणा ॥६५॥
शृणु फलानि तस्यास्त्वं सर्वपापैर्विवर्जिता ।
परस्त्रीणां च सर्वासां सुन्दरी सा भवेदिह ॥६६॥
देवासुरमनुष्याश्च दृष्ट्वा तां मुमुहुर्मुहुः ।
सा मनोहारिणी यूनां सौन्दर्येण भवेत्पुनः ॥६७॥
स्वर्गं गच्छति देहान्ते सूर्य्याभयानसंस्थिता ।
कल्पकोटिं वसेद्दिव्यं सोमाङ्घ्रिसेवयन्मुदा ॥६८॥
श्रावणे शुक्लपंचम्याममावास्यां करोति या ।
अतिप्रिया पतेः सा च यावज्जीवं सुखंवसेत् ॥६९॥
देहान्ते सा च यानेन सूर्य्यायुताभवर्च्चसा ।
समागत्य ह्युमालोकं कल्पकोटिं सुखं वसेत् ॥७०॥
भाद्रे षष्ठ्यां च सप्तम्यां द्वादश्यां चैव पक्षयोः ।
या करोति व्रतोपोषयं सर्वान्कामानवाप्नुयात् ॥७१॥
शुक्लायां च तृतीयायां विशेषेण महातिथौ ।
यां करोति व्रतोपोष्यं तस्याः पुण्यफलंशृणु ॥७२॥
पापैश्च त्रिविधैर्मुक्ता बहुपुत्रवती भवेत् ।
प्राधान्या चाबलानां सा पतिप्रियहितैषिका ॥७३॥

उमालोके च देहान्ते यानेनार्कनिभेन सा ।
गोत्रैः समं वसेद्गत्वा कल्पकोटिशतं सुखम् ॥७४॥
ईषेष्टस्यां त्रयोदश्यां पूर्णमास्यां करोति या ।
स्नानोपवासदानार्चा देव्याः प्रीत्यै मुदान्विता ॥७५॥
शृणु धीर फलं तस्याः सर्वपापैर्विवर्जिता ।
रूपसौन्दर्य्यमाप्नोति धनधान्यसुतान्विता ॥७६॥
सूर्य्यप्रतिमयानस्था देहान्ते गोत्रसंयुता ।
कल्पकोटिशतं दिव्यमुमालोके महीयते ॥७७॥
ततः पुण्यावसाने सा मेदिन्यां च प्रजायते ।
राजस्त्री च ततो भूत्वा विप्रपत्नी च मोक्षगा ॥७८॥
कार्त्तिके शुक्लपक्षे वा नवम्यां या करोति वै ।
पूर्णिमायामुमाप्रीत्यै स्नानोपोष्यार्चनादिकान् ॥७९॥
तस्याः पुण्यफलान्यार्य्य भूत्वाचैकमनाः शृणु ।
सर्वपापैर्विनिर्मुक्ता स्नानमात्रेण सा पुनः ॥८०॥
सुखंसाध्वी भवेद्दानादिह लोके परत्र च ।
गुणरूपसमायुक्ता पतिप्रिया सुतान्विता ॥८१॥
धनधान्यसमायुक्ता दासीदासप्रसेविता ।
सर्वभोग्यान्मुदा भोक्त्री भवेद्भूमौ हि दानतः ॥८२॥
तेजसाढ्या व्रतोपोष्या दिव्याङ्गनोपमा सदा ।
सर्वलक्षणसंयुक्ता सर्वासां सुन्दरी भवेत् ॥८३॥
गीःस्वररसोपेता सर्वलोकमुदावहा ।
प्रियम्वदा मनःस्वच्छा देव्याभक्तिषु तत्परा ॥८४॥
अर्च्चनात्सा भवेद्देव्याः सर्वसौभाग्यसंयुता ।
देहान्ते सा ततो विप्र यमिच्छति च तं लभेत् ॥८५॥
सूर्यायुतप्रतीकाशविमानेन मुदान्विता ।
सा व्रजति ह्युमालोकं सर्वलोकात्सुदुर्लभम् ॥८६॥
कल्पकोटिशतं दिव्यं तत्र वसेन्मुदा च सा ।
सेवयन्ती ह्युमादेव्याः पादाब्जौ सर्वसर्वदौ ॥८७॥
एतद्व्रतानि सर्वाणि यावज्जीवं करोति या ।
मासे मासे यथोक्तानि तस्याः पुण्यफलं शृणु ॥८८॥
भ्रूणहत्यादिभिः पापैः पूर्वजन्मकृतैरपि ।
सहस्रजन्मजैर्घोरैर्मुच्यते तत्क्षणाद्धि सा ॥८९॥
यदीप्सितं हृदा कामं तत्सर्वं लभ्यते ध्रुवम् ॥
एकहायनमात्रेण चैतद्व्रतकृतेन वै ॥९०॥
सूर्य्यायुतप्रतीकाशे याने सुबहुतेजसि ।
रुद्रकन्यासमाकीर्णे चाप्सरोगणसेविते ॥९१॥
गीतवाद्यमहोल्लासे धूयमाने च चामरे ।
तामारोप्य गणैः शम्भोर्वाह्यते चाम्बरे मुदा ॥९२॥
नीयमाने ततो नाके देवाङ्गनास्तथाऽमराः ।
धन्याधन्येति वादिन्यस्तामालोक्य मुहुर्मुहुः ॥९३॥
उमालोकं ततो गत्वा वसेत्तत्र महासुखं ।
कल्पकोटिशतं दिव्यमुमांघ्र्यब्जौ प्रसेवयन् ॥९४॥
कालान्ते च ततो भूयो मेदिन्यां जायते हि सा ।
भूत्वा च पद्मिनीस्त्रीणां सुन्दरी नृपवल्लभा ॥९५॥
ज्ञानशुद्धा च या नारी पुरुषदेहमिच्छति ।
स्नानदानोपवासाद्यच्चेत्समाचरति तद्धृदा ॥९६॥
कालान्ते सापि मेदिन्यां जायते हि महानृपः ।
सार्वभौमो महात्यागी जेता पुत्रान्वितो भवेत् ॥९७॥
इत्येतत्कथितं धीमन्स्त्रीणां धर्माणि सूक्ष्मतः ।
विधानं शृणु वक्ष्यामि येनालभ्यानि लभ्यते ॥९८॥
देवैर्भुक्तं च पूर्वाह्णे मध्यान्हे ऋषिभिस्तथा ।
पितृभिरपराह्णे च सन्ध्यां गुह्यकादिभिः ॥९९॥
सर्ववेलामतिक्रम्य नक्तमुत्तमभोजनं ।
स्त्रीपुंसां श्रद्धया शस्तं व्रतिनां च विशेषतः ॥१००॥
क्षमा सत्यं दया दानं शौचमिन्द्रियनिग्रहः ।
शिवपूजाग्निहोमश्च संतोषाश्रयभावना ॥१०१॥
सर्वव्रतेष्वयं धर्मः श्रद्धापूर्वं विशेषतः ।
श्रद्धया गम्यते तीर्थं श्रद्धया स्नायतेऽप्सु वै ॥१०२॥
श्रद्धया दीयते दानं श्रद्धया हूयते हविः ।
श्रद्धया जप्यते मंत्रं श्रद्धया ध्यायते शिवम् ॥११३॥
श्रद्धया लभ्यते धर्मः श्रद्धया लभ्यते फलम् ।
क्रोधेनाश्रद्धया यच्च क्रियते कर्म्म मानुषः ॥१०४॥
विलीयते च तत्सर्वं भस्मनीव यथा हुतम् ।
नास्ति धर्म्मसमो मंत्रं नास्ति दानसमा गतिः ॥१०५॥
नास्तिरुद्रसमोदेवोनास्तिमोक्षसमं सुखम् ॥१०६॥
स्त्रीणां परं धर्म्मफलाढ्यमेतत्,
जानीहि विप्रेश सदाचरेय ।
तुरीयवर्गोत्तमसंप्रदायं
पुनश्च किं श्रोतुमना असि त्वम् ॥१०७॥
इति श्रीस्कन्दपुराणे हिमवत्खण्डे उमाव्रतमाहात्म्यं
नामोनचत्वारिंशोऽध्यायः ॥३९॥

—❀❀❀—

४०

अगस्त्य उवाच ।

उमाव्रते विधानं च तेषां चैव फलोत्तमं ।
नारीणां च महाधर्मं त्वत्प्रसादाच्छुतं विभो ॥ १ ॥
भूयः श्रोतुं च वांछामि त्वत्तो रुद्रप्रियाधुना ।
कौशिक्याश्चैव गण्डक्याः प्रोद्भवं विस्तरं यथा ॥२॥
सप्तधाराः कथं तासां सप्त धाराः पुनस्तथा ।
अभूवंस्ता महासेन कस्मात्कस्मात्प्रनिस्सृताः ॥ ३ ॥
तस्याःव्रतं च विस्तारं तासु स्नानफलानि च ।
एतत्सर्व्वं भवान्वेत्ता मे वदार्य्य यथाविधि ॥ ४ ॥

स्कन्द उवाच ।

शृणु तद्वर्णयामस्ते ! पंचाग्निनाम सुव्रतं ।
श्रुतं रुद्रमुखात्पूर्वं हिमालये उमाव्रतम् ॥ ५ ॥
ज्येष्ठे मासि सिते पक्षे तृतीयायां महाव्रतम् ।
ज्येष्ठर्क्षसंयुतायां सा व्रतं दधार महामनाः ॥६॥
पूर्वोत्तरे समीपे सा नीलकण्ठस्य संस्थिता ।
निर्माय कुण्डचत्वारि चतुर्दिक्षु समात्मनः ॥७॥
पूर्वकुण्डे प्रदीपं सा प्रजज्वाल सदीपयन् ।
दक्षिणे च ततः कुण्डे वह्निं प्रज्वालयन्मुदा ॥८॥
चोत्तरे सा ततः कुण्डे गीतयञ्ज्वालयञ्छुचिम् ।
वारुणे गीतयन्कुण्डे ह्यपूरयज्जले न (पूरज्जलेन) सा
तेषाम्मध्ये स्वयं स्थित्वा प्राङ्मुखा सखिभिः समं ।
ऊर्ध्वं तेजस्विनं सूर्य्यं ददर्शगीतयन्मुदा ॥१०॥
प्रा (ङ्मुखा) पूजद्विधिवद्भक्त्या पंचोपचारकैश्च तान् ।
दीपानलजलान् भानुं यथाक्रमेण गीतयन् ॥११॥
योगासने स्थिता गौरी नासाग्रे सन्निरीक्ष्य वै ।
निस्पन्दाक्षा बभूवार्य्या किंचिदूर्ध्वानना सती ॥१२॥
दध्यौ स्वयं स्वमात्मानं निर्विकारं निरंजनं ।
ध्यायमानापि देवैः सा हृत्पद्मे हि महोज्वले ॥१३॥
असहत्सा सुतीक्ष्णं च भानुभानुमहातपं ।
असह्यं वर्च्चसं तेषां ज्योतीरूपेव च स्वयम् ॥१४॥
तेपे त्रिप्रहरं यावत्सुकठोरं च दुस्सहं ।
साऽऽर्या सूर्योदयारभ्य चतुर्थप्रहरावधि ॥१५॥
एवं चक्रे चतुर्थाब्दं पंचाब्दावधिरम्बिका ।
पंचमाब्दे व्रतं कृत्वा तत उद्यापनोत्सुका ॥१६॥
व्रतं या कुरुते ह्येवं दशभूतिंलभेत्किल ।
अवैधव्यं च सौभाग्यं धनधान्यसुखेप्सितम् ॥१५॥
पुत्रपौत्रादिसंवृद्धिं कामाञ्जन्ममहत्कुले ।
देव्याः कलेवराद्धर्म्मप्रविन्दवोन्यजीजनत् ॥१८॥
सूर्य्यातपाग्निसंभूता आपादमस्तकाङ्कुशं ।
उत्थाय च ततो गौरी गोदानं ऋषये ददौ ॥१६॥
हेमकूटे हि तत्पूर्वं कुशिकाय तपस्विने ।
तस्याः पादतलात्तत्र निदाघविन्दवोऽपतन् ॥२०॥
ततोऽजनि सरिच्छ्रेष्ठा हेमकूटेतपःस्थले ।
ववाह तत्सरिच्छ्रेष्ठा पवित्रनिर्मलावहा ॥२१॥
ददर्श कुशिकस्तां वै मुदं स प्राप्तवान्मुनिः ।
सस्नौ तस्यां मुनिर्नद्यां भक्त्या दायंयथाविधि ॥२२॥
प्राप्तवांश्चयुवावस्थामतिवृद्धोपिरूपवान् ।
सर्वमायाविनिर्मुक्तो जातिस्मरणमाप्तवान् ॥२३॥
दृष्ट्वा रूपं युवानं स्वमतिहर्षितवान्मुनिः ।
कुशिको लोमहर्षाङ्गस्तवं चकार भक्तितः ॥२४॥
गौर्य्याश्च दक्षपादाब्जोद्भवानद्यै नताननः ॥२५॥

कुशिक उवाच ।

ॐ नमः सरिदंशायै तरंगिण्यै नमो नमः ।
उद्धृतगाढपंकायै निर्म्मलाम्भोवहे नमः ॥२६॥
सर्वदेवप्रवन्द्यायै देव्यङ्घ्रिपद्मजोद्भवेनघे ।
सर्वलोकान्पवित्रायै सर्वपूज्ये नमो नमः ॥२७॥
गौरीस्वेदोद्भवायै च सर्वसौभाग्यदायके ।
हरिताम्भःप्रवाहिन्यै शैत्यजले नमोस्तु ते ॥२८॥
भवापवर्गदे देवि भवतारिणि ते नमः ।
दुरितघ्नि सुभद्रायै भद्रप्रदे नमोस्तु ते ॥२६॥
विश्वजासुभृतां हेतोर्ज्जलप्रवाहिते नमः ।
त्रैलोक्यानां पवित्रायै विश्ववन्द्ये नमोस्तु ते ॥३०॥
सितासितौ तथारक्तं धूम्रं पीतं हरित्पुनः ।
स्वच्छं नानाभपानीयं धृतायै ते नमो नमः ॥३१ ।
मोहान्धकाराविद्यानांविनाशिन्यै च जन्मिनां ।
बहुजन्मकृतान्पापान्प्रणाशिन्यै नमो नमः ॥३२॥
सृष्टिस्थितिविनाशानां स्वतन्त्रायै सरिद्वरे ।
ज्ञानदे ज्ञानरूपायै जलमूर्त्यै नमोऽस्तु ते ॥३३॥

स्कन्द उवाच ।

श्रुत्वा स्तवं महादेवी महर्षेः कुशिकस्य च ।
कायमनोवचोद्भूतं भृशं तस्मै तुतोष सा ॥३४॥
विनिर्य्ययौ ततो देवी जलमध्यान्मुदान्विता ।
वरदानाय तस्मै च द्वितीयार्य्या तनुस्तथा ॥३५॥
व्याचष्ट वचनं तस्मै जलदेवी प्रहर्षिता ।
अष्टभुजा हरिद्वर्णा सर्वालङ्कारशोभिता ॥३६॥

जलदेव्युवाच ।

वरं वृणीष्व मत्तस्तत्कामदायां मयि ध्रुवं ।
यत्त्वं वांछसि दान्तेश ददामि ते न संशयः ॥३७॥
न केवलं नदीमूर्त्तिं मां विद्याद्वरदां हि ते ।
मुने जगत्प्रसूतात्वं जानीहि प्रयतां जगत् ॥३८॥

कुशिक उवाच ।

महादेव्यै ह्यलक्षायै लक्षायै चाद्य वै नमः ।
सृष्टिस्थितिविनाशिन्यै जलमूर्त्यै नमो नमः ॥३६॥
देव्यद्य मे तपोवृक्षाः फलन्ति सुफलानि च ।
अद्यैव तृपिता देवाः पितरोऽद्यैव मे पुनः ॥४०॥
अहोभाग्यमहोभाग्यमनाथस्य तनुस्वकं ।
आविर्भूत्वा यतस्त्वं मे जलमध्यात्प्रदर्शिता ॥४१॥
नदीयं मम नाम्ना वै कर्त्तव्यं नामधेयकं ।
इति याचे वरं मेत्वा भूयो लीनं त्वदंघ्रिके ॥४२॥

जलदेव्युवाच ।

यद्याचितं त्वया वत्स वरं मां च यथेप्सितं ।

निःशेषं न भवेद्यावत्तथाऽस्तु तथाघतः ॥४३॥
कुशिकेन त्वया यस्मात्प्रसेविता ह्यहं मुदा ।
तस्मादहं सुताद्यादिः कौशिकीति भवामि वै ॥४४॥
ततो लोका वदिष्यन्ति कौशिकीति चराचराः ।
सप्तधारा भविष्यामि षट्धाराश्च तथाविधाः ॥४५॥
यत्र यत्र पतिष्यन्ति मत्स्वेदविन्दवो भुवि ।
तत्र तत्र नदीभूता भविष्यंत्यविधानतः ॥४६॥

स्कन्द उवाच ।

इयुक्त्वा सा तदा तस्मै तिरोधानं ययौ जले ।
जलदेवी वरं दत्वा तत्रैव च घटोद्भव ॥४७॥
ततो ददर्श गौरीं तां व्रजन्ती रत्नशेखरे ।
सनत्कुमारः स्थितो यत्र तत्पूर्वे हिमवद्गिरौ ॥४८॥
सोपि ततोऽन्वगच्छद्वै गौर्य्यास्तत्रैव सा मुनिं ।
संपूज्य च ददौ दायं तस्माद्रूपय एव हि ॥४९॥
तत्रैव चापतद्धर्म्मश्चिवुकाच्च सुनिर्म्मलः ।
तस्माद्दत्तान्नदी भूता तदपि चोर्म्मिमालिनी ॥५०॥
प्रेदयनदीं च ताम्राभां मुनिः सस्नौ यथाविधि ।
तुष्टाव च मुदा तस्य वाक्कायमानसैर्भृशम् ॥५१॥
भूयो जगाम सा गौरी हिरण्यशेखरं गिरिं ।
अन्वगच्छन्मुनिस्तस्यास्तप्तवान् हि सनातनः ॥५२॥
ददौ दायं समभ्यर्च्च्य तपस्विने व्रतस्थिता ।
तत्रापतन्निदाघोपि तस्याः सृक्किणितोर्गिरौ ॥५३॥
सरिद्भूत्वा ववाहाशु पीताभा शैलवाहिनी ।
तस्यां सस्नौ मुनिर्भक्त्या तुष्टाव च मुहुर्मुहुः ॥५४॥
भूयो जगाम सा गौरी अभ्रलेहिसुशेखरे ।
सोऽन्वगच्छद्धि तस्या वै सनन्दको हि तप्तवान् ॥५५॥
तस्मै गौरी ददौ दायं समभ्यर्च्च्य यथाविधि ।
घर्म्मोऽपतदपांगाद्धि तस्या भूयः सुनिर्म्मलः ॥५६॥
भूत्वा सरिन्निदाघस्तद्ववाह सलिलामला ।
तुष्टाव च मुनिस्तस्यै स्नात्वा भक्त्या पुनर्मुने ॥५७॥
ततो जगाम सा देवी माहाराजतशेखरे ।
अन्वगच्छन्मुनिस्तस्याः सनकच यत्र तप्तवान् ॥५८॥
वहुदायं ददौ तस्मै समभ्यर्च्च्य हि भक्तितः ।
तस्या घर्मः कपोलाद्वै रक्ताभो निर्म्मलोत्तमः ॥५९॥
नदी भूता तदा घर्माद्ववाह वहुलोर्म्मिभिः ।
संस्नौ तस्यां मुनिर्भक्त्या तुष्टाव त्रिविधैर्मुदा ॥६०॥
भूयो जगाम साऽगस्त्य धातुकूटं हि शैलजा ।
सोऽन्वगच्छन्मुदा तस्याः सनको यत्र तप्तवान् ॥६१॥
ददौ दायं मुदा तस्मै संपूज्य भक्तितोऽद्रिजा ।
यन्पतदलकाद्धर्म्मः पुनस्तस्याः सुनिर्म्मलः ॥६२॥
सरिद्भूत्वा ववाहाशु तद्धर्म्मश्चोर्म्मिमालिनी ।
सस्नौ तस्यां मुनिर्भक्त्या तुष्टाव च मुहुर्मुहुः ॥६३॥
भूयोऽगमद्रुद्रोद्भूतं दर्भवंतं सुशेखरम् ।
कुशिकेन समं गौरी ब्रह्मर्षिर्य्यत्र तप्तवान् ॥६४॥
ददौ दायं मुदा गौरी तस्मै संपूज्य भक्तितः ।
ललाटादपतद्धर्म्मस्तस्याः पुनः सुनिर्म्मलः ॥६५॥
सरिद्भूत्वा च तद्धर्म्मो ववाह जलनिर्म्मला ।
सस्नौ भक्त्या मुनिस्तस्यां तुष्टाव त्रिविधैर्मुदा ॥६६॥
आविर्भूता ततो देवी कौशिक्यां हि पुनस्तदा ।
वरदानाय लोकानां सर्वसत्त्वहिताय च ॥६७॥

देव्युवाच ।

शृणु विप्र वरं दास्ये तुभ्यं लोकहिताय च ।
ते नाम्ना सप्तधाराश्च मे भविष्यन्ति मूर्त्तयः ॥६८॥
शुभश्रवा च पापघ्नी भद्रावती महाप्रभा ।
वरदा चैव दुःखघ्नी सप्तैताः सत्यवाहिनी ॥६९॥
सततं सप्त कौशिक्यो वदिष्यन्तीति जीविनः ।
सप्तधारा भवात्मोघ्य विख्याता मद्विभूतयः ॥७०॥
दुर्गा नारायणी चण्डी शिवदूती कपर्दिनी ।
वाराही च शची गौरी कौशिक्यः क्रमशोऽद्रिजाः ॥७१॥
अद्य प्रभृतिराय्य त्वं चिरं जीव्यान्निरन्तरं ।
मम तीरे च कौशिक्या आदिलिंगो हि संभवेत् ॥७२॥
गत्वा तत्राऽऽशु लिङ्गं त्वं पूजय विविधार्हणैः ।
मा त्यज्यतां कदापीशः कलौ गूढं प्रतप्यताम् ॥७३॥
शृणु विप्र वरान्यद्य स्नातकेभ्यो ददाम्यहं ।
मन्मूर्त्तिकौशिकीष्वार्य्या श्रद्धाभक्तिमुदान्विताः ॥७४॥
ये कुर्वन्ति नराः स्नानं देवासुरास्तथापराः ।
ते मुच्यन्तां महापापैः सर्व्वजन्मार्जितैरपि ॥७५॥
व्रजाम्यहं च कौशिक्यां समाधायेति मानसे ।
आगमिष्यन्ति ये स्नातुं पथि तेषां फलं शृणु ॥७६॥
सर्वपापैर्विनिर्मुक्ता गमिष्यन्ति दिवं ध्रुवं ।
पदे पदेऽश्वमेधानां फलं लब्ध्वा सुनिश्चितम् ॥७७॥

स्कन्द उवाच ।

इत्युक्त्वा सा तदा देवी तिरोधानं ययौ जले ।
कुशिकोऽपि ययौ तत्र आदिलिङ्गो हि यत्र च ॥७८॥
ततो देवाः सहन्धर्व्वाः सिद्धर्षयस्तथापराः ।
समागत्य मुदा सस्नुः कौशिकीषु यथाविधि ॥७९॥
ततः शुम्भनिशुंभौ तौ रक्तवीर्य्योऽपरासुराः ।
तासु स्नात्वा निधिं दत्वा आदिलिङ्गमपूपुजत् ॥८०॥
ईश्वरात्तो वरं लब्ध्वा देवैः सह परस्परं ।
युयुधुः सुचिरं कालं ततो देवा निराकृताः ॥८१॥

समालोक्य जगद्धात्री स्थानभ्रष्टान्सुरांस्तदा ।
तुमुले युधि तान्दैत्यान्निःशेषं निजघान वै ॥८२॥
एतद्धि तुभ्यं कथितं च तस्या
जन्मानि कौशिक्यभिधानवार्त्ता ॥
श्रुत्वेशवक्त्राद्धि पुरा हिमाद्रौ,
भूयः किमस्ति श्रवणाभिलाषः ॥८३॥
इतिश्रीस्कन्दपुराणे हिमवत्खण्डे कौशिक्युद्भवो नाम
चत्वारिंशत्तमोऽध्यायः ॥४०॥

४१ अगस्त्य उवाच ।

कथं शुंभनिशुंभाभ्यां कृतं युद्धं सुरैः समं ।
जित्वा च सकलान्देवान्किमकुर्वंश्च दानवाः ॥१॥
कस्मात्संतोषितोरुद्रो दानवैस्तैर्भृशं तदा ।
रुद्रवरप्रलब्धान्वै कथं देवी जघान तान् ॥२॥
एतद्वार्त्तां त्वयिश्रोतुं पुनर्वाञ्छाम्यहं विभो ।
सर्वज्ञात्मज सेनानी सर्वज्ञोऽसि न संशयः ॥३॥

स्कन्द उवाच ।

शृणु विप्र प्रवक्ष्यामि यद्वृत्तान्तं पुराऽभवत् ।
देवासुरं महद्युद्धं सर्वेषां लोमहर्षणम् ॥४॥
शुम्भस्तथानिशुम्भश्च रक्तबीजो महाबलः ।
कुशिकेन शिवे तप्तं कश्चिन्मुखाद्यशुश्रुवन् ॥५॥
तेपीच्छिरे तपस्तप्तुं सुकठोरं शिवे मुदा ।
कश्यपं समपृच्छंस्ते तपःस्थान महेश्वरम् ॥६॥

कश्यप उवाच ।

गच्छन्तु भोसुराश्चाधोभागे हिमवतोगिरेः ।
तत्रादिलिङ्ग आस्ते वै कौशिक्याः सुतटे भुवि ॥७॥
स्नात्वा लिङ्गं समभ्यर्च्य कौशिक्यां यंयमिप्सितं ।
कामं तं तं लभेयुर्वा गच्छन्तु चेत्स्पृहा च वः ॥८॥

स्कन्द उवाच ।

कश्यपस्य मुखाच्छ्रुत्वा आजग्मुः कौशिकीतटं ।
तस्यां स्नात्वादिलिङ्गन्ते आनर्चुर्भक्तिपूर्वकम् ॥९॥
ततो जेपुश्च मन्त्राणि दशवर्षशतानि ते ।
आविर्भूतस्तदा रुद्रो वरदानाय भक्तिनां ॥१०॥

रुद्र उवाच ।

शुम्भनिशुम्भरक्तौजा वृणुध्वं मयि सांप्रतं ।
यानि वराणि वो मत्तः कांक्षितानि च मानसैः ॥११॥
दास्ये तान्यधुना वो हि युष्माकन्तपसा भृशम् ।
सन्तुष्टोहं च दैत्येन्द्रा जानीयुर्मा हि कामदम् ॥१२॥

दैत्या ऊचुः ।

आदिलिंगाय देवाय आदिरूपेश ते नमः ।
आत्मस्थाय परांगाय आत्मलिंगाय वै नमः ॥१३॥
अज्ञानज्ञानसंज्ञाय ज्ञानाङ्गाय नमो नमः ।
ज्ञानरूपाय रुद्राय ज्ञानदेश नमोऽस्तु ते ॥१४॥
वामदेवाय वीराय वागीश्वराय ते नमः ।
वायुरूपाय भीमाय वागगोचर ते नमः ॥१५॥
ददासि यदि देवेश वरोत्तमान्हि नो विभो ।
देवासुरैः सगन्धर्वैः पुंभिरजेयमवध्यताम् ॥१६॥
सर्वेशत्वं च नो लोकास्तिष्ठन्तु शासनेषु वै ।
एतान्वरान् शिवास्मभ्यं दीयतां भक्तवत्सल ॥१७॥

स्कन्द उवाच ।

ॐमिति च प्रतिश्रुत्य तिरोधानं ययौ शिवः ।
ततस्ते प्रययुर्नाकं रुद्रवरप्रदर्पिताः ॥१८॥
स्वर्गे प्रलुण्ठितं सर्वं निराकृत्यामरान्बलैः ।
युद्धे च बलिभिर्दैत्यैः संप्रहारविशारदैः ॥१९॥
दिव्यवर्षशतं साग्रं स्वर्गे राज्यं चकार वै ।
दानवैः सह सम्यग् वै भृशं शुंभो मुदा मुने ॥२०॥
ततो देवाः सगन्धर्वाः भ्रष्टस्थानाः पराजिताः ।
संमंत्र्य गुरुणा सार्द्धं ब्रह्माणं शरणं ययुः ॥२१॥
निवेदयेन्स्यजाधस्म तेषां चेष्टां प्रकंपिताः ।
ओजोभिस्तच्छरैर्युद्धे बहुव्रणांकिता मुहुः ॥२२॥
समाश्रुत्य च तच्चेष्टां प्रतीकाराय विश्वसृक् ।
तत्क्षणं हि क्षणं दध्यौ समाश्वास्यामरान्मुहुः ॥२३॥

ब्रह्मोवाच ।

मा भीयतां सुराश्चात्र नः प्रतिक्रियते मया ।
गच्छध्वममराः सार्द्धं हिमवंतस्तटोत्तमे ॥२४॥
तत्रामराश्च कौशिक्यां स्नात्वादौ विधिपूर्वकं ।
दुर्गामाराधयंत्वाशु प्रतीकारो भविष्यति ॥२५॥

स्कन्द उवाच ।

इत्युक्त्वा प्रययौ ब्रह्मा त्वरितं चामरैः समं ।
कौशिक्या दक्षिणे तीरे आदिलिंगे महोज्ज्वले ॥२६॥
ततः स्नात्वा सुराः सर्वे कौशिक्यां जयकामतः ।
आदिलिंगं समानर्चुर्भक्त्या च तुष्टुवुर्मुदा ॥२७॥
ततोऽभ्यर्च्य महालिङ्गं देवाः सर्वे ययुस्तटं ।
कौशिक्याः स्तुनये भक्त्या तस्यास्ते त्वरितं तदा ॥२८॥
गत्वा तस्याः समीपन्ते वाङ्मनस्तनुभिर्मुने ।
संहताञ्जलयो भक्त्या कौशिक्यै तुष्टुवुर्भृशम् ॥२९॥

देवा ऊचुः ।

ॐ नमो धर्म्मजायै तेऽम्भोरूपिण्यै नमो नमः ।

द्रवीभूतस्वरूपायै सर्वाघहन्त्र्यै नमो नमः ॥३०॥
व्योमस्थायै नभोदेव्यै वायुरूपे नमोऽस्तु ते।
आपोदेव्यै महादेव्यै तेजोरूपै नमोऽस्तु ते ॥३१॥
ज्योत्स्नायै क्षितिरूपायै वीजरूपे नमोऽस्तु ते।
रसायै रसरूपायै रसप्रदे नमोऽस्तु ते ॥३२॥
औषधायै च भक्ष्यात्मन्भोग्यायै ते नमो नमः।
भोक्त्रे च भक्ष्यरूपायै तोषकायै नमो नमः ॥३३॥
अन्तःस्थाने च देहानां बुद्धिरूपे नमोऽस्तु ते।
क्रोधात्मने मनोदेव्यै चित्तरूपे नमोऽस्तु ते ॥३४॥
जीविनां जीवनोद्भूतकर्त्रे जीवेश्वरे नमः।
जन्मदायै च सर्वेषां जञ्जालजालहे नमः ॥३५॥
ध्यानध्यायितरूपायै ध्यातव्यायै नमो नमः।
अरूपायै सरूपायै जलमूर्त्यै नमोऽस्तु ते ॥३६॥
रक्ष रक्ष जगद्धात्रि संकटस्थान्स्वसेवकान्।
दानवैरर्दितानस्मान्भ्रष्टांस्तेनघे शरणागतान् ॥३७॥
स्कन्द उवाच।
इत्याकर्ण्य स्तवं तेषां भयगद्गदविह्वलं।
निर्ययौ सा तदा देवी कौशिक्याश्च सवाहना ॥३८॥
अष्टादशभुजैर्युक्तां सर्वाभरणभूषितां।
वरदां सर्वलोकानां ददृशुस्तां सुरास्तदा ॥३९॥
ततोभ्यर्च्चर्य हि तां देवीं नेमुरष्टकलेवरैः।
परिक्रमंश्च भक्त्या वै स्तुतिभिश्च पुनः पुनः ॥४०॥
देव्युवाच।
मात्रास्यन्तां सुरास्तेभ्यः स्वल्पौजोभ्यः कदापि न।
प्रतीकारं करिष्यामि युष्मदुद्धारणाय वै ॥४१॥
दृप्ता रुद्रवलोन्मत्ताः मच्छस्त्राग्निदिधीपवः।
इदानीं तान् हनिष्यामि भुंजध्वं स्वर्यथासुखं ॥४२॥
स्कन्द उवाच।
एतस्मिन्समये चारौ आजग्मतुर्हिमाचले।
शुंभनिशुम्भयोर्भृत्यौ अन्वेपयन्सुरान् क्षितौ ॥४३॥
ददर्शतुश्च तां देवीमष्टादशैर्भुजैर्युतां।
सिंहस्थां सेवितां देवैर्देवसैन्यैश्च संवृताम् ॥४४॥
भाषयन्तीं मिथो देवैस्तेभ्यश्च ददतीं वरान्।
स्तोत्रैरभयदां तुष्टां कौशिक्याश्चान्तिकाचले ॥४५॥
आजग्मतुश्च तांदृष्ट्वा चण्डमुण्डौ च तत्र वै।
यत्र शुंभनिशुंभौ तौ स्वर्गं क्षिप्रं महाबलौ ॥४६॥
निवेदतः स्म तद्वार्त्तां ताभ्यां तौ च यथोद्भवां।
प्रणिपत्यासुरश्रेष्ठौ सभायां संस्थितौ मुदा ॥४७॥
चण्डमुण्डावूचतुः।
दैत्येश्वर महाराज त्वया वां प्रेपितौ भुवि।
अन्वेषणाय देवान् हि तद्वार्त्तां शृणु सांप्रतम् ॥४८॥
देवानां सैन्यसंभूय कौशिक्याश्च तटाचले।
तिष्ठन्ति स्तोत्रयन्देवीं सिंहस्थां हि शुभाननाम् ॥४९॥
अत्यन्तरूपसंपन्नां बह्वायुधभुजैर्युतां।
देवैः परिवृतां तेभ्यो भाषयन्तीं मिथोभयम् ॥५०॥
स्कन्द उवाच
श्रुत्वा शुम्भश्च तद्वार्त्तां स्वचारयोर्मुखाच्च्युतां।
द्रुतमिमेष तां द्रष्टुं योद्धुं तैः सह तत्परः ॥५१॥
व्याचष्टे प्रेषितुं शुंभः सुग्रीवं तत्र दानवं।
दूतं च त्वरितं देवीमानयितुं स्वमन्तिकम् ॥५२॥
शुंभ उवाच।
सुग्रीव तत्र गच्छ त्वं देवी यत्र प्रतिष्ठति।
मद्वचो वद सम्यक् वै तस्यै मधुरयन्मुदा ॥५३॥
सुन्दरी चासि देवि त्वं सर्वलोकेषु नः श्रुतम्।
अतोऽहं द्रष्टुकामोस्मि त्वमत्रागच्छ हि द्रुतम् ॥५४॥
एवं तां सांत्वयन् क्षिप्रं यथागमिष्यति द्रुतम्।
करोतु वै तथा कार्यं रत्नानि लोभयंश्च ताम् ॥५५॥
नागमिष्यति चेत्सात्र देवसैन्यप्रदर्पिता।
विमथ्य तरसा सैन्यं बलात्तामानयासुर ॥५६॥
दशकोटिरथैर्युक्तः कोटिकोटिपदातिभिः।
सनह्य कवचैर्योद्धुं गच्छ सुग्रीव सत्वरम् ॥५७॥
स्कन्द उवाच।
ततश्च तत्र सुग्रीवो बहुकोटिबलैर्वृतः।
जगाम त्वरितं विप्र कौशिक्यास्तटपर्वतम् ॥५८॥
हिमवतः सुकूटे वै चन्द्रशृङ्गे महोज्ज्वले।
उत्तरे धीरकौशिक्या देवसैन्यं ददर्श सः ॥५९॥
ददर्श देवसैन्यं स गर्ज्जयन्तमितस्ततः।
सिंहोपरि स्थितां देवीं देवसैन्यैः समावृताम् ॥६०॥
तत्र गत्वाशु सुग्रीवः शरवृष्टिं ववर्ष च।
सैन्योपरि च देवानां ज[illegible]धारामिवाम्बुभृत् ॥६१॥
अभूद्युद्धं महाघोरं तुमुलं लोमहर्षणम्।
देवानां दानवानां च परस्परं जयैषिणाम् ॥६२॥
रथान्रथैश्च जघ्नुस्ते पदातींश्च पदातयः।
वाहनैर्वाहनान् युद्धे शस्त्रैः शस्त्रान्परस्परम् ॥६३॥
अंधीभूता दिशस्तत्र शरजालैः समंततः।
नाद्राक्षुः शरजालानि शस्त्राक्षेपाणि ते तथा ॥६४॥
भूयो जघान सुग्रीवः शरैः खड्गप्रहारकैः।
विबुधानां सैन्यमध्ये गच्छन्रथेन संयुगे ॥६५॥
दुद्रुवुर्देवसैन्यानि हिमवद्गिरिगह्वरे।
तच्छरैरर्दितान्याशु त्यक्त्वा युद्धं समन्ततः ॥६६॥

ततः प्राहासुरो देवीं गत्वा तदन्तिकं लघु ।
शस्त्रास्त्राणि च संत्यज्य सुग्रीवो मधुरोक्तिभिः ॥६७॥
सुग्रीव उवाच ।
अत्राहं प्रेषितो देवि शुंभेन दैत्यवर्चसा ।
शृणु तेन यदुक्तं मे तव हेतोर्वदामि ते ॥६८॥
सुरासुरप्रवन्द्योऽहं त्रैलोक्यक्षोभकस्तथा ।
दैत्यराजाभिधानं मे सर्वलोकैर्नमस्कृतः ॥६९॥
देवाः सर्वे नमस्यन्ति नानोपहारपाणयः ।
मयि ते भक्तिभिर्नित्यं दिग्भ्य आगत्य भीरवः ॥७०॥
सवासवाश्च दिक्पाला बलेन कलहीकृताः ॥७१॥
विमथ्य तरसा देवान्(तीव्रान्)स्वर्गेराज्यं कृतोस्मि वै ।
त्रैलोक्यसुन्दरी देवी त्वमसीति श्रुतं जनैः ।
गुणैः शीलैस्तथा रूपैर्मम योग्यमिति प्रिये ॥७२॥
स्त्रीरत्नं त्वमतो ज्ञात्वा दूतोऽहि प्रेषितो मया ।
तव हेतोर्द्रुतं देवि भक्त्यागच्छात्र चेति वै ॥७३॥
एतानि च महार्हाणि रत्नानि विविधानि च ।
त्वं गृहाण सुखं देवि भूषणानि यथेप्सितम् ॥७४॥
तानि संगृह्य हे देवि मया सह प्रगम्यताम् ।
गत्वा तत्रासुराणां त्वं वन्दनीया भविष्यसि ॥७५॥
देव्युवाच ।
न वक्तव्यं त्वया दूत मह्यं मिथ्योदितं वचः ।
मिथ्यां वदति यो मेऽग्रे मूढो भवेत्स नारकी ॥७६॥
न प्रेक्षे तानि रत्नानि मूढ त्वं यानि तानि वै ।
सर्वरत्नमयं गेहं सहस्रशं च विद्यते ॥७७॥
त्रैलोक्याधिपतिर्दैत्यो यदि शुंभोऽभवेत्प्रभुः ।
तथापि न गमिष्यामि तत्र दूत कदापि च ॥७८॥
प्रतिज्ञा च कृता दूत पुरा शृणु मयेति च ।
मां जयिष्यति यो युद्धे भविष्यति स मे पतिः ॥७९॥
युद्धं करोतु शुंभोत्र समागत्य मया सह ।
जित्वा मामचिरेणासौ विवाहयतु च स्वयम् ॥८०॥
एतद्वार्ता समादाय गत्वा तस्मै निवेद्यतां ।
यदर्थमागतो हि त्वं तज्ज्ञात्वाऽशु प्रगम्यताम् ॥८१॥
सुग्रीव उवाच ।
अहो मूढतरा बुद्धिः संभूता त्वयि मानिनि ।
यया प्रतारिता त्वं वै सर्वसौभाग्यशर्म्मसु ॥८२॥
एकेन मंत्रिणा तस्य इन्द्रादयो मया युधि ।
शस्त्रास्त्रक्षेपणैरद्रेः पलायिताश्च गह्वरे ॥८३॥
नहि दृष्टं त्वया देवि असह्यं युद्धमत्र तैः ।
ससैन्येन च शुंभेन शक्तो योद्धुं समं च कः ॥८४॥
नागच्छस्यादरेण त्वं पश्चाद्बलाद्गमिष्यसि ।
यदागच्छति शुंभोऽत्र कस्त्राता ते वद ध्रुवम् ॥८५॥
स्कन्द उवाच ।
इत्युक्त्वा च ततस्तस्यै नाकं दूतो जगाम सः ।
तद्वार्ता कथयामास शुंभाय तच्च चेष्टितम् ॥८६॥
समाकर्ण्य तदा शुम्भस्तद्वृत्तान्तं स्वदूततः ।
चुकोप च भृशं तस्मै तत्र योद्धुमियेष च ॥८७॥
तां प्रयुद्ध्य समानेतुं शुंभश्च स्वांतिकं मुने ।
आज्ञापयत्तदा क्रोधी सैन्येभ्यः संसदि ध्रुवम् ॥८८॥
शुंभ उवाच ।
भो भो दैत्या महावीरा आरुह्यतां रथेषु वै ।
सनह्यतां हि कवचैर्नानाशस्त्रास्त्रसंयुताः ॥८९॥
निर्गच्छध्वं मयासार्द्धं नाकलोकात्सवाहनाः ।
हिमवतस्त्वधोभागे कौशिक्यास्तटपर्वते ॥९०॥
यत्र तिष्ठति सा देवी बहुमानपुरस्सरा ।
कृत्वा युद्धं च तां बध्वा आनयामो वयं त्विह ॥९१॥
स्कन्द उवाच ।
समादिश्याशु सैन्येभ्यो निर्य्ययौ स रथेन वै ।
निशुंभो रक्तवीजश्च चण्डमुण्डौ तथापरे ॥९२॥
जाम्बूनदमयेनाशु रथेन सूर्य्यवर्चसा ।
धरण्यां शुशुभे शुंभो ज्येष्ठे मासि रविर्यथा ॥९३॥
सुरारिसैन्यैः सहसा च सार्द्धं
सकौशिकीतोरगिरौ हि शुंभः ।
स्थिता जगाम द्विज यत्र देवी—
प्रपूरित—क्रोध—विमूर्च्छितोऽसौ ॥९४॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे गौरीव्रते कौशिकी माहात्म्ये शुंभनिशुंभनिर्याणं नामैकचत्वारिंशोऽध्यायः ॥४१॥

—❀❀❀—

४२ स्कन्द उवाच ।
शुंभो ददर्श तां देवीं कुशवदद्रिशेखरे ।
दिव्याननां च सिंहस्थां चैकाकिनीं महोज्ज्वलाम् ॥१॥
तत्रागत्य द्रुतं शुंभो यत्रास्तेऽसुरनाशिनी ।
आज्ञापयत्तदा भृत्यौ चण्डमुण्डौ महाबलौ ॥२॥
शुंभ उवाच ।
चण्डमुण्डौ हि तां देवीं बध्वा चानय तां लघु ।
नागपाशं समाकृष्य विभीषयंश्च मानिनीम् ॥३॥
निशुंभ रक्तवीज त्वं कालकेयाः ससैन्यकाः ।
गच्छध्वं तत्समीपं वै आगच्छामि ततस्त्वहम् ॥४॥

स्कन्द उवाच ।

तदाज्ञां च समादाय तद्वाहिन्यः समंततः ।
वाद्यकोलाहलैस्तीव्रं तां देवीमभिदुद्रुवुः ॥५॥
चण्डमुण्डौ ततो दैत्यौ देव्याश्चोपरि सत्वरं ।
चिक्षिपतुरहेः पाशं गत्वा तदन्तिकं बलात् ॥६॥
दृष्ट्वा देवी तदा दैत्यौ नागपाशसमीरितौ ।
कोपात्करालवक्त्राऽभूद्रक्तास्या रक्तलोचना ॥७॥
तस्याः प्रनिःसृताद्देहादष्टौ च मातृकास्तदा ।
दैत्यान्समुद्यता हन्तुं स्वस्वशस्त्रास्त्रसंयुताः ॥८॥
हन्तुं समुद्यतां दृष्ट्वा चण्डमुण्डौ च दानवान् ।
प्रेषयामास तु योद्धुं ज्यायां संधाय वै शरान् ॥९॥
शरवृष्टिं ववर्षाजौ तासामुपरि सत्वरं ।
ववर्षुश्च पुनः सैन्या वाद्यान्प्रवादयन्भृशम् ॥१०॥
अन्धीभूता दिशः सर्वाः कोलाहलमभूत्पुनः ।
कृष्णा नक्तमिवासारैर्व्यलक्षत दिशस्तदा ॥११॥
ततस्ता मातृकाः सर्वाः प्रेक्ष्य चेष्टाः सुरद्विषां ।
ववर्षुः शरवर्षाणि सौरास्त्रैर्द्योतयन्दिशः ॥१२॥
ततो युद्धमभूत्तीव्रं सर्वलोकभयंकरम् ।
मातृकाः दैत्ययोर्द्वन्द्वं परस्परजयैषिणोः ॥१३॥
चण्डमुण्डौ समं सैन्यैस्तत्र दुद्रुवतुः पुनः ।
रथस्थितौ महादैत्यौ दशकोटिरथैर्वृतौ ॥१४॥
जघ्नुस्ते ताश्च बाणौघैः शस्त्रास्त्रैश्च समंततः ।
आग्नेयवारुणास्त्रैश्च मायास्त्रैरंधकारकैः ॥१५॥
भूयो जघ्नुश्च तत्सैन्या युगपत्ताः समं ततः ।
निनदन् सिंहनादांश्च उद्दिश्य मातृकाः पुनः ॥१६॥
तत्र नादो भृशं चाभूद्गजाश्वहेषितोद्भवम् ।
वाद्यानां रथनेमीनां योद्धानां सर्वभीषणम् ॥१७॥
ततश्च मातृकाः सर्वा अमर्षैश्च प्रपूरिताः ।
स्वैः स्वैः शस्त्रैस्तथास्त्रैश्च जघ्नुर्दैत्यचमूर्भृशम् ॥१८॥
ततः शुंभो निशुम्भश्च रक्तबीजो महासुरः ।
अर्दयन्तीः स्वकान्सैन्यान्ददृशुर्मातृका भृशम् ॥१९॥
बहुकोटिरथैः युक्ता दृष्ट्वा ताश्चाभिदुद्रुवुः ।
वर्षयन्शरजालांस्ते घातयन्त इतस्ततः ॥२०॥
प्रेतसंस्था च चामुण्डा समुत्प्लुत्य युयोध सा ।
सवाहना सुरान्युद्धे जघान बहुशोऽसिना ॥२१॥
चामुण्डा भीषणास्या च चण्डमुण्डौ निपातितौ ।
रथात्रथेन संमर्द्य जघास रथिनोऽसुरान् ॥२२॥
समादाय कराभ्यां सा वाहान्रथांश्च दानवान् ।
कोटिकोटिपदातींश्च तदा चिक्षेप तान्मुखे ॥२३॥
माहेश्वरी त्रिशूलेन वृषारूढा च सत्वरा ।
कोटिकोटिं जघानाशु चक्रं प्रक्षिप्य सत्वरम् ॥२४॥
कौमारी च मयूरस्था शक्त्या जघान दानवान् ।
शतकोटीन् सवाहांश्च शक्तिं प्रक्षेपयन्मुहुः ॥२५॥
इन्द्राणी च गजारूढा वज्रेणाजौ जघान च ।
मुहुः प्रक्षेपयन्वज्रं शतकोटींश्च दानवान् ॥२६॥
वाराही तुण्डघातेन दानवान्महिषस्थिता ।
मुहुः प्रक्षेपयंश्चक्रं षष्टीकोटिं जघान च ॥२७॥
नारसिंही च चक्रेण दैत्यान् सिंहस्थगामिनी ।
नाशयामास तान्सर्वान् पंचाशत्कोटिदानवान् ॥२८॥
चंडे मुण्डे निपाते च रक्तबीजो महासुरः ।
दृष्ट्वा प्रमर्दितान्सैन्यान् चुकोप च भृशं मुने ॥२९॥
भर्त्सयंश्च स्वकं सैन्यमभिदुद्राव तांस्तदा ।
रथादवततराशु युद्धाय विरथो भुवि ॥३०॥
युयुधुश्च ततो भूयो मातृकाभिश्च दानवाः ।
नादयन् सिंहनादां स्ते वाद्यान् प्रवादयन्मुहुः ॥३१॥
रक्तबीजो जघानाशु आकर्णोद्धृतपत्रिभिः ।
सर्वांश्च मातृकास्तूर्णं सहस्रैश्च पृथक् पृथक् ॥३२॥
ततश्च मातृकाः सर्वा जघ्नुस्तान् युगपत्पुनः ।
विहाय दानवान् जघ्नू रक्तवीजं समन्ततः ॥३३॥
ततश्च सुस्रुवू रक्तास्तद्देहात्सततं मुने ।
रक्तबीजो बभौ तीव्रं माधवे किंशुको यथा ॥३४॥
यावन्तः पतितास्तस्य रक्तबिन्दून्कलेवरात् ।
तावंतो दानवा जाताः पांशुसंख्योद्भवा मुने ॥३५॥
ते युयुधुः समन्ताभी रक्तबीजाश्च सायुधाः ।
तानपि मातृका जघ्नुः शस्त्रास्त्रैश्च मुहुर्मुहुः ॥३६॥
रक्तबीजाः पुनर्जाताः कोटिकोटिसहस्रशः ।
ते युयुधः समन्ताभिर्जघ्नुर्मिथो भृशं पुनः ॥३७॥
तैरर्दिता भयं प्राप्ताः सर्वाश्च मातृका भृशं ।
दृष्ट्वा दैत्याञ्जगद्व्याप्तान्पांशुरक्तोद्भवान्मुने ॥३८॥
तद्दैत्यैरर्दिताः सर्वा मातृकाश्च भयावहाः ।
विहाय समितिं क्षिप्रं जग्मुर्देव्यास्तदन्तिकम् ॥३९॥
ततः पलायमानास्ता देवीमातृगणास्तदा ।
दृष्ट्वोवाच च चामुण्डां सत्वरं च घटोद्भव ॥४०॥

देव्युवाच ।

विस्तारयाशु जिह्वां त्वं रसां व्याप्य चतुर्दिशं ।
व्यात्तास्या भव चामुण्डे मा कार्य्योपेक्ष्यतेचिरम् ॥४१॥
ये युध्यन्त्यसुरास्तस्यां हनिष्यामि च तान्ध्रुवम् ।
पतितान् पिब तद्रक्तास्ततः सर्वो विनश्यति ॥४२॥

स्कन्द उवाच ।

ततो घटज चामुण्डा जिह्वां तस्तार भूतले ।

तस्याज्ञां च समादाय व्याप्य योधक्षितिं तदा ॥४३॥
ततश्च युयुधुर्दैत्यैः समं हि मातृका भृशं ।
जघ्नुस्ता मातृकाः शस्त्रै रक्तबीजान्समन्ततः ॥४४॥
रक्तबीजं जघानाशु दुर्गा दुर्गार्त्तिनाशिनी ।
अपीपिबच्च चामुण्डा रक्तबीजक्षतोद्भवान् ॥४५॥
नीरक्तं तं समालोक्य रणमध्ये व्यवस्थितं ।
देवी चिच्छेद खड्गेन रक्तबीजस्य कन्धरम् ॥४६॥
हाहाकारो ह्यभूच्छब्दो योधानां चावलोकिनां ।
दृष्ट्वा निपातितं देव्या व्यसुं तत्र क्षितौ वरे ॥४७॥
रक्तबीजे हते दैत्ये सर्वदेवभयंकरे ।
दुद्राव तद्दिशः सैन्यो भिन्नसेतुरिवार्णवः ॥४८॥
क्रोधेन मूर्च्छितः क्षिप्रं निशुंभोऽपि महाबली ।
अभिदुद्राव तां देवीं रथेन त्वरितं ततः ॥४९॥
निशुंभोपि जघानाशु सर्वास्ताश्च पृथक् पृथक् ।
तामुद्दिश्य शरैस्तीक्ष्णैः सहस्रशः समन्ततः ॥५०॥
ततो देवी शरेणाशु निशुंभं च रथस्थितं ।
जघान तमुरोदेशे सोऽप्यपतद्रथाद्भुवि ॥५१॥
उत्थाय च रणस्थानान्निशुंभो निःश्वसन्मुहुः ।
मातृकाः समभिद्रुत्य खड्गेनाशु जघान ताम् ॥५२॥
ततो देवी च तं प्रेक्ष्य शतसूर्य्यस्य वर्च्चसा ।
खड्गेन शितधारेण जघान तस्य कन्धरम् ॥५३॥
स पपात व्यसुर्भूमौ तं प्रेक्ष्य चासुराः पुनः ।
तामभिद्रुत्य जघ्नुस्ते युगपत्पत्रिभिर्भृशम् ॥५४॥
तान्बिभेद च भूयः सा खड्गेनापादमस्तकं ।
द्विधा द्विधात्वभूवंस्ते पतिता भुवि सर्वशः ।
रसातलात्पुनर्दैत्याश्चोत्थाय छिन्नविग्रहाः ॥५५॥
सुवासो रज्जुभिर्बद्ध्वा युयुधुश्च पुनः क्वचित् ।
क्वचिच्छिरांसि चादाय बद्ध्वागले पुनः क्षितौ ॥५६॥
युयुधुः खड्गहस्तास्ते कबंधाः छिन्नकन्धराः ।
ततो दुर्गा पुनस्तेषां योधानां सायुधान्भुजान् ॥५७॥
भल्लैश्चिच्छेद तूर्णंच वज्रेणैव यथा द्रुमाः ।
तेषां पाणी रसायां च छिन्नमूला द्रुमा इव ॥५८॥
ततश्चालोक्य तान् शुंभो देव्यै चोवाच सत्वरं ॥५९॥

शुंभ उवाच ।

मा गर्वं वहसेऽत्र त्वं हत्वा क्षुद्रांश्च दानवान् ।
परबलान्समाश्रित्य बहुमानिनि युद्ध्यसे ॥६०॥
स्त्रिया सार्द्धं कथं चेति योद्धव्यं मे उपस्थितं ।
धिगिति च वदिष्यन्ति लोका मह्यं मुहुर्मुहुः ॥६१॥
त्वं हनिष्यसि चेन्मां वा त्वां हनिष्याम्यहं यदि ।
नवरं त्विह संप्राप्येनानिति लोककुत्सितम् ॥६२॥
स्त्रिया हतं च मां लोका वदिष्यन्तीति धिक्च मे ।
मया त्वं हन्यते चेद्धाकुत्सितं च तथाविधम् ॥६३॥
तथापि योधयिष्येहं त्वया सहात्र मानिनि ।
लोकास्तुवन्तु निन्दन्तु नप्रेक्षे वापराङ्मुखम् ॥६४॥
उद्धरिष्यामि तद्वैरं भ्रातृमंत्रिहतोद्भव ।
बध्वा त्वामानयिष्ये वै हत्वा वा युधि संशये ॥६५॥

दुर्गोवाच ।

रे रे दैत्य महामूढ कथयसे कथान् बहून् ।
दर्शयामि बलं तेऽद्य शूरा न बहुभाषिणः ॥६६॥
मां मा जानीहि मूढत्वं केवलं स्त्रीमिमां तनुं ।
कालेऽमुना च सर्वं वै हनिष्यामि सृजामि च ॥६७॥
अमूश्च मातृकाः सर्वाः मदंशा मूढ नापराः ।
आहृत्य ता इदानीं त्वां हनिष्येहं युधि ध्रुवम् ॥६८॥

स्कन्द उवाच ।

ततस्ता धीरदेव्यङ्गे यथा प्रनिःसृताः पुरा ।
विलीनाश्च बभूवुर्वै सर्वलोकं प्रदर्शयन् ॥६९॥
ततो युद्धमभूद्भूयः सर्वलोकभयंकरं ।
गिरिजाशुंभयोस्तीव्रं परस्परजयैषिणोः ॥७०॥
ततः शुंभो बहून्बाणानाधाय धनुषि ध्रुवं ।
ववर्ष शरवर्षं च नभःकृष्णे यथा निशि ॥७१॥
अंधीभूता दिशः सर्वा अभूवन् गोचराद्बहिः ।
रुद्रक्रोधाच्च लोकालां कल्पान्ते च यथा जगत् ॥७२॥
ततो देवी समुद्धूय वायव्यास्त्रैश्च तच्छरान् ।
प्रोद्योतयद्दिशो भूयः सौरबाणैः समन्ततः ॥७३॥
जघान तमुरोदेशे देवी तीक्ष्णैः शरैर्भृशं ।
सारथिं च शतैर्भित्वा शतैःशतैश्च वाहनान् ॥७४॥
क्रोधेन मूर्च्छितः शुंभो देवीबाणैः प्रपीडितः ।
अक्षेपयद्देहः पापान्देवी बन्धाय सत्वरम् ॥७५॥
प्रबध्यतां च पाशैः स तीक्ष्णजिह्वैर्दृढं तदा ।
अवताय्र्य रथात्तूर्णं व्योम समानयत्स तां ॥७६॥
देवी स्वबन्धनं प्रेक्ष्य नागपाशैर्नभस्थले ।
आनयंतं तदा शुंभं पाशांश्चिच्छेद चासिना ॥७७॥
तयोर्युद्धमभूद्व्योम्नि दिव्यलोकभयप्रदं ।
शस्त्रास्त्रैः संप्रहारैश्च निराधारे मुहुर्भृशम् ॥७८॥
मुष्टिभिश्च तलैश्चैव मल्लयुद्धं च चक्रतुः ।
दिव्यवर्षशतं व्याप्य परस्परजयैषिणौ ॥७९॥
ततो देवी त्रिशूलेन भित्वा चोरसि तस्य च ।
तंशतं योजनाद्व्योम्नो वसुधायामपातयत् ॥८०॥
कंपयन्मेदिनीं सर्वां सशैलवनकाननां ।
व्यसुर्जगाम पातालं शुंभो भृत्यैः समन्तदा ॥८१॥

सिंहश्च दानवान्शेषान्नखैस्तलैरचूर्णयत् ।
पातालमपि ते जग्मुर्लांगूलेनाहताः क्वचित् ॥८२॥
ततः काकोभुशुण्डी च अवतीर्य्याद्रिशेखरात् ।
अभूभुजद्धितान् दैत्यान्पतितान्हि क्षितौ शवान् ॥८३॥
ततः कालान्तरे धीमन् विमुक्तास्ते च दानवाः ।
देव्याः शस्त्रास्त्रपूताङ्गास्तस्यां लिल्युर्हि सर्वशः ॥८४॥
ततो देवाः सगन्धर्वाः सिद्धर्षयो मुदान्विताः ।
शैलगुहात्समाजग्मुर्यत्र देवी प्रतिष्ठति ॥८५॥
तुष्टुवुश्च ततो देवाः देवीं सिंहोपरि स्थिताम् ।
आधाय स्वांजलिं भक्त्या परिक्रम्य च मूर्द्धसु ॥८६॥

देवा ऊचुः ।

ॐ नमः प्रणवरूपिण्यै मातृकायै नमो नमः ।
सर्वेषामात्मरूपिण्यै मात्रायै ते नमो नमः ॥८७॥
आत्मस्थायै च सर्वेषामात्मने वै नमो नमः ।
चिद्रूपिण्यै हृदिस्थायै बुद्धिरूपे नमो नमः ॥८८॥
अभिमानस्वरूपिण्यै सुखात्मने नमो नमः ।
नम आनन्दरूपिण्यै मोक्षरूपे नमोऽस्तु ते ॥८९॥
प्रज्ञायै ज्ञानरूपिण्यै ज्ञानाज्ञानात्मने नमः ।
विवेकिन्यै च भद्रायै चैतन्यायै नमो नमः ॥९०॥
नमो देव्यै महादेव्यै मङ्गलायै नमो नमः ।
कात्यायन्यै कलाधात्र्यै सर्वपापहरे नमः ॥९१॥
मायायै लोकधात्र्यै ते लोकरंजनकारिणि ।
सर्वपापहरे देवि सर्वदैत्यद्रुहे नमः ॥९२॥
यद्रक्षिता वयं देवि घोरदैत्यबलोद्धतात् ।
असुरांस्तान्निहन्याशु तस्यै तुभ्यं नमो नमः ॥९३॥
स्थानभ्रष्टा वयं भूयः शुंभासुराद्भयंकरात् ।
निहत्य रक्षितास्तुभ्यं तस्यै देव्यै नमो नमः ॥९४॥

देव्युवाच ।

स्तवैः सन्तोषिताहं वो देवा भक्तिभिरीरितैः ।
वाक्कायमानसोद्भूतैः स्वात्मोद्धारणहेतुभिः ॥९५॥
गच्छध्वं देवता यूयं स्वस्वं स्थानं सुखं मुदा ।
भुञ्जध्वं त्रिदिवे राज्यं शत्रुतो विगतज्वराः ॥९६॥

स्कन्द उवाच ।

प्रणम्य गिरिजां देवीमष्टाङ्गैर्दण्डवत्क्षितौ ।
गन्तुं प्रतस्थिरे स्वर्गं देवा हर्षप्रपूरिताः ॥९७॥
हत्वा दैत्यांस्ततो देवी देवान्प्रस्थाप्य वै दिवं ।
तत्पूर्वोत्तरभागे च स्वयं जगाम पर्वते ॥९८॥
देवाश्च नाके प्रसभं च जग्मु-
निष्कण्टकास्ते सहिरण्यगर्भाः ॥
तत्रापि राज्यं सुचिरं च चक्रु-
र्देव्याः प्रसादात्समुदान्विन्ता वै ॥९९॥

इतिश्रीस्कन्दपुराणे हिमवत्खंडे गौरीव्रते कौशिकी-
माहात्म्ये शुंभनिशुंभवधो नाम द्विचत्वा-
रिंशोऽध्यायः ॥४२॥

८३

वराह उवाच ।

कामकूटे गिरिश्रेष्ठे सा देवी च प्रतिष्ठति ।
तस्मात्तस्यै हि विख्याता कामिनीति सुरासुरैः ॥१॥
कामशृंगे च हेमाढ्ये सहस्रतीर्थशोभिते ।
राजते तत्र सा नित्यं सिद्धगन्धर्वसेविता ॥२॥
तत्प्रान्तरेषु तीर्थेषु संगमेषु नरोत्तमाः ।
स्नात्वा सम्यक् दिवं यान्ति बहुपापात्मनोपि वा ॥३॥
तेषु जप्तं हुतं दत्तं पितृभ्यो दत्तमक्षयम् ।
उपोष्यमर्चनं स्तोत्रं तत्सर्वमक्षय भवेत् ॥४॥
स्नात्वा कामाचलं दृष्ट्वा देवीं संप्रेक्ष्य यत्नतः ।
सर्वपापैर्विनिर्मुक्तः स याति परमां गतिम् ॥५॥
यं यं कामति मर्त्यो यः शीघ्रं तं तं फलं मुने ।
संप्राप्नोत्यचिरं लोके तं तं देव्याः प्रसादतः ॥६॥
भूयो वक्ष्ये च कौशिक्याः फलान्यत्र घटोद्भव ।
द्रवीभूताद्रिजायाश्च समाहितमनाः शृणु ॥७॥
स्नानं कुर्वन्ति ये भक्त्या कौशिक्यां यासु कासु च ।
सर्वपापैर्विनिर्मुक्तास्ते यान्ति परमां गतिम् ॥८॥
कुष्ठवान्मुच्यते कुष्टात्पातकिनोऽपि पातकैः ।
अभक्ष्यभक्षकश्चैव अगम्यागमनोपि वा ॥९॥
स्वर्णस्तेयीसुरापो वा परद्रव्यहृतोपि वा ।
मुच्यते सर्वपापेभ्यः स्नानात्तासु न संशयः ॥१०॥
असाध्यं साधयेत्स्नानादपुत्रो लभते सुतम् ।
दरिद्रो लभते द्रव्यं कन्यार्थी लभते प्रियाम् ॥११॥
मोक्षार्थी लभते मोक्षं स्नानाद्वोभ्यं लभेन्नरः ।
सार्वभौमार्थिनः स्नानाद्भविष्यन्ति धनेश्वराः ॥१२॥
या काचिदबला स्नानं कौशिक्यां सुकरोति वै ।
भ्रूणघ्नी च दिवं याति सर्वपापैर्विवर्जिता ॥१३॥
दुर्भगापि भवेत्स्नानात्सर्वसौभागिनी क्षितौ ।
विधवा सधवा नित्यं चिरं जीवति तत्पतिः ॥१४॥
प्राप्नोति च सुतान्वन्ध्या स्नानात्पतिप्रिया भवेत् ।
सुन्दरी च भवेत्स्नानात्कुरूपापि च सर्वदा ॥१५॥
कौशिक्यां कुरुते श्राद्धं पितृभ्यो भक्तियुङ्नरः ।
पितॄनुद्धृत्य सप्तत्रीन् पितृलोके महीयते ॥१६॥

दत्तं हुतं च कौशिक्यां जप्तं समर्च्चितं तथा ।
उपवासं च धर्म्मं च तत्सर्वमक्षयं स्मृतम् ॥१७॥
मृकण्डोश्च सुतो विप्रः पितॄन्सन्तर्प्य सन्ततम् ।
श्राद्धं चकार भक्त्या वै कौशिक्यां च पुरा मुने ॥१८॥
तत्पितरः समागत्य व्योम्नश्च तत्तटे मुदा ।
पिण्डैस्तिलोदकैस्तृप्तास्तस्मै प्रददुराशिषम् ॥१९॥

पितर ऊचुः ।

यस्मात्तिलोदकादानाद्वयं तृप्ताश्च पिंडतः ।
चिरंजीव्यास्त्वमद्यादिपुत्रास्मद्भक्तिसंयुतात् ॥२०॥
मा त्वया म्रियतां पुत्र वहुसर्वयुगेष्वपि ।
कल्पान्ते वत्स वै त्वं हि हरौ लीनो भविष्यसि ॥२१॥

स्कन्द उवाच ।

दत्वेति पितरस्तस्य मार्कण्डेयाय वै वरं ।
अंतर्द्धानं ययुर्व्योम्नि तृप्ताः पिण्डतिलोदकैः ॥२२॥
मार्कण्डेयो हि चाद्यापि चिरं जीवति विज्वरः ।
कौशिक्यां पिण्डदानाद्धि पितॄणां च प्रसादतः ॥२३॥
सर्वासां संगमेन्योन्यं वाञ्छितार्थफलप्रदे ।
पर्वसु स्नानमात्रेण कुलकोटिं समुद्धरेत् ॥२४॥
सर्वपापैर्विनिर्मुक्तः परिवारैः समन्वितः ।
कोट्यर्क्काभविमानस्थः स्नानाद्याति परां गतिम् ॥२५॥
अथाहं च प्रवक्ष्यामि कौशिकीनां पृथक् पृथक् ।
फलानि च तिथींश्चैव यस्मात्फलानि लभ्यते ॥२६॥
हरित्कान्त्याः प्रियायां च चतुर्दश्यान्तिथौ मुने ।
विशेषेण समास्नाव्यं सर्वफलप्रलब्धये ॥२७॥
पीतवाहाप्रियायां च अमावास्यां तिथौ नरैः ।
स्नातव्यं विधिवद्भक्त्या भुक्तिकामप्रलब्धये ॥२८॥
ताम्रकान्त्याः प्रियायां च अष्टम्यां च तिथौ पुनः ।
समास्नव्यं मुदा भक्त्या सर्वसौभाग्यलब्धये ॥२९॥
दुग्धकांतिप्रियायां च नवम्यां च तिथौ मुने ।
स्नातव्यं संततं भक्त्या सौन्दर्य्यस्वर्गलब्धये ॥३०॥
अमृतवाहिनीनद्याः प्रियायां हि तिथौ तथा ।
एकादश्यां समास्नव्यं वैकुण्ठलब्धये सुखम् ॥३१॥
कृष्णकान्त्याः प्रियायां च द्वादश्यां हि तिथौ मुने ।
स्नातव्यं भक्तितः स्वर्गं सार्वभौमफलाप्तये ॥३२॥
व्योमधाराप्रियायां च पूर्णिमायां तिथौ तथा ।
स्नातव्यं स्वर्गमोक्षं च सर्वसौख्यफलाप्तये ॥३३॥
एवं तिथिं विचार्य्यादौ कर्त्तव्यं स्नानमुत्तमम् ।
तासु सर्वार्थिभिर्धीरैः सर्वकामफलाप्तये ॥३४॥
कौशिक्याश्च मया मुनीश कथितं स्नानस्यदत्तस्य वै ।
माहात्म्यं हि फलानि ते सुकृतिभिर्गम्यं तथा नान्यभिः ॥
गण्डक्याः श्रवणे च मां प्रतिपुनः कांक्षा हि यद्यस्ति ते
सप्तानां च यथोद्भवं शृणु मुने मत्तश्च तद्वच्मि ते ॥३५॥
इति श्रीस्कन्दपुराणे हिमवत्खण्डे गौरीव्रते कौशिकीमाहात्म्यं नामत्रिचत्वारिंशोऽध्यायः ॥४३॥

४४

स्कन्द उवाच ।

दत्वा दायं मुनिभ्यश्च यत्र पंचाग्निदेवताः ।
नीलकण्ठह्रदात्पूर्वं ययौ सा सखिभिर्मुदा ॥ १ ॥
आदाय विधिवद्भूयः सर्वदायानि सत्वरम् ।
तत्पश्चिमं च सागन्तुमियेष धर्म्मसंयुता ॥ २ ॥
हिमाद्रेर्नीलकूटे सा ससागमत्पुनर्मुने ।
यत्र प्रतप्तवांश्चात्रिराराध्येशं महामुनिः ॥ ३ ॥
अत्रये सा ददौ दायं तमभ्यर्च्च्य यथाविधि ।
वासोयुग्मं सुवर्णं च कपिलां तिलमोदकान् ॥ ४ ॥
तस्या वामपदो घर्म्मस्तत्रापतत्सुनिर्म्मलः ।
अत्रेः स्थाने महापूते व्रतकुण्डाच्च दक्षिणे ॥ ५ ॥
तत्र ददर्श वर्माणों गण्डो नाम महामुनिः ।
गौरीपादतलोद्भूतं ह्रदीभूतं च कन्दरे ॥ ६ ॥
अतिवृद्धोऽपि गण्डर्षिः समागत्य शनैः शनैः ।
तपस्थो घर्म्मसंभूते सस्नौ भक्त्या निमज्यच ।७॥
ह्रदादुत्तीर्य्य गण्डर्षिः स्वदेहं च ददर्शच ।
पंचविंशतिभिरब्दैर्युक्तं युवानमग्रतः ॥ ८ ॥
बहुजन्मार्ज्जितैः पापैर्निर्मुक्तो रूपवान्पुनः ।
सस्मार प्राकृतं कर्म्म पूर्वजातिं स सर्व्वशः ॥ ९ ॥
लोमाञ्चनो मुनिर्भक्त्या स्तवं चकार हर्षितः ।
गौरीवर्म्माम्भसे धीमन्समभ्यर्च्च्य परिक्रमन् ॥१०॥

गण्ड उवाच ।

ॐनमो लोकधात्र्यंघ्रिपद्मोद्भवसुवारिणे ।
सर्वजीवस्वरूपिण्यै जीविनां जीवरूपिणि ॥११॥
नमो जीवनरूपिण्यै जीवदायै च जीवनात् ।
जीवेश्वर्यै नमस्ते वै जननं देहि जीविनाम् ॥१२॥
नमस्तेऽमृतरूपिण्यै द्रवीरूपे नमोस्तु ते ।
द्रवीभूतामृतायै ते चामृतायै नमो नमः ॥१३॥
भद्रायै च शिवायै च कल्याण्यै कमले नमः ।
संसारे सारदे भक्त्या साररूपे नमोऽस्तु ते ॥१४॥
ससारभीष्मशार्दूलक्रीडानाशिनि ते नमः ।
संसारिणामघंभक्त्या विनाशिनि नमोस्तु ते ॥१५॥
जीविनामन्तर्संस्थित्यै विमलायै नमो नमः ।
सर्वजीवप्रवन्द्यायै अनघे ते नमो नमः ॥१६॥
रसायै ते रसस्थायै सर्वरसस्वरूपिणि ।

मान्यायै बहुरूपायै मनोरूपे नमो नमः ॥१७॥
ध्यातव्यायै धरण्यै ते सर्वाधारे नमो मनः ।
रक्ष रक्ष च मां देवि विश्वरूपे नमोऽस्तु ते ॥१८॥

स्कन्द उवाच ।

समाकर्ण्य स्तवं दिव्यं गण्डमुनिमुखाच्च्युतं ।
जलदेवी ततो भूयो घर्म्महृदाद्विनिर्ययौ ॥१९॥
वरं दातुं तदा चक्रे जलदेवी ततो मुने ।
स्तवैः प्रतोषिता तस्मै त्रिविधैश्च मुनेर्भृशम् ॥२०॥

जलदेव्युवाच ।

वत्स भक्त वरं मत्तो वृणीष्व त्वं यथेप्सितं ।
दास्याम्यहं च तत्तेऽद्य स्तुतिभिस्ते प्रमोदिता ॥२१॥
तेस्तुतिरज्जुभिर्बध्वा त्वयानीतात्र गां स्तुता ।
यद्रूपा त्वयि शीघ्रं सा कासरसान् श्रविष्यति ॥२२॥

गण्डर्षिरुवाच ।

अहो भाग्यमनाथस्य भवेद्दीनस्य मेऽधुना ।
अद्यैव पितरस्तृप्ता अद्यैव तपसः फलम् ॥२३॥
जीवितं सफलं मेऽद्य भवेत् ज्ञानेन्द्रियं तथा ।
बहुयोगेन संप्राप्यं त्वद्दर्शनं भवेन्मम ॥२४॥
आविर्भूता भवन्ती वै अनुग्रहाय मे यतः ।
अगोचरा मनोभिश्च योगिनामतिकष्टतः ॥२५॥
याचेहं त्वां वरं देवि अगोचरे वरानने ।
एतद्धि वरदे मह्यं सर्वलोकदयाकरे ॥२६॥
त्वयि ध्यानरतो नित्यं त्वत्पूजने च नैष्ठिकः ।
त्वत्स्मरणे सुनिष्ठा मे त्वां नमामि भवानि वै ॥२७॥
त्वयि भक्तिरतो नित्यं चान्ते तवांघ्रिपुष्करे ।
विलिष्यामि परे मातर्मे वरं दीयतामिति ॥२८॥

जलदेव्युवाच ।

तत्तथाऽस्तु च ते वत्स यत्ते मनसि वर्त्तते ।
भूत्वा योगीश्वरश्चेह अन्ते मत्पदिलीयताम् ॥२९॥
भूयो दास्ये वरं तुभ्यं शृणु स्वान्तसमाहितः ।
यस्मान्मद्भक्तियुक्तस्त्वं मन्मूर्त्यम्बुसमाप्लवात् ॥३०॥
यत्र यत्र च मत्स्वेदविन्दुः पतिष्यति द्विज ।
तत्र तत्र नदी मूर्त्तिद्वारा सत्वरगामिनी ॥३१॥
सप्त धारा भविष्यन्ति ता मे जानीहि मूर्त्तिकाः ।
तास्ते नाम्ना भविष्यन्तु प्राक् स्नानात्ते मुने सदा ॥३२॥
गण्डेनादौ हि संस्नातं गण्डकीति वदीष्यति ।
लोकाश्च सप्त गण्डक्यो वदिष्यन्तीति सन्ततम् ॥३३॥
प्रस्थानं कुरुते स्नातुमेकचित्तो गृहाद्धि यः ।
पदे पदेऽश्वमेधस्य फलं लभ्यात्समाप्लवात् ॥३४॥
यः करिष्यति सुस्नानं सर्वपापैः प्रमुच्यतां ।
श्राद्धं करिष्यतु श्रेष्ठ अक्षयं च भविष्यतु ॥३५॥
जपहोमार्च्चनं दानं यः करिष्यति सत्तटे ।
सर्वपापैर्विनिर्मुक्त स यास्यतु परां गतिम् ॥३६॥

स्कन्द उवाच ।

एवं दत्वा वरं तस्मै भविष्यं श्रावयन्पुनः ।
तिरोधानं ययौ विद्धञ्जलदेवी च तज्जले ॥३७॥
दत्वा दायं ततो गौरी सौम्यशृङ्गं जगाम च ।
ध्यायमानः शिवं तत्र मरीचिस्तत्रवान्पुनः ॥३८॥
स ददर्श ततो यान्तीं गौरीं तां सखिभिः समं ।
नीलाद्रेः पश्चिमे शृङ्गे यत्र योजनदूरतः ॥३९॥
सोप्यन्वगच्छद्दाय्यायां भक्तियुक्तः स्तुवन्मुहुः ।
ध्यात्वा हृदरविन्दे तां दीपशिखाकृतिं पराम् ॥४०॥
तत्र गौरी ददौ दायं मरीचयेऽर्च्य भक्तितः ।
तिलधेनुं सुवर्णं गां यज्ञसूत्रं च मोदकान् ॥४१॥
तत्रैव चापतद्घर्म्मो गौर्य्याश्चिबुकदेशतः ।
नदीभूता च तत्कूटात्प्रवाहोर्म्मिमालिनी ॥४२॥
समभ्यर्च्य च तां भक्त्या सस्नौ तस्यां स्तुवन्मुदा ।
सितकान्त्यां च गण्डर्षिः न्तर्प्य च पितॄन्सुरान् ॥४३॥
ततोगमत्पुनर्गौरी महाकूटं च तत्परान् ।
पुलस्त्य यत्र योगीशः सोन्वगच्छन्मुनिस्त्वसौ ॥४४॥
ददौ दानं मुदा गौरी तस्मै पूज्योपवीतकम् ।
वासोयुग्मं सुवर्णं गां कनकं तिलमोदकान् ॥६४५॥
तत्रापि चापतद्घर्मो वामभ्रूक्षिणितो हि तत् ।
नदीभूता च पीताभा ववाह गिरिशेखरात् ॥४६॥
आनर्च विधिवत्तस्यै भक्त्या तुष्टाव हर्षितः ।
सस्नौ तस्यां च गण्डर्षिः संतर्प्यच पितॄन्सुरान् ॥४७॥
भूयोगमत्ततो गौरी मणिकूटे च तत्परान् ।
पुलहो यत्र योगीशस्तस्याः सोन्वगमत्पुनः ॥४८॥
आनर्च्च विधिवद्भक्त्या तं भक्त्या गिरिजा मुदा ।
पंचोपहारकैर्दिव्यैर्भूदेवं दिव्यवर्चसम् ॥४९॥
पुलहाय ददौ गौरी दानं गाः स्वर्णकं तिलान् ।
करकान् यज्ञसूत्रं च गुडाज्यमिश्रपिष्टकान् ॥५०॥
तत्रापतच्च घर्म्मो वै तत्कपोलात्सुनिर्म्मलः ।
नदीभूता हि तच्छृंगाद्ववाह श्वेतवाहिनी ॥५१॥
सुवेगिनीं नदीं दृष्ट्वा बहुकल्लोलिनीं मुदा ।
सस्नौ भक्त्या च गण्डर्षि सन्तर्प्य पितृदैवतान् ॥५२॥
भूयो जगाम चावाचीं योजनद्वयदूरतः ।
रत्नशृंगे त्वगच्छत्स क्रतुर्यत्र प्रतप्तवान् ॥५३॥
ददौ दायं बहून् तस्मै तिलकाञ्चनमिश्रितं ।
कपिलां यज्ञसूत्रं च मोदकान्करकान् तथा ॥५४॥

तत्रापतद्धि घर्म्मश्च तदलकात्सुनिर्म्मलः ।
नानावर्णनदीभूता ववाह श्रृंगदेशतः ॥५५॥
दृष्ट्वा सुनिर्म्मलां धारां नदीविश्वपवित्रिणीं ।
सस्नौ तस्यां हि गण्डर्षिस्ततर्प्य पितृदेवताः ॥५६॥
दत्वा दायं पुनर्गौरी तदवाचीं जगाम च ।
योजनद्वयदूरे वै भृगुर्यत्र प्रतप्तवान् ॥५७॥
सान्वगच्छत्पुनस्तस्या ददौ गौरी च वाससी ।
भृगवे गां तिलान्स्वर्णं सक्तूनगुडाज्यमिश्रितान् ॥५८॥
तत्रापतत्पुनर्घर्म्मस्तल्ललाटात्सुनिर्म्मलः ।
दुग्धाभार्णनदीभूता एकश्रृंगाद्ववाह च ॥५६॥
दृष्ट्वा नदीं वरां श्वेतामेकश्रृंगावतारिणीं ।
सस्नौ भक्त्या च गण्डर्षिः संतर्प्य पितृदेवताः ॥६०॥
ततो जगाम सा गौरी द्विकूटे तुंगशेखरे ।
तप्तवानंगिरा यत्र तस्याश्चान्वगमन्मुनिः ॥६१॥
तस्मै ददौ बहून्दायान्गौरी चाभ्यर्च्चर्य भक्तितः ।
तिलधेनुं सुवर्णं च पिण्याकं सघृतं च गां ॥६२॥
तत्रापतदपांगाच्च घर्म्मबिन्दुः सुनिर्म्मलः ।
नदीभूता च नीलाभा ववाह तुंगशेखरात् ॥६३॥
भिन्नांजननिभां पत्रे मसिधारामिवार्ज्जुने ।
प्रेक्ष्य सस्नौ च गण्डर्षिस्ततर्प्य पितृदेवताः ॥६४॥
एवं दत्वा मुनिभ्यश्च नाना दानानि भक्तितः ।
सप्तभ्यो गिरिजा देवी प्रतस्थे हि पुनस्ततः ॥६५॥
समाययौ च तस्मात्सा यत्र पंचाग्निदेवताः ।
नीलकण्ठह्रदात्पूर्वे प्रतप्तं सखिभिः पुरा ॥६६॥
समाप्य पंचमे वर्षे पंचाग्न्याख्यं व्रतं हि सा ।
भोज्यं दानानि दत्वैवं स्वगेहमगमत्पुनः ॥६७॥
एवं या कुरुते नारी उमाव्रतं महोत्सवैः ।
समाप्य पंचमे वर्षे नानाविभवविस्तरैः ॥६८॥
द्विजातीन् भोजयेत् पंच संवर्ध्य प्रतिहायनं ।
यावत्पंचाब्दकं सम्यग्दद्याद्दानानि सर्वशः ॥६६॥
सर्वपापैर्विनिर्मुक्ता पतिपुत्रसमन्विता ।
इहलोके सुखं भुक्त्वा सा यास्यति परां गतिम् ॥७०॥
येन कामेन तद्धर्म्मं यावज्जीवं करोति या ।
तं तं कामं समाप्नोति सर्वपापैर्विवर्ज्जिता ॥७१॥
सार्वभौमप्रिया भूत्वा सर्वभोग्यप्रमोदिनी ।
अन्तेत्रलभ्यते मोक्षं समुद्धृत्यकुलानि च ॥७२॥
ततश्च जलदेवी सा विनिर्य्ययौ जलात्पुनः ।
आविर्भूता तदा तत्र गण्डर्षयेत्युवाच च ॥७३॥

जलदेव्युवाच ।

अहोभाग्यवतां श्रेष्ठ श्रृणु मत्तो वचः पुनः ।
यस्मात्सर्वासु धारासु स्नातं सुश्रद्धया त्वया ॥७४॥
कोटियुगं सुखं भुक्त्वा पश्चाद्योगीश्वरो भव ।
तदन्ते मयि लीनो वै भविष्यसि न निर्वृतिः ॥७५॥
भूयश्च सप्तधाराणां गण्डकीनां च वच्मि ते ।
अभिधानानि सर्वासां श्रृणु पृथक् पृथक् सुत ॥७६॥
धर्मधारा यशोधारा विश्वधारा सितप्रभा ।
रत्नधारा सुवर्णाभा कृष्णाभा स्याच्च सप्तकाः ॥७७॥
माहेश्वरी ततो ब्राह्मी नारसिंही च वैष्णवी ।
कौमारी कालिका गंगा गंडक्यः क्रमशो मम ॥७८॥
तासां सुसंगमे तीर्थे बहुपुण्यफलप्रदे ।
अन्योन्य च मुनेस्नात्वा फलं कोटिगुणं भवेत् ॥७६॥
ततश्च धर्मधाराया नामधेयं च सन्ततं ।
लोकास्त्रिशूलगंगेति वदिष्यन्ति समाद्रितः ॥८०॥
एतानि नामधेयानि समाधाय हृदि ध्रुवम् ।
स्नात्वा गच्छ मुनिश्रेष्ठ यत्र तप्तं पुरा त्वया ॥८१॥

स्कन्द उवाच ।

इत्युक्त्वा जलदेवी सा गण्डर्षये वरं पुनः ।
दत्वेप्सितं च तस्यैवं तिरोधानं ययौ जले ॥८२॥
गण्डर्षिश्च वरं लब्ध्वा जलदेव्याः स्ववांछितं ।
नीलाद्रेः पूर्वकूटे वै ययौ तप्तुं च हर्षितः ॥८३॥
ततो देवाः सगन्धर्वाः पिशाचगुह्यकास्तथा ।
ऋषयश्च समागत्य सस्नुस्तासु यथाविधि ॥८४॥
आनर्च्चुस्तां च तेपुस्ते जेपुः सुनिश्चितं तदा ।
ददुर्दानानि भक्त्या वै तस्यै च तुष्टुवुः पुनः ॥८५॥
योगानि च पुनश्चक्रुः सस्नुः पर्व्वसु पर्व्वसु ।
आजग्मुश्च ततस्ते वै स्वं स्वं स्थानं मुदान्विताः ॥८६॥
तदाद्यापि गण्डक्यः सर्वाः पूताःसरिद्वराः ।
भवेयुस्ता यतो धीमन् गौरीदेहात्प्रनिःसृताः ॥८७॥
तासु कुर्वन्ति ये स्नानं न पश्यन्ति यमालयं ।
सर्वपापैर्विनिर्म्मुक्ता गच्छन्ति परमां गतिम् ॥८८॥
व्रजन्ति ये गृहात्स्नातुं मनसीति विधाय वै ।
करिष्यामि च गण्डक्यां स्नानं च भक्तिपूर्वकम् ॥८६
पदे पदे फलं लब्ध्वा अश्वमेधस्य मानुषाः ।
प्राप्स्यन्ति परमं स्थानं विमुच्य सर्वकिल्बिषान् ॥६०॥
ये कुर्वन्ति तटे श्राद्धं तस्यास्त्वपितरो मुदा ।
तेभ्यो दत्वाऽऽशिषं स्वर्गमधःस्था वै व्रजन्त्यपि॥६१॥
यज्ञार्च्चनं जपं तीरे तासां वै संगमे नराः ।
कुर्वन्ति शिवभक्त्या ये तेषां पुण्यफलं श्रृणु ॥६२॥
सूर्यायुतप्रतीकाशविमानस्थश्च सान्वगः ।
गीतवाद्यमहोल्लासैरप्सरोभिः प्रसेव्यते ॥६३॥

अ० ४४

विधूय सर्वपापानि धूयमानश्च चामरैः ।
सर्वलोकान्मुदा पश्यन् शिवलोके महीयते ॥९४॥
यो ददाति च दानानि स्वल्पं वा यदि वा बहु ।
स्वर्णान्नं गां च वासांसि तेषां पुण्यफलं शृणु ॥९५॥
सार्वभौमो नृपो भूत्वा राज्यं निःकण्टकं मुदा ।
यथेप्सितं च भुंजन्ति देहान्ते पापवर्जिताः ॥९६॥
तद्देहं च पुनस्त्यक्त्वा श्रुतियुक्तो भवेद्द्विजः ।
तपोभिस्त्यज्य तत्कायं निर्वाणं लभते सुखम् ॥९७॥
आसेवंति च गण्डक्यां या नार्यो दुर्भगा अपि ।
भ्रूणहत्यादिभिः पापैर्मुच्यन्ते नात्र संशयः ॥९८॥
यं यमिच्छंति कामं वै प्राप्नुवन्ति तमाशु च ।
समाप्लवन्ति या भक्त्या गण्डक्यां यत्र कुत्रचित् ॥९९॥
कुरूपापि भवेत् स्नाता नारी श्रेष्ठातिसुन्दरी ।
लोका मुह्यन्ति तां दृष्ट्वा लोकानां स्वान्तहारिणी ॥१००॥
दुर्भगापि च या नारी तस्यां स्नानाद्भवेत्पुनः ।
सर्वसौभागिनी रामा पतिप्रिया सुतप्रदा ॥१०१॥
विधवा सधवा तस्यां भवेज्जन्मनि जन्मनि ।
स्नानाद्दानाद्धि विप्रेभ्यो उपोष्य व्रतमाचरन् ॥१०२॥
सर्वासां संगमे धीर देवघट्ट उदाहृते ।
सर्वतीर्थमये पूते स्नातात्कोटिगुणं फलम् ॥१०३॥
सर्वतीर्थमया नद्यः सर्वदेवमयो हरः ।
तासां सुसंगमे नित्यममरैः स्नायते समम् ॥१०४॥
देवदेवः स्वयं तत्र तिष्ठति प्रमथैः सह ।
देवतीर्थमितिप्रोक्तं तस्मात्सर्वफलप्रदम् ॥१०५॥
पृथिव्यां यानि तीर्थानि सन्ति फलप्रदानि च ।
कोटिकोटिगुणं तेभ्यः स्नात्वा तत्र प्रलभ्यते ॥१०६॥
नवमी पूर्णिमा चैव द्वादशी च महाष्टमी ।
संक्रान्तिश्च तथा षष्ठी एकादशी च तासु वै ॥१०७॥
स्नातव्यं पंडितैर्धीमन् गण्डकीषु क्रमात्सदा ।
ज्ञात्वा हि तिथिभावं च कोटिकोटिगुणं फलम् ॥१०८॥
शृणु कश्चित्पुरा मुक्तः पत्नी सुकृतिना नृपः ।
संगमे स्नानतः पूते कृष्णात्रिशूलगंगयोः ॥१०९॥
आसीत्सारस्वतीपूर्यां रूपकेतुर्नृपोत्तमः ।
तस्य भार्ये समास्तां द्वे कामप्रभा च पद्मिनी ॥११०॥
पद्मिनी सुन्दरी श्रेष्ठा विदर्भाधिपतेः सुता ।
रूपकेतुप्रियाजस्रं प्राणैरपि गरीयसी ॥१११॥
कामप्रभा विरूपास्या छत्ररूपाधिपात्मजा ।
रतिक्रीडाविनिर्मुक्ता प्रियेण दुःखभागिनी ॥११२॥
तस्यास्यं प्रेक्ष्यते नैव पतिनापि कदाचन ।
पृथक्शैय्यासुदुःखार्त्ता प्रियभोग्यैर्विवर्जिता ॥११३॥
नीत्वैवं कश्चिदब्दान्ते प्रत्यागते पितुर्गृहे ।
सख्यासमं च सा मार्गे लोकैः समागमोऽभवत् ॥११४॥
यूयं भो क्वागताः पान्था इति प्रश्नवती मुहुः ।
देवघट्टे वयं स्नातुं गच्छाम इति वर्णिताः ॥११५॥
व्रजावस्तत्र संस्नातुं भवन्तो यत्र संगमः ।
इत्येवं संमतं कृत्वा गण्डकीसंगमं ययौ ॥११६॥
मकरस्थे रवौ सस्नौ तीर्थे देवसमूहके ।
लोकैः सह विरूपाऽसौ सुन्दरास्यं प्ररोचती ॥११७॥
निष्कृत्य मुद्रिकां रौप्यां पाथेयं यच्च संभवं ।
विप्रेभ्यः प्रददौ प्रोक्त्वा प्रीयतां शंकरस्त्विति ॥११८॥
उषित्वा तन्निशायां सा प्रातः स्नाता ययौ गृहं ।
पितुरवर्णयत्सा तं मातरं भर्तृचेष्टितम् ॥११९॥
समाश्वास्य सुतां सद्यः पितरौ समपालयन् ।
मधुरैर्वचोभिश्च साश्वस्थाचैवमेव सा ॥१२०॥
दिव्यरूपा भवत्सापि षण्मासान्ते पितुर्गृहे ।
सौन्दर्यरूपतो भूयो भार्यां स्वमानयद्गृहम् ॥१२१॥
तत्पुण्यप्रभया राज्ञी दधारातिवरानानम् ।
प्रार्थ्यमानं हृदा यूनां तदीक्षामुददेहिनाम् ॥१२२॥
कतिचिद्दिवसे राजा अद्राक्षीत्तां सुसुन्दरीं ।
हर्म्योपरि गवाक्षस्थामीक्षमाणां प्रभावतीम् ॥१२३॥
कम्बुग्रीवां हि चन्द्रास्यां मृगशावकलोचनाम् ।
उत्तुङ्गस्तनवत्साढ्यां सुभ्रूस्मरशरासनां ॥१२४॥
तप्तकार्त्तस्वराभांगीं रामामीषत्स्मितानानां ।
वासोलंकारशोभाढ्यां द्वितीयां स्मरवल्लभाम् ॥१२५॥
कामप्रभां समालोक्य मुमोह नृपतिर्भृशं ।
समुत्तीर्णव्यथो हर्म्यां प्रिया यत्र ययौ द्रुतम् ॥१२६॥
द्वाररुन्धकपाटान्तस्थगितश्चाह्वयत्प्रियाम् ।
कपाटोद्घाटनं कान्ते कुरु प्रवेशनाय मे ॥१२७॥
निशम्य वचनं राज्ञः कामार्त्तं गद्गदोदितं ।
कामप्रभा तदाऽवोचद्वचनं हि मधुस्रवम् ॥१२८॥
कामप्रभोवाच ।
राजन् गच्छ प्रिया यत्र पद्मिनी सुन्दरी वरा ।
रूपसौन्दर्यसंयुक्ता रतिभावरसैर्युता ॥१२९॥
उज्झिताहं सदा राजन् भवता वहिरालये ।
किं स्यात्प्रयोजनं पुष्पे निर्माल्ये षट्पदां यथा ॥१३०॥
भर्त्तास्वभृत्तोयविशोषकोष-
निःसंभवानङ्गरतिः प्रशुष्कः ।
किन्ते जनोयं प्रकरोति कामं,
यातु प्रिया या मनसा गरिष्ठा ॥१३१॥

रूपकेतुरुवाच ।

मामैवं व्यसनेक्षं देवि दैवेन वंचिताय मे ।
अतः परं प्रिये वक्ष्ये वचनं शृणु सुन्दरि ॥१३२॥
दैववंचितदेहेन त्वं वंचिता मया पुरा ।
नाशादि त्यज्यते कान्ते प्राणैरपि धनैर्ध्रुवम् ॥१३३॥
नागतरूणांप्रिये त्वद्ये युक्तनामाभिधानके ।
दासत्वेन चरिष्ये ते त्यक्त्वा तां जगतां धुरम् ॥१३४॥
यावज्जीव्यत्ययं देहस्तावत्त्वां नैव मुंचति ।
त्यक्तोत्तमाबलाः कान्ते सत्यं सत्यं वदामि ते ॥१३५॥
एवं शपथमाकर्ण्य कामप्रभा प्रियस्य च ।
कपाटोद्घाटयामास विमुच्यार्गलमाशु च ॥१३६॥
प्रविवेश नृपः कोष्ठं यत्र कान्तारहोद्भुतं ।
आलिंगनोत्सुको राजा अवोचन्मधुरं वचः ॥१३७॥

रूपकेतुरुवाच ।

भ्रूकामुकेरिताचाशुगभिन्नहृन्मृगाय ते ।
रतिकथामृतेनाशु क्षिप्रं कृपां च मे कुरु ॥१३८॥

स्कन्द उवाच ।

एवं क्रीडारसै राजा सवोध्य शपथैश्च तां ।
कामयामास वै शश्वद्यथा कामं मुदाचिरम् ॥१३९॥
दण्डनीतिप्रजारक्षां खिन्नोपि वनितापरः ।
सन्त्यज्य सतत राजा रेमे तया समं सुखम् ॥१४०॥
दानधर्मैर्विहीनोऽसौ कञ्चित्कालं निनाय तं ।
पंचत्वं प्राप्तवांश्चापि साऽभवदनुगामिनी ॥१४१॥
आदाय शिवदूतास्तां याने व्योम प्रचक्रिरे ।
यास्यास्त मुद्गरैस्ताड्या अधोनीतुं तथा पुनः ॥१४२॥
आलोक्य तादृशं कान्तं कामप्रभा ह्यातुरा ।
अवोचत्किल याम्येभ्यःप्रार्थयन्मधुरोक्तिभिः ॥१४३॥

कामप्रभोवाच ।

याम्या नमोऽस्तु वः शश्वत् क्षन्तव्यमधुना प्रभो ।
नैवं ताड़य दीनं मे भर्त्तारं कोमलं वपुः ॥१४४॥
शैव्या नमोऽस्तु वो नित्यं क्षन्तव्यो मेऽपराधकः ।
पतिमास्थाय याने मे नय परं मया सह ॥१४५॥

शिवदूता ऊचुः ।

मैवं वद सुकल्याणि पापिने पतये कदा ।
आजन्मकिल्बिषैर्युक्तो लभिष्यति ह्यधोगतिं ॥१४६॥
गण्डक्याः संगमे तीर्थे देवघट्टे जलाप्लवात् ।
त्वं लभिष्यति तत्पुण्यात्सुकृतिनां गतिं पराम् ॥१४७॥

कामप्रभोवाच ।

शैवा नमोऽस्तु वो भूयः प्रियस्य सहगामिनी ।
तारयिष्यामि भर्त्तारं केनोपायेन तद्वद ॥१४८॥

शैवा ऊचुः ।

अवश्यं तद्धि भोक्तव्यं स्वकृतं पापपुण्ययोः ।
सहगमनधर्मं यत्तवैवं न प्रियस्य च ॥१४९॥
यदि त्वं यातने कुण्डे तितीर्षुः खलु वल्लभम् ।
धर्मं ददस्व तेऽर्द्धांगं प्रियाय सुकृतं त्वया ॥१५०॥
यद्येवं चरसे देवि त्वया सह गमिष्यति ।
एवमेवोपकारस्यान्नान्यदुपाय ईष्यते ॥१५१॥

स्कन्द उवाच ।

स्वीकारं सा ध्रुवं कृत्वा प्रियायसुकृतं स्वकं ।
कुशोदकं समादाय कृतार्द्धं सा ददौ स्वकं ॥१५२॥
व्यनयत्परमं शैवं शैवास्तां पतिना सह ।
भुक्त्वा कोटिसमं सौख्यं ततोऽभवित्क्षितौ नृपः ॥१५३
दैत्याश्च तत्रैव तपः प्रचक्रु-
र्लब्ध्वावराल्यान्द्रुहिणाच्च देवात् ।
विद्रुत्य चक्रुस्त्रिदिवं हि राज्यं,
रुद्रश्च विष्णुश्चैवान् दैत्यान् ॥१५४॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नमात्रते सर्वगण्डक्युत्पत्त्यां देवघट्टमाहात्म्यं नाम चतुश्चत्वारिंशत्तमोऽध्यायः ॥४४॥

अगस्त्य उवाच ।

भगवन् त्वत्प्रसादाद्वै श्रुतं यथोद्भवं मया ।
सप्तानां गण्डकीनाञ्च तन्माहात्म्यं विशेषतः ॥१॥
नीलकण्ठ इति ख्यातो भवताभूच्च तत्कथं ।
तथा त्रिशूलगंगेति धर्मधारेति तत्पुनः ॥२॥
तपस्थानसुरान्देवाः जग्मुस्तत्र कथं पुनः ।
श्रोतुमिच्छामि तत्सर्वं वद मे शंकरात्मज ॥३॥

स्कन्द उवाच ।

अवश्यं ते प्रवक्ष्यामि शृण्वेकाग्रमना मुने ।
यद्वृत्तान्तं पुराऽभूच्च देवासुरश्रमोद्भवम् ॥४॥
प्रलये त्रिदशानां तद्विलीनैते पयोर्णवे ।
त्यक्त्वा तान्सहसा काले त्रिदशाः प्रलयं गताः ॥५॥
पारिजातं सुधां लक्ष्मीं ऐरावतं हयान्धनुः ।
संहृत्य ते च संतस्थौ क्षीरार्णवश्चिरं पुरा ॥६॥
सृष्ट्यान्तरे ततो धातो देवाः संभूय चाब्रुवन् ।
ब्रह्मवक्त्रविज्ञानन्तः कुर्वामो मथनं निधिम् ॥७॥
विमृष्यैव घटोद्भूत देवासुरान्परस्परम् ।
मिलित्वा प्रययुस्तीरं क्षीरार्णवस्य सर्वशः ॥८॥
चिकीर्षुर्मथनं पूर्वं क्षीरं पयोनिधेर्भृशं ।

देवासुरा ये संभूय कृत्वा दण्डं च मन्दरम् ॥९॥
ममंथुरर्णवं देवाः कृत्वा रज्जुं च वासुकिम् ।
दंडं च मन्दरं दैत्या विधाय विष्णुहस्तयोः ॥१०॥
तस्मात्समुद्भवां लक्ष्मीं विष्णुर्जग्राह सांप्रतं ।
ततो हयाश्रविः सन्तान्पारिजातं तथा नृपा ॥११॥
ऐरावतं च शक्रोसौ धनुश्च मम सम्मतं ।
जगृहुरमृतं दैत्या बलात्संसदि सत्वरम् ॥१४॥
तस्मात्क्ष्वेडं समुद्भूतं करालं क्षोभकं ततः ।
सर्वलोकं ग्रसन्त ते ददृशुरमराः सुराः ॥१३॥
तं प्रेक्ष्य क्षोभकं लोकाञ्शरणं चाभिदुद्रुवुः ।
देवासुराश्च रुद्रस्य त्यक्त्वा मन्थं भयातुराः ॥१४॥
स्वशरणागतांल्लोकान्शरणदः स रक्षति ।
इति कृत्वा ययुस्ते वै ऊचू रुद्राय तद्भयात् ॥१५॥

देवासुरा ऊचुः ।

नमस्ते शिपिविष्टाय शरणदाय शूलिने ।
सर्वभूतदयेशाय लोकानां पतये नमः ॥१६॥
रक्ष रक्ष भयात् क्ष्वेडादस्माल्लोकप्ररक्षक ।
तेन दग्धा महादेव ते शरणागतानिह ॥१७॥

स्कन्द उवाच ।

श्रुत्वा तेषां वचो रुद्रस्तद्भयाद्गद्गदेरितं ।
मा भीयन्तां सुरा दैत्याः प्रतीकारं करोमि तत्॥१८॥
एवमुक्त्वा महादेव आश्वासयत्सुरासुरान् ।
ददर्श गरलं भीष्मं विषज्वालांशुमालिनीम् ॥१९॥
देवान्द्रुत्य समायातं नीलांजनसमप्रभम् ।
अतिभयङ्करं तीक्ष्णं प्रेक्ष्य रुद्रश्चुकोप च ॥२०॥
सर्वलोकहितायाशु स्वमात्मानं विदन्नपि ।
आदाय पाणिना क्ष्वेडमग्रसीत्त्वरितं विभुः ॥२१॥
कण्ठमध्ये महानीलस्तस्थौ रुद्रस्य तत्क्षणात् ।
प्रवेशितो न तत् कुक्षौ जिह्वायां च न निर्गतः ॥२२॥
ददाहाभ्यन्तरं क्ष्वेडो रुद्रस्यापि महात्मनः ।
अक्षोभयन्मनो भूयः सर्वेन्द्रियाणि सत्वरम् ॥२३॥
कण्ठमध्ये महानीलो यतस्तिष्ठति संयतः ।
नीलकण्ठ इति ख्यातः सर्वलोकैश्च सन्ततम् ॥२४॥
आत्मानं विह्वलं दृष्ट्वा चिन्तितिस्म क्षणं विभुः ।
यद्युज्जहामि चैतद्धि ग्रसिष्यति जगत्क्षणात् ॥२५॥
न स्थातव्यं मया चात्र गच्छामि हिमवद्गिरौ ।
यत्र तप्तं पुरा गौर्य्या तत्कुण्डे आस्रवाम्यहम् ॥२६॥
तत्र स्नानान्महानीलः प्रशमिष्यति सांप्रतम् ।
गौर्य्यास्त्रिक्लिन्नधर्म्मेवै
तस्मिन्स्थास्येऽभयप्रदे ॥२७॥

इदमेव भविष्यन्ति प्रतीकारो न मेऽपरः ।
गच्छामि शरणं तस्य गौरीस्वेदाम्भसोऽधुना ॥२८॥

स्कन्द उवाच ।

एवं संचिन्त्य देवेशः क्ष्वेडतापसुविह्वलः ।
रुद्रलोकात्समागत्य प्रययौ हिमवद्गिरौ ॥२९॥
क्ष्वेडशिखाप्रदग्धांगो वेत्रपाणिः शनैः शनैः ।
स्कन्धे त्रिशूलमाधाय रुरोह हिमपर्वतम् ॥३०॥
यत्र कूटे हरः पूर्वं निचखान च वेत्रकं ।
श्रमार्त्तं च पुनस्त्यक्त्वा प्रययौ शूलपर्व्वतम् ॥३१॥
वेत्रप्ररोपणात्तत्र प्रनिःसृतं जलं शिवं ।
पपात कन्दरेऽजस्रं वसोर्धारा इवोत्सवे ॥३२॥
दृष्ट्वा देवर्षयः सर्वे रुद्रवेत्रोद्भवां नदीं ।
भक्त्या निवेद्य संसस्नुस्तस्यामागत्य तत्र वै ॥३३॥
सन्तर्प्य विधिवद्देवान्पितॄन्क्षेपुः सुनिश्चितं ।
दत्वा दानानि विप्रेभ्यः स्वं स्वं स्थानं ययुः पुनः ॥३४॥
गन्धर्व्वाप्सरसः सिद्धा गुह्यकाश्च तथापराः ।
सस्नुस्तस्यां मुदा भक्त्या स्व स्वं स्थानं तथा ययुः ॥३५॥
वेत्रोद्भवा नदी श्रेष्ठा वेत्रगंगेति संस्मृता ।
गंगातुल्या ह्यभूत्सा वै देवासुरर्षिभिः स्तुता ॥३६॥
तस्यां स्नात्वा नरो धीमान् शिवलोके महीयते ।
यानेन च सुदिव्येन मुदा युक्तार्कवर्च्चसा ॥३७॥
तस्यां जप्तं हुतं दत्तं तत्सर्वमक्षयं लभेत् ।
अधःस्थानपि सर्व्वांस्तु श्राद्धात्पितॄन्समुद्धरेत् ॥३८॥
सर्वतीर्थमयी सा स्याद्देवर्षिभिः प्रमाणिता ।
रुद्रवेत्रोद्भवा यस्माद्वेत्रगंगा फलप्रदा ॥३९॥
ततो गत्वातदूर्ध्वं वै शूलाद्रिशिखरं विभुः ।
परिश्रमातिपिपासार्त्तस्तस्थौ तत्र त्रिशूलि धृक् ॥४०॥
तत्रारोप्य त्रिशूलं स गंगां संस्मार तत्र च ।
नीलेनात्यन्तरं दग्धः तृषार्त्तो महाविभुः ॥४१॥
त्रिशूलरोपणाच्छिद्रं गंगा तत्रापि चोद्भवा ।
ययौ गंगा सुखं रुद्रः परिश्रमं तदा जहौ ॥ ॥४२॥
त्यक्त्वा तां शूलपाणिश्च गन्तु नीलाचले पुनः ।
त्रिशूलं च समुत्खात्य रुरोह चन्दनाचलम् ॥४३॥
ततो गंगाद्रिकूटाद्धि वेगात्पपात कन्दरे ।
स्वच्छकल्लोलिनी पुण्या शीतनिर्झरनिःस्वना ॥४४॥
शीकरमालिनी वेगाद्भृगुपातसुनिःसृता ।
विराजते तदा गंगा वसोर्धारा इवोत्सवे ॥४५॥
ततो देवगणाः सर्वे सिद्धा देवर्षयस्तथा ।
गन्धर्वाश्चाप्सरो यक्षास्तत्राययुश्च दानवाः ॥४६॥

ब्रह्मविष्णुसुनाशीराश्चन्द्रार्कपावकानिलाः ।
अंभःपतिर्यमौ कव्यात्समाययुश्च तत्र वै ॥४७॥
तस्यां सस्नुर्मुदा युक्ता निमज्योन्मज्य भक्तितः ।
गङ्गां संपूज्य पूजाभिर्यथाविधि सुरासुराः ॥४८॥
दध्युर्ध्यानं ततो जेपुर्दद्दुर्दायान्मुदा च ते ।
तुष्टुवुर्विविधैस्तां वै अप्रार्थयद्वरान्पुनः ॥४९॥
लब्ध्वा वरांस्ततो देवा गन्धर्वाश्चाप्सरोवराः ।
स्वं स्वं स्थानं ययुर्भूयः स्नानात्पवित्रदेहिनः ॥५०॥
तदादि सरितां श्रेष्ठा अभूत्सा विश्वपावनी ।
रुद्रेशाराधिता यस्माद्रुद्रगंगेति कीर्त्तिता ॥५१॥
तस्यां कुर्वन्ति ये स्नानं धीमन्तो भक्तिपूर्वकं ।
सर्वपापैर्विनिर्मुक्ताः प्राप्यन्ति परमां गतिम् ॥५२॥
स्नानमात्रं च कुर्वन्ति येऽपि ज्ञानविवर्जिताः ।
परिवारैः समं यान्ति ते स्वर्ग्गं पापवर्जिताः ॥५३॥
दशगुणं च गंगायाः स्नात्वा तस्यां फलं लभेत् ।
दत्तार्च्चनजपानां च द्विसहस्रगुणं लभेत् ॥५४॥
मोहकंचुकमुत्सृज्य प्रावृत्य ज्ञानकंचुकम् ।
जपार्श्चनकरस्तस्यां मोक्षं प्राप्नोति चाशु सः ॥५५॥
कुर्वंति याः स्त्रियः स्नानं तस्यां धान्यं धन सुतं ।
लब्ध्वा पतिप्रियाः नित्यं भवेयुः सुन्दराननाः ॥५६॥
श्राद्धं कुर्वंति ये तस्यां गच्छंति त्रिदिवं क्षणात् ।
समुद्धृत्य पितॄन्स्नानाद्दशपूर्वान्दशापरान् ॥५७॥
विलंघ्य चन्दनाहार्य्यमगमच्च शनैः शनैः ।
नीलाद्र्यधो नितम्बेसौ लोकानुग्रहकारकः ॥५८॥
ततो नीलाद्र्यधोभागे तस्थौ पुनः परिश्रमात् ।
क्ष्वेडक्षोभितदेहोऽसौ आरोहितुमशक्तवान् ॥५९॥
संस्मृत्य धर्म्मधारां स गौरीस्वेदसमुद्भवां ।
क्ष्वेडतापविनाशाय शूलेनाद्रिं बिभेद च ॥६०॥
विनिर्गत्याशु तत्स्वेदः स्वच्छः सुनिर्म्मलस्तदा ।
ततो भृगु त्रयो धारा उत्पेतुर्घर्म्मपर्व्वतात् ॥६१॥
विराजन्ते त्रयो धारा उत्पपातैः सुनिर्म्मलैः ।
गंगाद्रवत्रयो धाराः शंभोर्मूर्द्धाद् विनिर्गताः ॥६२॥
तस्मात् त्रिशूलगंगेति समाख्याता सुरासुरैः ।
समुद्भूता त्रिशूलात्सा त्रिधारा गाढशोभना ॥६३॥
ह्रदीभूता च तत्सानौ गंगा त्रिशूलभेदजा ।
स्फटिकाभाऽमृतस्वच्छा शिवाकारातिशोभना ॥६४॥
स्वच्छनीरेण सम्पूर्णं बहुकल्लोलिनं ह्रदं ।
प्रेक्ष्य मुमोद शूली स अगाधं त्वष्ट्रखातकम् ॥६५॥
ह्रदमध्ये ततो रुद्रः प्रवेश्य चातिहर्षितः ।
अशयिष्ट सुखं धीमन् बहुशीतजलोत्तमे ॥६६॥
दिव्यं वर्षशतं व्याप्य सुष्वाप च सुखं विभुः ।
आच्छाद्य स्वंभसात्मानं सर्वसत्त्वफलप्रदे ॥६७॥
नीलकण्ठह्रदाच्चाधः पपात तज्जलं पुनः ।
तदधश्च ह्रदीभूतं कुण्डं सुवर्त्तुलं तथा ॥६८॥
स्फाटिप्रनिःसृतान्नीरादभूद्ध्रदं तथाविधम् ।
स्फाटिकाभामृतैःपूर्णं शीतलार्णसुनिर्म्मलम् ॥६९॥
एकात्मानं द्विधा कृत्वा ततो व्याचष्ट शंकरः ।
गणेशक्षेत्रपालाभ्यां द्वाररक्षाय संततम् ॥७०॥

नीलकण्ठ उवाच ।

गणेश क्षेत्रपालाशु अतश्च पश्चिमे दिशि ।
मद्द्वारं रक्षतान्नित्यं परिवारैः समं युवाम् ॥७१॥
तिष्ठताद्रक्षयन्क्षेत्रं पापात्मानं निषेधकौ ।
तिष्ठन्तु सर्वलोकानां शासने गच्छथा युवाम् ॥७२॥

स्कन्द उवाच ।

गणेश क्षेत्रपालौ तौ लब्धवरौ सुरोत्तमौ ।
तस्य चाज्ञां समादाय जग्मतू रक्षितुं हि तत् ॥७३॥
त्रिशूलाद्रेरवाच्यां हि सानौ द्वारोत्तमे शुभे ।
तिष्ठतः स्म गणैः सार्द्धं दण्डपाणिमहेश्वरौ ॥७४॥
ब्रह्मादयोऽमराश्चान्ये गन्तुं विलंघ्य तत्र वै ।
असमर्था भवेयुस्ते किं पुनः क्षुद्रमानुषाः ॥७५॥
तदादि क्षेत्रपालौ तौ सर्वद्वारस्थितौ सदा ।
तदाज्ञां हि विना लोका गन्तुं शेकुर्न तत्र वै ॥७६॥
तौ दण्डिनौ देववरौ हि नित्यं,
तद्द्वारसंस्थौ ह्यवतःस्म देशं ।
तौ वन्द्य गच्छन्ति हि तत्र भक्त्या,
ब्रह्मादयो धीर न चान्यथा हि ॥७७॥

इति श्रीस्कन्दपुराणे हिमवत्खंडे नीलकण्ठोत्पत्तिर्नाम
पंचचत्वारिंशोऽध्यायः ॥४५॥

—❀❀❀—

४५

स्कन्द उवाच ।

कालान्ते च पुनर्भीमः स्नातुं तत्र समागमत् ।
तस्य मूर्तिर्द्वितीयोऽसौ विलंघ्य पर्व्वतांस्तथा ॥१॥
छेदनाद्ब्रह्मणः शीर्षं प्रालिप्तांगस्तदेनसा ।
विरूपोभवदीशोऽसौ कुष्ठवांस्तत्र चागमत् ॥२॥
अशयिष्ट स्वयं तत्र भैरवो भीष्मविग्रहः ।
सुखं कुष्ठांगितांगो वै भिन्नांजनचयोपमः ॥३॥
तस्माच्च तज्जलं तत्र महानीलरसोपमम् ।
भीषणाम्भःसुकल्लोलं सर्व्वजीवभयप्रदम् ॥४॥
दुर्वासःशापितो विष्णुस्तच्छापाद्भयविह्वलः ।

95958

व्यसुस्तत्र महाकायो हिरण्यकशिपुर्मुने ।
विकीर्णासृग्वसाह्याशु छिन्नो पपात तत्तनोः ॥२५॥
दानवानां महासैन्यं धावतिस्म दिशो दश ।
नृसिंहं च व्यसुं दैत्यं समालोक्य च सत्वरम् ॥२६॥
प्रह्लादश्च महाभक्तो भगवन्तं प्रणम्य च ।
ययौ हिमालये नन्तुं मुञ्जवत्पर्वतोत्तमे ॥२७॥
ववर्ष पुष्पवृष्टिश्च तस्य चोपरि सन्तते ।
लाजासारः पुनर्व्योम्नो देवकन्याकरेरितः ॥२८॥
नेदुर्वाद्यस्वरास्तत्र मृदङ्गपटहोद्भवाः ।
ननृतुश्चाप्सरोवृन्दा गन्धर्वपतयो जगुः ॥२९॥
तुष्टुवुर्देवताः सर्वाः प्रणम्य च परिक्रमन् ।
जय जयेति सिद्धाश्च ह्यवदन्मुनयः पुनः ॥३०॥
ततो देवर्षयः सिद्धा हिरण्यकलशैस्तदा ।
अभिषेकान्दुस्तस्मै विश्वधारार्णपूरणैः ॥३१॥
नरसिंहस्ततो धीमान्संत्यज्य दैत्यविग्रहं ।
ययौहि मुञ्जवच्छैलं क्रीडितुमीश्वराचले ॥३२॥
एवं च विश्वधारायां स्नात्वा देवासुरा मुने ।
वरं लब्ध्वा मिथो युद्धं चक्रुर्बलोद्धता भृशम् ॥३३॥
द्वादश्यां स्नायते येन रुद्रभक्तिसमन्वितः ।
सर्वपापं परित्यज्य शिवलोके महीयते ॥३४॥
माहात्म्यमेतत्कथितं मया ते-
तद्विश्वधारातटिनीप्रशंसा ॥
अन्यापगायाः शृणु वच्मि भूयः
स्नानेन तस्यां द्विजतो भवेद्राट् ॥३५॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे विश्वधारा-
माहात्म्ये हिरण्यकशिपुवधोनाम
पंचाशत्तमोऽध्यायः ॥५०॥

अ० ५१ —❀❀❀—

अगस्त्य उवाच ।

कोऽसौ गाधिसुतः स्कन्द तपश्चक्रे सुदुश्चरे ।
कस्मिन्स्थाने च तीर्थे वै पुरा विभो महामनाः ॥१॥
ब्रह्मत्वं च कथं लब्धं चान्यवर्णैः सुदुर्लभं ।
जायते मयि तच्चित्रं तच्चरित्रं वदस्व तत् (मे) ॥२॥

स्कन्द उवाच ।

आसीद्गाधिश्च धर्मिष्ठः सार्वभौमो महानृपः ।
तस्य पुत्रो महातेजा विश्वामित्र इति श्रुतः ॥३॥
शान्ते पितरि चक्रे स राज्यं सार्वक्षितिं मुदा ।
प्रपालयन्प्रजाः न्यायैर्दण्डनीतिमहोत्सवैः ॥ ४ ॥
नीतिशास्त्रसुवेत्तासौ सर्वधर्म्मपरायणः ।
पितृवच्चैव धर्मिष्ठो देवब्राह्मणपूजकः ॥५॥
स कदाचिद्दिने विप्र तपस्तप्तुं मनो दधे ।
वशिष्ठेन समस्तप्तुं पुरा श्रुत्वेति भूरिशः ॥६॥
नारदात्तु समाकर्ण्य ययौ तप्तुं हिमाचले ।
संत्यज्य कृष्णराज्यं भोग्यानि तत्सुखानि च ॥ ७॥
सितप्रभा नदीं मत्वा विश्वामित्रो हि निर्ज्जने ।
तस्यां सम्यक् मुदा सस्नौ यथोक्तं श्रुतिभिर्मुने ॥८॥
ददौ दायांश्च विप्रेभ्यो यथा विभवविस्तरैः ।
सन्तर्प्य पितृदेवांश्च भक्तिपूर्वं तिलोदकैः ॥९॥
हिमवन्तं समारुह्य एकाकी च शिवात्मकं ।
सितप्रभोद्भवायः स तस्थौ हिरण्यकिंशुके ॥१०॥
भूत्यालेपितदेहोऽसौ रुद्राक्षकंठलम्बकः ।
लिंगं च पार्थिवं स्थाप्य समानर्च जितेन्द्रियः ॥११॥
एवं विधिं च नित्यं स कृतवान्भक्तिमान्मुदा ।
तपश्चव्याप्य षण्मासं जयाय पूजनैर्भृशम् ॥१२॥
ततो रुद्रो ह्यदयात्मा गगनस्थो महाविभुः ।
व्याचष्ट वचनं तस्मै वरं दातुं च भक्तिने ॥१३॥
वरं वरय मत्तस्त्वं भक्त गाधिज सांप्रतम् ।
विद्यते यत्तव स्वान्ते वाञ्छा तच्च ददामि ते ॥१४॥

विश्वामित्र उवाच ।

तेजोरूपाय देवाय तेजसां तापये नमः ।
व्यक्तायाव्यक्तरूपाय लयालयाय ते नमः ॥१५॥
विश्वात्मने विश्वाय शंकराय नमो नमः ।
ज्ञानदाय च रुद्राय संसारदाय ते नमः ॥१६॥
यदि ददासि मे देव वरं वरद शंकर ।
वाञ्छाम्यहं वशिष्ठेन तुल्यं पराक्रमं विभो ॥१७॥
ब्राह्मण्यं मे तदंगं त्वमिदानीं कुरु शंकर ।
वरमेतच्च मे देहि तारये येन संसृतिम् ॥१८॥

अलख उवाच ।

मा वाञ्छय महापापमघोरं च द्विजातिनां ।
देवानामपि विप्राश्च गरिष्ठास्युर्हि गाधिज ॥१९॥
ब्रह्मणश्च मदंशस्य पूर्वोद्भूताः सुताश्च ते ।
तेभ्यो देवासुराः सर्वे जायन्ते कोटिकोटिशः ॥२०॥
ततो भक्त जगत्सर्वं स्थावरं जगमन्तथा ।
अद्यापि च तथा तेभ्यो जायन्ते कोटिकोटयः ॥२१॥
तस्माद्विप्राः सदा पूज्याः मान्याश्चाद्रिता नृप ।
भोजनैश्चैवभोक्तव्यो वन्दीयाश्च भक्तिभिः ॥२२॥
मे मूर्तयो द्विजाः सर्वे ज्ञानिनोऽज्ञानिनोपिवा ।
तस्मान्मान्याः सदा विप्रा इति स्यान्नृप निश्चितम् ॥२३॥
न निन्द्याश्च न दंड्याश्च न हन्तव्याः कदाचन ।

न वदेत्कुत्सितं तेभ्यो मूर्त्तयो मे द्विजातयः ॥२४॥
सर्वदेवमया विप्राः सर्वधर्ममयास्तथा ।
सर्वयज्ञमयाश्चैव लोकानां च पितामहाः ॥२५॥
ब्राह्मणेभ्यः समुद्भूतं भुवनं हि चतुर्दश ।
ततः समुद्भवा भूमिः सशैलवनकानना ॥२६॥
तस्माद्भूक्त रसाः सर्वाः ब्राह्मणानां च भूमयः ।
तेषामनुग्रहाद्भूपा भुञ्जन्ति च रसान् मुदा ॥२७॥
तद्भूमिस्थाः प्रजा रमाराः न निम्नुर्वाडवान्कदा ।
न ग्राह्यं तद्वसु भूमिस्तैर्दत्तं च विना नृप ॥२८॥
यदि लुण्ठन्ति भूमिं तद्दण्डन्ति वाडवान्सकृत् ।
तिष्ठन्ति नरके ते च यावच्चन्द्रदिवाकरौ ॥२९॥
यावन्त्यश्रूणि विप्राणां पतन्ति च महीतले ।
तद्दुःखजानि राज्ञश्च तन्नरकफलं शृणु ॥३०॥
यावन्तः पांशवो भूमावश्रुविलेपिताश्च ते ।
पतन्ति नरके तावद्रेणूनां वर्षसंख्यया ॥३१॥
तस्माद्विप्राः सदा सेव्याः जनैः कल्याणमिच्छुभिः ।
यत्किंचिदपि तेभ्यो वै दातव्यं ज्ञानसंयुतैः ॥३२॥
ब्राह्मणं यः समाहूय याचमानमकिंचनम् ।
पश्चान्नास्तीति च ब्रूयात्सवै ब्रह्महणः स्मृतः ॥३३॥
क्रोधाद्द्वेषाद्भयाल्लोभाद्ब्राह्मणस्य वदेत्तु यः ।
मर्मान्तिकं महादोषं ब्रह्महा स प्रकीर्त्तितः ॥३४॥
यश्च विद्याभिमानेन निस्तेजयति सद्द्विजं ।
उदासीनं सभामध्ये ब्रह्महा स भवेन्नरः ॥३५॥
द्विजवृत्त्यापहरणे न्यायतः समुपार्जिते ।
ब्रह्महत्या समज्ञेयं पातकं नात्र संशयः ॥३६॥
देवद्विजगतां भूमिं पूर्वभुक्तां हरेत्तु यः ।
प्रणष्टामपि कालेन स भवेद्ब्रह्मघातकः ॥३७॥
येन संतोषितो विप्रस्त्रैलोक्यं तेन तोषितम् ।
भक्त्या समर्चितं भूयः पूजितं सचराचरम् ॥३८॥
येन दत्तं द्विजातिभ्यो भक्त्या स्वल्पं बहूनि वा ।
लोकान्तरे च तेनाशु संप्राप्यन्ते तदक्षयम् ॥३९॥
अज्ञानैः संयुता विप्रा मम मन्त्रपरायणाः ।
तेभ्यो दत्तं च यत्किंचित्कोटिकोटिगुणं भवेत् ॥४०॥
तन्मुखेषु हुतं भोज्यं तथा दत्तं समर्चितं ।
गृह्णाम्यहं हि तत्सर्वं भक्तिपूर्वं च गाधिज ॥४१॥
एतज्जन्म च ते वत्स क्षत्रियाङ्गसमुद्भवं ।
न भवेदिह विप्र त्वं जन्मान्तरे भविष्यति ॥४२॥
इह त्वं च हि राजर्षिर्भविताऽसि न संशयः ।
ततो वशिष्ठतुल्यश्च सितप्रभाजलाश्रवात् ॥४३॥

स्कन्द उवाच ।
इत्यादिश्य वरं तस्मै तेजोरूपो महाविभुः ।
तिरोदधे तदा व्योम्नि स्वभाभिर्भासयन्दिशः ॥४४॥
ऋषयोऽपि समाजग्मुस्तमभिषेचितुं पुनः ।
मरीचिप्रमुखाः शीघ्रमीश्वरस्य समाज्ञया ॥४५॥
सितप्रभानदीतीरे तमानीय यथाविधि ।
अभिषेकं ददुस्तस्मै हिरण्यकलशैस्तदा ॥४६॥
सप्तर्षयो ददुर्भूयः आशीर्वादं समर्हयन् ।
भो विश्वामित्र राजर्षिर्भवान्भूयाद्धि विप्रता ॥४७॥
लोकन्स्रष्टुं च राजर्षे भवान्शक्तो भविष्यति ।
शास्त्रायुधः पुनर्वत्स अस्मत्तुल्यो न संशयः ॥४८॥
ब्रह्मत्वेनाभिषेकं च विश्वामित्राय धीमते ।
दत्वा सप्तर्षयः स्थानं स्वं स्वं ययुश्च सिद्धिदाः ॥४९॥
तदादि गाधिजो राजा विप्रतुल्यो ह्यभून्मुने ।
राजर्षिरिति लोकाश्च तस्मै वदन्ति सर्वशः ॥५०॥
विश्वामित्रः ससर्जाशु गोधूमधान्यकान्तथा ।
नारिकेलं गुवाकं च वशिष्ठेन यथापुरा ॥५१॥
वशिष्ठेन समं भूयस्तपश्चक्रे स गाधिजः ।
ईर्ष्यया च पुनस्तीव्रं सितप्रभासुसंगमे ॥५२॥
मुमुदुवस्ततः सिद्धाः सानुगा मुनयस्तथा ।
देवाश्चैव सगन्धर्वा दैत्यास्तस्यां समाययुः ॥५३॥
सस्नुर्भक्त्या मुदायुक्ता सितप्रभानदीजले ।
तदीप्सितानि ते लोकास्तस्यां फलानि चालभन् ॥५४॥
ये काङ्क्षन्ति सुखं लोका इहलोके परत्र च ।
सितप्रभानदीतोये स्नानं कुर्वन्तु सन्ततम् ॥५५॥
यः संस्नाति महाष्टम्यां तस्यां धीमान् विशेषतः ।
सर्वपापैर्विनिर्मुक्तो ज्ञानाज्ञानकृतैरपि ॥५६॥
इहलोके सुखं भुक्त्वा सूर्यप्रतिमयानगः ।
सर्वगोत्रान्समुत्तार्य्य स लभेत्परमं पदम् ॥५७॥
प्रोक्तं सितापातसरिद्वराया-
स्तुभ्यं च माहात्म्यमलं च धीर ।
प्राप्तो नृपेण द्विजता च तस्यां,
स्नात्वा द्विजानां च फलं किमूचे ॥५८॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे सितप्रभामाहात्म्ये विश्वामित्रतपःसिद्धिर्नामैकपंचाशत्तमोऽध्यायः ॥५१॥

—❀❀❀—

५२ स्कन्द उवाच ।
रत्नाधारा नदी श्रेष्ठा सर्वतीर्थमयी च सा ।
तस्यां च स्नानमात्रेण लभ्यते वाञ्छितं फलम् ॥ १ ॥

यस्याः श्रवणमात्रेण महापापैः प्रमुच्यते ।
माहात्म्यं शृणु तस्याश्च वच्मि ते मम भक्तिने ॥२॥

दुर्वासाः सत्यवासाश्च सत्यसन्धो महातपाः ।
रत्नाधाराजलेस्नात्वा षड्वर्गमत्यजत्तटे ॥३॥

तेनैव मुनिना शप्ता पुरा ते चाप्सरोगणाः ।
तच्छापतो ह्यभूवंस्ताः स्वर्गवेश्या न संशयः ॥४॥

स्थानदोषैः स्वकीयानां मुनेश्चैवापमानतः ।
प्राप्ताश्च विप्रस्हास्ताभिः स्वर्वेश्याऽद्यापि सप्तकाः ॥५॥

अगस्त्य उवाच ।

कथं शप्ताः पुरा स्कन्द दुर्वाससाऽप्सरोगणाः ।
स्वर्वेश्याश्च ततोऽभूवन् कस्माच्चैवापराधतः ॥६॥

ताश्चाप्सरोगणा देवकन्यास्तजाश्च सप्तकाः ।
श्रोतुमिच्छाम्यहं चैतद्वृत्तान्तं वद मे विभो ॥७॥

स्कन्द उवाच ।

आसीत्पूर्वे महाराज धर्मकेतुरिति श्रुतः ।
सार्वभौमो हि धर्मिष्ठो नीतिशास्त्रविशारदः ॥८॥

तस्य सुता घटोद्भूतसप्तकाः समजीजनन् ।
गुण-रूपैश्च ताः सर्वाः संयुताश्चा भवन्मुने ॥९॥

युवत्यो रूपसम्पन्नाः सर्वाभरणभूषिताः ।
परिग्रहैश्च कामार्त्ताः सर्वलोकविमोहिताः ॥१०॥

वैशाखशुक्लपक्षे वै एकादश्यां भवेत्तिथौ ।
समाययुश्च ताः स्नातुं रत्नधाराजले मुने ॥११॥

तस्यास्तीरे मुनिश्रेष्ठं दुर्वाससं महामुनिम् ।
ददृशुर्नृपकन्यास्तास्तस्यां स्नातुं गतेषु वै ॥१२॥

स्नात्वा योगासनस्थं वै भूत्यालिप्तकलेवरं ।
धारयन्तं च रुद्राक्षान् त्रिपुंड्कमहोज्ज्वलम् ॥१३॥

लिङ्गं च पार्थिवं स्थाप्य पुरो देशे मुदान्वितं ।
पूजयन्तं मुहुर्भक्त्या जपन्तमृजुविग्रहम् ॥१४॥

चिन्तयन्तं महेशानमक्षमालाकरोज्ज्वलम् ।
भासयन्तं दिशो नो नः स्वकीयैःसूर्य्यसन्निभम् ॥१५॥

दुर्वाससं मरुद्भक्षं षड्वर्गैः प्रविवर्ज्जितं ।
शापायुधं तपः क्लेशं द्वितीयभगवानिव ॥१६॥

विवस्त्रास्तास्ततः सस्नू रत्नधाराजलोत्तमे ।
पश्यन्नपि मुनिं दम्भात्तमवमन्य कन्यकाः ॥१७॥

अतिवृद्धस्तथैकाकी असौ मुनिः प्रदृश्यतः ।
किंजुगुप्सति निर्वस्त्राः हसिष्यति मिथः पुनः ॥१८॥

कृत्वेति कन्यकास्तस्यां जलक्रीडां प्रचक्रिरे ।
परित्यज्य च वासांसि वदन्त्यस्तत्तटे मिथः ॥१९॥

मुनिश्रेष्ठश्च दुर्वासास्तासां चेष्टां ददर्श च ।
विवस्त्राश्चैव निर्लज्जाः प्रक्रीडन्त जले मुदा ॥२०॥

स्वस्यावहेलनं कृत्वा संक्रीडितं च तज्जले ।
स तामिगिति संप्रेक्ष्य दुर्वासाः सुचुकोप च ॥२१॥

कोपात्मा धीर दुर्वासास्ताभ्यः शापं ददौ भृशं ।
विबुधैरप्यसह्यं तदच्छापं महदद्भुतम् ॥२२॥

दुर्वासा उवाच ।

भो भो कन्याः सुदुर्लज्जा गर्विण्यो रूपयौवनैः ।
यूयं मे कृतवन्त्योऽद्य महदद्भुतहेलनम् ॥२३॥

व्रीडां चैव परित्यज्य भूत्वा निर्वसना ध्रुवं ।
चक्रुर्यूयं जलक्रीडामवमत्य च मां भृशम् ॥२४॥

यस्मात्क्रीडथ यूयं वै मां चात्र हेलनं सुखम् ।
गणिका इव तस्माद्धि सप्तवेश्या भवन्तु च ॥२५॥

वसुभिर्येच गर्वन्ति रूपसौन्दर्य्ययौवनैः ।
गर्वतस्ते पतिष्यन्ति तैस्त्यक्ताश्च न संशयः ॥२६॥

रजोगुणैश्च ये केचिद्विराजन्ते सुखैषिणः ।
तेषां चैव भविष्यन्ति बुद्धिभ्रंशोऽविवेकिनः ॥२७॥

निर्दयाभिर्जनाश्चेह घ्नन्ति .पशून्समात्मने ।
तद्विग्रहाः पतिष्यन्ति अज्ञानाज्ज्ञालसैर्मुहुः ॥२८॥

अवमानन्ति ये विप्रान् श्रीमन्निमिलितेक्षणाः ।
तेऽपि चाशु पतिष्यन्ति सर्वदैवमयान्भृशम् ॥२९॥

ये हेलयन्ति देवांश्च भुक्ति-मुक्तिफल-प्रदान् ।
तेऽपि सत्यं पतिष्यन्ति परिवारैः समं तदा ॥३०॥

ये हेलयन्ति वै तीर्थमवधूतं तपस्विनं ।
पतिष्यन्ति जनास्ते च तन्निन्दका विशेषतः ॥३१॥

अतो मामवमन्याद्य विवस्त्राः क्रीडिता जले ।
भवन्तु गणिकाः सप्त यूयं च कन्यका ध्रुवम् ॥३२॥

स्कन्द उवाच ।

ततो दुर्वाससः शापं श्रुत्वात्र सप्तकन्यकाः ।
विह्वलांग्यो ययुर्गेहं कम्पितांग्यो मुहुर्मुहुः ॥३३॥

ता वै निवेदयन्तिस्म स्वपित्रे धर्मकेतवे ।
यद्दत्तं मुनिना शापं स्वात्मभ्यश्च तपस्विना ॥३४॥

धर्मकेतुनृपोऽप्याशु धर्षितोऽभूत्तदा भृशम् ।
श्रुत्वा दुर्वाससःशापं स्वभासां भासयन्दिशः ॥३५॥

श्रुत्वा दुर्वाससः शापं दुहितॄणां च वेपथुः ।
ततो दुःखातुरो राजा धर्म्मकेतुर्व्यचिन्तयन् ॥३६॥

जगामाशु मुनिर्यत्र दुहितृभिः समं मुने ।
दुर्वाससं मुनिं राजा रत्नधारातटे स्थितम् ॥३७॥

जपन्तं ध्यायमानन्तं स्वभासा भासयन्दिशः ।
दृष्ट्वा मुनिवरं राजा त्रस्तोऽभूच्च स वेपथुः ॥३८॥

तदन्तिकं च गन्तुं वा नशक्तः खलु कोऽपि वा ।
ततश्चिन्ताकुलो राजा बभूव तापसो रुपा ॥३९॥

दह्यति मे तनुं तस्य समीपं चेद्व्रजाम्यहम् ।
तथापि न गन्तव्यं प्रणिपाताय महात्मनः ॥४०॥
कोपश्च महतः शान्तः प्रणिपातेन नान्यथा ।
समाधायेति एवं स्वान्ते धर्मकेतुस्तदन्तिकम् ॥४१॥
जगाम च शनैः राजा दुहितृभिः समं मुने ।
गत्वा तदन्तिकं राजा ननाम तं मुहुर्मुहुः ॥४२॥
दण्डवत्पातयित्वाङ्गं स्तोत्रं चकार भक्तिभिः ।

धर्मकेतुरुवाच ।

नमो ब्राह्मणदेवाय ब्रह्मात्मने तपस्विने ॥४३॥
दुर्वाससे ऋग्गोक्ताय सत्यवाचे नमो नमः ।
यस्य कोपेन संपूर्णं ब्रह्माण्डं भस्मितुं क्षमः ॥४४॥
सुरैरपि न सह्यन्ते यस्य कोपः सुदारुणः ।
सुरासुरनरैः सर्वैर्योऽर्च्चितः सततं मुदा ॥४५॥
तस्मै नमो मुनीशाय नमस्ते ब्रह्मवर्च्चसे ।
क्षमस्व मेऽपराधं त्वं दुहितॄणां तथैव च ॥४६॥
रूपं संहर विप्रेश चैतासु मयि चाधुना ।
अज्ञकृतागसा ब्रह्मन्नपराधं न गण्यते ॥४७॥
स्त्रीणां विशेषतो भूय अतः क्षमस्व तं विभो ।
उपायं मे च वक्तव्यं ते किंकराय शांकर ॥४८॥
आसां च दुहितॄणां मे येन शापो विनश्यति ।

दुर्वासा उवाच ।

आभिः स्नानं कृतं नद्यां स्ववमत्य च मामतः ॥४९॥
दत्तं शापं विवासाभ्यस्ताभ्यो रुषा नृपोत्तम ।
यद्दत्तं च मया शापो यस्मैचाशीस्तथापि वा ॥५०॥
नविनश्यति तत्सर्वं धर्मकेतो कदापि च ।
गृहस्थानामपीशार्य्यशापंद्विजन्मिनां च यत् ॥५१॥
कदापि न भवेन्मिथ्या तपस्वीनां कुतो वद ।
कदाचिच्च रुषा विप्रः शापं ददाति चागसः ॥५२॥
तेन प्रदह्यते तस्य सन्तान्वया परा नृप ।
सोढव्यानि द्विजातीनां सहस्रागांसि वै ततः ॥५३॥
आत्मनः पुत्रपौत्राणां हिताय च सदा बुधैः ।
तस्मादिदं सदा वाच्यं तस्यात्मनोपि वागसः ॥५४॥
मेऽपराधं क्षमस्वेति ब्रह्मन् बद्धाञ्जलिं बुधः ।
एवं चेन्नैष्ठिकीं नित्यक्रियां जानीहि धीमतां ॥५७॥
भद्रं चैवात्मनस्तेषामन्यथा विपदोऽनिशम् ।
आसां च त्रिदिवस्थानमुपायं किंचिदस्ति च ॥५८॥
भक्त तवाऽधुनास्नेहाद्वदाम्यहं शृणुष्व तत् ।
रत्नधारा नदीतीरे स्नात्वा यथा च पार्थिव ॥५९॥
उमामहेश्वरं देवं अहोरात्रं समभ्यर्च्चयन् ।
ततः स्तुत्वा वरं प्रार्थ्य परिक्रम्य नमेत्पुनः ॥६०॥
भोज्यान्नं भोजयन्विप्रान् शिवमुद्दिश्य दक्षिणां ।
तत एतत्तनुं त्यक्त्वा उमाव्रतपरायणाः ॥६१॥
मुदा गच्छन्ति ताः स्वर्गं गणिकाश्च सुरप्रियाः ।

स्कन्द उवाच ।

इत्युपदिश्य ताभ्यश्च दुर्वासाः स महामुनिः ॥६२॥
ययौ हिमालयं शृंगं तपस्तनुं पुनर्मुने ।
धर्म्मकेतुर्नृपश्चापि ताभिः समं ययौ गृहम् ॥६३॥
कारयित्वा व्रतं प्रोक्तं मुनिना यद्भिनाश्च तं ।
ततो देहान्तरे ताभिः प्रलब्धं स्वर्गमुत्तमम् ॥६४॥
रत्नधाराजले स्नानादुपसौन्दर्य्यदेहिनः ।
गणिकास्तत्र चाभूवन्स्वैरिण्यो वञ्जिणस्तथा ॥६५॥
देवप्रियाश्च रूपाढ्यास्ता एव चाप्सरोगणाः ।
रत्नधाराजले स्नानादुपसौन्दर्यसंयुताः ॥६६॥
अद्यापि ताः प्रतिष्ठन्ति युगे स्त्रियो दिवि द्विज ।
घृताची मेनका रम्भा उर्व्वशी च तिलोत्तमाः ॥६७॥
सुकेशी मञ्जुघोषाख्या एताः स्युरप्सरोगणाः ।

वाञ्छन्ति ये सततं हि रूपं
कुर्वन्तु तस्यां सुजलाप्लवांश्च
सर्वैनरा-मुक्तशरीर-पूता
यास्यन्ति नाकं हि मुदान्वितास्ते ॥६८॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे रत्नधारामाहात्म्येसप्ताप्सरोगणसिद्धिर्नाम द्विपंचाशत्तमोऽध्यायः ॥५२॥

अ० ५३ अगस्त्य उवाच ।

भगवन्मे त्वया प्रोक्तं दुग्धप्रभेति या पुरा ।
तस्याश्चैव हि माहात्म्यं श्रोतुमिच्छाम्यहं विभो ॥१॥
केन तप्तं पुरा तस्यां तप्त्वा लब्धं च किं प्रभो ।
जलाप्लवफलं तस्या एतन्मे ब्रूहि सांप्रतम् ॥२॥

स्कन्द उवाच ।

आसीत्कश्यपसूनुश्च तारको नाम विश्रुतः ।
स कदाचिद्दिने धीमन्स्ना[illegible] तस्यां गतोऽसुरः ॥३॥
दुग्धप्रभानदीं पुण्यां प्रेक्ष्य स हर्षितोऽसुरः ।
तस्यां सस्नौ मुदा युक्तो ददौ दानं ततः पुनः ॥४॥
तत्समीपे दैत्येशस्तत्तीरे हिमभूषिते ।
तत्रापश्यन्मुनिवरं प्रचेतसं तपः स्थितम् ॥५॥
प्रणम्य शिरसा दैत्यस्तं समर्हितवान्मुदा ।
तदाज्ञां च समादाय दुग्धप्रभाजलाप्लुतः ॥६॥
ततः स्नात्वा जले नद्या धातुसानौ प्रतप्तवान् ।
ब्रह्माणं च समाराध्य भक्तिपूर्वश्च तारकः ॥७॥
सहस्राब्दं मुदा ध्याय्य जजाप मनुमुत्तमम् ।
कायमनोवचोभिश्च भक्त्या च स्तोत्रयन्मुने ॥८॥

ततश्च भगवान्ब्रह्मा नद्युत्पाते हिमालये ।
आविर्भूतो वरं दातुं तारकाय तपस्विने ॥९॥

ब्रह्मोवाच ।

अहोऽद्भुतं तपस्तप्तं सुकठोरं त्वया सुत ।
निर्जलेऽत्र तुषाराद्रौ मृदुदेहो विभीषणः ॥१०॥
सहस्राब्दं तपस्तप्तं त्वया वत्स सुनिश्चितं ।
भक्त्या मां हि समाराध्य यदेयं नास्ति चोऽधुना ॥११॥
वरं वरय वत्साशु विद्यते हृदि ते च यत् ।
अदेयमपि तत्सर्वं दास्याम्यहं न संशयः ॥१२॥

स्कन्द उवाच ।

इत्याकर्ण्य वचो दैत्यः पितामहस्य भूमनः ।
मुमोद तारकस्तस्मै स्तोतुमारम्भितः पुनः ॥१३॥

तारक उवाच ।

पितामहाय धात्रे वै विधात्रे हि नमोऽस्तु ते ।
निरञ्जनाय देवाय विरिंचाय नमो नमः ॥१४॥
आद्याय संसनोज्ञाय विश्वरूपाय वै नमः ।
स्थूलसूक्ष्मशरीराय सर्वात्मने नमो नमः ॥१५॥
ददासि यदि मे ब्रह्मन् मनोवाञ्छोत्तमं वरम् ।
देवासुरैर्नरैः सर्वैरवध्यत्वं प्रदीयताम् ॥१६॥
यावन्तो जीविनः सन्ति त्रिषु लोकेषु सर्वशः ।
अवध्यं विद्यमानानां तावकानां भवन्तु मे ॥१७॥

स्कन्द उवाच ।

श्रुत्वा तद्वचनं ब्रह्मा स्वीकारं कृतवान्तदा ।
तथेत्येवमिति प्रोक्त्वा ब्रह्मलोकं ययौ पुनः ॥१८॥
ततो दैत्या मुदा युक्तास्तदन्तिकं समाययुः ।
अभिषेकं ददौ यस्मै दुग्धप्रभाजलैस्तदा ॥१९॥

दैत्या ऊचुः ।

भोभो वत्स महावीर चक्रलोचन ते वलैः ।
अद्यादि नो भवान्राजा भवतु च सुनिश्चितम् ॥२०॥
यतो देवबलांभोधेर्गाढान्त्सन्तारयिष्यति ।
स्मान्नो नुततस्त्वं वा चाद्यादि तारको भव ॥२१॥

तारक उवाच ।

रः स्थितिर्वत्स नैवात्र न कार्य्ये कारका इह ।
गच्छध्वं दानवाः स्वर्गं युधिष्यामोऽमरैः समम् ॥२२॥

[illegible] उवाच ।

[illegible]
[illegible] महद्युद्धं देवदानवयोर्भृशम् ॥२३॥
[illegible] सकलान्देवान्तारको दानवैः सह ।
[illegible] त्रिदिवे राज्यं [illegible] त्रिदशान्दिशः ॥२४॥
[illegible] कुमसज ।

रुद्रमुखारविन्दाद्धि पुरा प्रगणितं श्रुतम् ॥२५॥

ऋषय ऊचुः ।

दैत्यराज्ये कृते स्वर्गे देवसैन्येषु विद्रुते ।
किमकुर्वन्सुरास्तत्र तद्वलादितसंभ्रमाः ॥२६॥
लब्धवरोऽपि देवारिस्तारकाख्यो महासुरः ।
कथं निर्जितवान्देवान्प्रभो तद्वद नोऽधुना ॥२७॥

लोमहर्षण उवाच ।

शृणुतार्य्याः प्रवक्ष्यामि यद्वृत्तान्तं पुराभवत् ।
गुरोर्व्यासमुखोद्भूतं स्कन्दस्य चरितं महत् ॥२८॥
दिवौकसः सगन्धर्वा ब्रह्माणं शरणं ययुः ।
बृहस्पतिं पुरोधाय भ्रष्टराज्याः पराजिताः ॥२९॥
नम्रप्रत्यच्चर्चनाप्तास्ते ब्रह्मलोके सनातनात् ।
अभिप्रोचुर्भयात्तस्य तच्चेष्टां ब्रह्मणे ध्रुवम् ॥३०॥

देवा ऊचुः ।

ॐ नमस्ते ब्रह्मणेऽब्जाय सर्वरूपाय भूतिने ।
जीवेश्वराय देवाय सर्वाङ्गेषु च जन्मिनाम् ॥३१॥
भवत्प्रसादतस्तात तारकेन हि सर्वशः ।
त्रैलोक्यं क्षोभितं शश्वल्लब्ध्वा च भवतो वरम् ॥३२॥
दशवर्षसहस्राणि स्वर्गराज्यं चकार सः ।
लब्धवरो महावीरो विद्राव्य नोदिशो भृशम् ॥३३॥
उपायमस्ति चेन्नोऽज प्रोच्यतां विश्वहेतवे ।
येन हत्वाऽशु तं पापं स्थास्यामस्त्रिदिवं यथा ॥३४॥

ब्रह्मोवाच ।

मास्म सुरा विषीदध्वं तस्मै वरप्रदानतः ।
यद्यत्कृतानि कर्म्माणि कर्म्मठुमः फलत्यपि ॥३५॥
तेनावश्यं तपःस्थेन प्राप्तव्यं तपसः फलम् ।
अदेयमपि दातव्यं सुकठोरतपस्विने ॥३६॥
तपसश्च फलान्ते हि अवश्यं तं वधिष्यति ।
रुद्रात्मजो महायुद्धे शक्त्या कुमार ऐश्वरः ॥३७॥

लोमहर्षण उवाच ।

ब्रह्मणोक्तं समाकर्ण्य असंत्रयन्सुराग्रजाः ।
ययुः शिवान्तिकं सर्वे संभूय त्रिदशा द्रुतं ॥३८॥
ऊचुःप्रणम्य ते तस्मै तद्वृत्तान्तं सुरद्विषाम् ।
रक्ष रक्ष महादेव कृत्वेति नः स्वकिंकरात् ॥३९॥
तदाकर्ण्य वचो रुद्रोदेवानां पथ्यमात्मनः ।
अचिन्तयत्स देव्यां कुमारजन्महेतवे ॥४०॥
तस्यां रुद्रात्मजो जज्ञे महावीरो महाबलः ।
संवर्द्धते दिनेऽजस्रं सिते पक्षे यथा शशी ॥४१॥
तेजो बलान्वितं स्कन्दं सर्वोन्नतसुविक्रमम् ।
रुद्रात्मजमिति श्रुत्वा विषीदन्त्यसुरा मुहुः ॥४२॥

साच्युतं शंकरं देवाः प्रभातीर्थं ययुर्भुवि ।
सितप्रभाप्रभानद्योः संगमे तीर्थमुत्तमे ॥४३॥
तत्र स्नात्वा दिवं यान्ति परिवारैः समन्विताः ।
गवां कोटिफलं प्राप्य राजसूयशतोद्भवं ॥४४॥
ततोऽभिषेकसंभारान्सर्वान्संभृत्य शास्त्रतः ।
बृहस्पतिः समिद्धेऽग्नौ जुहोत्यग्निं यथाविधि ॥४५॥
ततो हिमवता दत्ते मणिप्रवरशोभिते ।
दिव्यरत्नांचिते पुण्ये निषण्डं परमासने ॥४६॥
सर्वमङ्गलसंभारैर्विधिमंत्रपुरस्कृतं ।
आभिषेचनिकं द्रव्यं गृहीत्वा प्रययुः सुराः ॥४७॥
इन्द्रोपेन्द्रो महावीर्य्यौ सूर्य्याचन्द्रमसौ तथा ।
धाता चैव विधाता च तथा चैवानिलानलौ ॥४८॥
पूष्णा भगेनार्य्यम्णा च अंशेनच विवस्वता ।
रुद्रश्च सहितो धीमान् मित्रेण वरुणेन च ॥४९॥
रुद्रैर्व्वसुभिरादित्यैरश्विभ्यां च वृतः प्रभुः ।
विश्वेदेवैर्मरुद्भिश्च साध्यैश्च पितृभिः सह ॥५०॥
गन्धर्व्वैरप्सरोभिश्च यक्ष-राक्षस-पन्नगैः ।
देवर्षिभिरसंख्यानैर्वालखिल्यैस्तथैव च ॥५१॥
ब्रह्मर्षिभिस्तथा चैव स्वाहास्वधामरीचिभिः ।
वृतश्चांगीरसोभिश्च यतिभिश्च महात्मभिः ॥५ ॥
सर्वैर्विद्याधरैः पुण्यैर्योगसिद्धैस्तथा वृतः ।
पितामहः पुलस्त्यश्च पुलहश्च महातपाः ॥५४॥
अंगिराः कश्यपोऽत्रिश्च मरीचिर्भृगुरेव च ।
क्रतुर्हरः प्रचेताश्च मनुर्दक्षस्तथैव च ॥५५॥
ऋतवश्च ग्रहास्तत्र ज्योतींषि चाययुस्तथा ।
मूर्त्तिमत्यश्च सरितो देवाश्चैव सनातनाः ॥५६॥
समुद्राश्च ह्रदाश्चैव तीर्थानि विविधानि च ।
पृथिवी द्यौर्दिशश्चैव पादपाश्च तथाविधम् ॥५७॥
अदितिर्देवमाता च ह्रीः श्रीः स्वाहा सरस्वती ।
उमा शची सिनीवाली तथा चानुमती कुहूः ॥५८॥
राका च वृषणा चैव पत्न्यश्चान्या दिवौकसां ।
हिमवांश्चैव विन्ध्यश्च मेरुश्चानेकश्रृंगवान् ॥५९॥
ऐरावतः सानुचरः कलाः काष्ठास्तथैव च ।
मासार्द्धमासऋतवो रात्र्यहनी तथापरा ॥६०॥
उच्चैःश्रवा हयश्रेष्ठो नागराजश्च वासुकिः ।
अरुणो गरुडश्चैव वृक्षाश्चौषधिभिः सह ॥६१॥
धर्मश्च भगवान्देवाः समाजग्मुर्हि संगताः ।
कालो यमश्च मृत्युश्च यमस्यानुचराश्च ये ॥६२॥
ते कुमाराभिषेकार्थं समाजग्मुस्ततस्ततः ।
जगृहुस्ते तदा तत्र सर्व एव दिवौकसः ॥६३॥

अभिषेचनकुम्भानि मंगलानि च सर्वशः ।
दिव्यैः संभारसंयुक्तैः करकैः कांचनैः शुभैः ॥६४॥
गण्डकीभिश्च पुण्याभिर्दिव्यतोयाभिरेव च ।
प्रभातीर्थोद्भूतैस्तोयैः स्वर्णकलशपूरितैः ॥६५॥
ददौ ब्रह्मा कुमाराय अभिषेकमृचां पठन् ।
अभ्यषिञ्चत्कुमारं वै सप्रहृष्टा दिवौकसः ॥६६॥
सेनापतिं महात्मानमसुराणां भयंकरं ।
मुनयो वै यथापूर्वं वरुणं च जलेश्वरम् ॥६७॥
तथाभ्यषिंचद्भगवान्ब्रह्मा लोकपितामहः ।
कश्यपश्च महातेजा ये चान्ये नानुकीर्तिताः ॥६८॥
तस्मै ब्रह्मा ददौ प्रीतो बलिनो वातरंहसः ।
कामवीर्यधरान्सिद्धान्महापारिषदान्प्रभुः ॥६९॥
नन्दिसेनं लोहिताक्षं घण्टाकर्णं च सम्मतम् ।
चतुर्थमस्यानुचरं ख्यातं कुमुदमालिनम् ॥७०॥
ततः स्थाणुर्महावेगं महापारिषदं प्रभुः ।
मायाशतधरं कामं कामवीर्य्यबलान्वितम् ॥७१॥
ददौ स्कन्दाय भूतेशः सुरारिविनिबर्हणं ।
स हि देवासुरे युद्धे दैत्यानां भीमकर्म्मणाम् ॥७२॥
जघान दोर्भ्यां संक्रुद्धः प्रयुतानि चतुर्दश ।
तथा देवा ददुस्तस्मै सेनां नैर्ऋतसंकुलाम् ॥७३॥
देवशत्रुक्षयकरीमजय्यां विष्णुरूपिणीं ।
जयशब्दं ततश्चक्रुर्देवा सर्वे सवासवाः ॥७४॥
गन्धर्वयक्षरक्षांसि मुनयः पितरस्तथा ।
ततः प्रादादनुचरौ यमः कालोपमावुभौ ॥७५॥
उन्माथं च प्रमाथं च महावीर्यौ महाद्युती ।
सुभ्राजो भास्वरश्चैव यौ तौ सूर्य्यानुयायिनौ ॥७६॥
तौ सूर्य्यः कार्त्तिकेयाय ददौ प्रीतः प्रतापवान् ।
कैलाशश्रृङ्गसंकाशौ श्वेतमाल्यानुलेपनौ ॥७७॥
सोमोप्यनुचरं प्रादान्मालं सुमालमेव च ।
ज्वालाजिह्वं तथा ज्योतिरात्मजाय हुताशनः ॥७८॥
ददावनुचरौ शूरौ परसैन्यप्रमाथिनौ ।
परिघञ्चवटं चैव भीमं च सुमहाबलं ॥७९॥
दहतिं दहनं चैव प्रचण्डौ वीर्य्यसम्मतौ ।
अंशोप्यनुचरान्पंच ददौ स्कन्दाय धीमते ॥८०॥
उत्क्रोशं पञ्चकं चैव वज्रदण्डधरावुभौ ।
तदा स्कन्दाय ददतुः प्रीतावश्विनौ स्वकमण्डलुम् ॥८१॥
स्कन्दनं कुसुमं चैव कुमुदं च महात्मने ।
डम्बरा डुम्बरौ चैव ददौ धाता महात्मने ॥८२॥
चक्रानुचक्रौ बलिनौ मेघवर्णौ मदोत्कटौ ।
ददौ त्वष्टा महामायौ स्कन्दायानुचरावुभौ ॥८३॥

सुव्रतं सत्यसन्धञ्च ददौ मित्रो महात्मने ।
कुमाराय महात्मानौ तपोविद्यासमन्वितौ ।।८३।।
सुदर्शनीयौ वरदौ त्रिषु लोकेषु विश्रुतौ ।
सुप्रभं च महात्मानं शुभकर्माणमेव च ।।८४।।
कार्त्तिकेयाय संप्रादाद्विधाता लोकविश्रुतौ ।
पालिपात्रं कालिकं च महामायान्वितावुभौ ।।८५।।
पूषा च पार्षदौ प्रादात्कार्त्तिकेयाय सुव्रतः ।
बलं चातिबलं चैव महावक्त्रौ महाबलौ ।।८६।।
प्रददौ कार्त्तिकेयाय वायुः सर्वबलोद्धतः ।
घसं चातिघसं चैव सितवक्त्रौ महाबलौ ।।८७।।
प्रददौ कार्त्तिकेयाय वरुणः सत्यसंगरः ।
सुवर्चसं महात्मानं तथैवाप्यतिवर्चसं ।।८८।।
हिमवान्प्रददौ भूयो हुताशनसुताय वै ।
कांचनं च महात्मानं मेघमालिनमेव च ।।८९।।
ददावनुचरौ मेरुरग्निपुत्राय सांप्रतम् ।
स्थिरं चैवास्थिरं चैव सुमेरुश्चापरो ददौ ।।९०।।
स्कन्दाय च महात्मानौ महाबलपराक्रमौ ।
उच्छ्रितं चाग्निशृंगं च महापाषाणयोधिनौ ।।९१।।
स्कन्दाय प्रददौ भक्त्या विन्ध्यः पारिषदावुभौ ।
संग्रहं विग्रहं चैव समुद्रोपि गदाधरौ ।।९२।।
स्कन्दाय प्रददौ सम्यक् महापारिषदावुभौ ।
उन्मादं पुष्पदन्तं च शंकुकर्णं तथैव च ।।९३।।
स्कन्दाय प्रददौ भूयः पार्वती शुभदर्शना ।
जयं महाजयं चैव नागौ गिरिशसूनवे ।।९४।।
नागेन्द्रः प्रददौ सम्यक् वासुकिः पन्नगेश्वरः ।
एवं साध्याश्च रुद्राश्च वसवः पितरस्तथा ।।९५।।
सागराः सरितश्चैव गिरयश्च महाबलाः ।
ददुः सेनाबलाध्यक्षान् शूलपट्टिशधारिणः ।।९७।।
दिव्यप्रहरणोपेतान्नानावेषविभूषितान् ।
असिमुद्गरहस्तांश्च दण्डहस्तांस्तथापराः ।।९८।।
गदाभुशुण्डिहस्ताश्च तथा तोमरपाणयः ।
आयुधैर्विविधैर्घोरैर्महात्मानो मनोजवाः ।।९९।।
महाबला महावेगा महापारिषदास्तथा ।
एते चान्ये च बहवो महापारिषदा द्विजाः ।।१००।।
उपतस्थुर्महात्मानं कार्त्तिकेयं यशस्विनम् ।
दिव्याश्चैवान्तरिक्षाश्च पार्थिवाश्चानिलोपमाः ।।१।।
व्यादिष्टा दैवतैः शूराः स्कन्दस्यानुचराभवन् ।
तादृशानां सहस्राणि प्रयुतान्यर्बुदानि च ।।२।।
अभिषिच्य महात्मानं परिवार्य्योपतस्थिरे ।
अनुजग्मुर्महात्मानं त्रिदशेन्द्रस्य संमताः ।।३।।

ततः शक्त्यस्त्रमददाद्भगवान्पाकशासनः ।
महास्वनां महाघण्टां द्योतमानां सितप्रभां ।।४।।
ददौ पशुपतिस्तस्मै सर्वभूतमहाचमूम् ।
उग्रां नानाप्रहरणां तपोवीर्यबलान्वितां ।।५।।
अजेयां स्वगणैर्युक्तां नाम्ना सेनां धनंजयाम् ।
रुद्रतुल्यबलैर्गुप्तां योधानामयुतैस्त्रिभिः ।।६।।
न सा विजानाति रणात्कदाचिद्विनिवर्त्तितुम् ।
विष्णुर्ददौ वैजयन्तीं मालां बलविवर्द्धिनीं ।।७।।
चतुःषष्टीसुकोटीनां समूहं योगिनी चमूम् ।
उमा देवी ददौ स्नेहात्सर्वोन्नतबलान्वितां ।।८।।
ददौ गौरी विरजसी वाससी सूर्यसप्रभे ।
गंगा कमंडलुं दिव्यममृतोद्भवमुत्तमं ।।९।।
ददौ प्रीत्या कुमाराय दण्डञ्चैव बृहस्पतिः ।
गरुड आयतं पत्रं मयूरश्चित्रबर्हिणं ।।१०।।
अरुणस्ताम्रचूडं च प्रददौ चरणायुधम् ।
नागन्तु वरुणो राजा बलवीर्यसमन्वितं ।।११।।
कृष्णाजिनं ततो ब्रह्मा ब्रह्मण्याय ददौ प्रभुः ।
समरेषु जयं चैव प्रददौ लोकभावनः ।।१२।।
सेनापत्यमनुप्राप्य स्कन्दो देवगणैः सह ।
शुशुभे ज्वलितोऽर्चिष्मा द्वितीय इव पावकः ।।१३।।
ततः पारिषदैः सार्द्धं मातृभिश्च समन्वितः ।
ययौ दैत्यविनाशाय ह्लादयन्सुरपुङ्गवान् ।।१४।।
सासिना नैर्ऋती भीमां स घण्टोच्छ्रितकेतना ।
सभेरीशंखमुरजा सायुधा सपताकिनी ।।१५।।
शारदी द्यौरिवाभाति ज्योतिर्भिरिव शोभिताः ।
ततो देवनिकायास्ते नानाभूतगणास्तथा ।।१६।।
वादयामासुरव्यग्रा भेरीशंखांश्च पुष्करान् ।
पटहान् झर्झरांश्चैव क्रकचान्गोमुखानिकान् ।।१७।।
आडम्बरान्गोमुखांश्च डिण्डिमांश्च महास्वनान् ।
कांश्यांश्च ताम्रजालादान्पंञ्चतालघनस्वनान् ।।१८।।
तुष्टुवुस्ते कुमारं तु सर्वे देवाः सवासवाः ।
जगुश्च देवगन्धर्वा ननृतुश्चाप्सरोगणाः ।।१९।।
ततः प्रीतो महासेनस्त्रिदशेभ्यो वरं ददौ ।
रिपून्हन्तास्मि समरे ये च रोपचिकीर्षवः ।।२०।।
प्रतिगृह्य वरं देवास्तस्माद्विबुधसत्तमात् ।
प्रीतात्मानो महात्मानो मेनिरे प्रहतान् रिपून् ।।२१।।
सर्वेषां भूतसंघानां हर्षान्नादः समुत्थितः ।
अपूपुरच्च लोकाँस्त्रीन् वरे दत्ते महात्मना ।।२२।।
स निर्ययौ महासेनो महत्या सेनया वृतः ।
वधाय युधि दैत्यानां रक्षार्थं च दिवौकसां ।।२३।।

व्यवसायो दया धर्म्मः सिद्धिर्लक्ष्मीर्धृतिः स्मृतिः ।
महासेनस्य सेनानामग्रे जग्मुः प्रियाभृशं ॥२४॥
स तया भीमया देवः शूल-मुद्गरहस्तया ।
ज्वलिता लातधारिण्या चित्राभरणवर्त्मया ॥२५॥
गदामुशलनाराच - शक्तितोमरहस्तया ।
दृप्तसिंहनिनादिन्या विनद्य प्रययौ गुहः ॥२६॥
ततो देवाः समं सैन्यैस्तारको यत्र संस्थितः ।
पुरोधाय च सेनानीं यानस्था निर्ययू रवैः ॥२७॥
स्नात्वा च षष्ठ्यां मधुमासि सम्यक्,
दुग्धप्रभायां प्रसभं ससैन्यः ।
स्कन्दो हि यानेन ययौ निनादै-
र्यत्र स्थितस्तारकदानवेशः ॥१२१॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे दुग्धप्रभामाहात्म्ये देवासुरस्कन्दनिर्याणं नाम त्रिपंचाशत्तमोऽध्यायः ।५३।

—❀❀❀—

लोमहर्षण उवाच ।

सुरसैन्यरवं श्रुत्वा तारकोऽपि प्रकोपितः ।
अदर्शत्सुरसैन्यं च सिंहनादेन चागतम् ॥१॥
स प्रेक्ष्य मन्त्रिणो दैत्यान् राक्षसांश्चैव तारकः ।
आहूय सर्वसैन्यानि तं दुद्राव रथेन च ॥२॥
अभ्यद्रवन्त देवांस्तान्विविधायुधपाणयः ।
व्यद्रवन्त दिशो दैत्यास्तानालोक्य भयान्विताः ॥३॥
दृष्ट्वा च स ततः क्रुद्धः स्कन्दतेजोबलान्विताः ।
शस्त्रास्त्रं भगवान् भीमं पुनः पुनरवासृजत् ॥४॥
आदधच्चात्मनस्तेजो हविषा हि यथानलः ।
अभ्यस्तमानः शक्यस्ते स्कन्देनामिततेजसा ॥५॥
तारकोऽपि महाक्रुद्धः अभिदुद्राव तं भृशं ।
आहूय दैत्यसैन्यानि त्रस्तमानानि सर्वतः ॥६॥
उल्का ज्वाला महाभीमा पपात धरणीतले ।
संह्रादयन्तथा भूयो निर्घाताश्चापतन्क्षितौ ॥७॥
यथान्तकालसमये सुघोराः स्युस्तथा प्रिये ।
मिथः क्षेपणशस्त्राच्च अभूवश्च महारवाः ॥८॥
ततश्चाभून्महद्युद्धं भीषणं शरवृष्टिभिः ।
नानाशस्त्रास्त्रविक्षेपैरश्माग्निवृष्टिभिस्तथा ॥९॥
ततश्च तारको दैत्यो ब्रह्मास्त्रमुद्यतो रुषा ।
देवसैन्यं च विद्रुत्य अभिदुद्राव वासवम् ॥१०॥
तयोर्युद्धमभूत्तीव्रं परस्परजयैषिणोः ।
संप्रहारैर्मिथो युद्धे बाणवर्षैः समन्ततः ॥११॥
ब्रह्मास्त्रमुद्यतं प्रेक्ष्य तारकं च यथान्तकं ।
स्वाभिमुखं च दुद्राव वासवस्त्यज्य संगरम् ॥१२॥
ततः संप्रेक्ष्य सेनानीर्द्रावयन्तं स्वकां चमुं ।
शक्तिमुद्यम्य दुद्राव चोद्दिश्य तारकं भृशम् ॥१३॥
सकृच्चिक्षेप शक्तिं च दैत्यसैन्योपरि ध्रुवम् ।
त्रासयन्सर्वलोकांश्च कम्पयन्मेदिनीं गिरिम् ॥१४॥
ततः कोट्यसुराः पेतुर्नियुतानि तथार्बुदाः ।
भूयोऽपरांश्च सेनानी जघान भगवान्तदा ॥१५॥
दैत्येन्द्रं तारकं नाम महाबलपराक्रमम् ।
वृतं दैत्यायुतैर्व्वीरैर्बलिभिर्दशकोटिभिः ॥१६॥
महिषं चाष्टभिर्युक्तं संख्ये निजघ्नवान्प्रभुः ।
त्रिपादं चायुतशतैर्जघान दशभिर्वृतम् ॥१७॥
ह्रदोदरं च नियुतैर्हतं दशभिराशु च ।
जघानानुचरैः सार्द्धं विविधायुधपाणिभिः ॥१८॥
तत्राकुर्वन्त विपुलं नादं वध्यत्सु शत्रुषु ।
कुमारानुचराः सिद्धिं पूरयन्तो दिशो दश ॥१९॥
ननृतुश्च ववल्गुश्च जहसुश्च मुदान्विताः ।
शक्त्यास्य तु संभूतैस्ततोऽग्निभिः समन्ततः ॥२०॥
त्रैलोक्यं त्रासितं सर्वं जृम्भमानाभिरेव च ।
दग्धाः सहस्रशो दैत्या नादैः स्कन्दस्य चापराः ॥२१॥
पताकयावधूताश्च हताः केचित्सुरद्विषः ।
केचिद्घण्टारवत्रस्ता निषेदुर्वसुधातले ॥२२॥
केचित्प्रहरणोच्छिन्ना विनिपेतुर्गतासवः ।
एवं सुरद्विषोऽनेकान् बलवानाततायिनः ॥२३॥
जघान समरे वीरान्कार्त्तिकेयो महाबलः ।
आलोक्य देवसेनानीं शक्तिप्रक्षेपकं स्वके ॥२४॥
स ब्रह्मास्त्रं च चिक्षेप शक्तिमुद्दिश्य तद्रुषा ।
ततो रुषान्वितो स्कन्दः शक्तिं चिक्षेप सांप्रतम् ॥२५॥
ब्रह्मास्त्रं च समुद्दिश्य तैजसं दैत्यभीप्रदम् ।
ततो भूयो महद्युद्धमभूतपूर्वं कदापि न ॥२६॥
घर्षणैर्मिथ आघातैः शक्तिब्रह्मास्त्रयोश्च खे ।
जघ्नतुस्तौ मिथो व्योम्नि पक्षिणाविव खे भृशम् ॥२७
चिल्लौ गृध्रौ यथा वज्रौ काकाविव च संकुलौ ।
तस्य प्राप्ते तपः क्षीणे शीघ्रं व्योम्नो ययौ तदा ॥२८॥
ब्रह्मास्त्रं ब्रह्मलोकं वै युद्धं त्यक्त्वा सुरं च तम् ।
शक्तिश्चापि ततो व्योम्नो युद्धं त्यक्त्वा च सत्वरम् ।
कुमारस्यान्तिकं भूयः समाययौ ज्वलन्दिशः ।
तारकोऽपि ततो दृष्ट्वा ब्रह्मास्त्रं च तिरोहितम् ॥३०॥
कुमारेण धृतां शक्तिं दुद्रावाभिमुखं गिरौ ।
क्रौंचपर्वतमाश्रित्य देवसंघैश्च संयुतः ॥३१॥
तमभ्ययान्महासेनः सुरशत्रूदारधीः ।

स कार्त्तिकेयस्य भयात्क्रौंचपर्वतमीयिवान् ॥३२॥
क्रौंचनाममहाशैलस्तं विलंघ्य च सत्वरम्।
अलंघ्यं सर्वसत्वानां दुद्राव तारकासुरः ॥३३॥
पलायन्तं च संप्रेक्ष्य तारकं दानवेश्वरम्।
कुमारोऽनुययौ शीघ्रं शक्तिमुद्यम्य कोपवान् ॥३४॥
ततो बिभेद शक्त्या तं क्रौंचाद्रिं स्कन्द आशु च।
ततः क्रौंचो महामन्युः क्रौंचनादनिनादितम् ॥३५॥
शक्त्या बिभेद भगवान् प्रिये भूयोग्निदत्तया।
स सानुस्कंधशबलं त्रस्तवानरवारणम् ॥३६॥
प्रोड्डीनोद्भ्रान्तविहगं विनिष्क्रान्तितपन्नगं।
गोलाङ्गूलर्क्षसंघैश्च क्ष्वद्भिरनुनादितम् ॥३७॥
कुरङ्गगतिनिर्घोषं निनदित - वनान्तरं।
विनिष्पतद्भिः शरभैः सिंहैश्च सहसा द्रुतैः ॥३८॥
शोच्यामपि दशां प्राप्तो रराज च सपर्वतः।
विद्याधराः समुत्पेतुस्तस्य श‍ृङ्गनिवासिनः ॥३९॥
किन्नराश्च समुद्विग्नाः शक्तिपात - रवोद्धताः।
ततो दैत्या विनिष्पेतुः शतशोऽथ सहस्रशः ॥४०॥
प्रदीप्तात्पर्वतश्रेष्ठाद्विचित्राभरणस्रजः।
तान्निजघ्नुरतिक्रम्य कुमारानुचरा मृधे ॥४१॥
ततश्च भगवान्क्रुद्धः हन्तुं तारकं प्रिये।
शीघ्रं शक्तिं समादाय वह्निच्छद्रेण विनिर्ययौ ॥४२॥
ततः शक्त्या जघानाशु सेनानीस्तारकासुरं।
उरो देशे समुद्दिश्य सिंहनादं नदन्भृशम् ॥४३॥
शक्त्या बिभेद दैत्येन्द्रं वक्षःस्थले महात्मनः।
पुरा देवासुरे युद्धे वृत्रं देवपतिर्यथा ॥४४॥
बहुधारैकधा चैव कृत्वात्मानं महाबलः।
शक्तिः क्षिप्ता रणे तस्य मारिणमेति पुनः पुनः ॥४५॥
तस्य वक्षस्थलं भित्वा प्रास्य शोणितं मुहुः।
शक्तिः समाययौ भूयः कुमारस्य करोपरि ॥४६॥
व्यसुर्भूमौ पपाताशु तारकः सह सस्वरैः।
कम्पयंश्च महीं सर्वां सहार्य्यवनकाननाम् ॥४७॥
ततो दुन्दुभयो नेदुः दिवि शंखाश्च सुस्वरम्।
मुमुचुर्देवयोषाश्च पुष्पवर्षमनुत्तमम् ॥४८॥
दिव्यगन्धमुपादाय ववौ पुण्यश्च मारुतः।
गन्धर्वास्तुष्टुवुश्चैव य [illegible] महर्षयः ॥४९॥
पुष्पवृष्टिं कुमारे च स [illegible]
नेदुर्वाद्या भृशं त [illegible] ॥५०॥
तत्र देवाः सगन्धर्वा [illegible] मुः।
अपूजयन्स्तवैः स्कन् [illegible] ।
केचिदेनं व्यवस्यन्ति [illegible] म् ॥५१॥

सनत्कुमारं सर्वेषां ब्रह्मयोनिं तमग्रजम्।
केचिन्महेश्वरसुतं केचित्पुत्रं विभावसोः ॥५२॥
उमायाः कृत्तिकानां च गंगायाश्च वदन्पुनः।
एकधा च द्विधा चैव चतुर्द्धा च महाबलम् ॥५३॥
योगानामीश्वरं देवं शतशोऽथ सहस्रशः।
ततः स भगवान्देवो निहत्य विबुधद्विषः ॥५४॥
सभाज्यमानो विबुधैः परं हर्षमवाप ह।
क्रौञ्चास्तेन विनिर्भिन्ना दैत्याश्च शतशो हता ॥५५॥
सर्वलोकैः स्तुतः स्कन्दः शुशुभे समनूपमः।
एवं प्रभावो भगवाञ्शुशुभे चाधिकं प्रिये ॥५६॥
सौर्याद्द्विगुणयोगेन तेजसा यशसा श्रिया।
ततो देवा ययुः स्वर्गं राज्यं चक्रुः सुनिश्चितम् ॥५७॥
कुमारस्य प्रसादाद्वै हर्षनिर्भरमानसाः।

श्रुत्वा मया ते कथिता प्रशंसा,
दुग्धाम्बुनद्याः शिखिवाहनाद्वै।
तस्याद्भुतं वै चरितं प्रशस्तं,
प्रोक्तं च भूयः श‍ृणु ते न यत्से ॥५८॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे दुग्धाभामाहात्म्ये तारकवधो नाम चतुःपंचाशत्तमोऽध्यायः ॥ ५४ ॥

स्कन्द उवाच।

माहात्म्यं ते प्रवक्ष्यामि कृष्णाभायाः श‍ृणु ध्रुवं।
श्रवणात्पूयते गात्रं बहूपापैर्य्युतं च तत् ॥१॥
विष्णुरद्यापि वासं वै चक्रे तस्यां च सन्ततम्।
स्थावरत्वेन हेतोश्च कृष्णाभायां घटोद्भव ॥२॥

अगस्त्य उवाच।

कथं स्थावरतां प्राप्तं भगवता च विष्णुना।
पालकेन जगत्सर्वं हर्त्रा च सृजता विभो ॥३॥
केनैव हेतुना विष्णुर्वासं तस्यां चकार सः।
चित्रं मे जायते स्कन्द तत्कारणं वदस्व मे ॥४॥

स्कन्द उवाच।

जालन्धरस्य पत्नी या वृन्दा नाम पतिव्रता।
तां छन्दयन्पुरा विष्णुस्तत्प्रियांगं प्रधारयन् ॥५॥
विष्णोश्छायां ददर्शार्य्या शंखचक्रगदाब्जकां।
प्रदधानां चतुर्बाहुं सुरत्यासाशु धर्षिता ॥६॥
[illegible] [illegible]वती छद्मिनं विष्णुना तदा।
दुःखातुरा ददौ शापं विष्णवे लोकविष्णवे ॥७॥

वृन्दोवाच।

विष्णो केन वृत्ते त्वं छिद्रान्वेषणतत्पर।
[illegible]दारानपि ज्ञात्वा व्याजेन च्छन्दसे कथम् ॥८॥

एकाकिनीं मां साध्वीं यतः छद्मसि मौनतः ।
तस्मात्त्वं स्थावरो भूयाः परदाराविदूषणात् ॥९॥
रजोदेहाच्च मौर्ख्याच्च श्रीमदान्धाद्बलादपि ।
मर्दन्ति परदारां ये ते पतन्ति च नारके ॥१०॥
स्कन्द उवाच ।
तस्याः शापं समाकर्ण्य तदा विष्णुरचिन्तयत् ।
क्षणं व्याप्य ययौ स्नातुं कृष्णाख्याया जलोत्तमे॥११॥
तस्यां सस्नौ महाविष्णुः सर्वलोकहिताय च ।
अस्यां मूर्त्तिं ततो भूयः अवतर्त्तुं मनो दधे ॥१२॥
शापेन प्रेरितो विष्णुः कृष्णाभायां स्थितो यदा ।
आहूय विश्वकर्म्माणं निर्माणाय ह्युवाच च ॥१३॥
विष्णुरुवाच ।
विश्वसृक् त्वं च मे मूर्त्तिं स्वर्णोपलैस्सुनिर्मय ।
भूत्वा च कीटो वै कृष्णाभाभ्यन्तरे स्थितः ॥१४॥
यावन्तश्चावतारा मे भविष्यन्ति च विश्वसृक् ।
तावन्तो भिन्नचिह्नैस्त्वं चक्रैश्च निर्मयानिशम् ॥१५॥
स्कन्द उवाच ।
इत्युक्त्वा च महाविष्णुर्विश्वसृजे तदा मुने ।
स कृष्णाभामृते सार्द्धमुन्ममज्जाशु तेन च ॥१६॥
विष्णुर्बभूव तस्यां वै शालग्रामशिलातनुः ।
सर्वलोकहितार्थाय तस्याः शापेन निश्चितम् ॥१७॥
वज्रकीटः ससर्ज्जाशु चक्रैर्नानासुलक्षमभिः ।
जाम्बूनदमयैः शुभ्रैरवतारान्(सहस्राब्दं)पृथक् पृथक्
ततो लोका प्रपूजन्ति वांछितार्थप्रलब्धये ।
मान्यपूर्वं समादाय भक्तिभिर्ज्ञानिनो मुने ॥१९॥
अगस्त्य उवाच ।
किं फलं पूजनात्स्कन्द शालग्रामस्य चक्रिणः ।
कीदृशानि च रूपाणि तेषां विष्ण्वात्मनो विभो ॥२०॥
तेषामेव च माहात्म्यं वर्णानि च विशेषतः ।
तत्सर्वं श्रोतुमिच्छामि वद मे सर्ववित्प्रभो ॥२१॥
स्कन्द उवाच ।
द्वारस्थाने समे चक्रे विद्यते नान्तरीयके ।
वासुदेवः स विज्ञेयः शुक्लप्रभः सुशोभनः ॥२२॥
दीर्घाकारो बहुच्छिद्रः सूक्ष्मचक्रः सुशोभनः ।
प्रद्युम्नश्च सविज्ञेयः प्रीताभो रक्तवर्णतः ॥२३॥
रेखात्रयेण संयुक्तः पद्मचिह्नैः सुलाञ्छितः ।
अनिरुद्धः स विज्ञेयो नीलवर्णोतिशोभनः ॥२४॥
श्यामं नारायणं विद्धि नाभिचक्रं समुन्नतं ।
दीर्घरेखासमायुक्तो दक्षिणे शुषिरान्वितः ॥२५॥
दीर्घो दक्षिणवामांशो मत्स्यः कपिशवर्णभृत् ।
बिन्दुत्रयसमायुक्तश्चक्रशंखाङ्कितः स्मृतः ॥२६॥
तत्तल्लक्षणसंपूर्णः कुर्म्मो कवलयाकृतिः ।
वराहो लांछितश्चक्रैर्विषमैः सुस्थितैः शुभैः ॥२७॥
इन्द्रनीलनिभः स्थूलस्त्रिरेखाचिह्नितः शुभः ।
कपिलो नरसिंहः स्यात्पृथक्चक्रैस्तथोन्नतैः ॥२८॥
ब्रह्मचर्येण पूज्योऽसौ अन्यथा विघ्नदो भवेत् ।
वामपार्श्वे स्थिते चक्रे कृष्णवर्णे सबिन्दुके ॥२९॥
लक्ष्मीनृसिंहः स ज्ञेयो भुक्तिमुक्तिफलप्रदः ।
कदम्बकुसुमाकारो रेखापंचकभूषितः ॥३०॥
वर्त्तुलश्चातिह्रस्वश्च वामनः परिकीर्त्तितः ।
लक्षितश्च शुभैः पीतैश्चापपरशुलांगलैः ॥३१॥
रामो रामश्च रामश्च ज्ञेयो मृत्युहरः क्रमात् ।
अतसीपुष्पसंकाशो बिन्दुना सुविभूषितः ॥३२॥
सुदर्शनो महाश्यामो बहुभूतिसुखप्रदः ।
वामपार्श्वे गदाचक्रे रेखा चैव तु दक्षिणे ॥३३॥
दामोदरस्तथास्थूलो मध्ये चक्रं प्रतिष्ठितम् ।
परमेष्ठी तु शुक्लाभः पद्मचक्रसमन्वितः ॥३४॥
बिम्बाकृतिः क्वचित्पीतः पृष्ठेचैव सुलांछितः ।
कृष्णवर्णस्तथा विष्णुः स्थूलचक्रे सुशोभने ॥३५॥
यस्य मध्ये गदाकारा दृश्यन्ते पंचरेखिकाः ।
श्रीधरोऽसौ तथा देवैश्चिह्नितो वनमालया ॥३६॥
कदम्बकुसुमाकारा ऊर्ध्वरेखाश्च पादयोः ।
वामपार्श्वे स्थिते रेखा तथा चैव तु दक्षिणे ॥३७॥
स च त्रिविक्रमो देवः श्यामवर्णो महाद्युतिः ।
हयग्रीवोऽङ्कुशाकारो रेखाश्चक्रसमीपगाः ॥३८॥
हरिवर्णसमायुक्तो बहुबिन्दुसमन्वितः ।
गदाधरस्त्रिरेखाभिस्त्रि(लक्ष्या)सूक्ष्मो मध्यदेशतः॥३९॥
नानावर्णसमायुक्तो नागभोगेन चिह्नितः ।
अनेकमुखसंयुक्तः अनन्तो नाम नामतः ॥४०॥
दक्षिणावर्त्तप्राकारा वनमालाविभूषिता ।
सा शिला कृष्णवर्णाभा धनधान्यसुखप्रदा ॥४१॥
चतस्रो यत्र दृश्यन्ते रेखाः पार्श्वसमीपगाः ।
द्वे चक्रे मध्यदेशे च सा शिला स्याच्चतुर्मुखा ॥४२॥
कूर्म्मचक्रमये भागे मध्यभागे खुरान्वितः ।
शिवनाम इतिख्यातो दुर्ल्लभः सर्वकामदः ॥४३॥
चतस्रश्चक्रसंयुक्तः पंकजेन समन्वितः ।
अभ्यन्तरे खुरैर्बाह्ये लाञ्छितो वनमालया ॥४४॥
लक्ष्मीनारायणो देवो यस्य गृहे च विद्यते ।
तस्य गृहे न दारिद्र्यं शोकदुःखं न वै भवेत् ॥४५॥
न चौराग्निभयं तत्र दुर्ग्रहैश्च न पीड्यते ।

अन्ते मोक्षं लभेदेतच्छालग्रामप्रपूजनात् ॥४६॥
विदिक्षु दिक्षु सर्वासु यस्य हि दृश्यते मुखं ।
भुक्तिमुक्तिप्रदो नित्यं विज्ञेयः पुरुषोत्तमः ॥४७॥
वासुदेवं सितं विन्द्याद्रक्तं संकर्षणं तथा ।
तथा दामोदरं नीलं अनिरुद्धं तथैव च ॥४८॥
श्यामं नारायणं विद्धि तथा कृष्णं च वैष्णवं ।
ईषद्रक्तमनन्तं च श्रीधरं पीतवर्णकम् ॥४९॥
पत्नीहरः पिशङ्गश्च नीलो लक्ष्मीप्रदायकः ।
पुष्टिवृद्धिकरः श्यामः शुक्लो मोक्षकरः शुभः ॥५०॥
पीतो धनकरो ज्ञेयो रक्तो राज्यप्रदायकः ।
रोगदश्चातिरक्तश्च कृष्णः कीर्त्तिप्रदः शुभः ॥५१॥
पापघ्नः पांसुरो नित्यं रुक्षश्चोद्वेगकारकः ।
स्थूलो निहन्ति चैवायु र्वक्रो दारिद्र्यदः सदा ॥५२॥
स्निग्धः सिद्धिप्रदः शश्वत् निष्फलः स्याद्लाञ्छनः ।
कपिलो बहुचक्रश्च त्रिकोणो बन्धुनाशकृत् ॥५३॥
अधोमुखः क्षयकरः पुत्रघातकरः स्मृतः ।
आयुष्यं हरते घृष्टः करालः कुलनाशकः ॥५४॥
करालो विकरालश्च सर्व्वसम्पत्प्रणाशकः ।
दुर्द्दरः स्फुटितो दग्धस्त्रिकोणश्च विवर्जयेत् ॥५५॥
अन्तःस्फुटितचक्रश्च बहुचक्रस्तथैव च ।
बहुरेखं बहुच्छिद्रं निर्यग्भूतं तथा त्यजेत् ॥५६॥
शालग्रामशिला यत्र तत्र सन्निहितो हरिः ।
स्नानं जपं च दानं च वाराणस्यां कृताधिकम् ॥५७॥
चक्रांकितस्य सान्निध्ये यत्किञ्चित्क्रियते नरैः ।
स्नानं दानं जपं होमं तत्सर्वं चाक्षयं भवेत् ॥५८॥
सुदर्शनाख्यमेकेन द्वाभ्यां नारायणः स्मृतः ।
त्रिभिश्चैवाच्युतःसाक्षाच्चतुश्चक्रो जनार्दनः ॥५९॥
पंचभिर्वासुदेवः स्याद्षड्भिः प्रद्युम्न एव च ।
संकर्षणः सप्तभिः स्यादष्टभिः पुरुषोत्तमः ॥६०॥
नवव्यूहस्तु नवभिः दशभिश्चैव जन्मकृत् ।
रुद्रचक्राणि रुद्रस्य द्वादशो द्वादशात्मनः ॥६१॥
एतेभ्योऽधिकचक्रो यः परमात्मा स उच्यते ।
तस्यार्चनादवाप्नोति कैवल्यं केवलं मुने ॥६२॥
ये पश्यन्ति च पाषाणान्विष्णुचक्रेण संयुतान् ।
ते तद्दर्शनमात्रेण मुच्यन्ते सर्व्वकिल्बिषैः ॥६३
न गुरुर्न च मन्त्रोऽस्ति न जपो न च भावना ।
न स्तुतिर्नोपचारस्तु चक्राङ्किते शिलार्चने ॥६४
म्लेच्छदेशे शुचौ स्थाने चक्राङ्कं यत्र तिष्ठति ।
योजनानि भवेयुश्चाच्युतक्षेत्राणि सार्धवत् ।६५
तन्मध्ये म्रियते यस्तु पूजकः सुसमाहितः ।

सर्वपापैर्विनिर्मुक्तो न पुनर्जायते भुवि ॥६६॥
ब्रह्महत्यादिकं पापं यत्किंचित्कुरुते नरः ।
तत्सर्वं विलयं याति शालग्रामशिलार्च्चनात् ॥६७॥
शालग्रामान्तिके देशे श्राद्धं यः कुरुते मुने ।
पितरस्तस्य तृप्यन्ति तृप्ता वर्षशतं दिवि ॥६८॥
शालग्रामसमीपे तु क्रोशमात्रं समन्ततः ।
कीटोऽपि च मृतो याति वैकुण्ठभुवनं ध्रुवम् ॥६९॥
शालग्रामशिलायां यो मूल्यमुद्घाटयेन्नरः ।
विक्रेता चानुमन्ता च परीक्षां योनुमोदयेत् ॥७०॥
ते सर्वे पापिनो ज्ञेयाः शेषा दुःखस्य भागिनः ।
किं मुने बहुनोक्तेन नरकं यान्ति दारुणम् ॥७१॥
स्मरणं वासुदेवस्य कर्तव्यं पापभीरुणा ।
शालग्रामशिलाचक्रार्चनं हि सततं मुने ॥७२॥
पृथिव्यां यानि तीर्थानि पुण्यान्यायतनानि च ।
तत्फलानि ह्यवाप्नोति विष्णोर्नामानुकीर्त्तनात् ॥७३॥
तस्मादेव नदी श्रेष्ठा कृष्णाभा सा घटोद्भव ।
परिवारैः समं सांशैर्विष्णुना नित्यसेविना ॥७४॥
सर्वदेवमयो विष्णुः सर्वतीर्थमयी च सा ।
गौरीस्वेदोद्भवस्नानात्कोटितीर्थगुणं फलम् ॥७५॥
प्रयागे शतधा स्नात्वा कुरुक्षेत्रे च नैमिषे ।
कृष्णाभायां सकृत्स्नात्वा फलं तुल्यं लभेन्नरः ॥७६॥
श्राद्धं करोति यस्तस्यां पितॄन्सर्वान्समुद्धरेत् ।
दत्तं शतगुणं लब्ध्वा गयायां यान्ति नाककम् ॥७७॥
तस्यां च स्नानमात्रेण सर्वपापैर्विवर्जितः ।
कैवल्यं प्राप्यते ज्ञानाज्जपहोमार्च्चनान्मुने ॥७८॥
एकादश्यां वरे शुक्ले माघे मासि विशेषतः ।
भक्त्या करोति यः स्नानं कोटिकोटिगुणं फलम् ॥७९॥
पशुपक्षिमृगा मर्त्या वृक्षा ग्रावास्तृणानि च ।
तज्जलस्पर्शनादेव गच्छन्ति स्वर्गमुत्तमम् ॥८०॥
तस्यां दत्तं हुतं जप्तं तत्सर्वमक्षयं भवेत् ।
देहान्ते च परं स्थानं लभन्ते तत्र कारकाः ॥८१॥
मुक्तिधारा च कृष्णाभा तयोश्च संगमं जलं ।
सर्वतीर्थोत्तमं विद्धि देवलोकैश्च वांछितम् ॥८२॥
तस्मिन्तीर्थे नरः स्नातः प्राप्नोति परमं पदम् ।
मोहकंचुकमुत्सृज्य ज्ञानकंचुकसंवृतः ॥८३॥
जपार्चनं हुतं दत्तं स्नातको यः करोति वै ।
कोटिकोटिगुणं लब्ध्वा फलं प्राप्नोत्यगोचरम् ॥८४॥

कृष्णप्रभायाः कथितं माहात्म्य-
मेतद्धि वत्साय्यनदीवरायाः ।
अथाडिवासनि सुराश्च चक्रुः

स्वैः स्वैर्मुदांशैःगिरिशप्रसादात् ॥८४॥
इति श्रीस्कन्दपुराणे हिमवत्खण्डे कृष्णाभामाहात्म्यन्नामा पंचपंचाशत्तमोऽध्यायः ॥५५॥

—❀❀❀—

अगस्त्य उवाच ।

चित्रं च जायते स्वान्ते मम देवाधुना प्रभो ।
आकर्ण्यन्ते मुखाम्भोजान्मुक्तितीर्थमिति प्रभो ॥१॥
कथं समुद्भवं तीर्थं मुक्तिधारा कथं भवेत् ।
एतच्च श्रोतुमिच्छामि वद मे सर्वविद्विभो ॥२॥
स्कन्द उवाच ।
मुक्तिभूभृन्मध्यभागे धात्रा तप्तंपुरा मुने ॥३॥
समावाह्य जले वह्निं हुतवांस्तत्र हव्यकं ।
तयोर्वैरोऽपि चाभ्यन्तं कृशानुजलयोर्मिथः ॥४॥
तदादिश्चैकदेहंतौ तत्राश्रित्य प्रतिष्ठितः ।
देवास्तत्र समागत्य गृह्णन्तिस्म मुदान्विताः ॥५॥
पंचामृताक्तान्हविषः प्रज्ज्वलद्वह्निविग्रहं ।
ब्रह्मादयः सुरास्तत्र तिष्ठन्ति स्म निरन्तरम् ॥६॥
हविर्भुजो हविर्भुजज्जलाग्निमूर्त्तयः सदा ।
विष्णोर्मूर्त्तिं जलं विद्याद्रुद्रद्मूर्त्तिं तथानलं ॥७॥
तयोश्च हुतवान् ब्रह्मा आवाह्य हविषा च तौ ।
दिक्पतयश्च भोक्तारः पुरुहूतमुखा मुने ॥८॥
यत्र देवमये नित्यं तत्र तद्ब्रह्मशासनात् ।
पराग्नौ विषयं हव्यं मनः कुण्डे जुहोति वै ॥९॥
श्वासश्रुवेण च ब्रह्मा ध्यात्वा तत्र पुरा परं ।
मुक्तिहेतोः कृतं यज्ञं ब्रह्मणा सुभृतां परम् ॥१०॥
मुक्तिक्षेत्र इतिख्यातस्तस्माल्लोकैर्घटोद्भव ।
प्रत्यक्षं यत्र रुद्रोऽसौ अग्निमूर्त्तिस्तथापरः ॥११॥
विष्णुश्चामृतमूर्त्तिश्च होताजस्तत्र किं पुनः ।
ऋषयो यत्र मुञ्चन्ति न देवाः किन्नरास्तथा ॥१२॥
गन्धर्वाश्चाप्सरः सिद्धा नित्यं तत्र किमुच्यते ।
लोकाश्चतुर्विधोद्भूताः स्नात्वा तत्र कलेवरान् ॥१३॥
त्यज्य मुक्तिं प्राप्नुवन्ति मुक्तिक्षेत्रस्ततः स्मृतः ।
तत्रास्रवन्ति ये भक्त्या मोक्षं प्राप्यन्ति तत्क्षणात् १४॥
सर्वजन्मार्जितैः पापैस्ते मुक्ता नात्र संशयः ।
ज्येष्ठस्य शुक्लपक्षस्य दशम्यां स्नाति तत्र यः ॥१५॥
कोटिजन्मार्जितैः पापैः स मुक्तो नात्र संशयः ।
अथवा मकराख्ये च संक्रान्तौ स्नाति तत्र यः ॥१६॥
सर्वपापैर्विनिर्मुक्तः प्राप्नोति परमं पदं ।
जप्तं दत्तं हुतं तत्र रुद्रमुद्दिश्य यैर्नरैः ॥१७॥
संत्यज्य पुनरावृत्तिं लभ्यन्ते चेश्वरा गतिः ।
त्रियोऽपि यं यमिच्छन्ति प्राप्यन्ति तं तमाशु च ॥१८॥
सर्वपापैर्विनिर्मुक्तास्तत्र स्नानान्न संशयः ।
भोजयन्ति द्विजांस्तत्र भोज्यैश्चतुर्विधैः समम् ॥१९॥
स्वर्गे तिष्ठति वंशैः स सुतृप्तः पापवर्जितः ।
श्राद्धं करोति यस्तत्र तर्पणैर्भक्तिभिर्मुदा ॥२०॥
स्वर्गे तृप्ताश्च तिष्ठन्ति अधस्थाश्च जितैनसः ।
यावतीभिर्नदीभिश्च गिरिगह्वरजन्मभिः ॥२१॥
कृष्णाभायां जले मिश्रं तानि तीर्थानि संगमे ।
संगमेषु च तीर्थेषु क्षुद्रापगादिभिः युक्तिषु ॥२२॥
तेषु स्नात्वा दिवं यान्ति वियुक्ताः सर्वकिल्विषैः ।
ब्रह्मकुण्डे नरः स्नात्वा ब्रह्मलोकं प्रगच्छति ॥२३॥
रुद्रकुण्डे तथा स्नात्वा रुद्रलोकं सगच्छति ।
अनन्ताख्ये ह्रदे स्नात्वा दिवं यान्ति नरोत्तमाः ॥२४॥
पातकैः पंचभिर्मुक्ताश्चक्रनेमिगिरेरधः ।
यावत्योऽद्रिदरीभवाः सुललितानद्योहिमाद्रेरधः
शैलानां च समंततो घटज ताःपूतप्रवाहाः सदा ॥
सप्तानां च तटेषु संगमशुभैः श्रीगण्डकीनांभर ।
मन्यासां सलिलैः समं शिवकरैस्तीर्थानि पुण्यानि वै ।२५
इति श्रीस्कन्दपुराणे हिमवत्खण्डे कृष्णप्रभामाहात्म्ये मुक्तिक्षेत्रोत्पत्तिर्नाम षट्पंचाशत्तमोऽध्यायः ॥५६॥

—❀❀❀—

५६

स्कन्द उवाच ।

अत ऊर्ध्वं प्रवक्ष्यामि बदरिकाश्रमस्य च ।
माहात्म्यं च पुरा गौर्य्याः घर्मो यत्रापतद्गिरौ ॥१॥
यत्र च वञ्चितो विष्णुर्हिमाद्रिसुतया पुरा ।
नारदवचनेनार्य्य स विष्णुः प्राप्तवान्त्रपाम् ॥२॥
तत्रार्माष्टुं तपस्तत्र विष्णुश्चकार शेखरे ।
ऋषिणा नरनाम्ना वै सह कठोरमद्भुतम् ॥३॥
दिव्यवर्षसहस्राणि तपस्तप्तं च विष्णुना ।
बदरीकाश्रमं शैलमद्यापि स न मुञ्चति ॥४॥
तामेव च समाराध्य मया प्रतारितः स्वयम् ।
संपूज्य विधिवल्लिंगं तामेव प्रजजाप सः ॥५॥
सिद्धेश्वरं महालिङ्गं सर्वसिद्धिफलप्रदम् ।
यस्मात्सिद्धरसोद्भूतं तमेव पूजितोऽनिशम् ॥६॥
सृष्टिं स्रष्टुं शिवं पूर्वं ब्रह्माराधितवान् पुरा ।
समुद्भूतस्ततो लिङ्गो ब्रह्मणः सिद्धिदायकः ॥७॥
घर्म्मबिन्दुः शिवानेत्राद्यत्रापतच्च शेखरे ।
स्नात्वा तत्रैव विष्णुश्च बदरीवृक्षतप्तवान् ॥८॥
तस्मादपि च धर्म्मो हि अद्यापि च प्रनिःसृतः ।

आपाददेहतोऽजस्रं उदकुण्ड इति श्रुतः ॥९॥
अद्यापि देवताः सर्वे यक्षगन्धर्वकिन्नराः ।
विचरन्ति मुदा च नित्यं मुने बदरिकाश्रमे ॥१०॥
ऋषयस्तत्र चक्रुर्वै तपांसि च सुभक्तिभिः ।
सप्तमुन्यादयो विप्राः मुमुक्षवः सुभक्तिभिः ॥११॥
ब्रह्मात्मजो मुदायुक्तो गान्धर्ववित्सनारदः ।
असेवत्तत्र विष्णुं वै गायन् वीणां प्रवादयन् ॥१२॥

अगस्त्य उवाच ।

सर्वज्ञात्मजसेनानीः सर्ववार्त्ताविशारद ।
कोऽसौ नर इति प्रोक्तो भवता मेऽधुना विभो ॥१३॥
कथं तेन सखायं च लब्धं विष्णुं सनातनम् ।
तपस्तप्तं कठोरं वै प्रभुणा सह सन्ततम् ॥१४॥

स्कन्द उवाच ।

पुण्येन लभ्यते वाञ्छा सर्वेषामात्मनः स्पृहाम् ।
पुण्यैश्च लभ्यते देहाः कीटैरपि च मानुषाः॥१५॥
मानुषैरपि देवत्वं चान्त्यजैर्विप्रतां तथा ।
ज्ञानान्वितैर्द्विजैर्मुक्तिः प्रलभ्यते सुखं सदा ॥१६॥
तस्य पुण्यं प्रवक्ष्यामि शृणु घटोद्भवाधुना ।
यस्माल्लब्धं सखित्वं तं विष्णुं नरेण सन्ततम् ॥१७॥
हिमवद्दक्षिणे सानौ नेपाल इति विश्रुतः ।
पाशुपतं महाक्षेत्रमासीत्कामप्रदं मुने ॥१८॥
श्लेष्मान्तके वने रम्ये वाग्मत्या दक्षिणे तटे ।
तत्रासील्लुब्धको म्लेच्छो नाम्ना शंकुः सुनिर्दयः ॥१९
जन्तून्निहत्य नित्यं स अभूभुजच्च सर्वशः ।
शिशौ प्रौढे तथा वृद्धे समदृष्टिश्च जन्तुषु ॥२०॥
निर्दयं हतवान्नित्यं जन्तून्त्रिविधदेहिनः ।
एवमाजन्मपर्य्यन्तं वृत्तिं शंकुर्दधार सः ॥२१॥
एकदा तु वनं शंकुर्मृगयां प्रगतो मुने ।
मृगमेकं ददर्शाशु मृगस्थल्यां तपोपने ॥२२॥
हन्तुमियेष तं शंकुर्मृगं तृणचरं मुदा ।
सशरं चापमुद्धृत्य अभिद्रुत्य प्रलक्षितः ॥२३॥
सोऽपि प्रेक्ष्य धृतं बाणं दुद्राव दूरतो भृशम् ।
नारायणमहातीर्थे विले विवेश सत्वरम् ॥२४॥
पशुपतेश्च वाग्मत्याः पूर्वोत्तरतटे विले ।
शंकुश्च तमनुद्रुत्य प्राप्तवान्तत्र तत्क्षणम् ॥२५॥
अदृष्टवांश्च तं शंकुर्मृगं तत्र गतागतम् ।
क्षुधया विह्वलाङ्गोऽसौ किं करोमीत्यचिन्तयत् ॥२६॥
रौद्रश्रमप्रदग्धाङ्गो विमुच्य कार्मुकं शरं ।
सस्नौ नारायणे तीर्थे वाग्मत्याः संगमे शुभे ॥२७॥
द्वादश्यां चैव कार्त्तिक्यां शुक्लायां बुधवासरे ।
मैत्रेण संयुतायां स शंकुः सस्नौ च तद्दिने ॥२८॥
स्नात्वा तत्र गृहं शंकुः स्वकीयं गतवान्मुने ।
कश्चित्कालान्तरे भूयः पंचत्वं प्राप्तवान्हि सः ॥२९॥
ततो देहान्तरे शंकुर्ब्राह्मणस्य कुले शुभे ।
समुद्भूतः सुधीमान्स वेदशास्त्रविशारदः ॥३०॥
अज्ञानतोऽपि स स्नानाद्भूद्धि श्रोत्रियो द्विजः ।
पूर्वस्नानविपाकेन वाग्मत्यां स्नातुमागतः ॥३१॥
मृगोदके महातीर्थे तत्र सस्नौ पुनर्नरः ।
सन्तर्प्य पितृन्देवांश्च भक्तिपूर्वं घटोद्भव ॥३२॥
आविर्बभूव तत्रैव संप्रेक्ष्य स्नातकं हरिः ।
व्याचष्ट वचनं तस्मै वरं दातुं प्रहर्षवान् ॥३३॥

विष्णुरुवाच ।

धन्योऽसि कृतकृत्योऽसि भक्त पापैर्विमोचितः ।
पूर्वजन्मकृतैः स्नानैर्भूयश्चात्र जलाप्लुतः ॥३४॥
सत्तीर्थेऽत्र कृतस्नानान्मम देहो न संशयः ।
भवानपि भवेदद्य निर्मुक्तः पापकंचुकैः ॥३५॥
यो वा सो वा कृतस्नानात्सत्तीर्थेऽत्र भवेद्धि सः ।
अन्त्यजो वापि विप्रो वा द्वितीयो मत्कलेवरः ॥३६॥
अद्यप्रभृति चार्य्य त्वं सखा मम भव द्विज ।
यावच्च न भवेत्कल्पस्तावद्भवस्थिरः सखा ॥३७॥
वदिष्यन्ति त्रिलोकास्त्वां नरनारायणः सदा ।
आवयोर्वत्स नामाभ्यां यावत्तिष्ठति मेदिनी ॥३८॥
अज्ञानाद्रौद्रतापाच्च स्नानं कृतं त्वया पुरा ।
तस्मान्मुक्तिमिहालब्धं मम संगाल्लभिष्यसि ॥३९॥
नर गच्छ मया सार्द्धं यत्र सिद्धेश्वरः स्थितः ।
तपस्तप्तुं रहः सौख्यं सेविष्यावः शिवं सदा ॥४०॥
भविष्यन्ति कलौ चात्र सत्यधर्मरता नराः ।
युगेषु त्रिषु न स्थास्यं सत्यधर्मदयाव्ययात् ॥४१॥
यत्र कुत्रापि कुर्वन्ति वाग्मत्यां ये जलाप्लवं ।
मूर्त्तयो मे भविष्यन्ति स्नातकास्ते न संशयः ॥४२॥
प्रणम्यादौ पशुपतिं ब्रजावो हि ततः सुखं ।
तत्र तच्चरणाब्जं च सेवयावो नराऽनिशम् ॥४३॥

नर उवाच ।

अहो भाग्यं महाभाग्यं क्षुद्रस्य मेऽधुना विभो ।
भवता विष्णुना सम्यगनुग्रहः कृतो मयि ॥४४॥
अहो भाग्यमहो मेऽद्य योगिभिर्यो न दृश्यते ।
कृच्छ्रादपीतरैर्ध्येयः स मे स्याच्चक्षुगोचरः ॥४५॥
यं ध्येयं योगिभिः स्वान्ते आजन्माभ्यासकैर्वरैः ।
तेन संभाषणं सार्द्धं भाग्यं मेऽद्य भवेद्विभो ॥४६॥
विष्णुरूपेण मे दिव्यं दत्तं वरं च शंभुना ।

तपोभिर्दुर्लभं चेह भाग्यं मेऽतः परं किमु ॥४७॥
सखाकृतो ह्यहं लोकैर्भवता च सुदुर्लभः ।
सुदुर्लभं च मे भाग्यं किं विधेयमतः परम् ॥४८॥
कृत्वा सेवां हरेर्भक्त्या विष्णो रुद्रात्मनस्त्वया ।
आभाषणाद्व्रजन्सार्द्धं जीवन्मुक्तो भवाम्यहम् ॥४९॥
विष्णवे सर्वरूपाय सर्वज्ञ विष्णवे नमः ।
आत्मने सर्वजीवाय अगोचर नमोऽस्तु ते ॥५०॥
संसारसागरे मग्नः प्रोद्धृतो येन वा ह्यहं ।
कारुण्यरज्जुना बध्वा तस्मै तुभ्यं नमो नमः ॥५१॥
व्रजाम्यहं त्वया सार्द्धं यत्र सिद्धेश्वरो हरः ।
क्षमस्व मेऽपराधं त्वं सर्वज्ञानद ते नमः ॥५२॥

स्कन्द उवाच ।

इत्याकर्ण्य हि तेनोक्तं स विष्णुभक्तवत्सलः ।
ययौ पशुपतेः सार्द्धं तदोन्तिकं नरेण वै ॥५३॥
प्रणेमतुश्च तौ भक्त्या देवं पशुपतिं भवं ।
पातयित्वा क्षितौ देहं अष्टाङ्गैर्दण्डवन्मुदा ॥५४॥
संस्तुत्वा च तदात्मानौ परिक्रम्य पुनः पुनः ।
भक्त्या स्नात्वा च वाग्मत्यां मुदा प्रार्थयतां वरम् ॥५५॥
ततो लब्ध्वा वरौ तौ हि तद्भक्त्या जग्मतुर्मुने ।
यत्र सिद्धेश्वरो रुद्रो हिमवतः सुशेखरे ॥५६॥
तदादि तेन सार्द्धं च गिरिं बदरिकाश्रमं ।
न मुञ्चति च विष्णुर्वै हिमवद्गिरिशेखरे ॥५७॥
आनर्च्चर्य सततं भक्त्या यत्र सिद्धेश्वरं च वै ॥५८॥
तप्तवन्तौ सुखं तौ हि तत श्रेष्ठो हि तद्गिरिः ।
पुरा व्रतावसाने सा बद्रिकाद्रौ ययौ मुने ॥५९॥
सिद्धेश्वरं समानर्च्य धर्म्मयुक्ता च पार्वती ।
अलकादपदद्धर्म्मो नदीभूता ववाह सा ॥६०॥
प्रेक्ष्य सिद्धेश्वरस्तां वै सखौ तस्यां प्रहर्षितः ।
ततो रुद्रश्च संप्रेक्ष्य नदीं तदलकोद्भवाम् ॥६१॥
स्तुत्वा नामाभिधानं च तस्या नाम्ना चकार वै ।
यस्माद्देव्यलकोद्भूता साक्षात्सुधाप्रवाहिनी ॥६२॥
तस्मादलकनन्दा त्वं त्रैलोक्यपावनी भव ।
ब्रह्मादयः सुराश्चान्ये सस्नुस्तस्यां मुनीश्वराः ॥६३॥
संपूज्य विधिवद्भक्त्याऽलकानन्दां मुदा तदा ।
स्नात्वा चालकनन्दायां गिरिं बदरिकाश्रमम् ॥६४॥
प्रपश्यति हरेः स्थानं तस्य पुण्यफलं शृणु ।
सप्तजन्मार्जितैः पापै विनिर्मुक्तश्च सान्वयः ॥६५॥
इहलोकं परित्यज्य विष्णुलोकं स गच्छति ।
यश्चारोहति तच्छैलं विष्णुस्थानं पवित्रकम् ॥६६॥
शिवात्मकं महाविष्णुं स्मरन्धिया हि भक्तिभिः ।
वाजपेयाश्वमेधानां फलं प्राप्य पदे पदे ॥६७॥
भास्करायुतयानस्थो विष्णुलोकं सुखं व्रजेत् ।
उदकुण्डजले स्नात्वा बदरीशं प्रपश्यति ॥६८॥
स एव विष्णुदेहश्च जीवन्मुक्तो न संशयः ।
यश्चिविक्रमगंगायां स्नात्वा भक्त्या तपस्थितम् ॥६९॥
विष्णुं पश्यति रुद्रं च तस्य पुण्यफलं शृणु ।
सप्तजन्मकृतैः पापैः स मुक्तो नात्र संशयः ॥७०॥
इहलोकं परित्यज्य स गच्छेत्परमां गतिं ।
सिद्धेश्वरं महालिंगं सकृत्पश्यति तत्र यः ॥७१॥
लीनो भवति तल्लिंगे सदेहो नात्र संशयः ।
न पुनर्जायते योनौ मरणं नास्ति तस्य च ॥७२॥
दुःखार्णवे महाघोरे परित्यज्य च संसृतिं ।
एतत्प्रशंसा कथिता मया ते-
भक्त्याद्य वै बद्रिकपर्वतस्य ।
प्रश्नं च भूयो मयि ते किमस्ति-
त्वं तत्र पृच्छाशु यदस्ति वाञ्छा ॥७३॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे बद्रिकाश्रममाहात्म्यन्नाम सप्तपंचाशत्तमोऽध्यायः ॥५७॥

—❀❀❀—

अगस्त्य उवाच ।

कथं प्रतारितो विष्णुर्वचनान्नारदेन च ।
गिरिजया तया देव्या कथा च शिखिवाहन ॥ १ ॥
तत्कारणं कथा चैव वदस्व मेऽधुना विभो ।
चित्रं मे जायते स्वान्ते श्रोतुमिच्छाम्यहं च तत् ॥२॥

स्कन्द उवाच ।

शैलराजे हि कैलाशे यद्वृत्तान्तं पुराभवत् ।
तत्र श्रुता च तद्वार्त्ता देवीशंकरयोर्मिथः ॥ ३ ॥
पार्व्वत्त्या चैव संपृष्टं शंकरं प्रतियन्मुने ।
तत्सर्वं ते प्रवक्ष्यामि मुने शृणु समाहितः ॥ ४ ॥
नीलकंठोत्तरे भागे दूरे समैकयोजने ।
व्योमकूटे हिमाद्रेश्च गृहमासीत्सुशोभनम् ॥ ५ ॥
सर्वरत्नमयं दिव्यं रत्नतेजोभिसारितम् ।
तस्य प्राङ्गणके वेदी चतुरस्रःसमास्ति वै ॥ ६ ॥
अचिक्रीडद्धि तस्यां च पार्वती सखिभिः समं ।
प्रग्रन्थयंश्च पुष्पाणि उद्याने चावचित्य सा ॥ ७ ॥
तस्मिन्काले मुनिश्रेष्ठो ब्रह्मसतः समुद्भवः ।
नारदो ब्रह्मलोकाद्वै अवततार चाम्बरात् ॥ ८ ॥
यदृच्छया गतस्तत्र हिमवद्भवनोपरि ।
अम्बरान्नारदो धीर ताम्बालां च ददर्श वै ॥ ९ ॥

क्रीडन्तीं स्वेच्छया पुष्पैःसखिभिः परिवारितां ।
भासयन्तीं स्वभासा वै रत्नगेहं दिशोदश ॥१०॥
दिव्यरत्नयुतैर्वेषं भूपितां च विभूषणैः ।
केयूरहारवलयैर्विभ्राजितां महाधनैः ॥११॥
ददर्शाव्यक्तरूपां च नारदो मुनिसत्तमः ।
व्योम्नि सूर्य्य इवाव्यक्तो भस्मनि पावको यथा॥ १२॥
तस्या मुखं च संप्रेक्ष्य स्थगितश्च मुमोह सः ।
क्षणं देवं समाश्राय अचिन्तयच्च विह्वलः ॥१३॥
कस्मै योग्या त्वियं कन्या इति चिन्ताकुलोऽभवत् ।
विष्णवे चैव सा योग्या तदन्यथा कचिन्नहि ॥१४॥
रूपशीलगुणैर्योग्या ह्यस्या एव पतिर्हरिः ।
तस्माद्द्यैव वक्तव्यं गत्वा बदरिकाश्रमम् ॥१५॥
इति कृत्वा ययौ तत्र यत्र प्रतवान्हरिः ।
बद्रिकाद्रौ मुनिः शीघ्रं नरनारायणेन च ॥१६॥
ददर्श भगवान्तत्र नारदं चागतं मुदा ।
व्याम्नो वीणाधृतं भक्तं गायन्रुद्रयशोमुहुः ॥१७॥
उदतिष्ठत्तदा विष्णुः स्वकीयादासनाद्द्रुतं ।
प्रणमतुर्मिथो द्वौच हरिस्तमु अत् ॥१८॥
अपूपुजन्मुनिं विष्णुर्बहुमानपुरस्सरैः ।
मधुपर्कम्पुनर्दत्त्वा अपृच्छत्कुशलं मुनिम् ॥१९॥
विष्णुरुवाच ।
स्वागतं भो मुनिश्रेष्ठ भद्राणि तव वर्त्मसु ।
ब्रह्मणो ब्रह्मलोके च सर्वलोके तथा पुनः ॥२०॥
अहोभाग्यमहोभाग्यं निर्जनस्याचलौकसः ।
अत्रागतो यतो विप्रो ब्रह्मणो मानसोद्भवः ॥२१॥
अद्यैव पूयते गात्रं ममाश्रमं सपर्वतं ।
तपसः फलमद्यैव तवांघ्रिस्पर्शनाद्यतः ॥२२॥
त्रिकालं च मया ज्ञातमद्यैव च महामुने ।
पूतात्मानं कृतात्मानं तवागमनकारणात् ॥२३॥
दर्शनं ते पुरा पुण्याल्लब्धं मयेह वै पुनः ।
भविष्यति च देहोयं परत्र पुण्यभाजनम् ॥२४॥
भवतीह ममैवायं पवित्रात्माकलेवरः ।
जानीमहे मुनिश्रेष्ठ स्पर्शनाद्भवतस्तनुम् ॥२५॥
नारद उवाच ।
न वक्तव्यं विभो महहमित्थं हिमवता वचः ।
त्रैलोक्येशेन चैकेन किङ्कराय स्वभक्तिने ॥२६॥
सर्वभूतमयो ब्रह्मा सर्वतेजोमयो हरः ।
सर्वदेवमयस्त्वं च न भेदो वस्तयोर्मिथः ॥२७॥
यथा रुद्रस्तथा विष्णुर्यथा विष्णुस्तथा विधिः ।
तयोश्चैवात्मरूपस्त्वं तथाविधं तयोः पुनः ॥२८॥

ध्यानव्यं योगिनां साक्षाद्ब्रह्मणो च महोज्ज्वले ।
त्वामेव हि तयोर्मुक्तिर्जीविनश्च सुजृम्भक ॥२९॥
प्रणवाख्याय देवाय जीवरूपाय ते नमः ।
अव्यक्ताय सलक्षाय सर्वरूपाय ते नमः ॥३०॥
यं विभर्त्य प्रजीवन्ति जीविनो जङ्गमास्मजाः ।
तस्मै च देवदेवाय महाविष्णो नमोऽस्तु ते ॥३१॥
स्कन्द उवाच ।
ततो मुनेः समाकर्ण्य स्तवेन चरितं वचः ।
अपृच्छत्तं पुनर्विष्णुस्तत्रागमनकारणम् ॥३२॥
विष्णुरुवाच ।
मुनीश्वर द्विजश्रेष्ठ वक्तव्यं मे समुच्यता ।
यदर्थमागतोऽसि त्वमिहागमनकारणम् ॥३३॥
अथवा हि पुनातं मामत्र समागतो मुने ।
अथवा प्रेरितः कैश्चित्कश्चिज्जनेन वा वद ॥३४॥
नारद उवाच ।
नाहं ते प्रेरितः कश्चिदत्र ब्रह्मसनातन ।
कांश्चिद्वार्त्ता समादाय वक्तुं यदृच्छयागतः ॥३५॥
एका बाला मया दृष्टा गगनादतिसुन्दरी ।
हिमवतो गृहे दिव्ये महाकूटे सुशोभने ॥३६॥
प्राङ्गणे वेदिका तस्य नानारत्नोपशोभिते ।
क्रीडयन्ती मुहुः पुष्पैर्मुदा स्वसखिभिः समम् ॥३७॥
सुलोचना च विम्बौष्ठी सर्वाभरणभूषिता ।
गौरी मधुरवाणी च वन्दनीया च जीविभिः ॥३८॥
तेजसा सूर्यतुल्या सा आह्लादेन कलानिधिः ।
अक्रीडत्तत्र ताभिर्वै स्वभाभिर्भासयन्दिशः ॥३९॥
ते प्रसादान्मया विष्णो द्विसप्तभुवनेषु च ।
न दृष्टं तादृशं रूपं तत्तुल्यं च कलेवरम् ॥४०॥
विचारितं धिया व्योम्नि कस्य योग्या भवेदिति ।
निर्णीतं च हरेर्योग्या तेऽतो वक्तुमिहागतः ॥४१॥
विष्णुरुवाच ।
मयापि वाञ्छितः कार्य्यो यत्ते मनसि विद्यते ।
कुर्य्याः शीघ्रं च तत्कार्यं मुने गत्वा हिमाचले ॥४२॥
कार्यकारणयोर्वेत्ता सर्वकार्यविशारद ।
सर्वमर्मज्ञ विप्रेश तत्कारणाय गम्यताम् ॥४३॥
स्कन्द उवाच ।
निशम्य वचनं विष्णोर्नारदो लोकजृम्भकः ।
तदाज्ञां च समादाय प्रययौ हिमवद्गृहम् ॥४४॥
ददर्शाशु समायान्तं हिमवानपि नारदम् ।
वीणावाद्यमहोल्लासं भवने स्वे कलापिनम् ॥४५॥
आसनाच्च समुत्तिष्ठन्मुनिं संप्रेक्ष्य सत्वरं ।

हिमवानालयाद्ब्राह्मं प्रत्युद्ययौ प्रहर्षितम् ॥४६॥
प्रणम्य नारदं शीघ्रं हिमवान्भक्तिभिर्मुदा ।
दिव्यासने समानीय समुपावेशयन्मुनिम् ॥४७॥
संपूज्य विधिवद्भक्त्या हिमवान्नारदं पुनः ।
पप्रच्छ कौशलीं वार्त्तां सर्ववार्ताविदं मुनिम् ॥४८॥

हिमवानुवाच ।

अहोभाग्यमनाथस्य दीनस्य मे महदद्भुतं ।
ब्रह्मात्मजो यतश्चात्र समागतो ममालये ॥४९॥
अद्यैव भवनं पूतं ससानु ब्रह्मशेखरं ।
अद्यैव च तपोवृक्षाः फलन्ति मे फलानि च ॥५०॥
श्रवणाद्दर्शनात्स्पर्शाद्भवतां ब्रह्मजन्मिनां ।
पतिव्रिता तनुर्मेऽद्य तवाङ्गस्पर्शनैः किमु ॥५१॥
स्वागतं ब्रह्मविद्ब्रह्मन् कुशलं चास्ति नारद ।
तवाङ्गे ब्रह्मलोके च स्वर्गे चैव तथा पुनः ॥५२॥
अतः परं विभो मह्यं किंविधेयं वदाधुना ।
त्वत्सेवकाय दासाय वृत्तान्तं त्रिदिवस्य च ॥५३॥

नारद उवाच ।

न वक्तव्यं त्वया चेत्थं मह्यं च ब्रह्मसूनवे ।
संसृष्टो ब्रह्मणा त्वं वै सर्वलोकहिताय च ॥५४॥
तस्मात्त्वमेव सर्वेषां मुमुक्षूणां विशेषतः ।
गतिर्हि हिमवन्नार्य्य प्राणिनां च तपस्विनाम् ॥५५॥
त्वमेव च प्रपूतात्मा तपः सिद्धिस्त्वमेव च ।
अवसित्वं तपःस्थानं पशुपतेरनुग्रहात् ॥५६॥
यदर्थमागतोऽत्राहं हिमवन् शृणु सांप्रतं ।
विष्णुना प्रेषितश्चात्र सुतायास्तवकारणात् ॥५७॥
योग्यं योग्याय दातव्यमयोग्याय कदापि न ।
क्रियतां लघुकार्य्याणि ज्ञात्वेति हिमवांस्त्वया ॥५८॥
रत्नं च कांचनं योग्ये योजनीयं हिमालय ।
विराजते हि संपुक्तं आयसं पित्तले नहि ॥५९॥
वासुदेवसमो देवस्त्रिषु लोके न विद्यते ।
सुन्दरश्च महाविष्णुर्ब्रह्मशंकरयोरपि ॥६०॥
तेजस्वी रूपवान्विष्णुः सर्वलोकदयारतः ।
सुशीलः सुगुणैर्युक्तः सर्वभूतनमस्कृतः ॥६१॥
अस्ति चेत्संमतः सार्द्धं मया त्वं हिमवन्ध्रुवम् ।
दीयतां स्वसुतां तस्मै न कार्य्यमन्यचिन्तनम् ॥६२॥

हिमवानुवाच ।

अहोभाग्यं ममैवाद्य सुतायाश्च विशेषतः ।
विष्णुर्यतो मया सार्द्धं संबन्धं कर्त्तुमिच्छति ॥६३॥
अतः परं च मे भाग्यं किं विधेयं मुनीश्वर ।
मानसो ब्रह्मणो दूतः समागतो विशेषतः ॥६४॥
कुलेनैव च शीलेन गुणेन सुन्दरेण च ।
तैः सर्वदुर्लभैर्युक्तः सर्वमान्यो महाविभुः ॥६५॥
तेन च विष्णुना कन्या मयि प्रार्थयते ध्रुवं ।
प्रतिश्रुता मया तस्मै कन्येयं कुलभूषणा ॥६६॥
गत्वा च नारद श्रेष्ठ शीघ्रं विष्णोश्च सन्निधिं ।
भं राशिग्रहलग्नैश्च शुभं दिनं विचार्य्यताम् ॥६७॥

स्कन्द उवाच ।

हिमवता यदुक्तं च तत्समादाय नारदः ।
बदरिकाश्रमं शैलं यत्र विष्णुर्मुदा ययौ ॥६८॥
सत्कृत्य च पुनर्विष्णुः पप्रच्छ तं च नारदं ।
कार्यकारणवेत्तापि तन्माया-मोहितो मुने ॥६९॥

विष्णुरुवाच ।

स्वागतं तत्र वार्त्ताज्ञ मम कार्य्योपकारक ।
तदर्थं वद निष्पन्नं यदर्थं भवता गतः ॥७०॥

नारद उवाच ।

मया गतं यदर्थं च तन्निष्पन्नं न संशयः ।
विष्णोः सिद्धं महत्कर्म वैवाहिकपरो भव ॥७१॥
तत्कार्य्यं च ममाग्रे हिमवता प्रतिश्रुतं ।
इयं कन्या समादत्ता देवाय गरुडासने ॥७२॥

स्कन्द उवाच ।

तदा तदुत्सुको विष्णुस्तमाकर्ण्य प्रहर्षितः ।
नरेण सह तल्लग्नं सुविचारं चकार हि ॥७३॥
विष्णुः सुलग्नं शुभदं विचार्य्य
घस्रं ह्यवोचल्लघुनारदाय ।
त्र्यहात्तदूर्ध्वं द्विज चाद्यतो वै
जानीयतां मङ्गलवासरे तत् ॥७४॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे गौरीविवाहे नारद-
वाक्यन्नामाष्टपंचाशत्तमोऽध्यायः ॥५८॥

—❀❀❀—

अगस्त्य उवाच ।

याते च नारदे स्कन्द किमकुर्वद्धिमालयः ।
विष्णवे च प्रतिश्रुत्य दातुं सुतां च पार्वतीम् ॥ १ ॥
पार्वती सा तदा भूयः प्रेक्ष्यचेष्टां पितुर्गृहे ।
किंकृत्यसंस्थिता देवी उमा जगद्विमोहिनी ॥ २ ॥

स्कन्द उवाच ।

सा पार्वती समुद्विग्ना दुःखातुराभवत्पुनः ।
पितुर्वचः समाकर्ण्य अविमर्षोदितं तदा ॥ ३ ॥
निशम्य तद्वचो गौरी मुमूर्च्छ कटुकं मुहुः ।
राट्सर्षप द्रवीभूतं पार्श्वांगो विह्वलो यथा ॥ ४ ॥

पपात मूर्च्छिता तीव्रं विह्वला वासवेश्मनि ।
दुःखानलप्रदग्धाङ्गी वातेनेव हतो द्रुमः ॥ ५ ॥
समुत्थाय शनैर्देर्भ्यामबोधयत्सखी च तां ।
भूमौ निपतितां प्रेक्ष्य धर्मशीला निशि द्विज ॥ ६ ॥
ततः पप्रच्छ रात्रौ तां धर्मशीलासखी तदा ।
दुःखातुरां च वृत्तान्तं यतः प्राप्ता सुविह्वलाम् ॥ ७ ॥
धर्म्मशीलोवाच ।
मा मा दूयसि हे भद्रे कस्माद्दुःखातुराऽधुना ।
विह्वलायां च मागच्छ त्वं धैर्य्ययसि सुन्दरी ॥ ८ ॥
मात्रा ते गर्हिता भद्रे पित्रा वा वद मे वचः ।
अथवार्य्ये च केनापि कुत्सिता ते वदस्व मे ॥ ९ ॥
पितरौ त्वां भूषयतः बहुमानपुरस्सरैः ।
मान्यासि गौरवासि त्वं सर्वत्र सर्वकर्मसु ॥१०॥
इयं सुकोमला कायाखिन्नीकृता च येन ते ।
विद्यते तव दुःखं च सखि देवि वदस्व मे ॥११॥
गौरी त्वं दुःखिता कस्मात्सत्यंसत्यं च मे वद ।
भद्रोपायेन ते दुःखं मोचयिष्यामि सांप्रतम् ॥१२॥
पार्वत्युवाच ।
मामा मां च सखि त्वं तद्धर्म्मशीले हि पृच्छसे ।
दैवेन वंचितायाश्च वृत्तान्तं दुःखदं मम ॥१३॥
यन्मया चिन्तितं कार्य्यं तद्दैवेनान्यथा कृतं ।
अतस्त्वया त्वभागिन्या वार्त्ता मा मां च पृच्छसि॥१४॥
अविमर्श्याशुभे पित्रा मात्रा सखि सहाऽधुना ।
प्रतिश्रुता त्वहं तस्मै वै गरुडध्वजाय च ॥१५॥
अहन्तु चिन्तयामीशं सखि तदन्यथा यदि ।
तस्माद्देहपरित्यागं करिष्येऽद्य न संशयः ॥१६॥
धर्म्मशीलोवाच ।
मैवं चिन्तयसे गौरि भद्रोपायं करोमि ते ।
न जानाति पिता यत्र नृगावस्तद्वनं महत् ॥१७॥
यमिच्छितं त्वया देवं तमेवाशु लभिष्यसि ।
गच्छ गौरि मया सार्द्धं वाञ्छितं यत्र तद्वनम् ॥१८॥
स्कन्द उवाच ।
इत्येवं सम्मतं कृत्वा ययौ शीघ्रं च पार्वती ।
सख्या सह निशायां वै गौरी नाम शिलोच्चये ॥१९॥
नीलकण्ठाद्दिशि प्राच्यां दशयोजनदूरतः ।
यत्र तप्तं पुरा गौर्य्या तस्या नाम्नाचलोत्तमम् ॥२०॥
ब्रह्मनद्यां मुदा स्नात्वा स्वकामेन यदृच्छया ।
समारुह्योहतुस्तौ हि व्योमशृङ्गशिलोच्चयम् ॥२१॥
तत्र जजाप गौरी सा हुत्वाग्निं ज्वालयन्मुदा ।
सख्या सार्द्धं मुनिश्रेष्ठ तपश्चकार भूरिशः ॥२२॥
भाद्रकृष्णकुहौ देवी अहोरात्रमुपोष्य च ।
यावत्सम्यग्द्वितीयन्तं हृदा दध्यौ परेश्वरम् ॥२३॥
तदंगादजनिस्वेदः पपात हिमशेखरे ।
तस्माद्ववाह च स्वच्छा आदिगंगेति विश्रुता ॥२४॥
आदिगंगा महातीर्थे सर्वतीर्थशिरोरुहे ।
सापि ववाह कौशिक्या अद्यापि सह संततम् ॥२५॥
ततश्च हिमवान्मूर्त्तिराजुहाव सुतां मुहुः ।
स्नात्वा शमयितुं गेहे पार्वतीं कुलभूषणाम् ॥२६॥
अनागतां समालोक्य तद्गृहं प्रविवेश सः ।
अन्वेषयत्तदावासे हिमाद्रिस्तां न दृष्टवान् ॥२७॥
ततश्चान्वेषयच्छैलः सर्ववेश्मसु पार्वत ।
पर्वतेषु दरीष्वार्य्यां वनेपूपवनेषु च ॥२८॥
अप्रेक्ष्य हिमवान्धीर पार्वतीं दुहितां स्वकां ।
समागत्य ततो गेहं मुमूर्च्छ च मुहुर्मुहुः ॥२९॥
पपात हिमवान्भूमौ वज्रेणेव हतो द्रुमः ।
प्रियसुतां च संस्मृत्य तत्स्वीकारं तथा पुनः ॥३०॥
मेना चैव मुमूर्च्छादौ संस्मृत्य तनयां च तां ।
पपाताशु च मेदिन्यां विदीर्णहृदया यथा ॥३१॥
कस्यान्तिके च मे पुत्री देवदानवकिन्नरैः ।
हृता सत्यकृता पूर्वं किं दास्ये गरुडध्वजे ॥३२॥
इत्येवं चिन्तयन्गौरीं मूर्च्छितः पतितो भुवि ॥३३॥
हा हा कृतास्ततो लोका अभ्यधावत सांप्रतं ।
जना ऊचुः ।
मोहं प्राप्तः किमर्थं त्वं हिमवन् शैलराट् ध्रुवम् ।
तपःस्थानचरो भूत्वा तव किं कृच्छ्रसाधनम् ॥३४॥
बहून् विलप्य शैलेशो लोकैर्बोधे कृतेऽपि च ।
यद्विद्यते च दुःखं ते वदस्व हिमवन्निह ॥३५॥
हिमवानुवाच ।
केन दृष्टा त्वचेष्टस्य कन्येयं मे च मायया ।
दष्टा वा कालसर्पेण सिंहव्याघ्रेण वा हता ॥३६॥
नजाने क गता पुत्री केन दुष्टेन वा हृता ।
येन केनापि हृष्टा चेद्यत्र कुत्रापि तद्वद ॥३७॥
एका पुत्री सुरूपा मे सर्वोन्नतेन सुन्दरी ।
क गता नु न जानेऽहं कन्येयं कुलभूषणा ॥३८॥
हा पुत्री क गतासि त्वं परित्यज्य स्वमातरम् ।
हता केनास्यरण्ये त्वं हा पुत्रि कुलभूषणे ॥३९॥
स्कन्द उवाच ।
इत्येवं हि विलापे च हिमवति घटोद्भव ।
मेनायां दुःखितायां च स्वजनैः सान्त्वयन्स्थिते ॥४०॥
भूयश्च नारदस्तत्र समाययौ मुदान्वितः ।

वैवाहिकदिनं तस्या आदाय विष्णुसंमतम् ॥४१॥
ततश्च हिमवान्दृष्ट्वा दुःखदग्धश्च नारदं ।
बहून्विलप्य तस्याग्रे ननाम च मुहुर्मुहुः ॥४२॥

हिमवानुवाच ।

यन्मया चिन्तितं कार्य्यमभाग्येनैव नारद ।
अन्यथा च कृतं तद्वै दैवेनातिविवेकिना ॥४३॥
प्रतिश्रुता मया नूनं पुत्री नारद विष्णवे ।
हृता केन च मे बाला तां न जानामि पार्वतीम् ॥४४॥
वाग्दत्तं च कृतं पूर्वं मया नारद विष्णवे ।
अदत्ताकिल्विषं मह्यं कुत्सिष्यन्ति जना भृशम् ॥४५॥
मह्यं लोका वदिष्यन्ति धिग्धिगिति न संशयः ।
प्रतिश्रुत्य न दत्ता सा त्रिषु लोकेषु नारद ॥४६॥
उपालम्भो भवेदद्य दैवयोगान्ममैव च ।
कुलस्यैव तथाद्यैव सर्वलोकैश्च कुत्सितः ॥४७॥
किं करोमि क्व गच्छामि उपक्रोशमलीमसैः ।
संयुक्तापद्यतोहं च वाचा दत्तमदत्तवान् ॥४८॥
दैवयागेन दातुं तां तस्मै चाशक्तवानहम् ।
प्रतियातु भवांस्तत्र विष्णवे चैतदुच्यतां ॥४९॥
या दत्ता च मया तुभ्यं दैवेनैव हृताऽधुना ।
अशक्तोऽस्मि च तां दातुं क्षमस्वायांसि मे हरे ॥५०॥

स्कन्द उवाच ।

समाकर्ण्य ततो धीर हिमवतोदितं वचः ।
नारदोऽपि तदा तूष्णीमासीत्सुविह्वलो भृशं ॥५१॥
आययौ यत्र विष्णुः स मुनिर्भग्नमनोरथः ।
नकिंचिदवदत्तस्मै मूढात्मा त्रपया तदा ॥५२॥
अन्तस्थोऽसौ च सर्वेषां वृत्तान्तज्ञः सदा हरिः ।
नारदं धीर तद्वार्त्तां न किंचिदपि पृष्टवान् ॥५३॥
गौरी सख्या समं शैलादवततार सा पुनः ।
अहोरात्रोषिता कूटे व्रतं कर्त्तुमधः क्षितौ ॥५४॥
कामदायां च रम्यायां शिवाराधनतत्परा ।
सस्नौ च पार्वती सख्या ब्रह्मनद्यां समं तदा ॥५५॥
भाद्रशुक्लतृतीयायां हस्तनक्षत्रसंयुते ।
धर्म्मं चकार सा देवी अहोरात्रं निराशना ॥५६॥
निर्म्माय बालुकं लिङ्गं सम्पूज्य च समर्हणैः ।
जागरणं च संचक्रे भक्तिपूर्वं तया सह ॥५७॥
तस्मिन् रात्रौ महादेवो लिंगाद्व्यक्तो बभूव हि ।
त्रिनेत्रो द्विभुजः शान्तस्त्रिशूलं डमरुं दधन् ॥५८॥
ततो भूयश्च पार्वत्यै वरदानाय सांप्रतं ।
व्याचष्ट सुस्मितो धीर मनोवाञ्छाकरो हरः ॥५९॥

ईश्वर उवाच ।

अहो चित्रं मह्ल्लोके समुद्भूतं कदापि न ।
ईदृशी कोमला बाला तपश्चक्रे यतो दृढम् ॥६०॥
द्वादशाब्दं च संव्याप्य सख्या सह तिथौ तिथौ ।
धूम्रपानं निराहारं द्वादशाब्दं तथा भृशम् ॥६१॥
अदेयं नास्ति चैतस्यै तपस्विन्यै यदीप्सितं ।
अद्यैव च प्रदातव्यं वरं लोकेषु दुर्लभम् ॥६२॥
वरं वरय कल्याणि यत्त्वया वाञ्छितं हृदि ।
दास्येहं तद्वरं तुभ्यं सर्वलोकसुदुर्लभम् ॥६३॥
फलितस्ते तपोवृक्षो भूत्वा कल्पतरुर्भृशम् ।
गृह्यतां तत्फलान्यद्य वांछितानि च यत्त्वया ॥६४॥
प्रसन्नोस्मि च ते भक्त्या संतुष्टस्तपसा भृशं ।
सुप्राणिनामगम्योऽहं त्रैलोक्यानां हृदा ह्यपि ॥६५॥

पार्वत्युवाच ।

शिवाय शिवरूपाय मंगलाय च शूलिने ।
सर्वदाय च देवाय शंकरेश नमोऽस्तु ते ॥६६॥
संसारवृत्तिहर्त्रे वै सवार्थदाय शंभवे ।
तेजोरूपाय रुद्राय सर्वरूपाय वै नमः ॥६७॥
यदि मह्यं प्रसन्नोऽसि सर्वलोकेश्वरेश्वर ।
दीयतां च वरं भव्यं मत्स्वान्तेन यदीप्सितम् ॥६८॥
भर्त्ता भव ममैव त्वं सर्वभूतदयानिधे ।
अद्यप्रभृति आद्येश प्रेयसीं मां कुरु ध्रुवम् ॥६९॥

शर्व उवाच ।

तथाऽस्तु ते महादेवि यत्त्वयोक्तं च मां प्रति ।
प्रेयसी मे सदा त्वं च भविष्यसि वरानने ॥७०॥
यतस्तुङ्गतपोधर्म्मान्मां वरसे वरानने ।
अद्यादि तव दासोऽहं भवामि खलु सर्वदा ॥७१॥
गच्छ देवि मया सार्द्धं कैलाशं च नगोत्तमं ।
पाणिं पीड्य च तत्रैव तिष्ठावः सुसुखं मुदा ॥७२॥

उमोवाच ।

नैवं वक्तव्यमित्थं च त्वया नाथ कदापि न ।
अलौकिकं च वै कर्म प्रभो लोकविडम्बनम् ॥७३॥
भवता नाथ च वक्तव्यं विभो मे पितुरग्रतः ।
स मां दास्यति तुभ्यं स्यात्ततः कर्म तु लौकिकम् ॥७४॥

स्कन्द उवाच ।

समाकर्ण्य वचस्तथ्यमुमादेव्या महेश्वरः ।
स्वीकारं कृतवान् धीर तथास्त्विति सहर्षितः ॥७५॥
ब्रह्मणा हि पुरा धीमन्संसृष्टा च नदी वरा ।
हिमाद्रिणा समं तस्माद्ब्रह्मनदीति विश्रुता ॥७६॥
उमास्नानाद्विशेषेण पवित्राभूच्च सा नदी ॥७७॥

तस्यां दत्तं हुतं जप्तं तत्सर्वं चाक्षयं भवेत् ।
तस्यां च स्नानमात्रेण ब्रह्मलोके महीयते ॥७८॥
सर्वपापविनिर्मुक्तो ब्रह्मत्वं च ततो भवेत् ।
आदिगंगा महापुण्या उमास्वेदोद्भवा परा ॥७९॥
तयोः सुसङ्गमे तीर्थमुमातीर्थमुदाहृतं ।
शतगङ्गासमं तीर्थं निर्वाणं कांचिनप्रदम् ॥८०॥
कुलकोटीं समुद्धृत्य जलं स्पृष्ट्वा परं व्रजेत् ।
तस्मिन्स्नात्त्वा च गौर्य्याद्रिं समारोहति यो नरः ॥८१॥
उमां स्मरन् धिया वाचा तस्य पुण्यफलं शृणु ।
वाजपेयाश्वमेधानां फलं प्राप्नोति तत्क्षणात् ॥८२॥
उमातपोगिरिं भक्त्या आरोहणात्परदे पदे ।
दुर्ल्लभेन सुरैर्दैत्यैःसिंहयानेन गच्छति ॥८३॥
स मुदा तमुमालोकं पुनर्जन्म विहाय वै ।
जप्त्वा चेत्तन्मनुं धीरो मोक्षं प्राप्नोति दुर्लभम् ॥८४॥
अन्यक्षेत्रे कृतानां च योगिनां वातिदुर्लभं ॥८५॥
अन्तर्हितस्तत्र शिवोऽपि शीघ्रं
गौरी च सख्या सह वै निशायां ।
चक्रे विनिद्रं गिरिशं स्वभक्त्या
संपूजयित्त्वं विधिवन्मुदा सा ॥८६॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे उमाव्रते शर्व-सङ्गमनं नामोनषष्टीतमोऽध्यायः ॥ ५९ ॥

—❀❀❀—

६०

स्कन्द उवाच ।

प्रणीतायां निशायां सा स्नात्वोपसि ददौ मुदा ।
उमा वै भास्करायार्घ्यं भक्तेशं पूज्य पूजनैः ॥१॥
ततो वनसमूद्भूतफलमूलानि ते तदा ।
आनीय पारणं नद्याश्चक्रतुः पपतुर्जलम् ॥२॥
ब्रह्मनद्यास्तटे भद्रे सुषुपतुस्तदाहि ते ।
पार्वती धर्मशीला वै सर्वजन्तुविवर्जिते ॥३॥
तद्दिने हिमवान्गेहाद्विनिर्गत्य सुदुःखितः ।
सुतामन्वेषयन्तत्र संप्राप्तवान् हि तद्वनम् ॥४॥
ततो हिमालयश्चार्त्तो नदीतीरे च निर्ज्जने ।
तत्रालोक्य चतुर्दिक्षु वृक्षस्याधो नदी-तटे ॥५॥
ददर्श दूरतो यामे सुप्तं कन्याद्वयं स्थितं ।
दृष्ट्वा सुखं प्रसुप्तं वै विविक्तं कन्यकाद्वयम् ॥६॥
अर्धोवल्लघुतद्देशं प्रसुप्तं कन्यकाद्वयं ।
हा पुत्रीति च संक्रन्दन् शोकेन वेपथुस्तनुः ॥७॥
तत्क्रन्दितं समाकर्ण्य सुप्तोत्थिते च सांप्रतं ।
ते युगपन्मुने तात मदर्शतां तदन्तिके ॥८॥
स्वाङ्कमानीय चोत्थाय अरोदीत्स मुहुर्मुहुः ।
आत्मजाया मुखाब्जं च प्रेक्ष्य व्याचष्ट हेमभृत् ॥९॥

हिमवानुवाच ।

सिंहव्याघ्रगजैर्युक्तं नानाजन्तुभयंकरैः ।
एवं वनं महाभीमं किमर्थमत्र चागतम् ॥१०॥
कस्माच्च दूयसे पुत्रि कुलभूषणया त्वया ।
केनापि कुत्सितं तुभ्यं वद यन्मे तथा हुतम् ॥११॥
त्वया विरहितं गेहं सर्वसंपद्युते ह्यपि ।
अरण्यमिव मे पुत्रि प्रकृतं कुरु साम्प्रतम् ॥१२॥
बहुदुःखातुरा माता पुत्रि ते शोक-कर्पिता ।
कुररीव च स नित्यं संबोधयाशु मागतम् ॥१३॥

स्कन्द उवाच ।

एवमुक्तं वचः श्रुत्वा पितुर्हिमवतस्तदा ।
उमा देवी समं सख्या आजग्मतुर्गृहं स्वकम् ॥१४॥
हिमवानपि तां पुत्रीं ज्ञात्वा सक्तां शिवे हृदा ।
शिवभक्तां पुरोधाय आययौ स्वगृहं मुदा ॥१५॥
दुःखदग्धा ततो मेना ददर्श व्रतकर्षिणीं ।
ततो वनात्समायातां स्वसुतां मुनिसत्तम ॥१६॥
परिरभ्य सुतां गाढं दोर्भ्यां मेना तदा द्रुतं ।
कुररीव सुतां प्राप्य करुणं समरूरुदत् ॥१७॥
ततोऽवोचद्वचो मेना निःश्वसन्ती मुहुर्मुहुः ।
वाचा गद्गदया तस्यै पुत्रीस्नेहवती मुने ॥१८॥

मेनोवाच ।

हार्य्ये पुत्रि परित्यज्य मां तातं क गतासि च ।
रत्नालयं स्वकं गोत्रं महार्हणं विभूषणम् ॥१९॥
सभृत्यानां च नः पुत्रि जीवरूपा त्वमेव च ।
शवस्य च गतिं लब्ध्वा एवमेव वयं स्थिताः ॥२०॥
नः कुलभूषणायार्ये सर्वप्रियंवदे शुभे ।
कुतो दुःखं समायातं ते पुत्रि वद मेऽधुना ॥२१॥

पार्वत्युवाच ।

यन्मया चिन्तितं मातस्तं च तातेन सांप्रतं ।
अविमर्ष्य त्वया सार्द्धं विसर्ज्य तदेश्वरम् ॥२२॥
मया सुचिन्तितं रुद्रं तच्चरणप्रसेवनं ।
अंगीकृता च तातेन मां सत्वरं हि विष्णवे ॥२३॥
अतो दुःखातुराऽहं च गता तत्तु समैश्वरं ।
तत्रैश्वरेण मे मातः फलं दत्तं सुधर्म्मतः ॥२४॥
अतश्चैवमयं कायस्तच्चरणकुशेशयोः ।
प्रसेवनाय कार्य्यास्याम्मातः कदापि नान्यतः ॥२५॥

स्कन्द उवाच ।

तद्वचनं समाकर्ण्य तपस्विन्यास्तदा मुने ।

सुखं लब्धवती मेना माधुर्य्यप्रियभाषणैः ॥२६॥
दावेन क्लेशिता गुल्मा सुधासारैरिवाशु च।
तद्वचः शीतला मेना तापं जह्रे व्यथोद्भवम् ॥२७॥
तथाऽस्तु ते सुते भद्रे यत्ते कामं हृदि स्थितं।
एवं संबोध्य मेना तामजहाद्दुःखमाशु वै ॥२८॥

अगस्त्य उवाच।

स्वश्रृंगेऽपि स्थितां गौरीं तपस्विनींन्तदा विभो।
हिमवांश्च कथं स्कन्द न ज्ञातवान्सुतां स्वयम् ॥२९॥
अज्ञानेनाश्रितः शैलः प्राकृतश्च तथा जनः।
तपस्थानं गरीयांश्च सर्वेषां वद मे हि तत् ॥३०॥

स्कन्द उवाच।

यया विमोहिता लोका जगच्च सचराचरं।
पुरा विमोहितो विष्णुस्तन्माहात्म्यं च किं ब्रुमः (वे)।
यन्माया-मोहितो रुद्रः पितामहस्तथाविधं।
सुरासुरा मुने सर्वे किं च स स्थावरात्मकः ॥३२॥
सृष्टिस्थितिविनाशांश्च यदृच्छया करोति या।
तन्मायामोहितो यस्तच्चरितं वेत्ति किंच सः ॥३३॥
यस्या विभूतयो देवाः प्राणिनः सचराचराः।
त्रैलोक्यवन्दनीयायाश्चरित्रं वेत्ति को वद ॥३४॥
जायन्ते प्राणिनो यस्यां लीयन्ते च तथा पुनः।
सुखं दुःखं प्रलभ्यन्ते इच्छात्मानो यतो मुने ॥३५॥
संसारस्थितये गौरी तपस्तप्तवती ह्यभूत्।
अवश्यत्पुनः शंभुं सर्वलोकहिताय च ॥३६॥
तस्या इच्छास्वरूपिण्या रुद्रेण संगमं मुने।
वक्ष्यामि ते विवाहं वै शृणु मनः समाहितः ॥३७॥
एकात्मापि द्विधा भूत्वा तन्मनस्को महाविभुः।
लोकसंस्थापनायार्थं प्रजायै चैव नान्यथा ॥३८॥
ईश्वरश्च समाहूय सप्तर्षीनवदत्तदा।
गौर्य्या विवाहितुं सार्द्धं प्रेक्षणाय च सांप्रतम् ॥३९॥

ईश्वर उवाच।

गच्छध्वं मुनयो यूयं व्योमकूटं महाचलं।
कुरुध्वं मम कार्य्याणि मद्भक्तिषु रताः सदा ॥४०॥
हिमवते च वक्तव्यं मत्सन्देशं मुनीश्वराः।
गत्वा तत्र महाशैले तदुच्यते मयाऽधुना ॥४१॥
न च यत्नवतां कार्यं प्राकृताद्भाग्ययोगतः।
हिमवन्भवितव्यं यद्दैवाद्धि तद्भविष्यति ॥४२॥
स्वामिनश्चाप्यदानाद्वै प्राकृतश्च जनः सुखं।
तं लभिष्यति चावश्यं कृत्याकृत्यं पुरा गिरे ॥४३॥
प्राप्तव्यं हि जनैर्नूनं स्वकृतं तपसः फलं।
ते सुतयेप्सितश्चाहं सुतपोभिर्विवाहितुम् ॥४४॥

इति तस्मै च वक्तव्यं भवद्भिर्मधुरोक्तिभिः।
त्र्यहादूर्ध्वं तथाद्यादिवैवाहिकदिने पुनः ॥४५॥

स्कन्द उवाच।

ततः सप्तर्षयो धीमन् प्रणेमुश्च महेश्वरम्।
तस्य चाज्ञां समादाय व्योमकूटं ययुर्मुदा ॥४६॥
ददर्श हिमवान् व्योम्नः समागतान्मुनीश्वरान्।
उदतिष्ठत्सभास्थानाद्धर्षपूरितमानसः ॥४७॥
प्रणम्य च स्तवैः शीघ्रं हिरण्याद्यैरपूपुजत्।
विष्टरेषु समावेश्य मधुपर्काणि सन्ददौ ॥४८॥

हिमवानुवाच।

स्वागतं मुनयः श्रेष्ठा सन्ति वः कुशलानि च।
शरीरेषु च लोकेषु सर्ववार्त्ताविशारदाः ॥४९॥
अद्य मे सफलं जन्म अद्य पवित्रितं गृहं।
अद्यैव मे पवित्रात्मा भवन्तो यत आगताः ॥५०॥
किं करोति च वः कार्य्यं भवत्किंकर आशु च।
आज्ञां विधीयतां धीरा यस्मादिहागताश्च मे ॥५१॥

सप्तर्षय ऊचुः।

हिमवञ्शृणु वृत्तान्तं यदर्थं समिहागताः।
देवदेवस्य कार्य्याय संप्राप्तास्तव सद्मनि ॥५२॥
अवश्यं च भवेद्भावि प्राक्कृतस्य जनस्य वै।
अन्यैरपि निषिध्योऽपि दैवयोगेन पूर्वतः ॥५३॥
ईश्वरेणैव ते पुत्री प्रार्थयतेऽद्य हिमालयः।
तेनैव प्रेषिताश्चात्र तदर्थं वयमागताः ॥५४॥
हिमवन्कुरु तत्कार्य्यं यदर्थं वयमागताः।
मा विलम्बं च कर्त्तव्यं शर्व कार्य्ये हिमालय ॥५५॥
योग्यं योग्याय दातव्यं रत्नं रत्नेषु योजयेत्।
न रत्नं योज्यते लोहे नायोग्यं योज्यते तथा ॥५६॥

स्कन्द उवाच।

ततस्तद्वचनं भूयः समाकर्ण्य हिमालयः।
विमर्ष्य मेनया सार्द्धमपृच्छत्तान्मुनीन्तदा ॥५७॥

हिमवानुवाच।

कोऽसौ शर्व इति ख्यातः कदापि च न दृष्टवान्।
गोत्रं न ज्ञायते तस्य कस्य पुत्रो मुनीश्वराः ॥५८॥
किं शीलं तस्य देवस्य गुणानि हि तथैव च।
रूपं जातिं न जानाति एतत्सर्वं वदन्तु मे ॥५९॥

मरीचिरुवाच।

सर्वेशः सर्ववन्द्योऽसौ सर्वभूतानुकम्पकः।
सर्वभूताशयो देवस्तस्माच्छर्व इति श्रुतः ॥६०॥

अत्रिरुवाच।

अगोचरस्तथागम्यश्चालक्ष्यो भक्तिवर्जितैः।

योगिनामपि देवेशस्ततोऽलक्ष्य इति श्रुतः ॥६१॥
पुलस्त्य उवाच ।
गोत्रं दत्तं च जीविभ्यस्त्रायते येन गाः सदा ।
गोचराणि तथा शैल तस्मै गोत्रं समुच्यते ॥६२॥
पुलह उवाच ।
यस्मात्प्रजायते चैतल्लोकं स्वयमजः श्रुतः ।
शीलरूपो हि सर्वेषां तस्मै शीलः प्रचक्षते ॥६३॥
क्रतुरुवाच ।
गुणैर्विवर्जितो देवो गुणरूपोऽपि हेमभृत् ।
त्रिगुणैर्मोहितो लोकस्तस्मै गुणात्मकः श्रुतः ॥६३॥
भृगुरुवाच ।
चाक्षुष्यः सर्वभूतानां चक्षूरूपो महाविभुः ।
तत्प्रेरको हि रूपो ऽसौ सर्वरूपस्ततः श्रुतः ॥६४॥
अङ्गिरा उवाच ।
जीविनां जातिदो देवो वर्णानां च पृथक् पृथक् ।
जातिरूपो हि लोकेषु सर्वजातिं प्रचक्षते ॥६५॥
सप्तर्षय ऊचुः ।
ॐनमः शूलिनेऽजाय नमः शिवाय शाश्वते ।
येनोत्सृष्टं जगत्सर्वं तस्मै देवाय वै नमः ॥६६॥
स्कन्द उवाच ।
श्रुत्वा च वचनं तेषां रुद्ररूपप्रसंशनं ।
तन्मायाप्रविमुक्तोऽसौ अतिहर्षितवान्भृशम् ॥६७॥
देवदेवमिति ज्ञात्वा हिमवांश्च प्रहर्षितः ।
व्याचष्ट वचनं तेभ्यो ज्ञानयुक्तो मुनीश्वर ॥६८॥
हिमवानुवाच ।
अहोभाग्यमहोभाग्यं स्थावरस्य ममाद्य वै ।
त्रैलोक्येशेन मे पुत्री प्रार्थिता सांप्रतं यतः ॥६९॥
यद्येवं प्रार्थयेदीशः पुत्रीं मे कुलभूषणाम् ।
अवश्यं खलु दातव्या तस्मै मया मुनीश्वराः ॥७०॥
मनःकायवचोभिश्च दत्ता तस्मै मया सुता ।
मङ्गलाय सुभव्याय शोधयध्वं दिनं सतः ॥७१॥
सप्तर्षय ऊचुः ।
अद्यादेश्च त्र्यहादूर्ध्वं सर्वमङ्गलसंयुतं ।
तद्दिने चैव कर्त्तव्यं विवाहं वै हिमालय ॥७२॥
केदारदक्षिणे स्थाने त्रियुगी यत्र राजते ।
विधिवच्छङ्करायाशु तत्रैव दीयतां सुता ॥७३॥
स्कन्द उवाच ।
उत्युक्त्वा प्रययुर्भूयो हिमवते सुरर्षयः ।
कैलाशं च महाशैलं यत्र देवो महेश्वरः ॥७४॥
गत्वा ते ऋषयस्तत्र प्रणेमुरीश्वरं मुने ।
ऊचुस्ते तच्च वृत्तान्तं महादेवाय सांप्रतम् ॥७५॥
आकर्ण्य वचनं तेषां महादेवोऽतिहर्षितः ।
सस्मार सर्वदेवांश्च स्वात्मसारथये तदा ॥७६॥
आजग्मुस्त्वरितं तत्र सगन्धर्वाः सुरा मुने ।
चन्द्रसूर्यौ च दिक्पाला ब्रह्मविष्णुवृषास्तथा ॥७७॥
प्रमथाश्च समाजग्मुश्चतुःषष्टीसुकोटयः ।
वाहनानि समारुह्य स्वं स्वं शस्त्रास्त्रमुद्यतैः ॥७८॥
ययौ रुद्रः समं सैन्यैः संवृतश्चैव सांप्रतं ।
सर्वरत्नाढ्ययानस्थस्त्रियुगी यत्र संस्थितः ॥७९॥
हिमवांश्च ययौ पूर्वं त्रियुगी यत्र देवताः ।
स्वं स्वं तनुं विभृत्याशु सर्वशैलैः समं मुने ॥८०॥
उपकरणमादाय पार्वतीं चैव मेनया ।
सप्तर्षीन् योजयद्यज्ञे हिमवांस्तत्र वै तदा ॥८१॥
भारद्वाजश्च धौम्यश्च वशिष्ठो गौतमो गुरुः ।
जमदग्निर्यमश्चैव पैठीनसी तथापराः ॥८२॥
समाययुर्ग्रहाः सर्वे ऋषयस्तत्र कुम्भज ।
इजिरे विधिवद्यज्ञं विवाहाय महोत्सवैः ॥८३॥
ज्ञात्वा वैवाहिकं शम्भो ग्रहाः सर्वे शुभे स्थिताः ।
तत्प्रसादाद्वयं श्रेष्ठा भवाय इति सन्त्रयन् ॥८४॥
शुभे लग्ने शुभे घस्रे हिमवान्विधिवन्मुने ।
समभ्यर्च्चर्य वरं भक्त्या हराय पार्वतीं ददौ ॥८५॥
ततो नेदुर्महानादं नानावाद्योऽभवत्तदा ।
जगुर्भृशं गन्धर्वा ननृतुश्चाप्सरो गणाः ॥८६॥
ववर्षुः पुष्पवृष्टिश्च लाँजासारैस्तथैव च ।
अक्रीडंश्च तदा देवा सिन्दूरैश्च सुगन्धिभिः ॥८७॥
प्रजेगुश्च भृशं सिद्धा ननृतुर्योगिनीगणाः ।
सप्तर्षयो मुने प्रोच्चैर्वेदघोषैः प्रघोषयन् ॥८८॥
संगृहीत्वा च तां पाणौ हर्षनिर्भरमानसः ।
योगिनीभिः समं रुद्रः केदाराद्रिं समारुहत् ॥८९॥
ययुर्देवाः सगन्धर्वाः स्वं स्वं स्थानं मुदा पुनः ।
हिमवान् व्योमकूटे च भोजयंश्च द्विजान्सुखम् ॥९०॥
पर्वतारोहणात्कष्टात्पार्वती धर्म्मसंयुता ।
अपतद्धर्म्मविन्दुश्च तस्या देहाच्छिलोच्चये ॥९१॥
स्वच्छन्दं प्रववाहाशु वेगेन ब्रह्मशेखरात् ।
नदीभूता हि तद्धर्म्मबहुशुभ्रोर्मिमालिनी ॥९२॥
तस्यै नाम चकाराशु नद्यै यथार्थमीश्वरः ।
अतिप्रहर्षितो रुद्रः प्रेक्ष्य देव्यङ्गसम्भवाम् ॥९३॥
यस्माद्देव्यङ्गसंभूता अत्रापतद्गिरौ वरे ।
तस्मात्केदारगङ्गेति ख्याता देवी नदी भव ॥९४॥
ततो ब्रह्मादयो देवा ऋषयश्च समाययुः ।

गन्धर्वाश्चाप्सरः सिद्धा यक्षरक्षोमहोरगाः ॥९५॥
सस्नुस्तस्यां महानद्यां हर्षपूर्णमनोरथाः ।
ततश्चालकनन्दां तां भक्त्या पूजन्समर्हणैः ॥९६॥
पूर्वं सस्नौ महादेवस्तस्यां भक्त्या महोत्सवैः ।
संपूज्य विधिवत्तां वै प्रमथैः सहसं तदा ॥९७॥
देवदेवो मुदा तत्र ह्यद्यापि तिष्ठति स्म वै ।
उमया सह नित्यं च केदाराद्रौ महोज्ज्वले ॥९८॥
स्नात्वा तस्यां च केदारं समारोहति यो मुने ।
न पुनर्ज्जायते योनौ निधनं तस्य नास्ति च ॥९९॥
सर्वपापैर्विनिर्मुक्तः सूर्याभयानसंस्थितः ।
परिवारैः समं हर्षैः स याति शिवलोककम् ॥१००॥
उमामहेश्वरं देवं यः पश्यति च तत्र वै ।
शिवशिवेति संस्मृत्य आरोहते तद्गिरौ ॥१०१॥
निर्धूतसर्वपापोऽसौ प्राप्नोति परमां गतिं ।
संत्यज्य भौतिकं देहं निर्व्वाणं तत्र लीयते ॥१०२॥
स्वर्गद्वारं च तत्सानौ यो गच्छति नरोत्तमः ।
सर्वजन्मार्जितैः पापैः समुक्तो नात्र संशयः ॥१०३॥
इहलोकं परित्यज्य यो गच्छति मुदा मुने ।
स्वर्गद्वारं ततः स्वर्गो सर्वकालं हि तिष्ठति ॥१०४॥
त्रियुगाख्यं महाविष्णुं यो वन्दति च तत्र च ।
सर्वपापैर्विनिर्मुक्तो विष्णुलोके महीयते ॥१०५॥
विष्णुगङ्गेति विख्याते भक्त्या स्नाति नरो हि यः ।
शतजन्मार्जितैः पापैः स मुक्तो नात्र संशयः ॥१०६॥
त्रिभिर्युगैश्च येनाशु त्रैलोक्यं मोहितं पुरा ।
त्रेताद्वापरसत्यैश्च एकयुगमिव द्विज ॥१०७॥
छद्मनार्थं बले विष्णुश्चकार तत्तथा युगं ।
तपःस्थितस्य दैत्यस्य लोकरक्षाय कुंभज ॥१०८॥
विलेपयति देहं यस्तद्यज्ञकुण्डभस्मना ।
सर्वपापैर्विनिर्मुक्त उमालोकं सगच्छति(प्रयास्यति)१०९

एतद्धि तुभ्यं कथितं प्रशंसां-
घर्म्मोद्भवाया जननस्य देव्याः ।
केदारगङ्गेति हि विश्रुता सा,
मान्या हि देवैः सततं च सिद्धैः ॥११०॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे पार्वतीविवाहो नाम षष्टितमोऽध्यायः ॥६०॥

—❀❀❀—

अगस्त्य उवाच ।

बलिना सुकठोरं च तपस्तप्तं च तत्र वै ।
त्रियुगाख्ये हरौ कृत्वा इन्द्रो भवामि चेति वै ॥१॥
ततः शक्रः समागत्य ययाचे तं हरिं वरम् ।
तत्तपो भंजनायाशु तत्तापात्कंपितो भृशं ॥२॥

शक्र उवाच ।

याचेऽहं त्वां विभो विष्णो किंचित्कार्यं ममैव च ।
अनुग्रहं च कर्त्तव्यं कृपासागर माधव ॥३॥
तस्य तपो वभंजाशु मां केशव समुद्धर ।
कठोरं तपवान्दैत्यो लब्धकामो मदासनम् ॥४॥

त्रियुगिरुवाच ।

मैवं त्वया च वक्तव्यं तपस्विने च भक्तिने ।
मित्रो वा चापि शत्रुर्वा गरीयान्स तपः स्थितः ॥५॥
प्राप्तव्यं तेन चावश्यं मघवंस्तपसः फलं ।
कालदीर्घं करिष्यामि तवागमनकारणात् ॥६॥

स्कन्द उवाच ।

इत्युक्त्वा त्रियुगी विष्णुरन्तर्दधे हि तत्र च ।
शक्रोऽपि प्रययौ स्वर्गं तपस्तेपे बलिर्भृशम् ॥७॥
विस्तता(युगं विष्णुस्त्रयमेकमिवाशु च ।
तप्तवांश्च बलिर्मौनी सहस्राब्दमिवासुरः ॥८॥
लब्ध्वा वरं बलिर्विष्णोस्त्रैलोक्यं सचराचरं ।
दिव्यायुतसहस्राब्दं राज्यं चकार वै सुखम् ॥९॥
कश्चित्काले बलिर्यज्ञं चकार वै महोत्सवैः ।
निर्जित्य देवताःसर्वाः कृत्वात्मसाचराचरम् ॥१०॥
ददौ दायांश्च विप्रेभ्यो वासोरत्नानि सर्वशः ।
रत्नान्यन्नानि विप्रांश्च सुखं भोज्यञ्च भोजयन् ॥११॥
देवप्रयाग इत्याख्ये बहुपुण्यफलप्रदं ।
संगमे च महातीर्थे गंगाचालकनन्दयोः ॥१२॥
ययौ विष्णुश्च तद्यज्ञे वेदविद्विर्ति याचितुं ।
खर्व्वरूपं समाधाय रूपस्वरगुणैर्युतः ॥१३॥
चक्रे वेदध्वनिं खर्व्वो बले यज्ञे महोत्सवे ।
दृष्ट्वाकर्ण्यस्वरं रूपं खर्वस्य हर्षवान् बलिः ॥१४॥
ददौ दानानि खर्वाय हिरण्यरत्नवाससः ।
बलिर्व्वाचष्ट दैत्येभ्यः सर्वस्वं दातुमिच्छितः ॥१५॥
तन्मायामोहितो दैत्यो विप्ररूपं च नेदृशं ।
कदापि न मया दृष्टो वेदविद्यापि सुस्वरम् ॥१६॥
एतस्मै वाद्य दातव्यमनेन च यदीप्सितं ।
सर्वस्वमपि मे दैत्या ददेऽधुना महोत्सवे ॥१७॥

बलिरुवाच ।

भो भो खर्व द्विजश्रेष्ठ रूपगुणस्वरैर्युतं ।
याच्यतामीप्सितं मां तद्यदस्ति तेऽधुना ददे ॥१८॥
अत्रागत्य निराशत्वं मद्यज्ञे मा कुरु ध्रुवं ।
स्वेच्छार्थं तदसौ दैत्यो दास्यति वा नवेति मे ॥१९॥

खर्व उवाच ।
सर्वं दत्तं त्वया मह्यं दैत्यराज त्वशेषतः ।
पुनः किंचिद्ययाचे त्वां त्रिपदस्थानमार्य्यमे ॥२०॥
एतद्धेतोः समायातो याचकः क्षितिकांक्षया ।
ख्यातस्त्वं सर्वदो ज्ञात्वा सर्वलोकेप्सितप्रदः ॥२१॥
स्कन्द उवाच ।
तद्वचनं समाकर्ण्य दैत्यराजः प्रहर्षितः ।
तिलोदकं सदर्भं च आदाय पाणिना द्रुतम् ॥२२॥
वाक्यार्थं च बलिर्भूयः शुक्रमुखं प्रदृष्टवान् ।
प्रचक्रे च तदा दातुं तस्मै क्षितिं घटोद्भव ॥२३॥
शुक्रोऽपि विष्णुभीतात्मा असमर्थो निषेधिने ।
विवेश जलपात्रं तद्धारायमे स्थितो लघु ॥२४॥
प्रेक्ष्यासुराश्च तच्चेष्टां सम्मन्त्रयन्द्रुतं तदा ।
निषेधितुं तमूचुस्ते वेपमानाश्च तद्भयात् ॥२५॥
दैत्या ऊचुः ।
भो दैत्यराज तेऽद्य एतद्बुद्धिस्समागता ।
अस्माकं च विनाशाय प्रोद्यतोऽसीह सांप्रतम् ॥२६॥
भविष्यन्ति पुनर्नश्च भ्रष्टराज्या न संशयः ।
नः संकटा ह्यभूवंस्तान्पुरा सुरासुरेश्वर ॥२७॥
येन विध्वंसितः पूर्वं पितामहश्च नो विभो ।
हिरण्यकशिपुश्चान्यो हिरण्याक्ष स्तथापरम् ॥२८॥
त्वां छद्मितुं समायातो विष्णुर्जानीहि निश्चितं ।
विप्ररूपं समाधाय खर्वरूपेण मोहयन् ॥२९॥
विष्णुं ज्ञात्वा महाराज विवेकस्थो हि सर्ववित् ।
मा ददस्व क्षितिं तस्मै कैतवविप्ररूपिणे ॥ ०॥
सर्वस्वमपि चास्मै वै दीयतां मा क्षितिस्त्वया ।
अवलुंप्य पुनः स्वर्गमानयामो वसूत्तमान् ॥३१॥
बलिरुवाच ।
धिग्धिग्दैत्या ध्रुवं युष्मानीदृशी बुद्धिसंयुतान् ।
उत्सवे दानधर्मे च निषेद्धुं प्रोद्यता यतः ॥३२॥
निषेधति यो दानं दरिद्रः स भवेत्सदा ।
धर्म्मो निषेधितो येन स एव नारकी स्मृतः ॥३३॥
अहोभाग्यं ममैवाद्य प्रह्लाद शृणु धर्म्मवित् ।
यदि भवेदयं विष्णुः सर्वदेवैः प्रवन्दितः ॥३४॥
येन दत्तं पुरा मह्यमैश्वर्य्यं लोकदुर्ल्लभं ।
तस्मै मुदा च दातव्यं पात्रायार्घ्य विचारतः ॥३५॥
विष्णुसमो हि पात्रः को नास्ति प्रह्लाद निश्चयं ।
तेन यद्याचितोऽहं तत्तस्मै दातव्यमाशु वै ॥३६॥
भूत्वा दैत्येश्वरस्तात याचकेभ्यो ददामि न ।
कलङ्कं मेवदिष्यन्ति लोका धिग्धिगिति द्रुतम् ॥३७॥

भो भो विप्रेश ते पाणिं प्रसार्य्यतां च सत्वरं ।
गृहाण मेदिनीं नूनं भवता च यदिप्सिताम् ॥३८॥
स्कन्द उवाच ।
आनम्य जलपात्रं स जलमादाय कुंभज ।
अनागतं जलं प्रेक्ष्य बलिं खर्व्वः प्रबोधयत् ॥३९॥
जलधारायने राजन् कुशाग्रं च निवेशय ।
श्रुत्वा खर्ववचो दैत्यः कुशाग्रं निचखान वै ॥४०॥
तद्व्रणाच्चो द्रुतं शुक्रोज लपात्राद्विनिर्गतः ॥४१॥
आदाय पाणिना तोयं दर्भतिलैः समं बलिः ।
ददौ क्षितिं मुदा भक्त्या खर्वरूपाय विष्णवे ॥४२॥
हाहाकारा भवेयुश्च दैत्या म्लानमुखश्रियः ।
नेदुर्दुन्दुभयो व्योम्नि मुनयः साधु साध्विति ॥४३॥
आदाय पाणिना तोयं स्वीकारं कृतवान्हरिः ।
ततस्त्रिविक्रमं रूपं विदधे त्रिपदैर्युतम् ॥४४॥
विस्ततार ततो विष्णुः पादत्रयं हि तत्क्षणात् ।
मेदिन्यां च तथा नाके व्योम्न्येवमेव चापरम् ॥४५॥
त्रिविक्रम उवाच ।
भो दैत्यराज संस्थानम्मत्पदस्यापरस्य च ।
इदानीं कुत्र संन्यस्तं प्रदीयतां च तत्त्वया ॥४६॥
स्वर्गव्याप्तं पदं चैकमपरं मेदिनीतले ।
एकस्य नास्ति दैत्येश स्थानं भक्तं च सर्वद ॥४७॥
बलिरुवाच ।
अहोभाग्यं पुनर्मेऽद्य वाङ्मनोऽङ्गस्यगोचरम् ।
तत्पादमुद्वहाम्याशु यत्सुरैः दुर्ल्लभं हरेः ॥४८॥
नाथ चार्पय मे मूर्ध्नि तेऽवशिष्टं पदं च तत् ।
योगिनां मनसागम्यं यत्सर्वलोकदुर्ल्लभम् ॥४९॥
त्रिविक्रम उवाच ।
स्थाप्यते यदि ते मूर्ध्नि मत्पादं भक्त सन्ततं ।
गन्तव्यं च त्वया शीघ्रं पातालं हि निरन्तरम् ॥५०॥
स्थातव्यं भवता तत्र सर्वदैत्यसहावृतः ।
बले भव च लोकानां स्रष्टा हर्त्ता च पालकः ॥५१॥
प्रह्लादानन्तरं भक्त त्वमिन्द्रो हि भविष्यसि ।
मन्वन्तरे च दानानां ते प्रभावान्न संशयः ॥५२॥
ततो देवाः सगन्धर्वास्तव शासनतत्पराः ।
नमस्यन्ति मुहुस्त्वां वै दानधर्म्मप्रभावतः ॥५३॥
भक्त देवप्रयागे वै स्नानं कुरु यथाविधि ।
तत्र स्नात्वा च कालान्ते ध्रुवमिन्द्रो भविष्यसि ॥५४॥
बलिरुवाच ।
स्थातव्यं यदि पाताले मया विभोऽसुरैः समं ।
स्थातव्यं भवता तत्र मद्गेहे हि निरन्तरम् ॥५५॥

तमेवारुह्य गन्तव्यं सत्यमेतद्विभो शयः ॥८४॥
नारद उवाच ।
इत्याकर्ण्य वचस्तस्य सद्योऽब्रवीदपांपतिः ।
एवमेव हि याथार्थ्यं नक्रमारुह्य गच्छताम् ॥८५॥
आरुह्य साहस नक्रं प्राग्विपद्वं द्विजोत्तमः ।
विनयेन समं तस्माद्गङ्गा वाहेन चाययौ ॥८६॥
धर्मस्तं प्रेद्य हर्षाढ्यो धन्येति चाब्रुवन्सुतं ।
आदाय ब्राह्मणं धर्म्मो तदन्तिकं ययौ जलात् ॥८७॥
ब्राह्मणीमभिश्रित्यासौ तस्यै द्विजं ददाविति ।
गृहाणैनं प्रभुं सौम्यं यं प्रार्थयसे सदानघे ॥८८॥
संप्रेद्य स्वामिनं धर्मं ब्राह्मणी दिव्यभूषितं ।
संस्पृश्य पादुके नम्रन् वन्दयामास सा मुहुः ॥८९॥
ब्राह्मण्युवाच ।
अहोभाग्यमनाथाया मृतभर्त्ता समागतः ।
तीर्थस्यास्यैव विप्रस्य देवीशयोरनुग्रहात् ॥९०॥
धन्यास्मि कृतकृत्यास्मि सजीवो मत्प्रियो विभो ।
प्राप्ताहं त्वत्कृते प्रश्नं किं करोमि तव ध्रुवम् ॥९१॥
नारद उवाच ।
श्रुत्वैतद्वचनं धर्म्मस्तिरोधानं ययौ जले ।
द्विजः प्रियां समालोक्य व्याचष्ट परिशान्त्वयन् ॥९२॥
विप्र उवाच ।
कथमत्रागता सौम्ये कच्चित्कुशलमस्ति ते ।
मद्वार्त्तां शृणु कल्याणि नक्रो मां नीतवान् प्रिये ॥९३॥
शिवप्रसादाद्वारुण्यादनुग्रहादिहागतः ।
प्रयास्यामो ध्रुवं सौम्ये शांकरं पदवीं पराम् ॥९४॥
ब्राह्मण उवाच ।
कश्चिद्यतिमुखाच्छ्रुत्वा बभ्रम्य मेदिनीं प्रिये ।
चतुर्भिर्वत्सरैर्यावदिहैव प्राप्तवानहम् ॥९५॥
एवं संवादिते शैवायाने आधाय तौ मुने ।
व्योम्नो निन्युः परं शैवं पुनरावृत्तिनाशनम् ॥९६॥
विरजःप्राप्तवाँस्तत्र हंसयानेन नारदात् ।
तथैतत्तीर्थमाहात्म्यं विन्द्यान्नैपालिकं मुने ॥९७॥
इति श्रीस्कन्दपुराणे हिमवत्खण्डे धर्म्मतीर्थमाहात्म्य-नामाष्टषष्टितमोऽध्यायः ॥६८॥

—❀❀❀—

अगस्त्य उवाच ।
निःसृतं त्वन्मुखाब्जाद्वै कथासुधारसं विभो ।
भूयो (तयो) नुष्ठितवृत्तान्तमाकर्ण्य शीतलोस्मि वै ॥१॥
आश्चर्य्यं जायते स्वान्ते ममांगस्य महत्प्रभो ।
हिमवतश्च माहात्म्यं श्रुत्वा तपोमयं गिरिम् ॥२॥
सर्वेषां भूधराणां च गरिष्ठोऽसौ कथं भवत् ।
हिमवान्प्रयतः स्कन्द सर्वश्रृङ्गं तपोमयम् ॥३॥
कस्मात्तेन प्रलब्धं शं सर्वं तपोमयं ततुं ।
एतदिच्छाम्यहं श्रोतुं वद मे तद्यथा विभो ॥४॥
स्कन्द उवाच ।
आसीत्पशुपतिः शंभुर्हिमवत्सानुसुन्दरे ।
नेपालाख्ये महापुण्ये प्राणिनां मोक्षदे क्षितौ ॥५॥
सहस्रतीर्थसंभूते वाग्मती यत्र राजते ।
मणिमती तथाख्याता वीरभद्रा तथापरा ॥६॥
धर्मनदी तथा वृद्धा सत्यनदी सरस्वती ।
प्रभावती त्वसौ यत्र पशुपतिर्विराजते ॥७॥
गोमती च नदी पुण्या शिखराख्याश्च गोश्रवा ।
विश्वमती शिवाधारा यत्र पशुपतिर्विभौ ॥८॥
मातृनदी महापुण्या मणिमती गिरिश्रवा ।
कनखला नदी यत्र पशुपतिर्विराजते ॥९॥
शक्रमार्गनदी पुण्या कालप्रभा सुखप्रभा ।
नारायणी नदी तत्र पशुपतिर्विराजते ॥१०॥
श्यामा धर्मा तथा पुण्या विष्णुपदी तथापरा ।
चन्द्रभागा च गौरी च यत्र पशुपतिर्विभौ ॥११॥
गोकर्णाख्यः किलेशश्च अनन्तः सोम शंकरः ।
शर्वेश्वरश्च भृङ्गेशो यत्र पशुपतिर्विभौ ॥१२॥
तिलेश्वरश्च गुप्तेशो गोपालेशो महाविभुः ।
नवलिंगेश्वरो यत्र पशुपतिर्विराजते ॥१३॥
यत्र विराजते देवी गुह्याख्या मुक्तिदा सदा ।
यत्रासौ योगनी चाद्या राजते गरुडध्वजः ॥१४॥
तासां नदीगरिष्ठानां मध्ये पशुपतिः प्रभुः ॥
विराजते गणैः सार्द्धं सिद्धर्षिदेवसेविते ॥१५॥
वाग्मतीपश्चिमे तीरे सर्व्वदेवतयाःक्षितौ ।
ज्योतीरूपो मुने साक्षात्पशुपतिर्विराजते ॥१६॥
दिव्यवर्षसहस्राणि हिमवान्शैलसुन्दरः ।
यत्र तपश्चकारार्य्य सर्व्वभावैर्निरन्तरम् ॥१७॥
शृंगोदक-महातीर्थे आर्य्यातीर्थेन संयुते ।
स्नात्वा च हिमवांस्तत्र रुद्रमंत्रं सदा जपन् ॥१८
ततः पंचोपचारैश्च त्रिविधैर्भक्तिपूर्व्वकः ।
हिमवान्मेनया सार्द्धमपूपूजन्महेश्वरं ॥१९॥
तमालोक्याशुतोषोऽसौ भक्तिभावान्महोत्सवैः ।
व्याजहार तदा तस्मै वरं दातुं महेश्वरः ॥२०॥
श्रीपशुपतिरुवाच ।
भक्तवर महाशैल मयि भक्तिरतोऽसि वै ।

खर्व उवाच ।
सर्वं दत्तं त्वया मह्यं दैत्यराज त्वशेषतः ।
पुनः किंचिद्धयाचे त्वां त्रिपदस्थानमार्य्यमे ॥२०॥
एतद्धेतोः समायातो याचकः क्षितिकांक्षया ।
ख्यातस्त्वं सर्वदो ज्ञात्वा सर्वलोकेप्सितप्रदः ॥२१॥
स्कन्द उवाच ।
तद्वचनं समाकर्ण्य दैत्यराजः प्रहर्षितः ।
तिलोदकं सदर्भं च आदाय पाणिना द्रुतम् ॥२२॥
वाक्यार्थं च बलिर्भूयः शुक्रमुखं प्रदृष्टवान् ।
प्रचक्रे च तदा दातुं तस्मै क्षितिं घटोद्भव ॥२३॥
शुक्रोऽपि विष्णुभीतात्मा असमर्थो निषेधिने ।
विवेश जलपात्रं तद्धारायमे स्थितो लघु ॥२४॥
प्रेक्ष्यासुराश्च तच्चेष्टां सम्मन्त्रयन्द्रुतं तदा ।
निषेधितुं तमूचुस्ते वेपमानाश्च तद्भयात् ॥२५॥
दैत्या ऊचुः ।
भो दैत्यराज तेऽद्य एतद्बुद्धिरसमागता ।
अस्माकं च विनाशाय प्रोद्यतोऽसीह सांप्रतम् ॥२६॥
भविष्यन्ति पुनर्नश्च भ्रष्टराज्या न संशयः ।
नः संकटा ह्यभूवंस्तान्पुरा सुरासुरेश्वर ॥२७॥
येन विध्वंसितः पूर्वं पितामहश्च नो विभो ।
हिरण्यकशिपुश्चान्यो हिरण्याक्ष स्तथापरम् ॥२८॥
त्वां छलितुं समायातो विष्णुर्जानीहि निश्चितं ।
विप्ररूपं समाधाय खर्वरूपेण मोहयन् ॥२९॥
विष्णुं ज्ञात्वा महाराज विवेकस्थो हि सर्ववित् ।
मा ददस्व क्षितिं तस्मै कैतवविप्ररूपिणे ॥३०॥
सर्वस्वमपि चास्मै वै दीयतां मा क्षितिस्त्वया ।
अवलुंप्य पुनः स्वर्गमानयामो वसूत्तमान् ॥३१॥
वलिरुवाच ।
धिग्धिग्दैत्या ध्रुवं युष्मानीदृशी बुद्धिसंयुतान् ।
उत्सवे दानधर्मे च निषेद्धुं प्रोद्यता यतः ॥३२॥
निषेधति यो दानं दरिद्रः स भवेत्सदा ।
धर्म्मो निषेधितो येन स एव नारकी स्मृतः ॥३३॥
अहोभाग्यं ममैवाद्य प्रह्लाद शृणु धर्म्मवित् ।
यदि भवेदयं विष्णुः सर्वदेवैः प्रवन्दितः ॥३४॥
येन दत्तं पुरा मह्यमैश्वर्य्यं लोकदुर्ल्लभं ।
तस्मै मुदा च दातव्यं पात्रायार्य्य विचारतः ॥३५॥
विष्णुसमो हि पात्रः को नास्ति प्रह्लाद निश्चयं ।
तेन यद्याचितोऽहं तत्तस्मै दातव्यमाशु वै ॥३६॥
भूत्वा दैत्येश्वरस्तात याचकेभ्यो ददामि न ।
कलङ्कमेवदिष्यन्ति लोका धिग्धिगिति द्रुतम् ॥३७॥

भो भो विप्रेश ते पाणिं प्रसार्य्यतां च सत्वरं ।
गृहाण मेदिनीं नूनं भवता च यदिप्सितम् ॥३८॥
स्कन्द उवाच ।
आनम्य जलपात्रं स जलमादाय कुंभज ।
अनागतं जलं प्रेक्ष्य वलिं खर्वः प्रबोधयत् ॥३९॥
जलधारायने राजन् कुशाग्रं च निवेशय ।
श्रुत्वा खर्ववचो दैत्यः कुशाग्रं निचखान वै ॥४०॥
तद्व्रणाच्चो द्रुतं शुक्रोज लपात्राद्विनिर्गतः ॥४१॥
आदाय पाणिना तोयं दर्भतिलैः समं वलिः ।
ददौ क्षितिं मुदा भक्त्या खर्वरूपाय विष्णवे ॥४२॥
हाहाकारा भवेयुश्च दैत्या म्लानमुखश्रियः ।
नेदुर्दुन्दुभयो व्योम्नि मुनयः साधु साध्विति ॥४३॥
आदाय पाणिना तोयं स्वीकारं कृतवान्हरिः ।
ततस्त्रिविक्रमं रूपं विदधे त्रिपदैर्युतम् ॥४४॥
विस्ततार ततो विष्णुः पादत्रयं हि तत्क्षणात् ।
मेदिन्यां च तथा नाके व्योम्न्येवमेव चापरम् ॥४५॥
त्रिविक्रम उवाच ।
भो दैत्यराज संस्थानमस्मत्पदस्यापरस्य च ।
इदानीं कुत्र संन्यस्तं प्रदीयतां च तत्त्वया ॥४६॥
स्वर्गव्याप्तं पदं चैकमपरं मेदिनीतले ।
एकस्य नास्ति दैत्येश स्थानं भक्त च सर्वद ॥४७॥
वलिरुवाच ।
अहोभाग्यं पुनर्मेऽद्य वाङ्मनोऽङ्गस्यगोचरम् ।
तत्पादमुद्वहाम्याशु यत्सुरैः दुर्ल्लभं हरेः ॥४८॥
नाथ चार्पय मे मूर्ध्नि तेऽवशिष्टं पदं च तत् ।
योगिनां मनसागम्यं यत्सर्वलोकदुर्ल्लभम् ॥४९॥
त्रिविक्रम उवाच ।
स्थाप्यते यदि ते मूर्ध्नि मत्पादं भक्त सन्ततं ।
गन्तव्यं च त्वया शीघ्रं पातालं हि निरन्तरम् ॥५०॥
स्थातव्यं भवता तत्र सर्वदैत्यसहादृतः ।
वले भव च लोकानां स्रष्टा हर्त्ता च पालकः ॥५१॥
प्रह्लादानन्तरं भक्त त्वमिन्द्रो हि भविष्यसि ।
मन्वन्तरे च दानानां ते प्रभावान्न संशयः ॥५२॥
ततो देवाः सगन्धर्वास्तव शासनतत्पराः ।
नमस्यन्ति मुहुस्त्वां वै दानधर्म्मप्रभावतः ॥५३॥
भक्त देवप्रयागे वै स्नानं कुरु यथाविधि ।
तत्र स्नात्वा च कालान्ते ध्रुवमिन्द्रो भविष्यसि ॥५४॥
वलिरुवाच ।
स्थातव्यं यदि पाताले मया विभोऽसुरैः समं ।
स्थातव्यं भवता तत्र मद्गेहे हि निरन्तरम् ॥५५॥

तमेवारुह्य गन्तव्यं सत्यमेतद्विभो शयः ॥८४॥
नारद उवाच ।
इत्याकर्ण्य वचस्तस्य सद्योऽत्रवीदपांपतिः ।
एवमेव हि याथार्थ्यं नक्रमारुह्य गच्छताम् ॥८५॥
आरुह्य साहस नक्रं प्राग्विपत्तं द्विजोत्तमः ।
विनयेन समं तस्माद्गङ्गा वाहेन चाययौ ॥८६॥
धर्मस्तं प्रेक्ष्य हर्षाढ्यो धन्येति चाब्रुवन्सुतं ।
आदाय ब्राह्मणीं धर्म्मो तदन्तिकं ययौ जलात् ॥८७॥
ब्राह्मणीमभिश्रित्यासौ तस्यै द्विजं ददाविति ।
गृहाणैनं प्रभुं सौम्यं यं प्रार्थयसे सदानघे ॥८८॥
संप्रेक्ष्य स्वामिनं धर्मं ब्राह्मणी दिव्यभूषितं ।
संस्पृश्य पादुके नम्रन् वन्दयामास सा मुहुः ॥८९॥
ब्राह्मण्युवाच ।
अहोभाग्यमनाथाया मृतभर्त्ता समागतः ।
तीर्थस्यास्यैव विप्रस्य देवीशयोरनुग्रहात् ॥९०॥
धन्यास्मि कृतकृत्यास्मि सर्जावो मत्प्रियो विभो ।
प्राप्ताहं त्वत्कृते प्रश्नं किं करोमि तव ध्रुवम् ॥९१॥
नारद उवाच ।
श्रुत्वैतद्वचनं धर्म्मस्तिरोधानं ययौ जले ।
द्विजः प्रियां समालोक्य व्याचष्ट परिशान्त्वयन् ॥९२
विप्र उवाच ।
कथमत्रागता सौम्ये कच्चित्कुशलमस्ति ते ।
मद्वार्त्तां शृणु कल्याणि नक्रो मां नीतवान् प्रिये ॥९३॥
शिवप्रसादाद्वारुण्यादनुग्रहादिहागतः ।
प्रयास्यामो ध्रुवं सौम्ये शांकरं पदवीं पराम् ॥९४॥
ब्राह्मण उवाच ।
कश्चिद्यतिमुखाच्छ्रुत्वा बभ्रम्य मेदिनीं प्रिये ।
चतुर्भिर्वत्सरैर्यावदिहैव प्राप्तवानहम् ॥९५॥
एवं संवादिते शैवायाने आधाय तौ मुने ।
व्योम्नि निन्युः परं शैवं पुनरावृत्तिनाशनम् ॥९६॥
विरजःप्राप्तवाँस्तत्र हंसयानेन नारदात् ।
तथैतत्तीर्थमाहात्म्यं विन्द्यान्नैपालिकं मुने ॥९७॥
इति श्रीस्कन्दपुराणे हिमवत्खण्डे धर्म्मतीर्थमाहात्म्य-नामाष्टषष्टितमोऽध्यायः ॥६८॥

—❀❀❀—

अगस्त्य उवाच ।
निःसृतं त्वन्मुखाब्जाद्वै कथासुधारसं विभो ।
भूयो (तयो) नुष्ठितवृत्तान्तमाकर्ण्य शीतलोस्मि वै ॥१॥
आश्चर्य्यं जायते स्वान्ते ममांगस्य महत्प्रभो ।
हिमवतश्च माहात्म्यं श्रुत्वा तपोमयं गिरिम् ॥२॥
सर्वेषां भूधराणां च गरिष्ठोऽसौ कथं भवत् ।
हिमवान्प्रथतः स्कन्द सर्वश्रृङ्गं तपोमयम् ॥३॥
कस्मात्तेन प्रलब्धं शं सर्वं तपोमयं ततुं ।
एतदिच्छाम्यहं श्रोतुं वद मे तद्यथा विभो ॥४॥
स्कन्द उवाच ।
आसीत्पशुपतिः शंभुर्हिमवत्सानुसुन्दरे ।
नेपालाख्ये महापुण्ये प्राणिनां मोक्षदे स्थितो ॥५॥
सहस्रतीर्थसंभूते वाग्मती यत्र राजते ।
मणिमती तथाख्याता वीरभद्रा तथापरा ॥६॥
धर्मनदी तथा वृद्धा सत्यनदी सरस्वती ।
प्रभावती त्वसौ यत्र पशुपतिर्विराजते ॥७॥
गोमती च नदी पुण्या शिखराख्याश्च गोश्रवा ।
विश्वमती शिवाधारा यत्र पशुपतिर्विभौ ॥८॥
मातृनदी महापुण्या मणिमती गिरिश्रवा ।
कनखला नदी यत्र पशुपतिर्विराजते ॥९॥
शक्रमार्गनदी पुण्या कालप्रभा सुखप्रभा ।
नारायणी नदी तत्र पशुपतिर्विराजते ॥१०॥
श्यामा धर्मा तथा पुण्या विष्णुपदी तथापरा ।
चन्द्रभागा च गौरी च यत्र पशुपतिर्विभौ ॥११॥
गोकर्णाख्यः किलेशश्च अनन्तः सोम शंकरः ।
शर्वेश्वरश्च भृङ्गेशो यत्र पशुपतिर्विभौ ॥१२॥
तिलेश्वरश्च गुप्तेशो गोपालेशो महाविभुः ।
नवलिंगेश्वरो यत्र पशुपतिर्विराजते ॥१३॥
यत्र विराजते देवी गुह्याख्या मुक्तिदा सदा ।
यत्रासौ योगनी चाद्या राजते गरुडध्वजः ॥१४॥
तासां नदीगरिष्ठानां मध्ये पशुपतिः प्रभुः ॥
विराजते गणैः सार्द्धं सिद्धर्षिदेवसेविते ॥१५॥
वाग्मतीपश्चिमे तीरे सर्व्वदेवतनःस्थितौ ।
ज्योतीरूपो मुने साक्षात्पशुपतिर्विराजते ॥१६॥
दिव्यवर्षसहस्राणि हिमवान्शैलसुन्दरः ।
यत्र तपश्चकारार्य्य सर्व्वभावैर्निरन्तरम् ॥१७॥
श्रृंगोदक-महातीर्थे आर्य्यातीर्थेन संयुते ।
स्नात्वा च हिमवांस्तत्र रुद्रमंत्रं सदा जपन् ॥१८
ततः पंचोपचारैश्च त्रिविधैर्भक्तिपूर्व्वकः ।
हिमवान्मेनया सार्द्धमपूपूजन्महेश्वरं ॥१९॥
तमालोक्याशुतोषोऽसौ भक्तिभावान्महोत्सवैः ।
व्याजहार तदा तस्मै वरं दातुं महेश्वरः ॥२०॥
श्रीपशुपतिरुवाच ।
भक्तवर महाशैल मयि भक्तिरतोऽसि वै ।

सन्ततं च निकामेन वचोमनःकलेवरैः ॥२१॥
सन्तुष्टोऽहं तपोभिस्ते मां भवानीपरायणात् ।
अतो दास्ये वरं ते च मत्तः शृणु हि वच्मि तत् ।२२।
भूधराणां वरो भूयाः सर्वदा मे प्रसादतः ।
देवानां निलयो नित्यं हिमवान्भव संचिरम् ॥२३॥
ऋषीणां निलयो भूयः सिद्धानां भव पर्वत ।
किन्नराणां च यक्षाणां गन्धर्वाप्सरसां पुनः ॥२४॥
राक्षसानां पिशाचानामसुराणां तथा पुनः ।
चतुर्विधनराणां च अस्माकं च भवालयः ॥ ५॥
तपस्विनां तपो भूमिः सर्वकाले भवाचल ।
कांक्षितानि च तेषां वै फलदा भूमयो हि ते ॥२६॥
यावन्ति तव शृङ्गाणि सन्ति भक्त हि सन्ततं ।
तावन्ति च पवित्राणि भवन्तु मत्प्रसादतः ॥२७॥
ये तपांसि करिष्यन्ति स्वल्पं वा बहुशस्तथा ।
लभिष्यन्ति (न्तु)फलं शीघ्रं तद्वांछितं च सादृशम् ।२८।
यज्जला निःसृतास्त्वत्तस्तीर्था भवन्तु तज्जलाः ।
तत्तज्जलाप्लवानां च फलदाश्च पुनः पुनः ॥२९॥
आरोहणं करिष्यन्ति तव शृंगे नरोत्तमाः ।
तावत्फलं लभिष्यन्तु वाजपेयाश्वमेधयोः ॥३०॥
सप्तजन्मार्जितैः पापैस्ते निर्म्मुक्तास्त्रिविष्टपं ।
तत्फलं च समालभ्य गमिष्यन्तु पदे पदे ॥३१॥
दूरात्पश्यति यस्त्वा वै हिमरूपैर्विभूषितं ।
धर्मी मुक्तः स एनोभिरेकसंवत्सरार्जितैः ॥३२॥
गच्छ भूधर राजेन्द्र मत्प्रसादात्सुखं मुदा ।
लिंगमेकं च संस्थाप्य स्वनाम्ना हि मदन्तिके ॥३३॥

स्कन्द उवाच ।

तदुत्तरे स्थले रम्ये हिमवान् भक्तिपूर्वकं ।
संस्थाप्याश्रममयं लिंगं स्वनाम्ना पूजयन्मुदा ॥३४॥
हिमवदीश्वरश्चेति अभिधानेन भक्तितः ।
संपूज्य विधिवल्लिङ्गं तत्रालभेत्फलं पुनः ॥३५॥
मेना चैव महाभक्त्या गुह्येश्वरीमपूजयत् ।
पंचोपहारकैर्नित्यमहर्निशं महोत्सवैः ॥३६॥
नित्यं च पूजितवंती पतिना सह भक्तितः ।
पशुपतिं भवानीं च बहुकालं निनाय च ॥३७॥
एकदा दिवसे मेना भवानीं तां ददर्श सा ।
विद्युदिव निमेषेण तत्रैव पूजितुं गता ॥३८॥
सुन्दरीं सर्वदा गौरीं सर्वतेजोमयीं तनुम् ।
त्रिनेत्रां सुरवंद्यां तां सर्वाभरणभूषिताम् ॥३९॥
प्रणम्य शिरसा भूमौ सस्मार सुधिया च तां ।
तादृशीं रूपिणीं पुत्रीमिच्छन्ती सा मनोरथैः ॥४०॥

ततो मनोरथं तस्यै सर्वदेवगुहाशया ।
तिरोहिताऽपि तत्रैव सर्ववन्द्या ददौ तदा ॥४१॥
ततो मेना तदा मेने कृतार्थं स्वकलेवरं ।
अपि ज्ञानवती लब्धं वरं तद्दर्शना मुदा ॥४२॥
हिमवान्मेनया सार्द्धं व्योमकूटं ययौ मुदा ।
वाञ्छितं च वरं लब्ध्वा संस्मृत्येशं पदे पदे ॥४३॥
तस्माद्देवी स्वयं जज्ञे मेनायां पार्वती मुने ।
तस्यै दत्वा वरं पूर्वं तत्तपसा सुवाञ्छितम् ॥४४॥

अगस्त्य उवाच ।

नेपाल इति विख्यातो भवता स्कन्द मेऽधुना ।
महच्चित्रं फलं लब्धं पुरा हिमवता श्रुतम् ॥४५॥
किं विशिष्टं च तत्क्षेत्रं परिमाणं हि तस्य च ।
किं फलं लभ्यते मर्त्यैस्तत्र कृत्वा शुभाशुभम् ॥४६॥
भक्तवत्सल सेनानी तच्छ्रवणाय साम्प्रतं ।
प्रेरितोऽहं धिया भूयस्तन्माहात्म्यं वदाधुना ॥४७॥

स्कन्द उवाच ।

अहो धन्यतमोऽगस्त्य धर्म्मशीलो न संशयः ।
यतश्चैवेदृशी बुद्धिः संभूता लोकतारिणी ॥४८॥
नेपालस्य च माहात्म्यं श्रवणायाधुना हि ते ।
सुनिष्ठा जायते भूयः सर्वजनोपकारकम् ॥४९॥
भक्तोसि त्वं ममागस्त्य दयाधर्मरतः सदा ।
शृणु वत्स प्रवक्ष्यामि तन्माहात्म्यं महत्फलम् ॥५०॥
नेन्नामार्यो मुनिश्रेष्ठ आसीत्पुरा महातपाः ।
मरीचेस्तनयो धीमान्सर्व्वसत्वदयापरः ॥५१॥
दान्तश्च सर्वभूतेषु कृपाशीलश्च सर्व्वदा ।
दानधर्म्मरतो नित्यं सत्यवादी जितेन्द्रियः ॥५२॥
तेन तप्तं तपस्तीव्रं यत्रास्ते योगिनी मुने ।
द्वादशाब्दं पुरा व्याप्य कठोरं महदद्भुतम् ॥५ ॥
सप्तर्षिभिः समं भक्त्या शैलकोष्ठे तु नेन्मुनिः ।
आनर्च्च योगिनीं देवीं त्वष्ट्रा सुनिर्म्मितैस्तवैः ॥५४॥
तस्यैव तपसा देवी भृशं तुतोष भक्तितः ।
वरं दातुं ततस्तस्मै आविर्भूत्वा च योगिनी ॥५५॥

देव्युवाच ।

भो भक्त नेमुनिश्रेष्ठ ते तपसा च सन्ततं ।
तुष्टोऽहं ते वरं दास्ये शृणु पुत्र समाहितः ॥५६॥
त्वं सिद्धो भव भक्तेषु अनेन तनुना मम ।
अद्यादिक्षयपर्य्यन्तं ततो मयि प्रलोयसि ॥५७॥
त्वं च पालय हे वत्स इदं स्थानं निरन्तरं ।
वरं पशुपतेः क्षेत्रं धर्म्मेण धर्म्म रक्षितुम् ॥५८॥
ततो लोका वदिष्यन्ति तेऽभिधानेन सन्ततं ।

त्रैलोक्यानां गरिष्ठोऽयं नेपाल इति सर्वतः ॥५९॥
द्वीपानां चैव सप्तानां जम्बूद्वीपो गरीयसः ।
तस्मिंश्चैव गरिष्ठं च वाराणसीस्थलं महत् ॥६०॥
तस्माच्चतुर्गुणं ज्ञेयं श्रेष्ठक्षेत्रं च कामदं ।
भुक्तिमुक्तिप्रदं साक्षात्पशुपतिस्थलं महत् ॥६१॥
नित्यं पशुपतिं पुत्र समभ्यर्च्य सुभक्तितः ।
स्थित्वा तत्रैव सम्यक् त्वमेतत्क्षेत्रं प्ररक्षय ॥६२॥
ततः कालान्तरे भूयः तत्क्षेत्रं वहुवत्सरं ।
वाग्मती जलसंपूर्णा नदी(ह्रदी)भूता भविष्यति ।६३।

स्कन्द उवाच ।

देव्याश्चाज्ञां समादाय लब्धवरो मुनीश्वरः ।
धर्मेणापालयत्क्षेत्रं पाशुपतं हि संमन्ततम् ॥६४॥
लोकान्प्रबोधयन्सम्यक् नियमं तत्प्रबोधयन् ।
व्रतोपवासपूजाभिः क्षेत्रमरक्षयन्मुनिः ॥६५॥
ततो हि नेपाल इति प्रतिष्ठा
देवासुरैश्चापि हि सर्वलोकैः ।
देव्याः प्रसादाद्वरसंप्रलब्धो
नेनामदांत प्रतपः कृताच्च ।

इति श्रीस्कन्दपुराणे हिमवत्खण्डे गिरिराजनेमुन्योस्तपःसिद्धिर्नामोनसप्ततितमोऽध्यायः ॥६६॥

—❀❀❀—

60

स्कन्द उवाच ।

गण्डकी कौशिकी चैव तयोर्मध्ये वरस्थलं ।
नीलकण्ठतटे शौचं तयोः पुनस्तथाविधम् ॥१॥
नेपाल इति विख्यातं देवक्षेत्रं सुखप्रदं ।
ज्ञेयमगस्त्य तत्क्षेत्रं हिमवत्सानुसुन्दरम् ॥२॥
पर्वतस्य च माहात्म्यं तीर्थस्य च विशेषतः ।
श्रूयतामभिधास्यामि पुराणं पुण्यविस्तरम् ॥३॥
ब्रह्मणो वरदानेन सदारो देवपूजनात् ।
अपत्यानां शतं लेभे हिमवानचलाधिपः ॥४॥
उशीरवीजशैलेशो श्रोच्छत्रकस्तथापरः ।
उज्जयन्तश्च कासुन्दश्चित्रह्रदश्च सुह्रदः ॥५॥
केतुमान्मणिमान्गोमान्काभीरश्चैव धेनुमान् ।
सुनाभश्चक्रनाभश्च व्याघ्रवान्पुष्पकस्तथा ॥६॥
वैतरणः सुनेमिश्च श्यामाको वृषभस्तथा ।
चक्रो द्रोणश्च काकन्दः ककुदःस्कंद एव च ॥७॥
कुजश्चैव निकुंजश्च मुकुन्दः खण्डवस्तथा ।
शिवकूटः सुवेलश्च पारिपात्रस्तथापरः ॥८॥
मृगेन्द्राद्रिस्तथा श्रेष्ठो मुञ्जवानचलाधिपः ।
सिद्धाश्रमश्च दोलाद्रिः मणिधातुस्तथापरः ॥९॥
चन्द्रवान् पुण्यवांश्चैव कालाद्रिः ऋष्यवांस्तथा ।
सर्वौषधिर्विशालाद्रिः तथा चन्दनपर्वतः ॥१०॥
स्वर्गसोपानशैलेन्द्रः शक्रमार्ग इति श्रुतः ।
उशीरवीजशैलस्य दक्षिणे स विराजते ॥११॥
मध्ये सर्वगरिष्ठानामेतेषां क्षमाभृतां मुने ।
पाशुपतं महाक्षेत्रं सन्ततं प्रविराजते ॥१२॥
एतैः सार्द्धं भृशं भूयः सततं हि घटोद्भव ।
क्षेत्रं नैपालिकं पुण्यं तीर्थैर्लिङ्गैस्तथामरैः ॥१३॥
आदिलिङ्गः स्थितो यत्र कौशिक्याश्च तटोत्तमे ।
कुशेश्वर इति ख्यातस्तन्नेपालो विराजते ॥१४॥
भीमेश्वरो हि यत्रास्ते भीमसेनैः सदार्चितः ।
कौशिक्या संगमे तीरे देवतीर्थाह्वयेऽनिशं ॥१५॥
भीमतीर्थं च यत्रास्ते कौशिक्याः संगमे शुभे ।
भीमसेनश्च तत्रास्ते तन्नेपालो हि भासते ॥१६॥
काफीश्वरो महालिङ्गो गणैः सार्द्धं विराजते ।
सन्ततं चैव यत्रास्ते तन्नेपालो विराजे ॥१७॥
कश्यपेशो हि यत्रासौ विराजते हि संततं ।
महाह्रदान्तरे विप्र ऋषिभिः सेवितोऽनिशम् ॥१८॥
स्फटिकेशो हि यत्रास्ते शिलोच्चये गणैः समं ।
गन्धर्वैः पूजितो नित्यं तन्नेपालो हि राजते ॥१९॥
चंडेश्वरो महोग्रास्यश्चण्डिकायाः समंस्थितः ।
लोकवाञ्छाकरो यत्र तन्नेपालो हि भासते ॥२०॥
धनेश्वरः स्थितो यत्र चतुःषष्टीगणैः समं ।
भक्ताय वसुदः पूर्णं तन्नेपालो विराजते ॥२१॥
विकटेशो महालिङ्गः सुरलोकैः प्रसेवितः ।
रुद्रगणैः समं नित्यं यत्र विराजते भृशम् ॥२२॥
इन्द्रेश्वरो महालिंग इन्द्रेप्सितफलप्रदः ।
रुद्राण्या संस्थितो यत्र तन्नेपालो हि राजते ॥२३॥
तिलेश्वरः स्थितो यत्र प्रमथैरमरैः समं ।
गंगया च सरस्वत्या तन्नेपालो हि राजते ॥२४॥
चम्पकेशो हि यत्रास्ते सर्वदे... समं सदा ।
भक्तानां वरदो देवस्तन्नेपालो विराजते ॥२५॥
रामेश्वरः स्थितो यत्र प्रभातीर्थोत्तमोत्तमे ।
अर्चितः परमं लोकैस्तन्नेपालो विराजते ॥२६॥
नटारम्भेश्वरो यत्र गिरिकूटे समं गणैः ।
गन्धर्वैश्चाप्सरोभिश्च तन्नेपालो हि राजते ॥२७॥
कालेश्वरो हि यत्रास्ते देव्याःकालगणैः समं ।
राजते घर्घरा तीरे तन्नेपालो विराजते ॥२८॥
उद्दालके (उद्दारके) श्वरो यत्र सर्वर्षिभिश्च सेवितः ।
भक्तानां वरदो नित्यं तन्नेपालो विराजते ॥२९॥
गोपालेशःस्थितो यत्र प्रमथैश्च सुरैः समं ।

देव्या देवार्चितो नित्यं तन्नेपालो विभासते ॥३०॥
चम्पेश्वरो हि यत्रास्ते तन्नेपालो हि राजते ।
उन्मत्तेशो हि यत्रास्ते तन्नेपालो विराजते ॥३१॥
नन्दिकेश्वर आस्ते च देवसिद्धर्षिसेवितः ।
राजते सह भैरव्या तन्नेपालो हि राजते ॥३२॥
गोखुरेश्वर आस्ते वै गांवतीर्थतटेऽनिशं ।
प्रमथैः सेवितो भक्त्या तन्नेपालो हि भासते ॥३३॥
पण्डकेशो महालिंगो देवैः सिद्धैः प्रसेवितः ।
भवान्या सहितो यत्र तन्नेपालो हि भासते ॥३४॥
कुटेश्वरो महारुद्रो यत्रास्ते ऋषिभिः सह ।
राक्षसैः पूजितो नित्यं तन्नेपालोभिभासते ॥३५॥
असितेशो हि यत्रास्ते वनस्पतिसमर्चितः ।
क्ष्माभृतो गह्वरे रम्ये तन्नेपालो हि भासते ॥३६॥
भैरवेशो हि यत्रास्ते संहृत्यसकलान्वितो ।
धर्म्मधारातटे तोये तन्नेपालो हि भासते ॥३७॥
ब्रह्मेश्वरो हि यत्रास्ते देवैश्च प्रमथैः समं ।
वनस्पतिगणैर्नित्यं सेव्यते सततं मुदा ॥३८॥
(शिवपुरी) शतरुद्रेश्वरो यत्र यक्षगन्धर्वकिन्नरैः ।
सेवितो वरदस्तेषान्तन्नेपालो विराजते ॥३९॥
कार्त्तिकेयेश्वरो यत्र सुन्दर्य्यद्रिसुशेखरे ।
किरातैः सेवितो नित्यं तन्नेपालो विराजते ॥४०॥
काकेश्वरो हि यत्रास्ते भृगुतीर्थस्य कन्दरे ।
सुन्दर्य्या सहितो रुद्रस्तन्नेपालो हि भासते ॥४१॥
मणिचूडेश्वरो यत्र मणिपर्वतकोपरि ।
गन्धर्वैः सेवितो नित्यं तन्नेपालो विराजते ॥४२॥
योगेश्वरो महालिङ्गो यत्रास्ते प्रमथैः सह ।
योगिन्या योगदो नित्यं तन्नेपालो विराजते ॥४३॥
नारायणेश्वरो यत्र यक्षैः प्रसेवितोऽनिशं ।
जलान्तरस्थितो गूढस्तन्नेपालो विराजते ॥४४॥
ज्योतिर्लिङ्गेश्वरो यत्र योगतीर्थान्तिके सदा ।
देवैः प्रसेवितो नित्यं तन्नेपालो विराजते ॥४५॥
वागीश्वरो हि यत्रास्ते चित्रह्रदादधःस्थितः ।
ऋषिभिः सेवितो नित्यं तन्नेपालो विराजते ।
कीलेश्वरो महालिङ्गो यत्रास्ते प्रमथैः समं ।
गिरेस्तम्भो ह्यभूत्पूर्वं तन्नेपालो हि राजते ॥४६॥
वाल्मीकेशो हि यत्रास्ते लोकानां वरदोऽनिशं ।
वीरभद्रमहातीर्थे तन्नेपालो विराजते ॥४७॥
मङ्गलेशो हि यत्रास्ते यत्रैव विमलेश्वर ।
गणैः सार्द्धं सदाकालं तन्नेपालो विराजते ॥४८॥
अनन्तेशो हि यत्रास्ते ऋष्याश्रमान्तिके स्थितो ।
सेवितो ऋषिभिः सार्द्धं तन्नेपालो विराजते ॥४९॥
विश्वरूपेश्वरो यत्र तन्नेपालो हि भासते ।
सोमेश्वरः स्थितो यत्र तन्नेपालो विराजते ॥५०॥
गोभराटेश्वरो यत्र गुह्यकैः सेवितोऽनिशं ।
भक्तानां वरदो नित्यं तन्नेपालो विराजते ॥५१॥
भृङ्गेश्वरो हि यत्रास्ते प्रमथैश्च समं सदा ।
देवैः प्रसेवितो नित्यं तन्नेपालो विराजते ॥५२॥
त्रिलिङ्गेशो हि यत्रास्ते स रुद्राण्या गुहात्मकः ।
भक्तानां वरदो देवस्तन्नेपालो हि भासते ॥५३॥
कुपितेशो हि यत्रास्ते कात्यायन्या समं सदा ।
लोकभीतिकरोऽत्यन्तं तन्नेपालो हि भासते ॥५४॥
सर्वेश्वरो महालिङ्गो यत्रास्ते प्रमथैः सह ।
लम्बोदरेण वै गौर्य्या तन्नेपालो हि राजते ॥५५॥
गोलोकेशो महालिंगो रुद्रतीर्थतटोत्तमे ।
विराजते सदा कालं तन्नेपालो हि राजते ॥५६॥
सच्चन्दनभराटेशो भासते प्रमथैः सह ।
चन्दनाद्रिनितम्बे हि देवासुरेप्सितप्रदः ॥५७॥
यक्षेश्वरो हि यत्रास्ते यक्षलोकस्पृहाप्रदः ।
यक्षतीर्थान्तिके शश्वदूशीरबीजसानुके ॥५८॥
चंडिकेशो महालिंगः सदा चण्डिकया समं ।
यत्र विराजते देवो विष्णुपद्यास्तटे शुभे ॥५९॥
धर्म्मेश्वरो महालिङ्गो धर्म्मेणाराधितोऽनिशं ।
पाशुपते महाक्षेत्रे तन्नेपालो विराजते ॥६०॥
गोकर्णेशो महालिङ्गश्चन्द्रभागातटोत्तमे ।
राजते पितृभिर्नित्यं देवर्षिभिः प्रसेवितः ॥६१॥
कोटीश्वरो गणैः सार्द्धं रुद्रधारातटे बभौ ।
यत्र शंखस्तपस्तेपे रक्षो वर्गफलप्रदः ॥६२॥
वाणेश्वरो बभौ यत्र क्षेत्रे पाशुपतोत्तमे ।
ज्ञानेश्वरो महालिङ्गो नन्दीसारोत्तमे शुभे ॥६३॥
पाशुपते महाक्षेत्रे शैलेश्वरो विराजते ।
हिमवताऽनिशं भक्त्या मुदेप्सया प्रसेवितः ॥६४॥
अभिप्रवाहे वाग्मत्याः जीवने राजतेऽनिशं ।
जलेश्वरो महालिंगो रुद्रेण स्थापितः स्वयम् ॥६५॥
गुह्येश्वरो महालिंगः सर्व्वलोकेप्सितप्रदः ।
राजते प्रमथैः सार्धं तन्नेपालो हि राजते ॥६६॥
किरातेशो हि यत्रास्ते वाग्मत्याः पूर्वतस्तटे ।
सिद्धाचले महारण्ये तन्नेपालो विराजते ॥६७॥
ज्योतिरूपेश्वरो यत्र पशुरूपाश्रिते शिवे ।
भस्मभिर्धूलिभिः स्नातो भस्मेश्वरो विराजते ॥६८॥
धन्यं पाशुपतं क्षेत्रं राजते भुवनेश्वरः ।

यत्रास्ते प्रमथैः सार्द्धं तद्रुद्रमन्दिरेश्वरः ॥६६॥
यत्र विभासतेऽजस्रं प्रदीपे मंदिरेश्वरः।
भ्राजन्ते यत्र लिंगानि स्थापितानि च निर्ज्जरैः ॥७०॥
स्थापितानि च दिक्पालैस्तदीप्सितप्रदानि च।
नवलिङ्गानि राजन्ते स्थापितानि ग्रहैस्तथा ॥७१॥
सिद्धेश्वरमहालिङ्गं कांक्षासिद्धिफलप्रदं।
पशुपतीश्वरो यत्र ज्योतिर्लिङ्गो विराजते ॥७२॥
सुरगणैस्समं शश्वत्तन्नेपालो विराजते।
क्षेत्रं लिंगैः समायुक्तं चान्यैर्देवैश्च पीठकैः ॥७३॥
विराजते सदाकालं स्वर्गमोक्षफलप्रदम्।
धन्यं नैपालिकं क्षेत्रं लोके कामवरप्रदम् ॥७४॥
राजन्ते यत्र लिंगानि कोटीनां च प्रमाणतः।
पुण्यं नैपालिकं क्षेत्रं नानातीर्थसमाकुलम् ॥७५॥
नानापापहृताभिश्च तटिनीभिर्विराजते।
यावन्तो जीविनः सन्ति क्षेत्रे नेपालपावने ॥७६॥
सेव्या त्मानो हि तावन्तः पशवः पक्षिणोपि वा।
प्राणत्यागं करिष्यन्ति येऽज्ञानतोपि जीविनः ॥७७॥
महापद्मदले तत्र स्वर्गं यान्ति न संशयः।
धन्यं पाशुपतं क्षेत्रं महापुण्यतरं वरं ॥७८॥
साक्षात्पशुपतेर्लिंगं विराजते हि यत्र च।
ज्ञानयोगेन यो मर्त्यस्तत्र त्यजति विग्रहम् ॥७६॥
इह लोकं परित्यज्य शिवलोकं सगच्छति।
कार्त्तिके चैत्रिके वापि स्थाने स्थाने समाव्रजन् ॥८०॥
तेषु तेषु च तीर्थेषु स्नात्वा स्नात्वा सुभक्तितः।
अर्च्चयन्ति च लिङ्गानि नेपालसंभवानि च ॥८१॥
सकृदेवं कृतस्यार्घ्यं तस्य पुण्यफलं शृणु।
सर्वां हि मेदिनीं दत्वा सशैलवनकाननाम् ॥८२॥
यावन्त्यश्च क्षितौ सन्ति गावो विप्राय यत्फलं।
देवानां प्रतिमा मह्यां यावन्त्यः सन्ति दर्शनात् ॥८३॥
तावत्कोटिगुणं तत्र पूजनान्मेदिनीतले।
शतक्रत्वादियज्ञानामर्च्चनानां तथैव च ॥८४॥
यावत्सन्ति च पुण्यानि कोटिकोटीगुणानि च।
तिस्रः कोट्योर्द्धकोटीनां तीर्थानां महतां मुने ॥८५॥
यावत्सन्ति च पुण्यानि तेषां कोटिगुणानि च।
तत्फलानां सुखं धीरः प्राप्नोति च न संशयः ॥८६॥
प्रयुक्तोपि महापापैः सर्वपापानि मोचयन्।
अयुतार्कोभयानस्थः परिवारैः समन्वितः ॥८७॥
कुलकोटीं समुद्धृत्य रुद्रलोकं स गच्छति।
न पुनर्जायते योनौ मरणं नास्ति तस्य च ॥८८॥
सेवयंश्च सदा रुद्रं यावच्चन्द्ररवी वसेत्।

महोल्लासे सदानन्दे निर्विकारे महाशिवे ॥८६॥
महत्सुखं वसेत्तत्र सर्वदेव - नमस्कृते।
ये यत्र कुत्रापि च जन्तवो हि
ज्ञानैश्च धर्म्मैरपि वर्जिता वै।
नैपालिकेऽङ्गानि कुथास्त्यजन्ति,
शैवं प्रगच्छन्ति जनाः सुखं ते ॥६०॥
पिबन्ति कर्णप्रपुटैः सुभक्ताः
ये चैतदध्याय - सुधारसं वै।
आयुर्यशः कीर्त्तिमनूपमंते,
प्राप्यन्ति पुत्रं च धनं विपक्षाः ॥६१॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्यं-
नाम सप्ततिमोऽध्यायः ॥७०॥

—❀❀❀—

69

स्कन्द उवाच।

शृणु कुम्भज वक्ष्यामि क्षेत्रं महत्फलप्रदं।
देवैः प्रकांक्षितं नित्यं भुक्तिमुक्तीप्सितप्रदम् ॥१॥
मृगेन्द्रशिखरे संस्थः कूटेश्वराच्च याम्यतः।
आतिलेश्वरपर्य्यन्तं ज्ञेयं तत्कामदां क्षितिम् ॥२॥
विकटेशान्महल्लिंगात्पूर्वदेशाद्धि वारुणं।
आचन्दनभराटान्तं ज्ञेयं क्षेत्रोत्तमोत्तमम् ॥३॥
योगधारा नदी श्रेष्ठा तस्याश्चैशानतः पुनः।
आविष्णुतीर्थपर्य्यन्तं तत्क्षेत्रं मोक्षदायकम् ॥४॥
गोदावरी महातीर्थादाग्नेयाद्धि घटोद्भव।
आहरीतीर्थपर्यन्तं प्रशस्तं सर्वतो दिशम् ॥५॥
तेषां मध्ये च नेपालक्षेत्रं पाशुपतं परं।
भुक्ति-मुक्ति-सुखं भूमिः प्राप्यते तत्र जीविभिः ॥६॥
योजनाभ्यन्तरं क्षेत्रं प्रशस्तं सर्वतोदिशम्।
मूलक्षेत्रं तु विज्ञेयं रुद्रेणाराधितं सदा ॥७॥
मध्ये पशुपतिर्देवो ज्योतिर्लिङ्गो विराजते।
गुह्याख्यया समं देव्या प्रमथैर्योगिनीगणैः ॥८॥
उमामहेश्वरं क्षेत्रं प्रशस्तं सार्वकामिकं।
नेपालस्य क्षितेर्मध्ये जानीयाद्भुक्तिमुक्तिदम् ॥६॥
वज्राख्या योगिनीदेवी पशुपतिर्महेश्वरः।
तयोर्मध्ये परं ज्ञेयं योगक्षेत्रं च सिद्धिदम् ॥१०॥
यं यं कामन्ति लोकास्तं तं प्राप्नुवन्ति ह्युपासनात्।
योगाभ्यासाच्च तत्सिद्धिं लभन्ते योगिनो ध्रुवम् ॥११॥
विष्णोः पशुपतेर्मध्ये क्षेत्रं हरिहरात्मकं।
विराजेते हि तौ यत्र वृषेण गरुडेन च ॥१२॥
यत्किञ्चित्क्रियते तत्र शुभाशुभं नरैर्मुने।

तत्सर्वमक्षयं लब्ध्वा गमिष्यन्त्युर्ध्वतारकौ ॥१३॥
जायन्ते च म्रियन्ते वा क्षेत्रे पाशुपते वरे ।
ब्रह्मादिलोकभोक्तारः शिवेन सह मोदिनः ॥१४॥
धन्यं पाशुपतं क्षेत्रं भुक्तिमुक्तिप्रदं सदा ।
दिविस्था यत्र पश्यन्ति सर्वान्माहेश्वरान् गणान् ॥१५॥
तेपे विष्णुर्भृशं यत्र लक्ष्मीप्सया च शांकरे ।
अद्यान्ते लक्ष्मीवान् देवः सिद्धक्षेत्रप्रसादतः ॥१६॥
कृतानि त्रीणि कुण्डानि ब्रह्मणात्र तपस्विना ।
योगेनैव पवित्राणि लोकोद्धारणहेतुना ॥१७॥
कश्यपोऽपि तपस्तेपे शिवाराधनतत्परः ।
दक्षः प्रजापतिः श्रेष्ठो मार्कण्डेयो महामुनिः ॥१८॥
अश्वत्थामा बलिर्व्यासो हनूमाँश्च कृपस्तथा ।
रामो विभीषणो रक्षस्तेपिरे दीर्घजीविनः ॥१९॥
धन्यं पाशुपतं क्षेत्रं सर्वक्षेत्रोत्तमोत्तमम् ।
विराजते समं तीर्थैः भुक्तिमुक्त्योप्सितप्रदैः ॥२०॥
मरीचिरंगिराश्चैव प्रह्लादः पुलहः क्रतुः ।
भृगुरत्रिर्महेशानं यत्र सन्ति समर्हयन् ॥२१॥
नित्यं विराजते लिंगैस्तत्क्षेत्रमष्टमूर्त्तिभिः ।
सर्वलोकार्हणैः शश्वत्तेषां हृद्वाञ्छितप्रदम् ॥२२॥
श्लेष्मान्तकवनं यत्र विराजते सदा वरं ।
पशुपतेः प्रसादाद्धि नागकलेवरोद्भवम् ॥२३॥
गोपदं राजते यत्र नित्यं सिद्धगणैः समम् ।
निरञ्जनस्य दत्तस्य योगसिद्धबलप्रदम् ॥२४॥
यत्र विनायकोऽजस्रं क्षेत्रपालस्तथापरः ।
समासते भृशं तौ हि देव्याः क्षेत्रं प्ररक्षयन् ॥२५॥
यत्राऽसौ राजते देवी योगिनी कोटिकोटिभिः ।
गुह्याख्या सर्वकाले वै सिद्धदेवैः प्रसेविता ॥२६॥
ब्राह्मी स्थिता सदा यत्र कोटिगणैश्च संवृता ।
गुह्येश्वर्य्यान्तिके शश्वत्तत्क्षेत्रं प्रविराजते ॥२७॥
माहेश्वरी स्थिता यत्र योगिनी कोटिसेविता ।
तदन्तिके सदाकालं तत्क्षेत्रं शुशुभे भृशम् ॥२८॥
कौमारी संस्थिता यत्र योगिनी कोटिसंस्थिता (सेविता)
देव्याःस्थाने सदाकालं तत्क्षेत्रं हि विराजते ॥२९॥
वाराही संस्थिता यत्र गणकोटीषु संवृता ।
देव्याः सदान्तिके भव्ये तत्क्षेत्रं हि प्रभासते ॥३०॥
नारसिंही स्थिता यत्र गणकोटिसमावृते ।
सुविदूरे सदा देव्यास्तत्क्षेत्रं किल भासते ॥३१॥
शिवदूतीस्थिता यत्र गणकोटि-प्रसेविता ।
समीपे सततं देव्यास्तत्क्षेत्रमभिभासते ॥३२॥
एवं दशदिशो देव्याः स्थानं रक्षन्ति सर्वदा ।
स्वस्वंवाहनमारूढाः कोटिकोटिगणैर्वृताः ॥३३॥
याम्ये द्वारे स्थिता देव्या विराजन्ते त्वहर्निशं ।
पशुपतेर्गणैःसार्धं तत्क्षेत्रं रक्षयन्सदा ॥३४॥
सिद्धो गणपतिर्यत्र द्वारदेशे विराजते ।
परिवारैः समं नित्यं तद्द्वारं रक्षयन्सदा ॥३५॥
क्षेत्रपालोऽमरो नित्यं तत्क्षेत्रं रक्षयन्सदा ।
मनोवाञ्छाकरो नृणां सदाकालं विराजते ॥३६॥
यत्रैव वत्सला देवी विराजते गणैः समं ।
भुक्तिमुक्तिप्रदा नित्यं सत्या वक्षस्थलोद्भवा ॥३७॥
यत्र च मङ्गला देवी राजते मङ्गलप्रदा ।
भक्तेभ्यो मङ्गलं नित्यं पाशुपते विराजते ॥३८॥
राजराजेश्वरी देवी सर्ववाञ्छाफलप्रदा ।
सगणा संस्थिता यत्र पाशुपते हि राजते(भासते)॥३९॥
कुण्डो विराजते यत्र भविष्यासूचकः सदा ।
तज्जले जन्मिने नृणां प्रतिबिम्बप्रदर्शनात् ॥४०॥
ब्रह्मणानिर्मितः पूर्वं नृणां ज्ञानप्रबुद्धये ।
भविष्यं प्रेक्ष्य धीमन्तो यतिष्यन्त्यङ्गमुक्तये ॥४१॥
चन्द्रः पितामहो यत्र सर्वभूतदयापरः ।
सर्वध्यानरतो नित्यं पाशुपते विराजते ॥४२॥
भैरवः स विरूपाक्षः सर्वगणैः समं सदा ।
यत्र विराजतेऽजस्रं तत्क्षेत्रं रक्षयन्मुदा ॥४३॥
अनन्तो राजते यत्र परिवारैः समं सदा ।
तत्क्षेत्रं रक्षयन्भक्त्या सर्वलोकप्रवन्दितः ॥४४॥
पश्चिमे द्वारि रुद्रस्य विराजन्ते हि देवताः ।
रक्षयंश्चैव तत्क्षेत्रं परिवारैः समं सदा ॥४५॥
लम्बोदरो महादेवः क्षेत्रमध्ये विराजते ।
तत्क्षेत्रं रक्षयन्भक्त्या सर्वलोकोपकारकः ॥४६॥
दण्डपाणिः सदा यत्र तिष्ठति रक्षयन्मुदा ।
द्वारं पाशुपतं तद्वै अप्रतिमेन राजते ॥४७॥
वरुणोऽसौ गणैः सार्द्धं सततं प्रविराजते ।
तत्क्षेत्रं रक्षयन्देवः सर्व्वभूतदयापरः ॥४८॥
यत्र वागीश्वरी देवी राजते स्वगणैः समं ।
वरदाभूत्सतीनां सा भक्तेभ्यो वाक्प्रदायिनी ॥४९॥
नारायणो महादेवः सर्वलोकवरप्रदः ।
यत्र विराजतेऽजस्रं मुदा क्षेत्रं प्रपालयन् ॥५०॥
तथा चैवोत्तरे द्वारे रक्षका देवताः सदा ।
विराजन्ते गणैःसार्द्धं तत्क्षेत्रं रक्षयन्मुहुः ॥५१॥
एकदन्तो गणेशानो लोकवन्द्यो वरप्रदः ।
शुशुभे सततं यत्र तद्द्वारं पालयन्स्थितः ॥५२॥
नन्दिकेशो महावीरः सर्वलब्धवरोत्तमः ।

राजते चोत्तरे द्वारि तत्क्षेत्रं रक्षयन्स्थितः ॥५३॥
पौलस्त्यश्च महात्माऽसौ गुह्यकै सह राजते ।
तत्क्षेत्रं पालयन्नित्यं हरपादार्च्चने रतः ॥५४॥
निधिप्रपालितोऽजस्रं धनाधिपो हि शूलिनः ।
विराजते गदाहस्तः सर्वद्वेषी प्रतर्जयन् ॥५५॥
यत्रैव विजयादेवी विराजते हि सन्ततम् ।
योगिनीभिः समं क्षेत्रे भक्तवाञ्छाफलप्रदा ॥५६॥
सिद्धदेहाः समासन्ते शिवपादार्च्चने रताः ।
योगाभ्याससमायुक्ताः पाशुपते विराजते ॥५७॥
यत्र प्रपालिता दिक्षु दिग्पालाश्च हरात्मकाः ।
विराजन्ते हि तत्क्षेत्रं स्वर्गमोक्षफलप्रदं ॥५८॥
शक्रो वह्निः कृतांतश्च नैर्ऋतो वरुणोऽनिलः ।
कुबेरश्चैवमीशानस्तद्रक्षयन्पृथक् स्थिताः ॥५६॥
पशुपतेश्चतुर्दिक्षु संस्थिताः यत्र भैरवाः ।
शक्त्यायुक्ता गणैः सार्धं राजमानाः वरप्रदाः ॥६०॥
उन्मत्तश्चासितांगश्च रूरूःकालः क्रमात्ततः ।
संहारकस्तथाक्रोध आनन्दश्चण्ड एव च ॥६१॥
ग्रहाश्च संस्थितास्तत्र पाशुपतं प्ररक्षयन् ।
पशुपतेर्वरं लब्ध्वा तस्य पादार्च्चने रताः ॥६२॥
यत्र च नागराजोऽसौ वासुकिर्नाम विश्रुतः ।
हरात्मा राजतेऽजस्रं शिवप्रियतमः सखा ॥६३॥
यमाद्यं प्रणमन्भक्त्या पशुपेशं प्रदर्शयेत् ।
ततः सुफलभुग्यात्री शांकरे भासतेऽनिशं ॥६४॥
पुण्यं पाशुपतं क्षेत्रं देवानां निलयो भवेत् ।
सुराणां नगरीभूता काममोक्षफलप्रदा ॥६५॥
धर्म्मोहि रक्षयन् नित्यं पुरीं पाशुपतीं मुने ।
क्षयं यान्ति च पापानि यस्यां रुद्रप्रसादतः ॥६६॥
पाशुप ी पुरी धन्या यस्यां विराजते हरः ।
प्रमथैः शक्तिभिर्देवैः समं पुण्यतरा पुरी ॥६७॥
ते ोर ्री पुरी भद्रा जाम्बूनदमयी क्षितिः ।
धन्या पाशुपती शुभ्रा योजनैकं विराजते ॥६८॥
हिमवतो महासानौ नगरी सा विराजते ।
धर्मार्थकाममोक्षाणि तत्रस्थानां ददाति या ॥६६॥
महापद्मैकपत्रे सा राजते मेरुकर्णिके ।
सहस्रदलके तस्यां कर्णिके च शिवः स्थितः ॥७०॥
माहेश्वरी पुरी धन्या योजनैकं विराजते ।
माहेश्वरी पुरी धन्यांयोजनैकप्रस (शं) सिता ॥७१॥
लिंगमयी मही सर्वा निर्वाणदा विराजते ।
पुरी माहेश्वरी साक्षात्सर्वदा सर्वदा मुने ॥७२॥
देवासुरमनुष्येभ्यो भक्तेभ्यो नगरी भवेत् ।
तेजोमयी पुरी साक्षादुमा माहेश्वरी परा ॥७३॥
त्रैलोक्यदुर्लभा पुण्या दिविस्थैः कांक्षिता सदा ।

तेजोमयं पट्टनमीश्वरस्य
तन्मध्यसंस्थो गिरिशो हि साक्षात् ।
विराजतेऽजः सुरनायकोऽसौ
परात्परं निर्गुणमीश्वरो वै ॥७४॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे पाशुपतक्षेत्रमाहात्म्यं नामैकसप्ततितमोऽध्यायः ॥७१॥

स्कन्द उवाच ।

धन्या सा नगरी पुण्या यस्यां विराजतेऽनिशम् ।
पशुपतिर्गणैः सार्द्धं ज्योतिर्लिङ्गो महाविभुः ॥ १ ॥
धन्या पुण्यतरा ज्ञेया पुरी पाशुपती मुने ।
द्विसप्तभुवनेष्वेषा भवेच्छ्रेष्ठा सुदुर्ल्लभा ॥ २ ॥
जम्बूद्वीपे पुरी द्वेच रुद्रेणाधिष्ठितेऽनिशं ।
काशी पाशुपती साक्षात्समासते सुरालये ॥ ३ ॥
काश्याश्चतुर्गुणं मान्या पुरी पाशुपती यतः ।
धर्मार्थकाममोक्षाणि यस्यां प्रलभ्यते किल ॥ ४ ॥
मोक्षमेकं तु काश्यां वै लभ्यन्ते जन्तुभिः सदा ।
उमामाहेश्वरीपुर्य्यां चतुर्वर्गं घटोद्भव ॥ ५ ॥
तस्मात्काश्या गरिष्ठा स्यात्पाशुपती पुरी वरा ।
प्रलभ्यन्ते यतो लोकैश्चतुर्वर्गान् ध्रुवं किल ॥ ६ ॥
देव्याःस्थानोद्भवं लिङ्गं तेजोमयं चतुर्मुखं ।
तस्मादुत्तरकाशीति हिमवद्दक्षिणे यतः ॥ ७ ॥
गंगाया उत्तरे भागे हिमवत्सानुगह्वरे ।
रुद्रप्रियतमं तीर्त्रं नगरं राजतेऽनिशम् ॥ ८ ॥
नमुंचति क्षणं चापि शंकरो नगरीमिमां ।
तस्मादुत्तरकाशीति उत्तरपुण्यभूगता ॥ ६ ॥
उद्गतातिशयेनैव उत्तरेण च सन्ततं ।
काशी ताभिःप्रदीप्ता सोत्तरकाशीति विश्रुता ॥१०॥
गौरीश्वरो बलिध्वंसी तरलो वासुकिर्विधिः ।
अनन्तो भ्राजते तेषां शयनस्थानमाश्रयम् ॥११॥
रुद्रप्रियतमा तीर्त्रं नमस्कारात्सुमुक्तिदा ।
तस्मादुत्तरकाशीति विश्रुता लोकदुर्लभा ॥१२॥
दिविस्था यत्र पश्यन्ति सर्वान्माहेश्वरान् गणान् ।
यावन्तोमानुषाः सन्ति स्त्रीभिःपाशुपते समम् ॥१३॥
स्वच्छन्दं विचरन्त्यार्य्याः तस्यान्ते किल निर्भरं ।
दिविस्थास्तान्प्रपश्यन्ति त्रिनेत्र इव निर्भयम् ॥१४॥
धन्यतमाश्च तत्रस्था नरा रुद्रपुरौकसः ।
चतुर्वर्गफलैर्युक्ताः पापनिलिप्तदेहिनः ॥१५॥
दिविस्थास्ताँश्च पश्यन्ति त्रिनेत्रिणश्च शूलिनः ।

वृषध्वजान् जटाशीर्षान्तद्गणांश्चन्द्रमौलिनः ॥१६॥
दिविस्था यत्र वाञ्छन्ति चतुर्वर्गफलाप्तये ।
त्रिदिवाधिकृते राज्ये स्थातुं रुद्रेण वै समम् ॥१७॥
कोटिजन्मार्जितात्पुण्यादन्यक्षेत्रेषु मानुषैः ।
पुरी पाशुपती पुण्या लभ्यते मोक्षदा ध्रुवम् ॥१८॥
कृमि-कीट-पतङ्गाश्च वृक्षाश्च पशवस्तथा ।
तेपि प्राप्स्यन्ति निर्वाणं धीमतो किमु वच्म्यहम् ॥१९॥
अन्त्यजोऽपि भवेद्विप्रस्तत्र देहान्तरे मुनिः ।
चतुर्वर्गफलं प्राप्य गच्छति स परंपदम् ॥२०॥
दुर्लभं मानुषं देहं संप्राप्य यो हि मूढधीः ।
नगच्छति च तद्राज्यं दुःखदग्धः स एव हि ॥२१॥
तस्यां च ये न पश्यन्ति ज्योतिर्लिङ्गं परात्परं ।
वाग्मत्यां स्नपयन्भक्तया पशुजा दुःखभाजनाः ॥२२॥
पशुपतिं न पश्यन्ति सुकृतैर्वञ्चिताश्च ये ।
पशुयोन्युद्भवा नित्यं भ्रमन्ति च महीतले ॥२३॥
यद्यसामर्थ्य मर्त्यानां दूरस्थानां विशेषतः ।
गन्तुं तद्दर्शितुं तत्र अनुष्ठेयं विधिं शृणु ॥२४॥
यस्यां विराजते देवी पशुपतिर्गणैः सह ।
वाग्मती निम्नगाभिश्च पाशुपत्यै नमो नमः ॥२५॥
इति भक्त्या नरो यो हि यत्र तत्र स्थितोपि वा ।
नित्यं ब्रूयान्मुदा भक्त्या तत्रागतफलं लभेत् ॥२६॥
नेपाल इति यो ब्रूयाज्ज्ञानतोऽज्ञानतो ऽपि वा ।
नित्यकृतैनसा मुक्तस्तत्रैव जायते पुनः ॥२७॥
तत्र पंचत्वमापन्नः सर्वपापैर्विवर्जितः ।
पशुपतेः प्रसादात्स शिवलोकं व्रजेत्सुखं ॥२८॥
जिह्वाग्रे वर्त्तते यस्य शांकरं चतुरक्षरम् ।
पुरी पाशुपतीं चेति सहि पापैर्विवर्जितः ॥२९॥
जिह्वाग्रे चेति यस्यास्ते पशुपतिर्विकिल्विषः ।
यत्र कुत्र स्थितो वापि समुक्तो नात्र संशयः ॥३०॥
पशुपतिरिति पाठो योत्रूयाद्भक्त भक्तिमान् (भक्तितः)।
क्रोधान्मोहाद्भयादम्भात्स मुक्तो लीलयाऽपिवा ॥३१॥
भये विपदि रोगार्त्ते संग्रामे संकटे च यः ।
पशुपतिरिति ब्रूयात्तेषु रक्षति तं शिवः ॥३२॥
सकृदपि नमन्गत्वा तत्पुरे पश्यति प्रभुम् ।
पशुपतिं मुदा भक्त्या तस्य पुण्यफलं शृणु ॥३३॥
सर्वेषां चैव यज्ञानां सर्वतीर्थोद्भवं फलं ।
सर्वयागार्जितं पुण्यं सर्वदा नोपवासजम् ॥३४॥
तत्फलं प्राप्तवान् धन्यो विमुखः पशुयोनिषु ।
अर्कायुतनिभयानस्थः कुलसप्त समुद्धतः ॥३५॥
चतुर्वर्गफलं प्राप्य शिवलोकं स गच्छति ।
महाश्चर्य्यं महासौख्यं सर्वलोकैः सुदुर्ल्लभम् ॥३६॥
तत्रैव पञ्चरात्रं यः स्थित्वा पंचोपचारकैः ।
तद्भक्त्या पशुभर्त्तारं पूजयेद्वाग्मती जलैः ॥३७॥
शिवमनुज्ञ आर्य्योऽसौ तन्मन्त्रं प्रजपेत्सुधीः ।
ध्यायतस्तन्मनस्को वै जितेन्द्रियो हि सात्विकः ॥३८॥
इहैव पुनरावृत्तिं विहाय सर्वविग्रहान् ।
गच्छति परमं स्थानं देवासुरैः सुदुर्ल्लभम् ॥३९॥
तन्मनुज्ञः सुधीर्भक्त्या गुह्येश्वरीं समर्च्चयन् ।
सकृज्जपति तत्रैव तस्य पुण्यफलं शृणु ॥४०॥
सर्वदा नोपवासानां यज्ञानां योगिनां च यत् ।
सर्वेषां चैव तीर्थानां कोटिकोटिगुणं फलम् ॥४१॥
तत्फलं नृवरो लब्ध्वा लीयतेऽन्ते च तत्र वै ।
ज्योतिर्मये शिवाकारे वाग्मनोभिरगोचरे ॥४२॥
यो मृतो यत्रकुत्रापि क्षेत्रे पाशुपते नरः ।
विधूय सर्वपापानि शिवलोकं स गच्छति ॥४३॥
पातकैरपि संयुक्तो ज्ञानैर्हीनोऽपि वा पुनः ।
किं वच्मि ज्ञानसंयुक्तो मृतः प्राप्नोति यत्फलम् ॥४४॥
क्षेत्रे पाशुपते यो हि सकृच्छ्राद्धं करोति च ।
विंशतिः कुलमुद्धृत्य शिवलोकं प्रगच्छति ॥४५॥
आर्या तीर्थान्तिके यो वै पिंडं ददाति शांकरे ।
कुलकोटिं समुद्धृत्य रुद्रलोकं व्रजेत्सुखम् ॥४६॥
वाग्मत्याः सलिलं योहि घटेनोद्धृत्य शंकरं ।
स्नापयेत्स्कन्धवाहेन तस्य पुण्यफलं शृणु ॥४७॥
यावत्तदम्भसां विन्दुस्तावत्कालं समैककम् ।
(कोटिपितॄन्)कुलकोटींसमुधृत्य रुद्रलोके प्रमोदते ॥४८॥
योभोजयेद् द्विजान्स्तत्र शिवमुद्दिश्य भक्तितः ।
क्षितौ सर्व्वसुखं भुत्वा शिवलोकं प्रगच्छति ॥४९॥
यत्किंचिद्दीयते दानं कामेन परमार्थतः ।
तत्सर्वमक्षयं लब्ध्वा तत्ताल्लोकं प्रगच्छति ॥५०॥
पुरी पाशुपती धन्या चतुर्वर्गफलप्रदा ।
ज्योतिरूपंमहालिङ्गं यथाग्नौ तप्तकांचनम् ॥५१॥
पुरी पाशुपती दिव्या विद्योतते ह्यहर्निशं ।
सूर्य्येणैव जगत्सर्वं ज्योतिर्लिङ्गस्य तेजसा ॥५२॥
अव्यक्तं परमं लिंगं प्रकाशते ह्यहर्निशं ।
जाम्बूनदमये देशे स्वर्णदीपे शिखा यथा ॥५३॥
योगीनां मानसे नित्यं ज्योतिःशिखा विराजते ।
दीपशिखाकृतिं तां च योगिभिरेव दृश्यते ॥५४॥
धन्यास्त एव मर्त्याश्च दृष्टः पशुपतिश्च यैः ।
साक्षाद्विराजमानोऽसौ ज्योतिः पुंजो हृदिवच ॥५५॥
मेदिनीहृदये साक्षाद्विराजते हि सन्ततं ।

तेजसां पुंजलिंगोऽद्यः सर्वलोकैरगोचरम् ॥५६॥
धन्या नैपालिका मर्त्यास्तद्रूपं गोचरं विभुं ।
पश्यन्ति येऽपि देवानां साक्षात्पुनरगोचरम् ॥५७॥
यः पश्यत्यनिशं गत्वा पाशुपतिं च तत्र वै ।
नरोऽसौ भक्तिभावात्मा जीवन्मुक्तो न संशयः ॥५८॥
अयोध्या मथुरा माया काशी काञ्ची ह्यवन्तिका ।
पुरी द्वारावती सप्त गरिष्ठा मोक्षदायकाः ॥५९॥
तासां चैव गरिष्ठा स्यात्पुण्या पाशुपती पुरी ।
यस्यां विराजते लिङ्गो वाग्मत्या सह सन्ततम् ॥६०॥
सत्ये काशीपुरी ज्ञेया द्वापरेऽवंतिका तथा ।
त्रेतायुगे तथा माया अयोध्या चैव मोक्षदाः ॥६१॥
गरिष्ठा हि कलौप्राप्ते द्वारिका मथुरापुरे ।
युगेयुगे गरिष्ठास्ताः स्वर्गमोक्षफलप्रदाः ॥६२॥
तासां मध्ये महापुण्या चतुर्वर्गफलप्रदा ।
सर्वयुगे तथा ज्ञेया श्रेष्ठा पाशुपती पुरी ॥६३॥
कृते सत्यवती ज्ञेया त्रेतायां च तपोवती ।
द्वापरे मुक्ति-सोपाना कलौ नेपालिकापुरी ॥६४॥
यस्याःप्राच्यामधोभागे शिवगंगा ववाह सा ।
सर्वासां सरितां* श्रेष्ठाः सर्वकामफलप्रदा* ॥६५॥
नास्ति चोत्तरकाश्यन्या समा स्वर्गे रसातले ।
चतुर्वर्गप्रदा नित्या भूगताप्यमरालया ॥६६॥
यः शृणोति च माहात्म्यं पाशुपत्याः सुभक्तितः ।
सर्वैनोभिर्विनिर्मुक्तः शिवलोकं प्रगच्छति ॥६७॥

विराजते शैवलिनी सुपुण्या,
महत्तङ्गैः किल वाग्मती सा ।
सुरासुरैः पंचजनैश्च नित्यं
प्रसेविताया: कलुषः प्रहन्त्री ॥६८॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे पशुपतीपुरीमाहात्म्यं नाम द्विसप्ततीतमोऽध्यायः ॥७२॥

—❀❀❀—

अगस्त्य उवाच ।

निशम्य भूमन्स्तव वक्त्रपुष्करे
प्रनिःसृता नुपमभारतीं शुभां ।
तपोऽमरावास-सुधाप्रसंशनं
विनोदयामो हिमशैलहेतुकम् ॥ १ ॥
मुक्तो नरः को वद शंकरात्मन्
क्षेत्रे हि नेपालमहत्तरार्य्ये ।
भर्तुःपशूनामधिराज्यपुण्ये
निर्वाणबीजेऽसुहृदुद्भवानाम् ॥ २ ॥

लोमहर्षण उवाच ।

यद्वदतिस्म सेनानी भक्तिने घटयोनये ।
मत्तः शृणुत तत्सर्वं वक्ष्यमाणं शुभोदितम् ॥ ३ ॥

स्कन्द उवाच ।

आसीत्पूर्वे महाराजो देवीदास इति श्रुतः ।
उत्कलाख्येपुरीदिव्ये दानधर्म्मार्चने रतः ॥ ४ ॥
संत्यज्य तृणवद्राज्यं स्थापयित्वात्र सूनुकं ।
कश्चिद्यतिं समालम्ब्य हिमवद्भूधरं ययौ ॥ ५ ॥
ब्रह्मपुत्रजलाश्राव्य तेपे नीलाचले वसन् ।
भक्त्या संपूज्य कामाख्यां निर्जनोऽहर्निशंजपी ॥६ ॥
द्वादशाब्दं तपस्वी स सिद्धदेहो निरापदः ।
ददर्श स्नातकं तत्र पूजयन्तं महेश्वरीम् ॥ ७ ॥
प्रणम्य शिरसा दान्तं जैगीषव्यं च योगिनं ।
कुशलं प्रच्छमानोसौ प्रोवाच नृपतिं द्विजः ॥ ८ ॥

जैगीषव्य उवाच ।

राजंस्ते शृणु वक्ष्यामि यत्ते श्रवणमागतं ।
तीर्थराजेऽनिशं स्नात्वा ब्रह्मलोकं व्रजाम्यहम् ॥ ९ ॥
प्रणम्य द्रुहिणं विष्णुं सम्पश्यन्सप्तलोककं ।
तद्वृत्तान्तं समाहृत्य स्वगृहे बुभुजेऽशनम् ॥१०॥
जपन्तं परमं चास्मिन् सेव्यमानं सनातनैः ।
एवमेव महाराज एतद्धर्मं सनातनम् ॥११॥

राजोवाच ।

साधु ब्रह्मन् महाप्राज्ञ ईदृक्ते तपसः फलं ।
अहो ह्यत्यद्भुतं कर्म ईदृग्धर्म्मं तपस्विनः ॥१२॥
भाग्यं समद्यैवयतोमहन्मे प्रत्यक्षधातेक्षणगोचरो यत् ।
आभाषणेनाप्रतिमेनसार्द्धं दिष्टंत्रमःकिं सदतःपरंच १३

जैगीषव्य उवाच ।

मामैव तात वक्तव्यं भवता धीमता कदा ।
योगीश्वरो हि साक्षात्त्वं देवीपुत्रः शिवात्मकः ॥१४॥
दिव्यचक्षुषि ते दत्ते जगदम्बिकयार्य्यया ।
विद्धि राजन्नृतं देव्याः सिद्धमंत्रकलेवरः ॥१५॥
अयं योगीश्वरो विद्धि यतिरूपेण ते गुरुः ।
मन्वन्तराणि सर्वाणि जीवतिस्म निरन्तरम् ॥१६॥
केरलेशो महाराजस्तपस्वी त्वादृशो महान् ।
नेपालेऽसौ महाक्षेत्रे पशुपतिः समर्च्चितः ॥१७॥
एकादश समा यावत् समाराधितवान् हरं ।
तस्माच्छैवी तनोः सिद्धः क्षेत्रप्रसादतः ॥१८॥

योगीश उवाच ।

राजन् योगीश्वरो वर्णी विष्णुभक्तोमहातपाः ।
सहस्राणि युगं जीवी दौलाद्रौ पूजितो हरिः ॥१९॥
तस्माल्लब्धवरो दान्तो योगीश्वरोऽच्युतात्मकः ।
यदुक्तं धीरवीरेण तत्सर्वं तथ्यसंभवम् ॥२०॥

राजोवाच ।

सिद्धक्षेत्रं महापीठं यत्रास्ते पशुपेश्वरः ।
नेपालाख्यं हि मां तत्र सिद्धयोगीश नीयताम् ॥२१॥
मनः प्रोज्जृम्भते मे च तत्क्षेत्रं दर्शितुं प्रभो ।
क्षेत्रं माहेश्वरं पुण्यं कामसिद्धिप्रदं परम् ॥२२॥

स्कन्द उवाच ।

आकर्ण्य वचनं सद्यो योगीश्वरो हि योगिनः ।
प्रणम्य शिरसा देवीं गन्तुमप्रार्थयन्मुदा ॥२३॥
योगिनः प्रययुस्तूर्णं नीलाचलात्प्रदर्शितुं ।
सिद्धक्षेत्रं क्षणाद्व्योम्नः प्राप्तवन्तो मणिह्रदम् ॥२४॥
दद्दृशुर्योगिनः क्षेत्रं सर्वविष्णुमयं जगत् ।
लिंगमयं धराशैलं व्याप्तं देव्याः कलेवरैः ॥२५॥
प्रणेमुर्दण्डवत्क्षेत्रं पाशुपतं हि योगिनः ।
तुष्टुवुः प्रेक्ष्य संभक्त्या यद्यदृष्टं च भाषतः ॥२६॥

योगिन ऊचुः ।

विष्णोऽच्युत हरे शौरे रुद्रस्थाणो भवेश्वर ।
दुर्गे गौरि शिवे कालि नमोऽस्तु तेऽभिपाहि माम् ।२७।
सर्वैर्नःप्रहणोपेन्द्र पापमृत्युहरेश्वर ।
मृत्यूद्भवहरे देवि नमोऽस्तु ते नमोनमः ॥२८॥
नमः स्थित्युद्भवेशाय नमः संसारहारिणे ।
सृष्टिस्थितिविनाशिन्यै इच्छाशक्त्यै नमोऽस्तुते ॥२९॥
मनोरूपाय कृष्णाय बुद्धिरूपाय शूलिने ।
सर्वाण्यै ज्ञानरूपिण्यै नमोनमोऽस्तु तेऽनिशम् ॥३०॥
जगद्व्याप्त्यात्मनेऽजाय लिंगव्याप्तजगात्मने ।
जगद्व्याप्तस्वरूपाय नतोऽस्मि तेऽनिशं नमः ॥३१॥
पराय पद्मनाभाय परमेशाय शंभवे ।
परापरप्रतीतायै प्रणमामि नतोऽस्म्यहम् ॥३२॥
विष्णवेऽनन्तरूपाय रुद्राय वहुमूर्त्तये ।
आर्य्यायै वहुरूपायै वाग्धृदंगैर्नमोनमः ॥३३॥
शंखचक्र - गदापद्मैः शूलादिभिस्तथायुधैः ।
खड्गचर्म्मांकुशैश्चान्यैर्विषमे पातु मां शिवे ॥३४॥
यो न्र याद्भक्तितः स्तोत्रं पुरतः सततं बुधः ।
हरे देव्याः सदाशंभोः सर्वपापैर्विवर्जितः ॥३५॥
रक्षन्ति देवतास्तं वै विपत्तौ विषमेऽशुभे ।
ग्रहभूतपिशाचार्त्तं अन्ते ब्रह्मपदं व्रजेत् ॥३६॥

जैगीषव्य उवाच ।

पश्य राजन्महायोगिन् विष्णुमयमिदं जगत् ।
नेपालं यद्धरेःक्षेत्रं व्याप्तं विष्णुकलेवरैः ॥३७॥

योगीश उवाच ।

पश्य पाशुपतं क्षेत्रं तल्लिंगैः परिपूरितं ।
न पश्याम्यार्य ताताऽन्यं केवलं तन्मयं जगत् ॥३८॥

राजोवाच ।

पश्य योगीश्वराः क्षेत्रं व्याप्तं देव्याः स्वविग्रहैः ।
केवलं योगिनी-वृन्दैराच्छादितं धराचलम् ॥३९॥

स्कन्द उवाच ।

एवं संभाषणे कूटे मिथो मुनीशयोगिनां ।
वायुस्तत्र समागत्य अब्रवीत्कर्णं तर्पयन् ॥४०॥

वायुरुवाच ।

वज्राख्यां योगिनीं वन्द्यां संगत्य विमलेश्वरं ।
विमलाम्बुजलास्नाव्य तं समर्चयतां सुताः ॥४१॥
एतत्सर्वं ततः शैलात्प्रदर्शिष्यन्ति योगिनः ।
हरप्रियां समभ्यर्च्य पशुभर्त्तारमर्च्चय ॥४२॥

स्कन्द उवाच ।

भर्त्तुर्वाक्यामृतं पीत्वा जग्मुर्यत्र तमीश्वरः ।
पौषकृष्णनवम्यां ते स्नात्वेशमर्च्चयन्मुदा ॥४३॥
दद्दृशुर्योगिनः क्षेत्रं सर्वं विष्णुमयं मुने ।
शंखचक्रगदापद्म - स्वायुधाम्वर - भूषणैः ॥४४॥
विभूषितान्हरीन् व्याप्तान् रसाशैलतले वहून् ।
क्वचिद्भक्तैर्मुदा विष्णुं पूजितमर्हणैर्ध्रुवम् ॥४५॥
तेभ्यः प्रवरदं कंचिल्लक्ष्म्या समं मुदाश्रितं ।
दद्दृशुर्योगिनः कंचित्स्तूयमानं सुरासुरैः ॥४६॥
स्वायुधैर्भूषयन्भक्तान् याने प्रस्थापयन्परं ।
दद्दृशुर्योगिनः क्षेत्रे सायुज्यपदवीं हरेः ॥४७॥
आयुधैर्भूषणैः सर्वैः प्राप्तान्विभूषितान्नरान् ।
सायुज्यपदवीं केचिद्दृशुस्ते हरेस्तनौ ॥४८॥
विविशुः सहसा भक्तान् ज्योतिस्तेजसि तद्यथा ।
तत्क्षणे दद्दृशुः क्षेत्रं लिंगमयं रसाचलम् ॥४९॥
शैवैः प्रपूजितान् रुद्रान् भक्त्या पंचोपचारकैः ।
क्वचिद्रुद्रावतारान्ते भक्तेभ्यो वरदान्हरान् ॥५०॥
आयुधालंकृतान्धूर्णान्दद्दृशुर्भक्तवत्सलान् ।
क्वचित्प्रस्थापयं तं ते यानैर्भक्तान्स्वपत्तनम् ॥५१॥
व्योम्नो विभूषयंताद्धि अक्षैरायुधभूषणैः ।
सदृशां दद्दृशुः केचित्स्वभक्तान् शूलिनो हि ते ॥५२॥
त्र्यक्षैर्जटायुधैर्वाहैर्विभूषितांश्चैव योगिनः ।
विविशुर्भक्तिनां रुद्रे तेजास्यसून्विमोचने ॥५३॥
दद्दृशुस्तद्धि सायुज्यं तथैवं योगिनः पुनः ।
अपश्यन् योगिनः क्षेत्रे पाशुपतेर्धराधराम् ॥५४॥
दुर्गामयीं पुनः सर्वा भूषणायुधभूषिताः ।
सायुज्यपदवीं भक्तान् प्रापयन्निहितान् हितान् ॥५५॥
खड्गचर्म्मांकुशैःपाशैर्भूषिता भक्तवत्सला ।

दद्दशुर्योगिनः केचित् महिषासुरघातिनीम् ॥५६॥
दुर्गाख्यमसुरं संख्ये घातयन्तीं वरोद्धतम्।
प्रचण्डाख्यं महादैत्यमन्धकासुरमेव च ॥५७॥
त्रिकूटाख्यं महादैत्यं निशुम्भं शुम्भमेव च।
अपश्यन्दीर्घकीर्तिञ्च येन त्रिलोकं कंपितम् ॥५८॥
घातयन्तीं त्रिशूलेन कांचितखड्गेन संगरे।
घातिनीं सर्वतो दैत्यान् शंखपद्मान् हि संख्यया ॥५६॥
ब्रह्मेश लब्धकामांस्तान् तद्बलोद्धतकोपन।
ननृतुर्योगिनी वृन्दाः सर्वायुधविभूषिताः ॥६०॥
खादन्मांसानसृक् पीत्वा असिप्रहारदेहिनां।
अपश्यन्योगिनश्चैव हतानामिति देहतः ॥६१॥
तेजांसि विविशुर्देव्यां दीपे दीपशिखा इव।
चित्रात्मान इति प्रेक्ष्य अभूवन्योगिनस्तदा ॥६२॥
प्रचक्रिरे स्वकं स्थानं क्षेत्रं प्रणम्य तन्मयं।
निवेदितुं हि तद्वार्त्ताः द्वीपेभ्यो ब्रह्मणे मुने ॥६३॥
योगिभ्यो योगिनस्तस्माद्गन्तुमुत्पेतुराशु ते।
तदैवाशक्नुवन्तस्ते प्रोच्चलितुं हि योगिनः ॥६४॥
चित्रात्मानो हि सस्मेरुर्जगत्प्राणं च तत्क्षणे।
सदात्मा जगतां वायुरब्रवीत् कर्णतर्पयन् ॥६५॥
अप्रणम्य गता यूयं रत्नमयीं च नेमुर्नि।
ततो विघ्नान्विता देहाः शक्तिविवर्जिता हि वः ।६६।
तान्तं प्रणम्य योगीशा गच्छन्तु पशुपेश्वरम्।
विघ्नेशं प्रणमन्नादौ क्षेत्रपालं गणान्पृथक् ॥६७॥
प्रणम्य वासुकिं प्रार्थ्य परं विघ्नविनाशनम्।
शृङ्गोदके वरे स्नात्वा पशुभर्त्तारमर्च्चय ॥६८॥
मङ्गलां वत्सलां गौरीं गुह्याख्यां च महेश्वरीं।
आकर्ण्य वचनं वायोस्तथात्मानो हि योगिनः ॥६६॥
प्रययुः सहसा सिद्धा यत्र वज्रेश्वरीगिरिः।
भक्त्या नेमुर्महेशानीमादिशक्तिं च दण्डवत् ॥७०॥
परिक्रमन्मुदा सिद्धा प्रतुष्टुवुर्मुहुर्मुहुः।

योगिन ऊचुः।

ॐमातर्देवि नमस्तुभ्यं जगद्वन्द्यहरिप्रिये ॥७१॥
त्रैलोक्यमोहिनीशानि सर्व्वदुष्कृतनाशिनि।
परापरममात्रायै ब्रह्मरूपिणि ते नमः ॥७२॥
सृष्टिस्थितिविनाशानां स्वात्मेच्छाहेतुभूतिनि।
स्तुत्वैवं योगिनीवक्त्राद्दशुस्तद्गिरिं वरम् ॥७३॥
वज्रमयं सुवर्णाढ्यं सप्तर्षि नेमुर्नि ततः।
चित्रात्मानो गणान्सिद्धान्प्रणमन्स्थगतायनाः ॥७४॥
सत्कृत्य नेमुर्निः सिद्धान् प्रोवाच गिरिसानुनि।

सिद्धर्षिरुवाच।

नतिरस्तूभयेशश्चा योगिनः कुशलं हि वः ॥७५॥
एते हि योगिनः सिद्धाः सप्तर्षयस्तपस्विनः।

योगिन ऊचुः।

नमो वो ब्रह्मपुत्रेभ्यः सिद्धर्षये नमोनमः ॥७६॥
वयमत्रागता द्रष्टुं तवक्षेत्रं परात्परं।
त्वत्प्रसादात्पराभेनाभाग्यात्प्रदर्शिताधुना ॥७७॥
कथं च पशुपं गुह्यां दर्शिष्यामो वद प्रभो।

स्कन्द उवाच

ओमिति च प्रतिश्रुत्य सिद्धर्षिः सहसा मुने ॥७८॥
आदिशक्तिं प्रणम्याग्र्यामगमद्योगिभिः समम्।
परिभ्रम्य स्वकं क्षेत्रं तीर्थाम्बुस्पर्शयंश्च तान् ॥७६॥
वन्दयन्तानि लिंगानि माहेश्वरं ययौ ततः।
स्पर्शयन् शृंगतीर्थाणं मृगांशं भृंगिनं ततः ॥८०॥
नमयन्तिस्म तद्राज्ये गणं क्षेत्रं च नन्दिनं।
धर्म्मं च द्वारपालं च वासुकिंच पितामहम् ॥८१॥
भुवनेशीं शिवां दुर्गां गुह्येश्वरीं हरप्रियां।
क्रमशो नमयन्सिद्धान् सिद्धाँश्चान्याँश्च देवताः ॥८२॥
पशूनां चैव भर्त्तारं क्रमशोवन्दयत्किल।
परिक्रम्य मुदा भक्त्या देवं त्रिभुवनेश्वरम् ॥८३॥
क्षेव्याय क्षेव्यमानाय क्षेव्यतोपाय ते नमः।
देववन्द्याय रुद्राय देवानां पतये नमः ॥८४॥
ताररूपाय रुद्राय ताराय शेखराय ते।
त्राणाय जगतां दुःखात्तारणाय नमोनमः ॥८५॥
घोराय घोररूपाय घोरोद्भवविनाशिने।
ईशानायेश्वरायाज ईशित्वाय नमोनमः ॥८६॥
वन्देऽहं जगतां धाम जगज्जृम्भनहेतुकं।
जगतामालयं भूमन् जगज्जीवं जगद्गुरुम् ॥८७॥

स्कन्द उवाच।

एवं स्तुत्वा शिवं भक्त्या परिक्रम्य हि योगिनः।
मेनिरे तत्क्षणात्सिद्धाः कृतार्थिताः स्वविग्रहाः ॥८८॥
उषित्वैकां निशान्तत्र पाशुपतेऽब्रवीद्विजः।
सिद्धर्षये द्विजेशाय भक्त्या प्रणम्य गौरवात् ॥८६॥

जैगीषव्य उवाच।

तात सनातनं धर्मं नैव त्याज्यं मनागपि।
ब्रह्मलोकं हरेर्लोकं नित्यं गन्तव्यमर्हति ॥६०॥
सप्तद्वीपान्तथा चास्य कामाख्यां नृपते पुनः।
अनुज्ञामृतवर्षाद्यैः प्रसिंच्य तां च नोऽधुना ॥६१॥
येन प्रेक्षामहे लोकान्सेव्यमानं निरन्तरं।
भवत्प्रसादतस्तात सिद्धदेवैःप्रपूजितम् ॥६२॥

प्रदृष्टं मोक्षदं क्षेत्रमशून्यं तिलमानतः ।

सिद्धर्षिरुवाच ।

अलं वो गमनं तात तेषु शून्यपरेषु च ॥९३॥
मोचयित्वा भविष्यन्ति इदं गर्वमयं त्यजन् ।
पश्य विप्रेश गोकर्णं यत्र तेपे दशाननः ॥९४॥
पश्य गरुड़लिङ्गं च यत्र मोक्षं प्रदर्शनात् ।
योगीश पश्य मत्क्षेत्रं दक्षावर्त्तेन चाभ्रमन् ॥९५॥
पश्य राजन्पुरः पीठं यत्र वाञ्छा प्रलभ्यते ।

स्कन्द उवाच ।

निशम्य वचनं तस्य ययौ हरिगिरिं द्विजः ॥९६॥
गरुडध्वजमद्राक्षीत् विष्णुलोकं च तन्मयं ।
सेवितं विष्णुभक्तैस्तं विष्णुलांछनलाञ्छितैः ॥९७॥
यावद्गुणानि तल्लोके अपश्यत्संति तानि सः ।
अब्धिजया सरस्वत्या जयेन विजयेन च ॥९८॥
राजमानं समं विष्णुं ददर्श वज्रपीठके ।
प्रणम्य विधिवद्भक्त्या विष्णुलोकाचलं हरिम् ॥९९॥
ययौ गोकर्णदेवेशं ब्रह्मा तताप यत्र सः ।
अद्राक्षीद्ब्रह्मलोकं स ब्रह्मभक्तैः प्रपू(रि)जितम् ।१००।
सावित्र्या तत्र गायत्र्या राजमानं विधिं समं ।
सन्ति गुणानि यावन्ति ब्रह्मलोके च तानि तत् ।१०१।
तावत्सर्व्वं च सोऽद्राक्षीत् निर्विशेषं मनागपि ।
भक्त्या प्रणम्य धातारं प्रत्याययौ हराश्रमम् ॥१०२॥
परिभ्रम्य स तत्क्षेत्रं सप्तद्वीपानि सागरान् ।
अद्राक्षीत्तत्क्षणात्सिद्धः सर्व्वलोकं समंततः ॥१०३॥
यावत्सन्ति पदार्थानि द्वीपेष्वब्धिषु सप्तसु ।
सोऽपश्यत्तानि तत्क्षेत्रं क्रमशो हिमवत्ततः ॥१०४॥
वाग्मती रत्नधारा च वृद्धगंगा च शृङ्गजा ।
प्रभावतीन्द्रमार्गाख्या विष्णुपदी तथाब्धयः ॥१०५॥
अन्तरेषु च तासां स [illegible]द्वीपानि कुम्भज ।
अद्राक्षीद्द्वीपसिन्धून्वै प्रत्यागमच्छिवाश्रमम् ॥१०६॥
अपश्यन्नृपतिस्तत्र पीठे कामेश्वरीं शिवां ।
सिद्धयोगिगणैर्देवै राजमानां समन्ततः ॥१०७॥
चतुःषष्टिगणैस्सार्द्धं योगिनीनां समन्ततः ।
राजमानमहापीठे अद्राक्षीत्स नृपेश्वरः ॥१०८॥
ब्रह्माच्युतेश्वरेन्द्राणां चूडामणिमरीचिभिः ।
रंजितपादपद्मांसंस्तुतिजप्योपहारकैः ॥१०९॥
सिद्धान्समाधिनः केचिद्योगिनः खेचराः स्त्रियः ।
तत्र ददर्श राजेन्द्रः कामाख्यां मणिमन्दिरे ॥११०॥
मुमुक्षूणां च तेजांसि दाक्षायिण्यग्नितेजसि ।
सोऽपश्यद्विविशुस्तत्र ज्वालाग्नौ शलभा इव ॥१११॥
एवं प्रेक्ष्य महाक्षेत्रं योगिनः सिद्धविग्रहाः ।
पाशुपतं महद्राज्यं ददृशुस्तत्क्षणात्स्थलान् ॥११२॥
पश्यंतिस्म पुरीं दिव्यां वज्रस्वर्णमयीं पराम् ।
देवर्षीन्योगिनः सिद्धान्कोटिकोटि तपस्विनः ॥११३॥
अर्हयन्तिस्म गुह्याख्यां प्रमथान्योगिनीगणान् ।
तुष्टुवुर्गिरिजां भक्त्या प्रणामदण्डवद्भिते ॥११४॥

योगिन ऊचुः ।

ॐ भवब्रह्मवन्द्यां भवोद्भूतनन्दां,
भवेशादिभिः पूजितां भव्यरूपां ।
स्वकीयप्रभाभिर्लसद्भिन्नदेहां,
भवेशां भवानीं सुभद्रां भजेऽहम् ॥११५॥
महाकालरात्रि-स्वरूपां कृशाङ्गीं,
सुगुह्याख्यकृष्णां करालाभवक्त्रां,
प्रकाश्या (म्या) भकालीं कुमाराम्बिकार्य्यां,
भजे भद्रकालीमकारादिरूपाम् ॥११६॥
मृडानीमपर्णां चिदानन्दरूपां,
शिवामीश्वरीं चण्डिकां मोहरात्रिं ।
सुनन्दां जयंतीं शवालं कृतांगीम्,
त्रयीधर्मरूपां भजे सिंहवाहाम् ॥११७॥
महेशप्रियां पार्वतीं गुह्यकालीं,
मणिभ्राजमाने सुपीठे निषण्णां ।
मनःकामदोग्ध्रीं सुरैः सेव्यमानां,
कुमारीं प्रवन्द्यां भजे ज्ञानरूपाम् ॥११८॥
विधात्रीं प्रसन्नां प्रचण्डां सुकेशीं,
जगत्सारजन्मां जनिस्वान्तसंस्थां ।
जगज्जीवरूपां जगज्जन्यकर्त्रीम् (धात्रीम्),
जटाजूटशुभ्रां भजे प्राणरूपाम् ॥११९॥
तपःस्थां रजःस्थामुमां सत्वसंस्थां,
प्रचण्डांशुकोटिप्रभाकालरूपां ।
कलादित्त्रयान्तं युगस्थां त्वमेकां,
त्रिलोकान्तकाले भजे सत्वरूपाम् ॥१२०॥
लसद्योगिचित्तारविन्दाभिरामां,
लसच्चित्रभोग्यां महायोगिवन्द्यां ।
रवीन्द्वाश्रयामाभिरामाक्षिभव्यां,
भजे सर्ववर्षैर्मनोज्ञां सुवीणां ॥१२१॥
नदीसिन्धुसंस्थां सुवीणां महोग्रां,
भजेऽहं चितिस्थां शिवारावरावां ।

हर प्राणरामां सुरैर्ध्यायमानां,
विभूतिं प्रचण्डां सुरप्राणदात्रीम् ॥१२२॥
निषण्णां जनानामुरः पुंडरीके,
सदा ध्यायमानां विवेकोपलब्धैः।
वदन्ति स्वचिन्तां विवेकात्मनस्त्वां,
तवाम्बेह मायांशगोपात्मनस्ते ॥१२३॥
सुरार्ग्यस्नपानश्रवद्रक्तजिह्वा,
श्रुतेरङ्गरूपा त्वमेव श्रुतिस्त्वं।
त्वमेवेश्वरी त्वं हि लज्जा च वाणी,
त्वमाद्यामनाद्यां भजेहम्भजेहम् ॥१२४॥
पठद्भक्तियुक्तः शिवाग्रे शिवात्मा,
सदा धर्मकामान्मनोवाञ्छितार्थं।
प्रभुत्वं च मुक्तिं जयं सर्वसिद्धिं,
लभेन्नात्र कार्यो विचारोहि धीरैः ॥१२५॥

स्कन्द उवाच।

स्तुत्वा परिक्रमन्सिद्धा ईश्वरीं हरवल्लभां।
प्रोवाच तत्र राजासौ भक्तिनम्राननौ हि तौ ॥१२६॥
अतः परं परं स्थानं भुवनेषु न विद्यते।
लोकानां परमं श्रेष्ठं क्षेत्रं कामदुघं शिवम् ॥१२७॥

राजोवाच।

नैव त्याज्यमिदं क्षेत्रं वाङ्मनोविग्रहैः सदा।
सर्वदेवमयं पुण्यं देवानामालयं शुभम् ॥१२८॥

योगीश उवाच।

सत्यं प्रोक्तमिदं राज्ञा योगिनात्र द्विजार्हण।
ममैव हृदये चास्ति वाञ्छे स्थानमत्र वै ॥१२९॥
क्षुद्रोऽयं मतिमच्छ्रेष्ठ अवश्यं च विपद्यते।
तृणजीवेन हर्षात्मा कथमत्र त्यजेद्वद ॥१३०॥

जैगीषव्य उवाच।

एवमेव हि योगीशौ मद्धृदि वर्त्तते च यत्।
भवद्भ्यां वर्णितं यन्नः तत्सर्वं हृदयंगमम् ॥१३१॥
सेविष्यामो महेशानमार्य्यया सह संततं।
सर्वदेवमयं रूपं सर्वलोकैः प्रसेवितम् ॥१३२॥
सर्वलोकात्परं स्थानं सर्वलोकतपोमयं।
यत्रैव पशुपो विष्णुः गुह्येश्वरी पितामहः ॥१३३॥
यत्र ववाह गंगासौ ब्रह्मसरस्वती शिवा।
वाग्मती मोक्षदा देवी कथं त्याज्यमिदं परं ॥१३४॥
स्वं स्वं लोकं परित्यज्य सुरैर्ब्रह्मपुरोगमैः।
अवास्यत तपःस्थाने पशुभर्त्तारमर्हयन् ॥१३५॥
अत्र तप्त्वा लभेत्कामं भूतिनिर्वाणमेव च।
सिद्धक्षेत्रं कथं त्याज्यं सर्वलोकशिरोमणिम् ॥१३६॥
क्षेत्रे माहेश्वरे दिव्ये सर्वलोकतपोमये।
पितरौ जगतां सिद्धौ स्थास्यामः सेवयन्सदा ॥१३७॥

स्कन्द उवाच।

एवं विमृश्य योगीशा अवात्सुस्तत्र शांकरे।
मनोजवाःशिवात्मानो योगाभ्यासं निरन्तरम् ॥१३८॥
पाशुपतेन नास्त्यन्यं समं क्षेत्रं रसातले।
क्षेत्रं तपोमयं सर्व्वं सत्यं सत्यं वदाम्यहम् ॥१३९॥
भक्त्या च शृण्वन्त्यनिशं पवित्र-
मध्यायमेतद्धृदयैकचित्ताः।
पुत्रं सुकीर्तिं धनधान्यमायुः,
प्राप्यन्ति पापानि विहाय नाकम् ॥१४०॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालक्षेत्रमाहात्म्यं नाम त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥

—❀❀—

अगस्त्य उवाच।

देवेश सर्वविन्मे च श्रुत्वा मनो विजृम्भते।
पाशुपत्याश्च माहात्म्यं त्वत्तोऽधुना महदद्भुतम् ॥१॥
कथं देवः समुद्भूतः पशुभर्त्ता महेश्वरः।
कुतो बीजान्महालिङ्गं कदाकाले चमूपते ॥२॥
ज्योतिर्मयं महाचित्रं कथं स्थावरतां गतं।
तथैव नगरी चापि वदैतन्मे षडानन ॥३॥

स्कन्द उवाच।

आसीदेकार्णवे घोरे सर्वसत्वविवर्जिते।
निःशेषेण पुरा तत्र मेदिनी सा जलाप्लुता ॥४॥
नष्टे च तारके देवे सूर्य्यचन्द्रे तथापरे।
अंधीभूते रसार्णे च द्वौ देवौ च व्यवस्थितौ ॥५॥
अवशिष्टौ घटोद्भूत नारायण–पितामहौ।
तन्माया—मोहितौ देवौ तमोगुण—प्रधानगौ ॥६॥
एकदादिवसे देवौ प्रवादं चक्रतुर्मिथः।
जलक्रीडास्थिते तत्र सून्ये सत्वे जलाप्लुते ॥७॥

ब्रह्मोवाच।

मत्तो जानीहि भो विष्णो जगत्सर्वं समुद्भवं।
नान्यो जगत्पतिर्देव ऋतं मां जगतीह कः ॥८॥

को देवो मां विना कर्त्ता को भोक्ता कः पतिर्वद ।
को दाता पालकः स्रष्टा कः पिता कः पितामहः ॥९॥
अहं तु जगतां कर्त्ता हर्त्ता च पालकस्तथा ।
अहमेव विभुर्ज्ञेयो वाञ्छाप्रदश्च नापरः ॥१०॥
ये ये पर्य्युपिता देवा मया ते वासवा हरे ।
जीवन्ति के विना मात्रा देहिनो मद्विभूतयः ॥११॥
सर्वभूतगुहास्थोऽहं सर्वेन्द्रियविजृम्भकः ।
ब्रह्मानन्दोऽहमाद्योऽजः सर्वमनः श्रितोऽनिशम् ॥१२॥

विष्णुरुवाच ।

सर्व-कर्त्ता ह्यहं धातः सर्वलोकपितामहः ।
सर्वभूतेष्वहंरूढः सर्वरूपो निरंजनः ॥१३॥
विन्ध्याद्रिभुरहं ब्रह्मन्देव देव-स्वरूपकः ।
सत्वप्रधानदेहोऽहं सर्वसत्वदयाकरः ॥१४॥
नित्योऽहं निर्विकारोऽहं सूक्ष्मः स्थूलोऽहमच्युतः ।
सर्वदानन्दरूपोऽहं विश्वानन्दः सदीश्वरः ॥१५॥
मयैव सकलं जातं मय्येवान्ते प्रलीयते ।
मयैव पाल्यते ते वै तद्ब्रह्मास्म्यहमद्वयः ॥१६॥
विश्वरूपोऽहमाद्योऽहं मत्तोऽन्यः को वदामरः ।
लीयन्ते मयि सर्वेऽन्ते तं मां जानीहि विष्टपः ॥१७॥

स्कन्द उवाच ।

एवमभूत्पुरात्यन्तं विवादो मरयोर्मुने ।
अन्योन्यं वदतोऽजस्रं रजस्तमोगुणान्धयोः ॥१८॥
तदा महाविभुस्तत्र जलरूपो जगत्पतिः ।
स्वकीयाङ्केऽनिशं क्रीड्यवक्तारौ तौ ददर्श च ॥१९॥
अहङ्कर्त्ताहङ्कर्त्तेति मत्तो नान्यो जगत्पतिः ।
एवं मिथो वदन्तौ द्वौ गुणाभ्यां संप्लुतौ भृशम् ॥२०॥
तयोर्दर्पापहाराय प्रबोधार्थं सदेवयोः ।
जगतां रक्षणायाद्यः संभवितुं मनोदधे ॥२१॥
दिव्यायुतसमान्ते च वाच्यमाने तयोरिति ।
कर्त्ताऽसौ जगतां धाम सर्वरूपो ह्यजीजनत् ॥२२॥
एवं च क्रोशयोर्मध्ये विवाद-परयोर्मिथः ।
तदाऽभवत्कनीयांसं लिङ्गं तैजसमैश्वरम् ॥२३॥
आमूलाद्ब्रह्मपर्य्यन्तं विसतन्तुतनीयसं ।
तैजसं परमं सूक्ष्मं विद्युदिव सुचंचलम् ॥२४॥
अव्यक्तं परमं लिङ्गं ज्योतिःपुञ्जं परात्परम् ।
सूक्ष्मरूपं महादीर्घं अनादिर्लिङ्गमैश्वरम् ॥२५॥
ददृशातुश्च तल्लिंगं तौ विद्युदिव चंचलम् ।
मध्ये व्यवस्थितं तत्र तं स्वकीयान्तरे परम् ॥२६॥
तेजः पुञ्जं महादीर्घं संववर्द्ध भृशं क्रमात् ।
योजनायत-विस्तीर्णं बहुयोजनमुच्छ्रितम् ॥२७॥
ज्वलमानं स्वतेजोभिरव्यक्तं तेजसां परं ।
विराजते तमोगेहे यथा दीपशिखा भृशं ॥२८॥
तत्तेजोभिः प्रदग्धाङ्गौ दूरं दुद्रुवतुर्भृशम् ।
तत्तेजो सह्यमानौ तौ तमोप्रेक्ष्य प्रकर्द्धनम् ॥२९॥
तत्तेजो सह्यमानांगौ शंकाभिः पूरितौ सुरौ ।
दुद्रुवतुर्हितस्त्यक्त्वा योजनं हि तमःप्लुते ॥३०॥
अव्यक्तं चैव तल्लिङ्गं इति चिन्ताकुलौ सुरौ ।
तदा चाव्यक्तरूपो हि प्रेक्ष्य मायापरिप्लुतौ ॥३१॥
प्रबोधनाय तौ देवः अन्तरिक्षादुवाच च ।

ज्योतिरूप उवाच ।

त्वया ब्रह्मन्नृतं प्रोक्तं रजोगुणसमाश्रितः ॥३२॥
ब्रह्मशब्दस्त्वमेवाजः सर्वलोकपितामहः ।
स्रष्टा त्वमसि सर्वेषां त्वत्तोऽन्यो नास्ति हेतुकः ॥३३॥
सर्वेषां हि प्रभुर्नस्त्वं स्रष्टाजजीविनोन्यतः ।
मा त्वयैवं च वक्तव्यमभिमानेन बालिश ॥३४॥
विष्णो त्वयापि सत्योक्तं पालकोऽहमिति ध्रुवं ।
अस्मद्वरं समासाद्य पासि लोकं च सर्वशः ॥३५॥
सर्वकर्त्ता भवो नान्यो भवान् वीजं प्रभुस्तथा ।
मैवं प्रजल्पसे विष्णुर्वालगर्वपरिप्लुत ।
ब्रह्मन् विष्णो भवेतां हि भवन्तौ गर्व्वसंप्लुतौ ॥३६॥
योऽभिमानाश्रितो लोके भवेद्धास्याय सर्व्वतः ।
स्वल्पशक्ति समासाद्य अपारं पारमिच्छति ॥३७॥
स एवमिह हास्यःस्यात् लोकविडम्बको भवेत् ।
ब्रह्मन् विष्णोऽत्र सत्योक्तौ भवन्तावधुनेति च ॥३८॥
अहंकर्त्तेत्यहंकर्त्ता नान्यो जगति मे परः ।
भवद्भ्यामत्र रक्षन्तां तेजःपुंजं पुरःस्थितम् ॥३९॥
तदन्तिकं समागत्य चिन्त्यतां किमिति ध्रुवं ।
भवन्तौ यदि कर्त्तारौ जगतामपि सर्वशः ॥४०॥
एतत्स्तंभस्य मूलाग्रं व्रजेतां परमा शुभा ।
यो गमिष्यति चैतस्य पारमूर्ध्वमधोपि वा ॥४१॥
कर्त्तासि एव लोकानां नात्र कार्य्यं च वल्गणम् ।
व्रजन्त्वयैवमेतस्य ऊर्ध्वमधोपि वा युवाम् ॥४२॥
प्रत्यागत्यात्र चोच्येतां यथा दृष्टं नृतं तथा ।

स्कन्द उवाच ।

विरराम स इत्युक्त्वा लीनोलक्षस्तथाम्बरे ॥४३॥
तन्निवृत्ते सति व्योम यथा प्रकृति संस्थितम् ।
ततस्तस्मिन्निवृत्ते च समाकर्ण्य हि तद्वचः ॥४४॥
ब्रह्मविष्णु तदा तूष्णीमेवमेवं च संस्थितौ ।
अपश्यतां दिशः सर्व्वा अधऊर्ध्वं तथा जलम् ॥४५॥
कोऽसौ वदति वा व्योम्न इतिकृत्त्वामरौ ध्रुवं ।

इति चिन्तापरौ देवौ बभूवतुस्तदा भृशम् ॥४६॥
कोऽसावस्मिंश्च निःशेषे अशरीरो वदत्यज ।
किं कर्त्तव्यमिहावाभ्यामृतमुक्तं हि ते नमः ॥४७॥
अशरीरेण यत्प्रोक्तं तत्प्रमाणं न संशयः ।
एवं विचारयन्तौ तौ अशरीरवचो मुने ॥४८॥
विष्णू पितामहौ तत्थं संस्थितौ विमलेऽम्भसि ।
तौ ज्ञानवन्तावितिति चात्मनाजौ,—
अस्मत्परः कोऽपि च वर्त्ततेऽजः ।
कृत्वा च तथ्यं अशरीरवाग्वै,
गन्तुं हि वाञ्छां किल चक्रतुस्तम् ॥४९॥

इति श्री स्कन्दपुराणे हिमवत्खण्डे पशुपतिमाहात्म्ये लिंगोत्पत्तिर्नाम चतुःसप्ततितमोऽध्यायः ॥७४॥

—❀❀❀—

स्कन्द उवाच ।

एवं विमृष्य तौ देवौ आराधितुं च जग्मतुः ।
तत्समीपे ततो ब्रह्मा व्याचष्टे हरये पुनः ॥१॥

ब्रह्मोवाच ।

विष्णो त्वं गच्छ पातालं तन्मूलं पश्य तत्र च ।
ऊर्ध्वं व्रजामि तत्कोटिं पश्य यत्र च विद्यते ॥२॥
अशरीरेण चात्रैव नः प्रोक्तं हि यथाविधं ।
तथा च कथयिष्यावस्तद्वृत्तान्तमृतं यथा ॥३॥

स्कन्द उवाच ।

समाकर्ण्य ततो विष्णुर्ब्रह्मणो वचनं शुभं ।
अगमत्खलु पातालं तन्मूलं हि प्रदर्शितुम् ॥४॥
ब्रह्मापि चागमत्तस्मादूर्ध्वं हि सप्तलोककं ।
गवां लोकं तदूर्ध्वं च अदर्शत्सुरभीं शुभाम् ॥५॥
ददर्श कामधेनुस्तं ब्रह्माणं तत्र चागतं ।
सप्तलोकं समुत्तीर्य कृच्छ्रं परिश्रमायुतम् ॥६॥
प्रणम्य चार्चिवन्तं सा ब्रह्माणं लोककारणं ।
विष्टरे चोपवेश्यादौ पप्रच्छ कुशलं तदा ॥७॥

सुरभिरुवाच ।

स्वागतं भो महाब्रह्मन् सर्वलोकपितामह ।
अहोभाग्यं मयैवाद्य प्राप्तं वो दर्शनं यतः ॥८॥
कुशलं सप्तलोकेषु अस्ति सर्वेषु विश्वसृक् ।
शरीरेषु च देवानां भवतां च विशेषतः ॥९॥
अत्र चागमनं कार्य्यं प्रष्टुमिच्छामि सांप्रतं ।
श्रीमतामागते कार्य्यं प्रभोऽयमविचारतः ॥१०॥
भूर्भुवःस्वेषु वृत्तान्तं भवान् ज्ञाता न संशयः ।
तेषु यद्विद्यते ब्रह्मन् कथ्यतां सर्वविद्विभो ॥११॥

ब्रह्मोवाच ।

कुशलमस्ति सर्वेषु शरीरेषु चानोऽनिशं ।
शून्यभूते यथा स्वर्गे अवशिष्टाविमे तनू ॥१२॥
ममागमनकार्य्यं च कामधेनोः शृणु ध्रुवं ।
यतः समागतश्चात्र तत्कारणं वदामि ते ॥१३॥
अम्भसाच्छादिते चास्मिन् एकार्णवे रसातले ।
मन्वन्तरे युगस्यान्ते कलिशेषेऽभवत्पुनः ॥१४॥
विष्णुना सह संवादं कृतम्मया मिथः सति ।
नो मध्येचाभवत्पूज्यंसुदीर्घं तेजसामयम् ॥१५॥
प्रद्येयं संस्थिता वावां अशरीरेण बोधितौ ।
विष्णुर्गतश्च पातालमत्रागतस्तथाह्यहम् ॥१६॥
मूलाग्रं दर्शितं कामं नान्यकामञ्च विद्धि नः ।
एतस्य सति दृष्टं न कथं पश्यामि तद्वद ॥१७॥

कामधेनुरुवाच ।

इदं तु शिवलिङ्गं वै कथं न ज्ञायते विभो ।
तन्मूलाग्रं हि वेत्तु तत् समर्थः कोपि विद्यते ॥१८॥
अनादिलिंगमाद्येशं शाश्वतं सुरनायकं ।
कोपि न विद्यते वेत्ता ममापि नन्वगोचरम् ॥१९॥
सूक्ष्मलिङ्गोपरि क्षीरं प्रस्रवामि च नित्यशः ।
एतस्य स्थूललिंगस्य प्रस्रवितुं न शक्यते ॥२०॥
एतस्योपरि पुष्पाणि पुष्पोपरि ह्यहं सदा ।
प्रस्रवाम्यपि कः क्षीरं नमे उपरिविद्यते ॥२१॥
लिङ्गस्य कोऽस्यधोभागे पाशुपताश्रमद्भुतं ।
भ्रमंति कोटिशः संख्या स्तद्गन्तुं कस्य गोचरः ॥२२॥
रेणुरेकोपि तत्राज यद्यपि खलु गच्छति ।
तदस्त्रो हि भृशं ब्रह्मन् विभेत्ति च सहस्रधा ॥२३॥
तदस्त्रसकलीभूतस्तद्रेणु व्योम्नि सांप्रतं ।
विलीयते समुद्धूय गन्तुं शक्यश्च तत्र कः ॥२४॥
बन्धूकः केतकी ब्रह्मन् उवाचातिप्रियाणि च ।
रुद्रस्यैतानि जानन्ति वृत्तान्तं कोटिशानि तत् ॥२५॥

ब्रह्मोवाच ।

सत्यमुक्तं त्वया देवि कामधेनो न सशयः ।
अनृतं वचनं लोके न वदसि कदापि च ॥२६॥
किंपृच्छते सूत तेषु तद्वृत्तान्तं मुहुर्मुहुः
यदुक्तं भवता चात्र तदेव सत्यमेवच ॥२७॥
ईषत्कार्य्यं भवद्भिर्म्मे कर्त्तव्यं हेतुतः सति ।
बन्धूक केतकि श्रीमज्जवे व्रजन्मया सह ॥२८॥
ब्रह्मणावगतं सर्वं लिंगकोटिं न संशयः ।
तत्कोटिशैः समस्माभिर्दृष्टं तत्र हरे विधिः ॥२९॥

सम्बोद्धव्यो हरिश्चैवं भवद्भिस्तत्र संव्रजन्।
अधुनैवं प्रगन्तव्यं भवद्भिश्च मया समम् ॥३०॥

कामधेनुरुवाच।

यथा रुद्रस्तथा विष्णुर्यथा विष्णुस्तथा विधिः।
एकमूर्त्तिस्त्रयो देवा ब्रह्मविष्णुमहेश्वराः ॥३१॥
अधः क्षिप्रं व्रजन् विष्णो लिंगान्तिकं विशेषतः।
तात कथं च वक्तव्यं अनृतं वचनं हि नः ॥३२॥
नानृतात्पातकं लोके महत्तरं हि विद्यते।
पातकात्पतनं यावदर्केन्दुसागरा रसा ॥३३॥
अनृतात्पितरश्चाधः पतन्ति त्रिदिवादपि।
तीर्थे क्षेत्रे सभायाञ्च धर्मदाने महत्सु च ॥३४॥
नानृताच्च महत्पापं स्वात्मा वेत्ति यथा चरं।
यो बोधयत्येवमात्मानं तदेव वंचयत्यज ॥३५॥
द्यौर्भूर्ज्जगत्प्राणः अर्केन्द्वग्निर्विभावरी।
सन्ध्ये चेतो मनस्थस्तदंशाः जानन्ति देवताः ॥३६॥
जीविनां हृदये यत्तत्कृत्याकृत्यं शुभाशुभं।
जानन्ति व्यक्तमव्यक्तं तद्गोप्तव्यं कथं भवेत् ॥३७॥

ब्रह्मोवाच।

मा शंकैवं च कर्त्तव्या सत्यानृतं वरं महत्।
गोविप्रान्स भयार्त्तानां रक्षणे शरणागते ॥३८॥
गुरूणां वचनाच्चापि नानृतात्किल पातकं।
अर्हणीयो क्षवे रक्षो नानृतात्पातकं लभेत् ॥३९॥

स्कन्द उवाच।

इत्याकर्ण्य वचो धातुः पुष्पाणि सुरभी तदा।
स्वीकारं तानि चक्रुर्वै सापि चैवं तथाविधम् ॥४०॥
अवतत्तु च गोलोकाद्यत्र वादः पुराऽभवत्।
ब्रह्मणा सहसा तानि ययौ हिमाद्रिसानुनि ॥४१॥
विष्णुरपि ततो गत्त्वा समुत्तीर्य्य च पट्टलं।
महातलस्य शेषे च ददर्शानन्तपन्नगम् ॥४२॥
आरक्तविग्रहं शुभ्रं शंखाब्जकृतलाञ्छनं।
सुन्दरास्यं महाभोगमीषत्प्रहसिताननम् ॥४३॥
सहस्रवदनन्दिव्यमयुताहिर्गलैर्वृतं।
मणिभी राजमानाङ्गं मणिमयन्गृहोत्तमे ॥४४॥
पूजयन्तं महालिङ्गं तेजपुञ्जं महोत्सवैः।
स्वात्मानं हि महानन्तं महातलं दधानकम् ॥४५॥
सोपि सत्कृत्य तं विष्णुं प्रणत्यात्मसुभावतः।
जानन्नपि तदेकाङ्गं तत्रागतं हरिं मुने।
संपूज्य विधिवद्भक्त्या उपवेश्य समासने।
व्याजहार शुभं वाक्यं स्मिताननो नमन्मुदा ॥४६॥

अनन्त उवाच।

भो भूमन्स्वागतं विष्णो लोकानां सर्वजीविनां।
कुशलमस्ति वो देहे विश्वराज दयाकर ॥४७॥
अत्रचागमने कार्यं वक्तव्यमधुना विभो।
न मे भवान्भवच्चाहं न भेदोस्त्यावयोर्विभो ॥४८॥
एकांशोऽहं सहस्राणां भूमन्ते पुरुषस्य च।
गोचरतां गतो भूमन् चक्षुषोरप्यगोचरः ॥४९॥
महद्भाग्यं परं मेऽद्य किंविधेयमतःपरं।
विष्णवे व्याप्तदेवाय सर्वभूतदयाय च।
योगेश्वराय योगाय प्रणतोऽस्मि नमो नमः ॥५०॥

विष्णुरुवाच।

स्वागतं वै मया चात्र अनन्तनागराट्भुवः।
जलेनाच्छादिता भूमिः सर्व्वलोकैर्विवर्ज्जितः ॥५१॥
अत्रा गमन-कार्य्यं मे शृण्वनन्तोरगेश्वर।
तेजस्तम्भस्य मूलं हि द्रष्टुकाम इहागतः ॥५२॥

नागराज उवाच।

जानन्नपि महाविष्णो प्राकृततां कथं गतः।
नस्तम्भोऽयं विभुस्त्वञ्च तेजोलिङ्गो महेश्वरः ॥५३॥
एतल्लिङ्गस्य मूलं यः कः प्रभुर्वेत्ति विद्यते।
अनादिरिह देवोसौ प्रभो भूतगुणाशयः ॥५४॥
एतल्लिगस्य मूलं हि कोटिनागाः प्रवेष्टयन्।
प्रतिष्ठन्ति महाकायाः सर्वलोकभयप्रदाः ॥५५॥
य एकस्यापि तस्याहे नन्वेकोच्छ्वासकैः सकृत्।
दशयोजनदूरस्थो उद्धूयन्ति च जीविनः ॥५६॥
एतल्लिङ्गस्य मूलं वै को गच्छति विभो वद।
विनाशायात्मनो विष्णो विना चाङ्गं हि कोपरः ॥५७॥
यतः समागतो विष्णो तत्रैव प्रतिगम्यताम्।
जानन्स्वयं शिवात्मापि मायारमिच्छसीश्वरम् ॥५८॥

स्कन्द उवाच।

इत्याकर्ण्य वचो विष्णुरनन्तस्य मुखाच्च्युतं।
तथ्यं कृत्वा ततोऽगस्त्य प्रत्याययौ रसातलम् ॥५९॥
यत्र पुराभवद्वादः यत्र स्थितः पितामहः।
समप्राप्तप्रतिज्ञोऽसौ प्राप्तवांस्तत्र सात्त्विकः ॥६०॥
ददर्श स हरिस्तत्र जलोपरि रसातले।
ब्रह्माणं चैव पुष्पाणि कामधेनुं तथा पुनः ॥६१॥
तदन्तिके गतो विष्णुर्यत्र स्थितं विधिं मुने।
कामधेनुप्रसूनैश्च परिवृतं मुदान्वितम् ॥६२॥
ब्रह्मापि तमभिप्रेक्ष्य उदतिष्ठत्स्वमासनात्।
सत्कृत्य पूजनैर्मान्यं व्याजहार स्मितं वचः ॥६३॥

ब्रह्मोवाच ।
स्वागतं हि हरे तस्मात् महातलात्त्वया विभो ।
अत्रागतोसि चैकाकी साक्षी कोऽपि न विद्यते ॥६४॥
यदर्थं भवता तत्र गतं तूर्णं रसातलं ।
तदर्थं चैव निष्पन्नमुच्यतां वै हरेऽधुना ॥६५॥
विष्णुरुवाच ।
असमर्थोऽप्यहं द्रष्टुं तन्मूलं च पितामह ।
चित्रं तन्मूलपारं वै गन्तुं तत्र न शक्यते ॥६६॥
नदृष्टं हि मया ब्रह्मन् तन्मूलं हि महातले ।
तदृष्टोहि तस्यैव सत्यं सत्यं वदाम्यहम् ॥६७॥
भवता चैव दृष्टं तदग्रभागं पितामह ।
तव लोकादि सर्व्वोर्ध्वे प्रोच्यतां हि ऋतं ध्रुवम् ॥६८॥
ब्रह्मोवाच ।
दृष्टं वाथ मयादृष्टं पुष्पाण्येतानि पृच्छ्यताम् ।
भवतामत्र तद्वार्त्ता कामधेनूरसौ ह्यपि ॥६९॥
दृष्टे साक्षिणि धीमाँश्च वदत्स्वयं कदापि न ।
विष्णो एतेषु चैतस्यां शृणु तां तां यदृच्छया ॥७०॥
विष्णुरुवाच ।
सुपात्रे कर्त्तरि प्राप्ते नास्ति साक्षिप्रयोजनम् ।
धीमान्मिथ्या कदाप्यार्य्य नवदेत्स्वात्मने परे ॥७१॥
संसदि यो वदेन्मिथ्यां ज्ञात्वा कर्म्म स्वसात्मना ।
पराय चात्मने वापि सकिल्विषं प्रभुञ्जते ॥७२॥
कार्य्यविद्यो वदेन्मिथ्यां पक्षाश्रयी परीक्षकः ।
समवायप्रवेत्तापि अक्षयं पापभुग्भवेत् ॥७३॥
सभायां पक्षवादी चेद्धीमानपि परीक्षकः ।
प्राप्तेचाष्टैश्वरे ब्रह्मन् सोक्षयं नरकं व्रजेत् ॥७४॥
तथापि क्रियते प्रश्नस्तत्ते वचन-गौरवात् ।
एतस्यां च तथैतेषु प्रवृत्तिं हि पितामह ॥७५॥
कामधेनो जवापुष्प-बन्धूक-केतकी-ध्रुवं ।
दृष्टं वाऽनेन तत्कूटं यूयं ब्रूथ ऋतं विभो ॥७६॥
कामधेनुरुवाच ।
शेखरं च गतं सत्यमेतस्य ब्रह्मणा विभो ।
समागत्त्य ततः सार्द्धमनेनैवमिहागताः ॥७७॥
केतक्युवाच ।
सत्यमुक्तं हरे चात्र कामधेन्वा न संशयः ।
तत्रागतं विधिं तस्य दृष्टं मया च शेखरे ॥७८॥
बन्धूक उवाच ।
स्थित्वा तच्छेखरे विष्णो ताभ्यां समं मया यदा ।
तत्रागतं विधिं दृष्टमपि चैतन्न संशयः ॥७९॥
जवापुष्प उवाच ।
आगतं हि विधिं तत्र एतल्लिङ्गस्य शेखरे ।
मयापि च हरे दृष्टं सत्यमेतन्न संशयः ॥८०॥
स्कन्द उवाच ।
एवं विकत्थिते विष्णुरधोमुखो बभूव ह ।
तन्मायामोहितो मत्त्वा तमेव चात्मनः परम् ॥८१॥
अधोमुखे कृते विष्णौ दूयमाने हृदि मुने ।
व्याजहारेश्वरो व्योम्नो भूयः पुरा यथावचः ॥८२॥
अलक्ष उवाच ।
विष्णो नु मा विषादं त्वं गच्छातिवितथोदिते ।
एतस्या श्चैव पुष्पाणां मध्यस्थो सत्यसाक्षिणाम् ॥८३॥
वितथं कामधेनो हि त्वयाप्युक्तं सभाग्रतः ।
भूत्त्वाकामप्रदा लोके त्रैलोक्यपावनी सती ॥८४॥
भूत्वा वितथसाक्षी यदृदृष्टं कथितं स्वयं ।
तस्मात्त्वं सती चाद्यादि मुखेन चास्पृशा भव ॥८५॥
बन्धूककेतकीश्रीमन्जवेऽविचारतोऽधुना ।
युष्माभिर्वितथं प्रोक्तं भूत्त्वा ततपक्षिणोऽत्र वै ॥८६॥
अतिप्रियतमा यूयमेतावद्भवन्मम ।
यावन्नोक्तमसत्त्यं च युष्माभिर्नन्वगोचरम् ॥८७॥
अद्यादि मम यूयं च निर्माल्या भवताऽनिशं ।
वितथकथनाद्युष्मान्न स्पृशेऽहं कदापि च ॥८८॥
अद्यप्रभृतिरारंभे यश्चार्चिष्यति मां सदा ।
युष्मत्पुष्पैश्च मूर्खोऽसौ भवेन्मय्यपराधकः ॥८९॥
स्कन्द उवाच ।
एवमुक्त्वाप्यलक्षोऽसौ तत्रैवान्तर्दधेऽम्बरे ।
दत्त्वा शापं पुनस्तेभ्यः श्रावयन्तांश्च गांमुने ॥९०॥
आकर्ण्य वाचं गिरिशस्य तां खा-
द्विष्णुश्च धाता बुबुधे तदा वै ।
तंचेश्वरेशं परमानतौ तौ
मायाविमुक्तौ वितथस्य किञ्चित् ॥९१॥
इतिश्रीस्कन्दपुराणेहिमवत्खण्डेज्योतिर्लिंगोत्पत्तिर्नाम
पंचसप्ततितमोऽध्यायः ॥७५॥

—❀❀❀—

स्कन्द उवाच ।
सुविस्मयं तदा देवौ प्राप्तौ भृशं घटोद्भव ।
तेजःस्तम्भमभिप्रेक्ष्य आकर्ण्य तदुदीरितम् ॥१॥
सस्मरतुस्तदा देवौ रुद्रं विष्णुपितामहौ ।
सर्वात्मानं महेशानं प्रबोधार्थं मुदात्मनः ॥२॥
स्तोतुं प्रचक्रतुर्देवौ ईश्वराय मुदान्वितौ ।
संविधायाञ्जलिं मूर्ध्नि त्रिविधैर्भक्तिपूर्वकम् ॥३॥
ब्रह्मविष्णू ऊचतुः ।
ॐज्योतिरूपाय रुद्राय ज्योतिषाम्पतये नमः ।

तेजःस्तम्भात्मनेऽजाय ईश्वराय नमो नमः ॥४॥
अव्यक्ताय च लिङ्गाय व्यक्तलिङ्गाय भक्तिनां ।
व्यक्ताव्यक्तस्वरूपाय सर्वेश्वर नमोऽस्तु ते ॥५॥
आद्याय समनाद्याय अन्तस्थाय नमो नमः ।
अन्तश्चराय चान्तःस्थव्यञ्जनाय नमो नमः ॥६॥
न जानन्ति च ये त्वां शं त एव पशवः स्मृताः ।
पशूनां पतये तेषां तुभ्यं देव नमोऽस्तु ते ॥७॥
क्षितिरूपाय रुद्राय घ्राणांशाय नमो नमः ।
जलरूपाय चोग्राय रसांशाय नमो नमः ॥८॥
तेजोरूपाय भर्गाय चक्षुरंशाय वै नमः ।
वायुरूपाय भीमाय श्रोत्रांशाय नमो नमः ॥९॥
व्योमरूपाय चेशाय कण्ठांशाय नमो नमः
व्योमातीताय देवाय महाव्योम्ने च वै नमः ॥१०॥
अव्यक्तशब्दरूपाय व्यक्तशब्दाय वै नमः ।
अनाहतनिनादाय कारणध्वनिने नमः ॥११॥
पराय परमेशाय परापराय वै नमः ।
परापरप्रतीताय जीविनां परमात्मने ॥१२॥
आनन्दाय तथैकाय सच्चिदानन्दरूपिणे ।
निरानन्दाय नन्दाय लिङ्गाय नन्दिने नमः ॥१३॥
प्रणवाय स्वरांशाय श्रुतये नादरूपिणे ।
मूलरूपत्रिमात्राय मूलताराय वै नमः ॥१४॥
प्रमोहिता ये तव देवमायया
स्वदीयया त्वां न भजन्ति सन्ततं
प्रबोधयावानुकम्पया हि ते
कटाक्षपीयूष-सुधारयाधुना ॥१५॥

स्कन्द उवाच ।

आकर्ण्य तत्स्तवं रुद्रो ब्रह्मविष्णुमुखोद्भवं ।
देवेश्वरः सुसन्तुष्टस्ताभ्यां लिङ्गं प्रदर्शयत् ॥१६॥
तेजःस्तम्भान्तरालेऽजौ ददृशतुः परं सुरौ ।
लिङ्गमध्यगतं लिङ्गं स्थितं प्रादेशसंमितम् ॥१७॥
नैव तत्काञ्चनं रौप्यं ताम्रस्फटिकमौक्तिकं ।
लक्षमात्रं स्थितं शान्तं केवलं तच्छिवात्मकम् ॥१८॥
भूयस्तुष्टवतुर्लिङ्गं विष्णुपितामहौ तदा ।
अव्यक्तं परमं दिव्यमभिप्रेक्ष्य घटोद्भव ॥१९॥
ॐनमो लिङ्गदेवाय भीमरूपाय शूलिने ।
नमः पराय लिंगाय पशूनां पतये नमः ॥२०॥
देवाधिदेवाय सर्व्वदेहश्रिताय च ।
प्रजावः शरणं त्वां नो रक्ष रक्षेश ते नमः ॥२१॥
भूयो ददृशतुस्तौ तं लिङ्गमध्ये व्यवस्थितं ।
प्रकृत्या सह संयुक्तं चित्ररूपं महोज्ज्वलम् ॥२२॥

चतुर्भुजं वरैकास्यं दिव्याननं त्रिलोचनं ।
व्याघ्राम्बरधरं देवं नागयज्ञोपवीतिनम् ॥२३॥
नागकुण्डलदिव्याङ्गं नागकेयूरमण्डितम् ।
जटामुकुटविभ्राणं ललाटचन्द्रमोज्ज्वलम् ॥२४॥
त्रिशूलं डमरुं बाणं चापं दधानमीश्वरं ।
शक्तिमालिंगखेनेशं भ्राजमानं समन्ततः ॥२५॥
सहस्रपत्रपद्मस्थं पद्मासनं स्मिताननं ।
बन्धूकारुणसर्वाङ्गं बन्धुराधरमैश्वरम् ॥२६॥
तत्क्रोडस्थां महादेवी सिञ्जन्मञ्जीरपादुकां ।
किंकिणीद्योतकट्यां तां सर्व्वाभरणभूषिताम् ॥२७॥
दिव्याम्बरधरां देवीं कांचीगुणसमुज्ज्वलां ।
पीनयुग्मकुचां दिव्यां विस्तारोरुसुशोभनाम् ॥२८॥
मणिमुक्तामहाहारां कम्बुग्रीवां चतुर्भुजां ।
पाणिपद्मैर्दधानां वै पाशांकुशवराभयान् ॥२९॥
दिव्याननां विशालाक्षीं त्रिलोचनैः सुशोभनां ।
बन्धूकारुणसंकाशां बंधुरोष्ठपुटां शुभाम् ॥३०॥
मकरकुण्डलोद्योतश्रवणयुगलां सदा ।
अलकापत्रलेखाभिर्भ्राजमानां स्वतेजसा ॥३१॥
चूडामणिसुविभ्राजद्खण्डेन्दुशेखरां शिवां ।
शिवं दक्षभुजाभ्यां तमालिंगितां स्मिताननाम् ॥३२॥
शिवं शक्त्या समायुक्तं संप्रेक्ष्याशु तदन्तरे ।
तेजोभिर्दीप्यमानं तौ मेनाते दिष्टमात्मना ॥३३॥
ततश्च नेमतुस्तौ हि शिवं शक्त्या युतं मुने ।
दण्डवत्पातयित्वाङ्गं प्रणेमतुर्हि भक्तितः ॥३४॥
भूयस्तुष्टवतुर्देवं परिक्रम्य मुहुर्मुहुः ।
शिवं साक्षाच्छिवायुक्तमीषत्प्रहसिताननम् ॥३५॥
ॐशिवाय शिपिविष्टाय शिवदाय नमो नमः ।
शिवायै शिवरूपायै शिवदायै नमो नमः ॥३६॥
नतास्म ईश्वरं त्वां वै जगत्पितरमंजसा ।
मातर्देवि जगद्धात्रि नतास्मस्त्वां भवानि च ॥३७॥
त्वमेव प्रणवः साक्षाल्लज्जारूपा त्वमेव च ।
मात्रारूपे नतास्मस्त्वमर्द्धमात्रास्थितेऽम्बिके ॥३८॥
यजमानश्च भोक्ता त्वं भोज्यं यज्ञश्च शाश्वतः ।
स्वाहा स्वधा वषट् मंत्र वह्निरूपे नमोऽस्तु ते ॥३९॥
एवं स्तुतिं समाकर्ण्य शक्त्या युक्तस्तदामरौ ।
अदर्शयत्स्वकं लिङ्गं शक्त्या विरहितं परम् ॥४०॥
संकृत्याम्भसि तत्स्तम्भं लिङ्गं च तेजसां परं ।
प्रमाणं धनुपञ्चार्द्धांतरञ्चवक्त्रं प्रधारयन् ॥४१॥
तयोः स्तुतिप्रसन्तुष्टा ज्वालामालिनमीश्वरं ।
स्वबाहुभ्यां समालिंग्य बबन्ध स्वाञ्जलिं शिवा ॥४२॥

पञ्चास्यमक्षमालाञ्च घटं पूर्णामृतं तथा ।
दधानं दिक्करैर्लिङ्गं सपीठिकमपश्यताम् ॥४३॥
नागावतंस सुश्रोत्रं नागग्रैवेयकोज्ज्वलं ।
अहिकंकणकेयूर-सर्व्वाभरणभूषितम् ॥४४॥
चन्द्रार्काग्नीक्षणैश्चिह्नं जटाचूडेन्दुशेखरं ।
रंजितं पंचरङ्गाढ्यैः पञ्चात्मकं तथात्मभिः ॥४५॥
एवं प्रदर्शयन्देवौ अर्द्धात्मानं महेश्वरः ।
व्याचष्टे सगुणश्चापि वरं दातुं च निर्गुणः ॥४६॥

ईश्वर उवाच ।

सर्व्वस्वरूपोऽहमगोचरोऽहं
मद्भक्तिहीनैरसतां जनानां ।
तेषां मनस्तामस्याश्रितं मां
पश्यन्ति चान्धाः न यथा प्रदीपम् ॥४७॥
निमित्तं हि सर्व्वस्वरूपोऽहमात्मा
अशेषासुभृन्मानसाब्जस्थितोऽहं ।
निरस्तं जनानां मया चित्तरागं
सदा भक्तियुक्तांगिनां मज्जनानाम् ॥४८॥
जनानां मनःस्थोऽनिशं प्रेरकोऽहं
मनोबुद्धिचित्ताभिमानस्वरूपः ।
जनान्तेषु कार्य्येषु षड्विंशतत्त्वै-
रजोऽहं च तत्तत्कृतोऽहं सदात्मा ॥४९॥
अविद्याश्रितोऽहं परं ज्योतिरीशो-
विपद्येपु कार्य्याश्रितस्तेषु चाहं ।
विपद्याभिलब्धोऽपि नैवं तथा तै-
रनिर्लेपतेजःस्वरूपोऽहमात्मा ॥५०॥
स्वकीयैश्च कार्य्यैः सुखं दुःखमाद्यं ।
जना भुञ्जयन्तो मया जन्यते ते,
स्वकर्म्माभिवंद्यां स्वकाले हरिष्ये ।
प्रशक्ते निविष्टान्सुधर्म्मेपु यावत् ॥५१॥
पुरोद्भूतक... संत्यज्य मर्त्त्याः
मम प्रेमबद्धाः श्रिता विद्यया ये ।
यतंत्यं हि कृच्छ्रेषु मद्भक्तिहीनाः
कुकुर्म्मप्ररूढा सतोऽसत्यभाजः ॥५२॥
यजन्तीश्वरं मां त्रिभिश्चैकवाक्यैः
शिवेतीश्वरेति ह्यपि त्यागहीनाः ।
विहायानिवृत्तिं प्रपीडाजनिश्च
विशंतीश्वरे मय्यजे मोक्षभद्रे ॥५३॥
पुरा कृत्यकृत्योद्भवैर्नोव्यथाक्ता
मदंशाश्रिताभ्यन्तरा चाप्यवीचौ
पतन्त्यश्च जीवा यदि प्रेमभक्त्या
सक्तसेवते मां स चानायि नाकम् ॥५४॥
अभूवन्मनुष्या दृढैर्नः प्रशक्ता
मखैर्धर्मदानैर्विहीनाल्पजीवाः ।
विधे कृष्ण नस्ते विहायान्यसक्ता
अतोऽहारि सर्वं ममांशैः पयोभिः ॥५५॥
यदंशावतारा वियद्वह्निपृथ्वी
मरुच्चन्द्रसूर्य्याः शिवायाच्युतापः ।
धृताः सर्व्वलोका दशांशैः समेतैः
यदा न प्रमाणं हरिष्ये च सर्व्वम् ॥५६॥
एतद्रूपं शमैवाद्यं जानीतां सततं युवां ।
सर्व्वदेहाश्रितं देवं तेजस्विनं सदाच्युतम् ॥५७॥
शृणु ब्रह्मन् वरं दाष्ये विष्णो तुभ्यं च सांप्रतं ।
मयि भक्तिरतौ यस्माद्भवन्तौ मे हि संस्तुतौ ॥५८॥
संसृज्यतां च लोकेस्मिन्सर्वभूतानि सर्व्वशः ।
सर्गैश्चतुर्विधोद्भूतैः स्वकीयकर्म्मभुंजिनः ॥५९॥
सृष्टिकर्त्ता यथा पूर्वं भव ब्रह्मन्ननुग्रहात् ।
अद्यादि ते वदिष्यन्ति पितामह इति श्रुतः ॥६०॥
विष्णो त्वमपि लोकेऽस्मिन् प्राणिनः पालको भव ।
यावन्तो जीविनः सन्ति तावन्तः पाल्यतां समम् ॥६१॥
ततो लोका वदिष्यन्ति विष्णुर्लोकान्प्रपालकः ।
पालकः सर्वजीवानां भव विष्णो निरन्तरम् ॥६२॥

ब्रह्मोवाच ।

कृतकृत्यौ भवावोऽद्य जानीवहे हृदेति वै ।
यतो नौश्चक्षुषां यातस्त्वं मनसाप्यगोचरः ॥६३॥
किमुच्चाभाषणेनेश भवता सह नोऽधुना ।
तस्मादपि वरो लब्धः किं विधेयमतः परम् ॥६४॥
तथापि भवतश्चाग्रे वक्तव्यं वचनं विभो ।
भूमन् किंचित्त्वयीशान जगतां हेतवेऽधुना ॥६५॥
शतवर्षसहस्राणि दिव्यानि व्याप्य सन्ततं ।
जलेनाच्छादिता भूमिर्ह्रदीभूता बभूव सा ॥६६॥
देवैतानि च तोयानि शोषणीयानि सांप्रतं ।
मेदिन्यां यावदस्त्यम्भस्तावदीश्वर सर्व्वशः ॥६७॥
ततो भवत्प्रसादाद्वै सृजामि सर्व्वजीविनः ।
प्रकृत्यां सति मेदिन्यां चतुर्व्विधानि सर्व्वशः ॥६८॥
अयं विष्णुर्यथोक्तं च भवताद्य यथा पुनः ।
पालयिष्यति मेदिन्यां तानि तानि भवानिशम् ॥६९॥

स्कन्द उवाच ।

आकर्ण्य वचनं सद्यः ब्रह्मणोक्तं महेश्वरः ।
विनाशाय च तोयानां सृष्टिं कर्त्तुं मनो दधे ॥७०॥
ससर्ज शंकरः पूर्वं लम्बोदरं गजाननं ।

द्विनेत्रं द्विभुजं सौम्यं लड्डुकं परशूज्ज्वलम् ॥७१॥
सर्वाभरणभूषाढ्यं नागहारविभूषितं ।
रुद्राद्धांगसमुद्भूतं सर्व्वदेवनमस्कृतम् ॥७२॥
ततः ससर्ज्ज मार्त्तण्डं तेजस्विनं महेश्वरः ।
जगतां च समुद्धर्त्तुं सर्वभूतनमस्कृतम् ॥७३॥
त्रिनेत्रं द्विभुजं देवं अक्षमालाब्जहस्तकं ।
जपाप्रसूनसंकाशं सर्व्वाभाग्य (भाढ्यं)शिवांगजम् ७४
भूयः ससर्ज्ज सोमं हि स्वदेहाच्छंकरो मुने ।
आह्लादनाय नक्तं च जगतां गोचराय च ॥७५॥
त्रिनेत्रं द्विभुजं शान्तं अक्षमालाभयावहं ।
सर्वाभरणभूषाढ्यं शीताह्लादनमैश्वरम् ॥७६॥
एकैकांशं पुना रुद्रः स्वकीयं हि ससर्ज्ज वै ।
असह्यं सर्व्वलोकानां दावानलं प्रदीपिनम् ॥७७॥
एकविंशतिनेत्रं च सप्राननं भयावहं ।
श्रुक्श्रुवायुधमैश्वर्य्यं सर्व्वभुजमविन्धनम् ॥७८॥
संसृज्यैव हरो देवान् चतुर्थानात्मनस्तदा ।
व्याजहार वचस्तेभ्यः सर्वेषां च हिताय सः ॥७९॥

ईश्वर उवाच ।

दावानल महाबाहो एतज्जलं प्रशोषय ।
पीत्वा सप्तार्णवं तावन्मध्यस्थो लव(वरु)णाम्भसः ॥८०॥
यावन्नैव भवेत्क्षोणी विनाशं प्रलये पुनः ।
पीत्त्वैददुदकं चेह संरक्षातामियं क्षितिः ॥८१॥
लम्बोदराय्य शक्तोपि एतज्जलं प्रशोषितुं ।
पीत्वा शोषय पानीयं ततःस्पष्टा भवेत्क्षितिः ॥८२॥
मार्त्तण्डा शुजगत्सर्वं विद्योतय भवान्भवः ।
व्योमगः सन्स्वतेजोभिर्जगत्यस्मिन्प्रसारयन् ॥८३॥
भो सोम भवता नक्तं लोके चाह्लाद्यतामिह ।
शीतांशुभिश्च पूतांशैः सर्व्वलोकान्सुशीतयन् ॥८४॥
ब्रह्मन्संसृज्यतां जन्तून् ..द. विष्णो स्वयं पुनः ।
स्पष्टायां क्षितियातायां पातालं मदनुग्रहात् ॥८५॥
युष्माभिश्च कृते चात्र मही स्पष्टा भविष्यति ।
सर्व्वलोका भविष्यन्ति निदानं युवयोर्म्मम ॥८६॥
सहस्रवत्सरान्ते च एतल्लिङ्गं सुरार्चितं ।
पुरी स्वर्णमयी दिव्या भविष्यतीह मुक्तिदा ॥८७॥
दिव्यायुतसहस्राणि यावत्सहस्रवत्सरं ।
स्थास्याम्यनेन रूपेण भूतले देव-पूजिते ॥८८॥
ततो म्लेच्छैरधिक्रान्ते भूमेरन्तर्गते मयि ।
तत म्लेच्छा भविष्यन्ति मानुषा धर्म्मवर्जिताः ॥८९॥
नरा मां गूढरूपं ते न ज्ञास्यन्ते विधे हरे ।
म्लेच्छगणे विलीनेऽत्र आयुताब्दाद्वनं महत् ॥९०॥
धारयिष्याम्यहं चात्र पशुरूपं महावने ।
बहुवर्षान्तरे काले वने पुष्पोपशोभिते ॥९१॥
नानाद्रुमलताकीर्णे सर्व्वजन्तूपसेविते ।
सुखं स्थास्याम्यहं पशूनां क्रीडयन्मुदा ॥९२॥
ततः पशुपतिश्चेति वदिष्यन्ति च मे सदा ।
देवासुराः द्विजाः सिद्धास्ततो गूढो रसातले ॥९३॥
कामधेन्वा ततो हेतोः प्रदर्शिष्यन्ति भूबिले ।
मां म्लेच्छाश्च विलेष्यन्ति मद्दर्शनाद्धि तत्क्षणे ॥९४॥
सहस्राब्दान्तरे दिव्ये कृते प्राप्ते महायुगे ।
(गो)मह्यात्मकं च पञ्चास्यमेतत्कूटे भविष्यति ॥९५॥

स्कन्द उवाच ।

इत्युक्त्वा सहसा ताभ्यां निवृत्ते महेश्वरः ।
धनुः प्रमाणमात्रञ्च जलमध्ये व्यवस्थितम् ॥९६॥
तदाज्ञां च समादाय सर्व्वे देवा महाजले ।
आसन्ते प्रेक्षवन्तो वै ज्योतिर्लिङ्गं घटोद्भव ॥९७॥
शृण्वन्ति येऽध्यायमिदं पवित्रं ।
ते प्राप्नुवन्तीह सुभुक्तिमुक्तिं
सर्व्वैनसा त्यक्तशरीरपुण्या
लीनाः भविष्यन्ति हि तेजसीशे ॥९८॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे ईश्वरवाक्यं नाम-
षट्सप्ततितमोऽध्यायः ॥७६॥

स्कन्द उवाच ।

अविन्धनो मरश्चापः पपौ सर्वार्णवं क्षणात् ।
सहस्रवदनैर्भीमैर्निःशेष हेतुसंभवम् ॥१॥
पीत्वा पीत्वागभद्वह्निः पानीयमुत्तरे कुले ।
मेरोर्हि सप्तधा भूत्वा तस्थौ सप्तार्णवेषु सः ॥२॥
शुशुभिरे तदा तीव्रं द्वीपाः सप्तार्णवास्तथा ।
सघृतदीपपात्राणि ज्वलच्छिखाभिरार्य्यते ॥३॥
बभूवुर्गिरयः सर्व्वे प्रव्यक्ताश्च समन्ततः ।
स्पष्टा च मेदिनी सर्व्वा सप्तद्वीपाः ससागराः ॥४॥
हिमवद्दक्षिणे सानौ नेपालनामगह्वरे ।
राजते यत्र तल्लिङ्गं जलेनाच्छादिता क्षितिः ॥५॥
क्रीडयंश्च महोल्लासैर्ह्रदीभूते भयंकरे ।
लम्बोदरो बभौ तत्र निःशेषे च यथा हरिः ॥६॥
यावन्ति सन्ति तोयानि तावन्त्यशेषमाशु सः ।
लम्बोदरः पपौ तत्र शुण्डेनोग्रेण सर्व्वशः ॥७॥
प्रययौ गगने सूर्य्यः सप्ताश्वरथसंस्थितः ।
अपालयज्जगत्सर्व्वं यामैः सप्तभिः स सदा ॥८॥
चन्द्रोऽपि प्रययौ व्योम्नि हंसयानमहोज्ज्वलः ।

अपालयज्जगत्सर्वं नित्यं प्रमाणमूर्दितैः ॥९॥
ससर्ज्ज सर्वभूतानि मेदिन्यां च पितामहः ।
त्रिविधानि यथापूर्व्वं सप्तद्वीपेषु सर्वशः ॥१०॥
दिव्यायुतसहस्राणि वत्सरं द्विसहस्रकं ।
स्वर्णपुर्य्यां सुरैर्नित्यं ज्योतिर्लिङ्गं प्रसेव्यते ॥११॥
ततः प्राप्ते कलौ शेवे तिरोधानं बभूव सः ।
तेजोलिङ्गं पुनर्भूमौ हिमवत्सानुसुन्दरे ॥१२॥
नानाद्रुमलताकीर्णे नानापुष्पोपशोभिते ।
अगोचरे नरैस्तत्र रराम पशुरूपधृक् ॥१३॥
ततो व्यक्तो ह्यभूदीशस्तेजोलिङ्गं महाद्भुतं ।
प्रमाणं धनुषोमात्रं सर्व्वदेवैः प्रसेवितम् ॥१४॥
तत्रामरैरधिष्ठानं कृतं सम्यक्च सन्ततं (समन्ततः)।
राजधानी कृता दिव्या सर्व्वदेवैरधिष्ठिता ॥१५॥
पशुपतेः पुरी दिव्या जाम्बूनदमयी परा ।
ततः सर्वेषु देवेषु पुरी माहेश्वरी श्रुता ॥१६॥
राजते स्वर्णहेमैश्च मणिमुक्तैस्तदोजसा ।
ज्योतिर्म्मयी पुरी दिव्या पाशुपतीति विश्रुता ॥१७॥
तस्यां विराजते लिङ्गं घृतपूर्णशिखेव हि ।
स्वर्णपद्मान्तरे मध्ये कर्णिकास्थो मणिर्यथा ॥१८॥
सा ततस्तत्प्रमाणान्ते द्वापरान्तेऽमरार्च्चिताः ।
मृदूपलेष्टिकाकाष्ठैर्बभूव नगरी पुनः ॥१९॥
तिरोहितानि रत्नानि सौवर्णानि तथाविधं ।
तिरोहिते शिवे भूमौ कलौ प्राप्ते हि सर्वशः ॥२०॥
पुरीं पशुपतीं त्यक्त्वा स्वं स्वं लोकं ययुः सुराः ।
ततो बभूव सा शून्या सर्व्वदेवैर्विवर्ज्जिता ॥२१॥
ब्रह्मापि प्रययौ सद्यो यत्र गोकर्णशंकरः ।
तत्र तेपे मुदा नित्यं समहर्यन्महेश्वरम् ॥२२॥
गरुडगो ययौ विष्णुर्दोलाशिखरशेखरं ।
तस्थौ तत्र मुदाजस्रं शंकरवचनान्मुने ॥२३॥
लम्बोदरस्तदात्मासौ नैर्ऋत्ये दिशि सन्ततं ।
तत्क्षेत्रं पालयन्तस्थौ सर्व्वसिद्धिप्रदो भृशम् ॥२४॥
कामधेनुः सदा दोग्ध्री चन्द्रवत्सानुगह्वरे ।
अवात्सीदनिशं देवीं पशुपतिं प्रसेव्य सा ॥२५॥
तिरोधानं गते रत्ने दानधर्मैर्विवर्ज्जिता ।
तिरोधानं गते लिङ्गे तेजोरूपे हि तत्र च ॥२६॥
मृत्तिकया च तद्भूमिराच्छादिता च सर्व्वशः ।
कामधेनुः समाऽगत्य दुग्धं स्रवति नित्यशः ॥२७॥
अद्यप्रभृति ईशे सा शिवमुद्दिश्य तद्दिने ।
संस्नाप्य पशुं देवमासाद्य वाग्मतीजले ॥२८॥
गत्वायात्याश्रमं दिव्यं चन्द्रवद्गिरिसानुनि ।
दशवर्षसहस्रान्ते कश्चिम्लेच्छो ददर्श सः ॥२९॥
तत्र प्रस्रवितां गावं समागत्य च नित्यशः ।
एकदा दिवसे म्लेच्छाश्चखुस्तन्मृत्तिकां किल ॥३०॥
बीजं किमिति कृत्वात्र द्रष्टुं तद्वचनेन वै ।
बिले प्रमाणे धनुषो ज्वालामालिनमीश्वरम् ॥३१॥
असह्यतेजसा पुंजं चुंनाद्या ददृशुस्तदा ।
ज्वालामये महालिङ्गे तप्तकाञ्चनसन्निभे ॥३२॥
विलिन्युः खनकास्तत्र ज्वालाग्नौ शलभा इव ।
म्लेच्छाश्च बहवस्तत्र विलीनाश्चाभवन्पुनः ॥३३॥
किमिति हि हि कृत्वा ये चकिताः प्रेक्षकाश्च तम् ।
पापात्मानोपि ते म्लेच्छाः योगभक्तिविवर्ज्जिताः ॥३४॥
सुमुक्तिमलभंश्चेशे भूयो विहाय संभवं ।
बुबोध च तदा ब्रह्मा तद्वृत्तान्तं घटोद्भव ॥३५॥
म्लेच्छा लीना बभूवुस्ते लिङ्गे तेजोमये ध्रुवं ।
मत्वा सृष्टिं विमुक्तिं च विष्णुमाहूय सत्वरम् ॥३६॥
ययौ तेन समं धाता यत्र ज्योतिर्मयः स्थितः ।
सुनिर्मितं नमन्ब्रह्मा लिङ्गं शिलामयं शिवम् ॥३७॥
सवेदिकं च पंचास्यं सर्व्वलक्षणलक्षितं ।
स्थापितवान्मुदा भक्त्या ज्योतिर्लिङ्गोपरि ध्रुवम् ॥३८॥
स्वात्मापिधानकं लिङ्गं सिद्धमणिमयं परं ।
संस्थापितो यथा भूयो विष्णुना प्रभविष्णुना ॥३९॥
इन्द्रनीलमयं ग्रावं लिङ्गं तदुपरि ध्रुवं ।
विष्णवात्मकं महालिङ्गं सर्व्वलोकैः प्रलक्षिते ॥४०॥
सर्व्वाधस्तेजसां पुञ्जं सर्व्वभूतैरगोचरं ।
सर्व्वदा दृश्यते लोकैर्विष्णुना स्थापितं शिवम् ॥४१॥
शिलामयं महालिङ्गं पंचव्यूहं तदात्मकं ।
पशुपतिं महालिङ्गं ब्रह्मविष्णुशिवात्मकम् ॥४२॥
उमामहेश्वरं लिङ्गं सर्व्वदेवालयं बभौ ।
ततो विप्रास्तमर्हन्ति भक्त्या पंचोपचारकैः ॥४३॥
पशुपतिं तमीशानं तन्मंत्रैश्च महोत्सवैः ।
तत्राक्रान्तेपि च म्लेच्छैर्दानधर्मविवर्जितैः ॥४४॥
तन्मनुज्ञाः द्विजाः नित्यं पशुपतिं समर्च्चिताः ।
ये ये मुक्तिं च वाञ्छन्ति त्यक्त्वेह संसृतिं पराम् ॥४५॥
पशुपतिं प्रपश्यन्तु भक्त्या योगेन तत्र वै ।
तत्राद्यं विद्यते शैवं पशुकलेवरं परम् ॥४६॥
सकृत्पश्यन्ति लोकास्तं तेषां पुण्यफलं महत् ।
तस्य दर्शनमात्रेण पशुपाशैर्विमुच्यते ॥४७॥
स्पर्शनात्पाणिना भक्त्या पशुजन्म न विद्यते ।
ये पश्यन्ति शिवं साक्षात्पंचव्यूहसमाननम् ॥४८॥
श्रद्धयाऽश्रद्धया वापि तेषां पुण्यफलं शृणु ।

१२११४

सर्व्वजन्मार्जितैः पापैश्चतुर्विधोद्भवैश्च ते ॥४९॥
मुच्यन्ते तत्क्षणान्नूनं ज्ञानाज्ञानकृतैरपि ।
सर्व्वयज्ञफलं लब्ध्वा सर्व्वदानोद्भवं तथा ॥५०॥
सर्वोपवासपूजां स शिवलोके महीयते ।
शिवगङ्गाजलास्नायी संस्पृश्य शुलिमहम् ॥५१॥
पश्यन्पशुपतिं भक्त्या निष्पापः शांकरं व्रजेत् ।
भक्त्या प्रदक्षिणं कृत्वा पशुपतेर्यथाविधिः ॥५२॥
सर्व्वयज्ञोपवासेषु सर्व्वधर्म्मेषु यत्फलं ।
अश्वमेधसहस्राणां तत्क्षणाल्लभ्यते फलम् ॥५३॥
नमस्कारः स्मृतो यज्ञः सर्व्वयज्ञोद्भवं फलं ।
नमस्कृत्वा महालिङ्गमश्वमेधफलं लभेत् ॥५४॥
प्रणम्य दण्डवद्भूमौ नमस्कारेण योच्चर्चयेत् ।
स यां गतिमवाप्नोति न तां यज्ञशतैरपि ॥५५॥
सर्व्वयज्ञोपवासेषु सर्व्वतीर्थेषु यत्फलं ।
स्तुतिजप्योपहारेण सर्व्वं तत्फलमाप्नुयात् ॥५६॥
वाञ्छन्ति ये मुनिर्व्वाणं ज्ञानतो भवनाशकं ।
सेव्यतां पाशुपं भक्त्या सर्व्वदुष्कृतनाशकं ॥५७॥
भये विपदि रोगार्त्ते उत्सवे ग्रहपीडने ।
स्मरणात्पशुपं यो वै रक्षति सर्व्वतः सतम् ॥५८॥
ये चाध्यायमिदं भक्त्या संशृण्वन्ति नरोत्तमाः ।
भूत्वा च तन्मनस्का वै तेषां पुण्यफलं शृणु ॥५९॥
यत्र कुत्रापि देशे वा मृता भूत्वा द्विजाश्च ते ।
पूर्व्वजन्मार्जितैर्द्धर्मैर्जायन्ते तत्पुरोत्तमे ॥६०॥
तन्मनुज्ञाः श्रुतिज्ञाश्च सर्वशास्त्रविशारदाः ।
चतुर्व्वर्गफलं भुक्त्वा लभेयुः शांकरं मृते ॥६१॥

एतन्मया ते कथितं ध्रुवं वै-
दृष्टं पुराहं भवता मुने यत् ।
शिलामयोऽभूत्पशुपस्तदादि-
रजाच्युतस्थापित आर्य्य यस्मात् ॥६२॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे पशुपतिस्थावर-
लिङ्गोत्पत्तिर्नाम सप्तसप्ततितमोऽध्यायः ॥७७॥

—॥ ॥ १ —

अगस्त्य उवाच ।

मकरन्दं पुनः पातुं कथामधुरसं त्विदं ।
अहन्तु भ्रमरीभूतस्त्वन्मुखाम्भोजनिःसृतम् ॥१॥
भगवन्श्रोतुमिच्छामि त्वयि तत्पार्व्वतीसुत ।
यदुक्तं भवता पूर्व्वं सर्वं सर्वकथोत्तमम् ॥२॥
कथं भगवता पूर्व्वं मृगरूपं धृतं विभो ।
यस्य शृंगात्समुद्भूतः कथं गोकर्णशंकरः ॥३॥
पशुरूपं दधानः स कैः कथं च प्रलक्षितः ।
एतत्सर्व्वं महासेन वद मह्यं हि सांप्रतम् ॥४॥

स्कन्द उवाच ।

शृणु वत्स महाभाग यथा तत्त्वं ब्रवीमि ते ।
यत्पृष्टोऽहं त्वया चाद्य गोप्यां दिव्यां कथां मुने ॥५॥
अस्ति भूधरराजस्य हिमवत्युत्तरे शुचौ ।
मुञ्जवान्नाम कूटार्य्यो नन्दनोपवनद्युतिः ॥६॥
वज्रस्फटिकपाषाणप्रवालांकुरशर्कराः ।
नीलामलशिलावर्णगुहासंयुक्तकन्दरः ॥७॥
विचित्रकुसुमोपेतैर्लतामंजरिधारिभिः ।
विरेजे पांशुभिः शृंगैरुल्लिखद्भिरिवाम्बरम् ॥८॥
ग्रावादर्पणचन्द्रे तु धातुद्रव्यं स्रवद्भृशम् ।
प्रतिबिम्बैश्च पुष्पाणां चित्रिता इव सर्व्वतः ॥९॥
विकशत्केतकीपत्रा हरिद्दलेषु संभवाः ।
उन्मीलिता इवाभान्ति नानाविपिनराजयः ॥१०॥
भिन्नेन्द्रनीलविमलैर्भाभिः प्रस्रवणाम्बुभिः ।
चित्रैः कुसुमसञ्छन्नैः शिलासुन्दरविस्तरैः ॥११॥
शक्रचापनिभैः रम्यैः कुबेरभवनोपमैः ।
नानापतत्त्रिणां रावैर्भृङ्गरवैरितस्ततः ॥१२॥
पुष्परसलिहोद्भूतैर्वृत्ता - वासकृतोद्भवैः ।
शुशुभे गिरिकूटोऽसौ मुनिभिश्च तदालयैः ॥१३॥
विद्याधरगणैः सिद्धैर्गन्धर्व्वगायनैर्भृशम् ।
किन्नरोद्गीतरम्यैश्च अप्सरसां च नर्त्तनैः ॥१४॥
मृदङ्गतालभेरीणां मुर्मुरोद्भवरावकैः ।
ऋषीणां वेदनिर्घोषैर्यज्ञाहुतिसुगन्धिभिः ॥१५॥
धारापातैश्च तोयानां शुशुभे गिरिशेखरः ।
मणीनां तेजसां रम्यः प्रतिबिम्बैर्मिथोंऽशुभिः ॥१६॥
श्रवद्भिश्चन्द्रकान्तानां सूर्य्यकान्तोद्भवाग्निभिः ।
सव्वर्त्तुकुसुमोत्पन्नैः सर्व्वद्रुमसुशोभनैः ॥१७॥
जीवं जीवमयूराणां केकाभिरभिरामकैः ।
तस्मिन्नगवरे रम्ये अध्यास्ते शंकरस्सदा ॥१८॥
धर्म्मारण्ये तपःक्षेत्रे देव्या सह जगद्गुरुः ।
दग्ध्वा कामं पुरा शम्भुस्तत्रैव च दृशाग्निना ॥१९॥
तपःस्थिते हि मद्धेतोर्देवैः प्रप्रेरितो मुने ।
तदादिस्तत्र चालक्षः सर्व्वेषां भगवान्हरः ॥२०॥
स्वर्गादागत्य देवैः स विमानगैः प्रसेवितः ।
आसीन्म्लेच्छः पुरा कश्चित् सुबाहुर्नाम विश्रुतः ॥२१॥
मृगयासु रतो धन्वी श्लेष्मान्तकवने वसत् ।
सोऽन्ते पंचत्वसामन्नो वाग्मतीसुतटे भुवि ॥२२॥
कार्त्तिकीपूर्णिमायाञ्च रजाजिनो हि निर्ज्जनः ।

कात्यायनकुले जातो वाग्मतीजलपानतः ॥२३॥
वेदविदांवरो विप्रः तपःशीलो गुणान्वितः।
सोऽत्र कृतयुगे मध्ये नन्दी नाम द्विजोत्तमः ॥२४॥
तमाराधयिषुः सर्व्वं तपस्तेपे महत्तदा।
ग्रीष्मे पंचातपोतिष्ठच्छिशिरे सलिलाश्रये ॥२५॥
ऊर्ध्वबाहुर्निरालम्बस्तोयानिलहुताशनः।
एकाब्दं विविधैरुग्रैस्तपोभिर्नियमैः कृतः ॥२६॥
जप्योपहारपुष्पैश्च काले काले हि तेन वै।
शंकरं विधिवद्भक्त्या समर्च्चयन् द्विजोत्तमः ॥२७॥
उग्रेण तपसात्मानं तापयामास सुव्रतः।
काष्ठोपलोपमो विप्रः शीतातपसहः कृशः ॥२८॥
क्षीणोऽभूत्कृष्णदेहोऽसौ ततः प्रीतश्च शंकरः।
सम्यगाराधितो भक्त्या नियमेन प्रतोषितः ॥२९॥
तदात्मदर्शनं प्रादात्तस्मै च वृषभध्वजः।
व्याजहार वचस्तस्मै आशुतोष सुभक्तितः ॥३०॥
दिव्यनेत्रप्रदानाय वरं चैव तदीप्सितं।

ईश्वर उवाच।

भक्तार्य्य दिव्यनेत्रं ते सर्व्वलोकैः सुदुर्ल्लभम् ॥३१॥
दर्शनाय च मां नन्दिन् तव भक्त्या ददाम्यम्।
वरं वृणीष्व मत्तोऽद्य ददामि ते त्वदीप्सितम् ॥३२॥
यथाऽष्टगुणमैश्वर्य्यं त्रैलोक्येश त्वमीप्सितं।
अव्ययमपवर्गं वा गाणपत्यमथापि वा ॥३३॥
निष्कण्टकानि राज्यानि ह्रदीप्सितं वृणीष्व मे।

स्कन्द उवाच।

लब्ध्वा दिव्येक्षणं नन्दी ददर्शाशु महेश्वरम् ॥३४॥
सहस्रसूर्य्यसंकाशं बालार्कमण्डलप्रभम्।
जटाधरं शिवं साक्षाच्चन्द्रार्द्धकृतशेखरम् ॥३५॥
त्रिनेत्रं च चतुर्बाहुं नागाभरणभूषितं।
अक्षमालां त्रिशूलञ्च डमरुमभयं तथा ॥३६॥
वृषपृष्ठे समासीनं व्यालयज्ञोपवीतिनं।
कोटिसूर्य्यप्रभां देवीन्तद्वामक्रोडसंस्थिताम् ॥३७॥
संश्लिष्टां हरहस्तेन ईषत्प्रहसिताननां।
तमभिप्रेक्ष्य नन्दी स उदतिष्ठच्च सत्वरम् ॥३८॥
प्रणम्य दण्डवद्भक्त्या तुष्टाव च पराक्रमन्।

नन्द्युवाच।

ॐनमोऽजाय च रुद्राय त्रिनेत्राय शिवाय च ॥३९॥
शंकराय महेशाय जगद्वक्त्राय चक्षुषे।
भवाय च भवेशाय भवगोत्रे च शंभवे ॥४०॥
भवौषधाय भव्याय भव्यदाय नमो नमः।
भीमाय भीमरूपाय भीमेश्वराय वै नमः ॥४१॥
भीमप्रदाय हि सर्व्वाय भीमनाशाय ते नमः।
सौम्याय सौम्यरूपाय सोमांशायांशुदाय च ॥४२॥
सोमशीर्षाय देवाय सौम्यदाय नमो नमः।
नमो देव्यै महादेव्यै जगद्धात्र्यम्बिके नमः ॥४३॥
शिवायै शिवरूपिण्यै शिवदायै नमोऽस्तु ते।
नमोऽस्तु भगवत्यै च भवान्यै भयहारिणि ॥४४॥
याचे भूमन्वरं त्वां हि एतदेव महेश्वर।
तव पादार्च्चने नित्यं रतो भवत्वयं जनः ॥४५॥
त्वत्स्मरणे सुनिष्ठश्च तेऽभिधाने रतो मुखे।
त्वद्दासोऽयं जनो हि त्वां क्षणमपि न मुञ्चतु ॥४६॥
एतद्वरं च मे देहि नापरं वरमुत्सहे।

ईश्वर उवाच।

एवमेवं हि भूयास्त्वं यथा वदसि तत्तथा ॥४७॥
भक्त्या चाराधितोऽहन्ते यतो नन्दिन् तपोबलात्।
दुष्करं सर्व्वदेवैश्च कठोरं च महातपः ॥४८॥
दुष्कृतं सुमहाश्चर्य्यं त्वया कृतं यतस्तपः।
संक्षोभितं च ते नन्दिन् त्रैलोक्यं सचराचरम् ॥४९॥
तपसानेन दिव्येन तस्माच्छ्रेष्ठो गणाधिपः।
मत्तुल्यो मानितो लोके त्वमेकश्च सुरार्च्चितः ॥५०॥
मद्रूपो ह्यपरो वत्स त्र्यक्षस्सर्व्वगुणोत्तमः।
भविष्यसि न सन्देहो देवदानवपूजितः ॥५१॥
अनेनैव शरीरेण जरामरणवर्जितः।
दुष्प्राप्यो विबुधैश्चापि देहोऽयं भवतु ध्रुवम् ॥५२॥
पार्षदानां बलिष्ठस्त्वं मामकानां द्विजोत्तम।
नन्दीश्वर इतिख्यातो भविष्यसि न संशयः ॥५३॥
प्राप्तमष्टगुणं मत्तः ऐश्वर्य्यं ते तपोबलं।
द्वितीया मे तनुस्त्वां तु नमस्यन्ति च देवता ॥५४॥
अग्रे प्रत्येति देवानां देवकार्य्ये तु सर्व्वता।
त्वं प्रभुर्भविता लोके मत्प्रसादान्मुनीश्वरः ॥५५॥
त्वामेवाभ्यर्चयिष्यन्ति सर्व्वभूतानि सर्व्वतः।
मत्तः समभिवाञ्छन्तः प्रसादं पार्षदाधिपः ॥५६॥
वरार्थिने वरं यत्त्वं दास्यसि मत्प्रसादतः।
यस्त्वां द्वेष्टि स मां द्वेष्टि यस्त्वां मन्ता स मामपि ॥५७॥
नावयोरन्तरं भेदो लोकानामस्ति किञ्चन।
द्वारे मे दक्षिणे नित्यं सन्तिष्ठसि गणाधिपः ॥५८॥
वामे भृंगी तथा भूयो महाकालश्च सर्व्वदा।
प्रतीहारो भवानद्य सर्व्वदा त्रिदशोत्तमः ॥५९॥
भवात्रक्षतु मे द्वारं महाकालेन वै समम्।
न वज्रेण न चक्रेण न दण्डेन न चाग्निना ॥६०॥
कश्चित्कर्त्तुं तवाबाधां न शक्तो भुवनत्रये।

देवदानवगन्धर्व्वा यक्षराक्षसपन्नगाः ॥६१॥
त्वामेव संश्रयिष्यन्ति मद्भक्ताः पुरुषाश्च ये ।
त्वयि तुष्टे ह्यहं तुष्टः कुपिते कुपितस्त्वहम् ॥६२॥
त्वत्तः प्रियतरो नास्ति ममान्यो द्विजपुङ्गव ।
त्वां द्रष्टुं हि सुराश्चात्र आयास्यन्ति न संशयः ॥६३॥
मदर्थं हेतुतस्तिष्ठ कञ्चित्कालं वरोत्तम ।

स्कन्द उवाच ।

एवं तस्मै वरं दत्त्वा प्रीतः स्वयमुमापतिः ॥६४॥
कात्यायनमृषिं भूयो रहस्यं समुवाच ह ।
श्लेष्मान्तके महारण्ये पुण्यभूमौ मनोहरे ॥६५॥
नानाद्रुमलताकीर्णे नानापुष्पोपशोभिते ।
विचरिष्यामि तत्रैव मृगरूपेण वै सुखम् ॥६६॥
न वक्तव्यमिमां वार्त्तां कस्मैचिन्मुनिपुङ्गव ।
इत्युक्त्वा प्रययावीशः श्लेष्मान्तकवनोत्तमम् ॥६७॥
तिरस्कृत्यैत्तणं तत्र कात्यायनस्य शंकरः ।
तस्मै वरः पुरा दत्तः तस्य नाम्ना वनोत्तमम् ॥६७॥
अहेः श्लेष्मान्तकस्यैव तत्र श्लेष्मान्तकेऽगमत् ।
अन्तर्हिते ततस्तस्मिन्भवे वै भूतनायके ॥६६॥
ध्रुवं बभूव दिव्याङ्गो नन्दीगणचमूपतिः ।
चतुर्भुजस्त्रिनयनो दिव्यदेहेन संस्थितः ॥७०॥
दिव्यवर्णवपुश्चारुर्दिव्याकल्पविभूषितः ।
त्रिशूली परिघी दण्डी पिनाकी मौञ्जमेखली ॥७१॥
शुशुभे तेजसा तत्र द्वितीय इव शंकरः ।
नन्दिः सहर्षं ह्यलभत्तदासौ
लब्ध्वाशु रुद्रात्सुवरं महत्त्वं ।
नन्दी ततो वै त्वभवद्धि शंभोः
श्रेष्ठो गणानां प्रतिहारसंस्थः ॥७२॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नन्दिकेश्वरवर-
प्रदानं नामाष्टसप्ततितमोऽध्यायः ॥७८॥

—:❀❀:—

अगस्त्य उवाच ।

कोऽसौ श्लेष्मान्तको नाम कस्मात्प्रलब्धवान्वरं ।
सिद्धाद्रिरिति विख्यातस्तस्य नाम्ना कथं भवेत् ॥१॥
सर्व्वज्ञात्मज सेनानी सर्व्ववार्त्ता-विशारद ।
त्वं कुशलोऽसि तद्वक्तुं वदैतन्मे यथाविधिः ॥२॥

स्कन्द उवाच ।

अस्ति कश्चित्समुद्दिष्टः क्षितौ सिद्धाद्रिसंज्ञकः ।
पादे हिमवतः पुण्ये तपोवनगुणान्विते ॥३॥
योजनैकसुदूरस्थो याम्ये मुंजवतो दिशि ।
यत्राध्यास्ते शिवा देवी गुह्याख्या वरदानिशम् ॥४॥
बहुतीर्थैः समं यत्र वाग्मती सरितांवरा ।
ववाह सततं पुण्या चेतःकांक्षाफलप्रदा ॥५॥
वनं मनोरमं पुण्यं सिद्धर्षिभिः प्रसेवितं ।
बहुतीर्थाश्रयं रम्यं तपोवनं महत्तरम् ॥६॥
तत्र श्लेष्मान्तको नाम नागेन्द्रो वसते भयात् ।
विवादे चात्मभंगात्स गरुडेन समं पुरा ॥७॥
नागराजं समाश्रित्य तेपे कश्यपसंभवः ।
शिवार्च्चको ह्यात्माऽसौ तन्मनस्कोऽनिलाशनः ॥८॥
सहस्रवत्सरं व्याप्य तपश्चकार तन्मनाः ।
कठोरं प्रियया सार्द्धं रुद्रभक्तस्तदर्च्चकः ॥९॥
सहस्रवत्सरान्ते च आविर्भूतो महेश्वरः ।
वरं दातुं च तत्रैव भक्तिने भक्तिनन्दनः ॥१०॥
व्याजहार वचस्तस्मै वरेण्यो वरदो विभुः ।
दन्तानां किरणैस्तत्र विद्योतयन् दिशो दश ॥११॥

ईश्वर उवाच ।

अहो धन्यतमो वत्स श्लेष्मान्तक विकिल्बिष ।
सुतपास्त्वं यतो भक्त सुकठोरं तपः कृतम् ॥१२॥
वरं वरय नागेन्द्र यत्त्वं वाञ्छसि सांप्रतं ।
ददाम्यहं च तत्सर्व्वं तपः कृश-हितेऽधुना ॥१३॥

नाग उवाच ।

नमो देवाधिदेवाय देवानां पतये नमः ।
सर्व्वदाय च सर्व्वाय भूतिदाय च भूतिने ॥१४॥
भव्याय भवरूपाय भवानीपतये नमः ।
भास्वद्देवाय चोग्राय भूतानां पतये नमः ॥१५॥
भवान्यै भवहारिण्यै भूतिदायै नमोऽस्त्विके ।
भवानां भीतिहारिण्यै भक्तिवत्सलरूपिणि ॥१६॥
मां समुद्धर देवेश दुष्कृतेन पुरा मम ।
लब्धवन्तं च सर्व्वागमसद्भवार्णवे स्थितम् ॥१७॥
त्वयि भक्तिरतो नित्यं त्वत्पूजने रतोऽनिशम् ।
त्वदंघ्रिसेवने निष्ठा यावज्जीवं भवत्वियम् (भवाम्यहम्)
त्वन्तिकटे सदास्थानं नेच्छामि चापरं प्रभो ।
एतदेव वरं याचे अचलं नापरं च मे ॥१८॥

ईश्वर उवाच ।

एतुवमस्तु भुजंगेन्द्र यत्त्वं वदसि तत्तथा ।
भूयो ददामि ते वत्स तपस्विन् शृणु यद्वरम् ॥२०॥
सुरासुरैरवध्यश्च नित्यं मत् प्रियकारकः ।
भविष्यसि भुजंगेन्द्र स्वच्छन्दगतिरेव च ॥२१॥
वासुकेश्च सखित्वेन प्रचरसि भुजंगम ।
प्रमथैः सन्ततं सार्द्धं परित्यज्य ह्यरातिजम् ॥२२॥

इदं वनं च सिद्धाद्रिं पुण्यकृद्भिर्निषेवितं ।
भविष्यति जगत्ख्यातं तव नाम्ना भुजंगम ॥२३॥

स्कन्द उवाच ।

दत्वा वरं हरस्तस्मै तत्स्थानं विससर्ज सः ।
सूर्य्यायुताभयानस्थः उत्पपाताम्बरे विभुः ॥२४॥
व्याजहार वचो देव्यै विस्मयोत्फुल्ललोचनां ।
निरीक्ष्य पार्श्वगां देवीं भगवानिदमब्रवीत् ॥२५॥
चन्द्रभागातटे देवीं पश्य चन्द्रसमोज्ज्वलां ।
भगवतीं महेशानीं वाराहीं च सरिद्वराम् ॥२६॥
जेष्ठिलीं च नदीं पुण्यां पुण्यां शोकवतीन्तथा ।
वाग्मतीं च महापुण्यां आर्य्यां मणिमतीन्तथा ॥२७॥
वीरां भद्रां पुरः पश्य गोदावरीं च गोमतीं ।
पश्य धर्म्मनदीं पुण्यां ब्रह्मनदीं प्रभावतीम् ॥२८॥
सरस्वतीं महापुण्यां विष्णुधारां च गोपदीम् ।
मातृनदीं पुरः पश्य नवधारां हरिश्रवाम् ॥२९॥
चन्द्रस्रवां प्रिये पश्य शक्रवतीं च सालिकां ।
रुद्रपदीं महापुण्यां विष्णुपदीं तथापराम् ॥३०॥
पश्य तीर्थान्यनेकानि मत्प्रभावोद्भवानि च ।
लोकोद्धारणहेतुभ्यः इमास्तव विभूतयः ॥३१॥
तीर्थानि च मदंशानि सर्व्वा नद्यस्त्वदंशकाः ।
मत्प्रियं शिखरं पश्य योगिनीन्तव रूपिणीम् ॥३२॥
मणिचूडं महापुण्यं मणिह्रदं हरेर्गिरिं ।
सर्व्वमनोहरं दिव्यं द्रुमैः पुष्पैर्विराजितम् ॥३३॥
सिद्धारण्यं तपः स्थानं पश्याधस्त्वं मनोहरं ।
अत्रैव क्रीडयिष्यामि मृगरूपेण सांप्रतम् ॥३४॥
मृगयूथैः समं देवि रहस्यमिव कानने ।
मृगयूथं समाविश्य रम्ये वनवरे शुभे ॥३५॥
मृगरूपं समास्थाय चरिष्यामि सुलोचने ।
यदा मद्दर्शनोद्युक्ताः ब्रह्मविष्णुपुरन्दराः ॥३६॥
पृच्छन्ति यर्हि मद्रूपं कथ्यतां सुरसुन्दरि ।

स्कन्द उवाच ।

एवं संभाष्य भगवान् देवीं देवेन्द्रवन्दितां ॥३७॥
अवततार यानं स्वं व्योम्नस्तत्र घटोद्भव ।
ततो विसृज्य तां देवीं स्वयमन्तर्दधे विभुः ॥३८॥
सापि देवी च गुह्याख्या तत्रैवान्तरधीयत ॥३९॥
सिद्धाटनं देवमनोहरं त-
च्छ्लेष्मान्तकश्चेति च विश्रुतो वै ।
नाम्ना च तस्यैव तपस्विनस्त-
ल्लोकेष्वजस्रं सुतपःस्थलोऽभूत् ॥४०॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे श्लेष्मान्तकवरप्रदानं नामैकोनाशीतितमोऽध्यायः ॥७९॥

—❀❀❀—

स्कन्द उवाच ।

ततोऽयुतान्त वर्षे च मृगरूपन्दधार सः ।
तत्र श्लेष्मान्तकारण्ये भगवान्भूतभावनः ॥१॥
मुञ्जवच्छिखरे रम्ये दत्त्वा वरं च नन्दिने ।
मार्गकृष्णचतुर्दश्यां भौमेन च समन्विते ॥२॥
त्रिनेत्री च सुवर्णाभ एकशृंगी मनोहरः ।
तुङ्गश्रवो विचित्रांगी सुदंष्ट्री चकितेक्षणः ॥३॥
विवेश मृगयूथे वै इच्छागतिर्मृगोत्तमः ।
पेक्ष्य मृगास्तुदेशाङ्गं चक्रुर्हार्द्राशितं भृशम् ॥४॥
कृतार्थं मेनिरे तत्र स्वमात्मानं विभीषणः ।
अनेन संगमान्नोऽत्र भद्रस्थानं भविष्यति ॥५॥
कृत्वेति चेतसा सर्वे जहुर्दुःखानि सर्व्वशः ।
यत्र यत्र प्रयातं वै हरेण मृगरूपिणा ॥६॥
व्रजन्तिस्म मृगास्तस्य भूत्वा तेऽनुचरा मुदा ।
क्रीडयन्तिस्म ते तत्र मृगयूथा इतस्ततः ॥७॥
कृत्वेति पतिरस्माकं पुरोधायाञ्जसा शिवं ।
लेलिह्यन्ते मृगास्तं वै अतिहार्देण यूथपाः ॥८॥
आत्मानमिति कृत्वा च तदङ्गेषु मुदान्विताः ।
कण्डूयन्तिस्म सुस्नेहं तद्विग्रहेषु कुम्भज ॥९॥
केचिन्मृगा मुखेनैव हार्द्ररूपमिति स्वकं ।
ववल्गुस्तत्र तैः सार्द्धं हरो हरिणरूपधृक् ॥१०॥
अचीक्रीडत्सहानन्दं क्वचित्स्थानं विलंघयन् ।
नानापुष्पलताकीर्णे अक्रीडत्पशुपो भृशम् ॥११॥
तत्पुष्पाणि समाघ्राय मृगैः समम्सितस्ततः ।
निदाघेऽपि तथा भूयो मृगयूथैः समं विभुः ॥१२॥
पीत्वा तज्जलमक्रीडत् कन्दर..षु प्रजन्मुदा ।
साद्वलानि सुखं खादन्तथा ग्रीष्मे मृगांगधृक् ॥१३॥
सुविहारं पुनश्चक्रे मृगैः प्रसेवितो वने ।
गुहासु निवसन्नित्यमक्रीडत्पशुपो भृशम् ॥१४॥
यूथपैश्च मृगैः सार्द्धं सकृद्दु वल्गा तृणानि च ।
शरदि वै तथा भूयो मृगश्रेष्ठो मृगैः समम् ॥१५॥
अक्रीडत्तद्वने नित्यं पतत्फलानि भक्षयन् ।
हसन्ते च मृगैः सार्द्धं तद्वने चरितो विभुः ॥१६॥
गह्वरेषु वसन्नूनं तृणमूलान्यभक्षयत् ।
ते वनस्पतयस्तत्र फलन्तिस्म फलानि च ॥१७॥
प्रेक्ष्य पशूत्तमं तं वै विस्मयोत्फुल्लकन्धराः ।

कुञ्जेपु च मुदा तत्र स्थितो रोमन्थयद्विभुः ॥१८॥
मृगरूपो मृगैः सार्द्धमक्रीडयत्पृथक् पृथक् ।
लताः सुपुष्पिताः सर्व्वाः फलन्तिस्म स्वकं क्वचित् ॥१९॥
आलोक्य पशुपं तत्र मृगयूथपुरःसरम् ।
मन्दं मन्दं ववुर्वाता मन्दसुरभिशीतलैः ॥२०॥
सर्वकाले यथा योग्यैस्तमभिप्रेक्ष्य विस्मयाः ।
ववर्षुः पुष्पवर्षाणि वृक्षाः प्रोत्तुङ्गकन्धराः ।
यत्र यत्र मृगं यातं लक्षीकृत्य विभुर्मुदा ॥२१॥
सूर्य्यस्तेपे हि तं प्रेक्ष्य सुस्नेहेन विचित्रकं ।
तत्र तस्य सुखायैव कृत्वेति मनस्यद्भुतम् ॥२२॥
शिशिरेऽपि च शीतांशुः स्वल्पं हिम स्रवत्तथा ।
व्योम्नः प्रेक्ष्याद्भुतं रूपं हार्देण पशुपं तथा ॥२३॥
अभूवन् पक्षिणः प्रेक्ष्य स्थगितगतयोऽपि तं ।
अद्भुतं चित्ररूपं च यत्रैवमेव संस्थिताः ॥२४॥
स्थगितगतयो भूमन् तत्रैव पशवः पुनः ।
तं प्रेक्ष्याऽपि कदा दृष्टं कृत्वेति स्मेदृशं मृगम् ॥२५॥
सिंह-शार्दूल-भल्लूका व्याघ्र-खड्ग-गजा वृकाः ।
हून्दार-शूकराश्चैव मृगधूर्त्ताश्च मर्कटाः ॥२६॥
तन्मृगाणां मुने तत्र गतिं च बाधितुं कदा ।
अभूवन्न समर्थास्ते तं प्रेक्ष्य हार्दचेतसः ॥२७॥
अपि पुरार्दितास्तैश्च स्वच्छन्दं विचरन्ति ते ।
जहुर्भयानि चैतेभ्यो मृगाश्च तत्पुरोगमात् ॥२८॥
विचरन्ति स्म चारण्ये मृगाश्च तत्पुरोगमाः ।
एवं भयानि संत्यज्य स्वच्छन्दगतयस्तदा ॥२९॥
कृष्णसाररुरुन्यंकु - हरिणास्तद्वने मुदा ।
कुञ्जेपु वृक्षमूलेपु अक्रीडयन्यथासुखम् ॥३०॥
विचरन्तिस्म भूयस्ते दरीपु च गुहासु च ।
वाग्मतीसलिलेष्वार्य्यः संक्रीड्य तत्तटेपु च ॥३१॥
क्वचित्सिद्धाश्रमे रम्ये तद्भृगूपतनेपु च ।
चन्द्रार्कतीर्थतीरे ते अक्रीडयन्महत्सुखम् ॥३२॥
परिवार्य्य मृगैर्भूयो निकुंजे निर्जने क्वचित् ।
मृगरूपधरो रुद्रो रेमे बहुसुखं तदा ॥३३॥

एवं शिवोऽसौ नृमृगैः समं च
क्रीडां चकारातिसुखं पशूनां ।
दिव्यं दशाब्दं विपिने च नाके
विभुश्च देवा निरदर्शनात्तत् ॥३४॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये
पशुपति क्रीडनन्नामाशीतितमोऽध्यायः ॥८०॥

—:❀❀:—

स्कन्द उवाच ।

ततः क्वचिद्धि कालान्ते भगवान्पाकशासनः ।
अदर्शनान्महेशस्य त्रिविष्टपं विहाय च ॥१॥
संमंत्र्य गुरुणा सार्द्धं देवैर्लोकैश्च यानगैः ।
विष्णुना सहितो गत्वा ब्रह्माणमिदमब्रवीत् ॥२॥

इन्द्र उवाच ।

भगवन्पद्मगर्भाभ पद्मयोने ह्ययोनिज ।
त्रातुमर्हसि नो नाथ दुःखाच्छम्भोरदर्शनात् ॥३॥
शंभुं विना न लोकालं कर्य्यं निष्पन्नमात्मभूः ।
लोकस्यालोकनं शंभुं न पश्यामोऽधुना विभो ॥४॥
इदं रहस्यं विप्रेन्द्र ज्ञायते यदि दानवैः ।
क्रीयते हरणं लोभान्मम राज्यस्य निश्चयम् ॥५॥

ब्रह्मोवाच ।

मार्गयामो वयं शंभु हरे लोकेपु सांप्रतं ।
सप्तद्वीपेपु भो देवाः पर्व्वतेपु दरीपु च ॥६॥
प्रापयिष्यामो ह्यवश्यं तं मा मा खेदय वासव ।
स्वं स्वं यानं समास्थाय गच्छध्वं देवता ध्रुवम् ॥७॥

स्कन्द उवाच ।

इत्याकर्ण्य वचो देवा ब्रह्मणो मुखसंभवम् ।
तं मार्गितुं ययुश्चेशं विधिविष्णुवृपादयः ॥८॥
रुद्रलोके ययुर्देवा आर्य्यलोके च मार्गितुम् ।
शक्रलोकेऽजलोके तं विष्णुलोके च मामके ॥९॥
गाणपत्ये च चान्द्रे वै नाक्षत्रके तथापरे ।
यमलोके पुनः सौरे कौबेरके च सत्वरम् ॥१०॥
अग्निलोके च नैर्ऋत्ये वायव्ये वारुणे पुनः ।
अमार्गयंस्तमीशानं ब्रह्माद्योऽमराः पुरा ॥११॥
सप्तद्वीपेपु देशेपु समुद्रेपु समन्ततः ।
दिक्पर्वतेपु तं देवा अमार्गयंस्तथोत्तरे ॥१२॥
कुत्रापि नालभं देवास्तमीशानं घटोद्भव ।
आययुर्हिमवन्तं ते अन्वेपयन्दरीपु च ॥१३॥
ददर्श नारदो व्योम्नो मुञ्जवत्पर्व्वतोत्तमे ॥१४॥
नन्दिकेशं भ्रमाच्छ्रेष्ठमवुधश्च तमीश्वरं ।
अब्रवीत्सहसा तेभ्यो दृष्टो रुद्रो मया विभो ॥१५॥
मुञ्जवच्छिखरे रम्ये प्रतिष्ठति मुदा विभुः ।
श्रुत्वा तद्वचनं देवा ब्रह्मादयः प्रहर्पिताः ॥१६॥
प्रययुस्तत्र यानैस्ते यत्र नन्दी स्थितो गिरौ ।
महेश्वरप्रतीकाशं ददृशुर्नन्दिनं सुराः ॥१७॥
त्रिलोचनं जटाशीर्पं शूलडमरुहस्तकम् ।
सनन्दी चागतान्देवान्ददर्श यानगान्मुदा ॥१८॥
उदतिष्ठत्स भूयो वै प्रेक्ष्य देवान्समागतान् ।

प्रत्युद्ययौ तान्नन्दी च यावत्ते तत्र नागताः ॥१९॥
प्रणनाम मुदा भक्त्या ब्रह्माणं विष्णुमव्ययम्।
प्रवेश्य सत्कृतान्नन्दी यथायोग्यं समासने ॥२०॥
संपृच्छ्य कुशलं तेषां विरराम मुदान्वितः।

देवा ऊचुः।

किं शिवेन शरीरेण अनेन नन्दिकेश्वर ॥२१॥
शश्वदुपस्थवार्त्तेन पराधीनेन नो विभो।
क्लिश्यामहे वयं नाके यं विना सन्ततं शिवम् ॥२२॥
अन्वेषणाय तस्यैवमिहागता वयं द्विज।
तदीश्वरस्य वृत्तान्तं वेत्ता त्वमेव निश्चितम् ॥२३॥
बुध्वेतीहागता नन्दिन् प्रकथ्यतां च नोऽधुना।

नन्दिकेश्वर उवाच।

अत्रैव चार्चितः स्थाणुर्य्यथा शक्त्या च भक्तितः ॥२४॥
तुष्टवान्भगवान्मह्यं वरं दत्तं मदीप्सितम्।
स्वकीयं विभुरेकांशं दत्त्वा मह्यं पुनस्तदा ॥२५॥
भविष्यं श्रावयन्भूयो भगवानमरोत्तमाः।
देवा ह्यागत्य मद्धेतोस्त्वाभिषेचन्ति मङ्गलैः ॥२६॥
भविष्यसि गणश्रेष्ठ इत्युक्त्वान्तर्दधे विभुः।

धिषण उवाच।

उपायं वक्ष्यहं शक्र लभ्यते येन दर्शनम्।
ईश्वरस्य सुरा अस्माभिः तच्छृणुत हि मद्वचः ॥२७॥
त्रैलोक्येषु च शैलेषु देशेषु सागरेषु च।
अस्माभिर्नागतं यत्र तत्स्थानं नैव विद्यते ॥२८॥
खिन्नाः क्लिष्टा वयं द्रष्टुमसमर्थाश्च तं विदुः।
तं द्रष्टुं वद कः शक्तो विष्णुं पितामहं विना ॥२९॥

इन्द्र उवाच।

अहो ऋतं वचो देवा यदुक्तं गुरुणाऽधुना।
पथ्यमेतद्वचो नो वै तद्दर्शनप्रसूचकम् ॥३०॥
विभो ब्रह्मन्नमस्तुभ्यं कार्य्यकारणसंविदे।
नमस्ते भगवन्विष्णो सर्व्वकारणसंविदे ॥३१॥
धातः समाधिना चात्र द्रष्टव्यो भवता शिवः।
यत्र तिष्ठति शंभुर्वै तत्स्थानमुच्यतां हि नः ॥३२॥
तस्माद्योगवलेनाशु प्रविलोक्य महीतलं।
प्रसाद्यतां विभोऽस्माकमधुना खिन्नचेतसाम् ॥३३॥

स्कन्द उवाच।

तस्य तद्वचनं श्रुत्वा ब्रह्मा लोकपितामहः।
दध्यौ समाधिना साक्षात्तेजो रूपं तमीश्वरम् ॥३४॥
स्थित्वा निश्चलं सम्यक् सुप्तमीनो यथा ह्रदः।
अब्रवीदीदृशं वाक्यं ध्यात्वा योगेश्वरं तदा ॥३५॥

ब्रह्मोवाच।

अतो याम्यदिशि स्थाने योजनैकप्रमाणके।
पादे हिमवतः पुण्ये रम्ये सिद्धाद्रिसंज्ञके ॥३६॥
श्लेष्मान्तकालये तत्र शंकितोऽस्मि महेश्वरम्।
अधुना तत्र गन्तव्यं मधुजित्त्रिदिवेश्वराः ॥३७॥

स्कन्द उवाच।

ब्रह्मणो वचनं श्रुत्वा हर्षप्रफुल्लमानसाः।
साधु साध्विति वदन्तो बभूवुः सिद्धकारणाः ॥३८॥
ददृशुस्तद्वनं देवास्तस्माच्छ्लेष्मान्तकं मिथः।
एतदेव वनं पुण्यं सत्यं सत्यमिति ब्रुवन् ॥३९॥
किंशुकाशोकवकुलैः पुष्पितैः सुविराजितम्।
मन्दारैर्विविधैः कुन्दैरर्ज्जुनैरुपशोभितम् ॥४०॥
करवीरैः कदम्बाद्यैः सिन्दुवारैस्तथाऽपरैः।
पुन्नागैर्जातिभिश्चान्यैर्नाना - जातिसुगन्धिभिः ॥४१॥
सर्ज्जबिल्ववकैर्जत्रैश्च तचम्पकजम्बिरैः।
दाडिमैर्बीजपूरैश्च कदलीपनसैर्विभो ॥४२॥
द्रुमच्छायानिकुञ्जैश्च कुसुमैः सुमनोहरैः।
लताभिः फुल्लपुष्पाभिर्विविधाभिर्विराजितम् ॥४३॥
जीवं जीवमयूरैश्च कूजद्भिश्चैव कोकिलैः।
भ्रमद्भिश्च द्विरेफैश्च समन्तादुपशोभितम् ॥४४॥
चकोरै राजहंसैश्च खंजरीसारसैर्विभो।
वराहयूथसंक्रान्तैर्मृगयूथैश्च संयुतम् ॥४५॥
कपिशार्दूलगवयैर्व्याघ्रहुंङ्कारकैस्तथा।
संप्रेक्ष्य तद्वनं दिव्यं देवलोकमनोहरम् ॥४६॥
गन्तुं प्रचक्रिरे देवास्तद्दर्शनसमुत्सुकाः।

देवाश्च शंभोर्वचनाद्धि भक्त्या
तं नन्दिकेशं ह्यभिषिच्य तस्मात्।
तेनैव सार्द्धं प्रययुर्ध्रुवं ते
तीरे मुदा वाक्प्रभवापगायाः ॥४७॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे श्लेष्मान्तकवनदर्शनं नामैकाशीतितमोऽध्यायः ॥८१॥

—❀❀❀—

स्कन्द उवाच।

एवं प्राप्ते नदीतीरे देवसैन्ये तदा पुरा।
भूयस्ते ददृशुर्दिव्यं वाग्मत्याः दक्षिणे कुले ॥१॥
कदलीवनसंच्छन्नं फुल्लपादपशोभितं।
वाग्मत्याः पुलिने दिव्ये हंससारसशोभिते ॥२॥
नानापुष्पसमाकीर्णं नदीस्वच्छार्णराजितं।

गन्धामोदनपुष्पाणां वासितं मधुरादिभिः ॥३॥
मुक्ताचूर्णप्रकाशाभिर्वालुकाभिरितस्ततः ।
क्रीडन्तीं ददृशुर्देवाः कन्यां काञ्चिन्मनोरमाम् ॥४॥
निर्म्मलेन्दुप्रतीकाशतोयप्रवाहसंयुते ।
पुलिने वेदिकां स्वच्छैर्विनिर्म्मन्तीं सुवालुभिः ॥५॥
नीलाब्जपत्रनेत्रान्तां तन्वंगीं सुपयोधरां ।
स्मिताननां चन्द्रवक्त्रां सर्वचिह्नैश्च संयुताम् ॥६॥
विषमलोचनां दिव्यां विम्बौष्ठीं सप्तवर्षिकाम् ।
दिव्यवस्त्रपरीधानां सर्वाभरणभूषिताम् ॥७॥
कोटिकन्दर्पसौन्दर्य्यां कोटिसूर्य्यप्रभायुताम् ।
महातेजस्विनीं कन्यां देवलोकजितप्रभाम् ॥८॥
भ्राजमानां पुलिने तां मनोहरां च मोहिनीं ।
एकाकिनीं समालोक्य ब्रह्मविष्णुपुरन्दराः ॥९॥
विस्मयं परमं जग्मुर्भृशं मोहवशङ्गताः ।
मुमुहुर्देवताः शेषा अत्यन्तं प्रेक्ष्य सुन्दरीम् ॥१०॥
हरिणीनयनां दिव्यां चित्रार्पिता इव स्थिताः ।
प्रोवाच वचनं ब्रह्मा विष्णुः शक्रप्रचोदितः ॥११॥
हृदि शंकां विधायैव रूपौदार्य्यगुणेन वै ।

ब्रह्मोवाच ।

एकाकिनी महारण्ये कथं तिष्ठसि कन्यके ॥१२॥
सर्वसौन्दर्य्यसंयुक्ता का त्वं वदाधुना च मे ।
रूपेण तेजसा चिह्नैः पार्वती त्वं भवेद्ध्रुवम् ॥१३॥
शुचिस्मिते त्वया भद्रे दृष्टोऽसौ भुवनेश्वरः ।
नो लोकानां विना शंभुं न शोभते किलाम्बिके ॥१४॥
शम्भुं लोकस्य भर्त्तारं न पश्यामो हरं शिवे ।
भुवनेषु च सर्वेषु पर्वतेषु दरीषु च ॥१५॥
मार्गमाणा हि तं क्लिष्टा द्रष्टुकामा इहागताः ।
अवश्यं विद्यते देवि त्वत्सन्निधौ वदेश्वरः ॥१६॥
भवानी यत्र तत्रार्य्ये भवेश्वरो न संशयः ।

देव्युवाच ।

अतो नैर्ऋत्यभागे च सर्वपुष्पोपशोभिते ॥१७॥
नानाद्रुमलताकीर्णे बहुमृगसमाजके ।
वाग्मत्याः पश्चिमे देशे विस्तीर्णे मृदुशाद्वले ॥१८॥
द्रक्ष्यसे तत्र तं धातो मृगरूपधरं हरम् ।

स्कन्द उवाच ।

इत्युक्त्वा सहसा देवी तत्रैवान्तर्दधे भुवि ॥१९॥
ततोऽब्रुवन् सुरास्तत्र विलं देवी निमज्जकं ।
तुष्टुवुश्च ततो देवास्तस्यै च त्रिविधैस्तदा ॥२०॥
आधाय चाञ्जलिं मूर्ध्नि परिक्रम्य पुनः पुनः ।

देवा ऊचुः ।

(अत्र कश्चित्पुस्तके गुह्येश्वर्य्याः सहस्रनामोल्लेखमस्ति)
मातर्देवि नमस्तेऽस्तु भवान्यै सततं नमः ॥२१॥
अव्यक्तायै अलक्षायै व्यक्ताव्यक्तस्वरूपिणि ।
कात्यायन्यै कलाधात्र्यै अम्बिकायै शिवे नमः ॥२२॥
मायायै गतमायायै मायामोहितसंहरे ।
जगदैश्वर्य्यरूपार्य्ये जगन्मोहिनि ते नमः ॥२३॥
गुह्याख्यायै च रौद्रायै गुह्येश्वरि नमोऽस्तु ते ।
वरं देहि च नो मातर्येन द्रक्ष्यामहे विभुम् ॥२४॥

स्कन्द उवाच ।

स्तुत्वैवं विबुधास्तां वै स्मृत्वा तद्वचः पुनः ।
ततः पदातिनो भूत्वा विविशुस्तद्वनं महत् ॥२५॥
अन्वेषयन्सुरास्तत्र पशुरूपधरं हरं ।
शनैः शनैश्च कुञ्जेषु कन्दरीषु गुहासु च ॥२६॥
मृगकूटं स्थलं पश्चादारुरुहुः सुरास्ततः ।
किरातेशश्च यत्रास्ते श्रमक्लिष्टाः स्थिताः क्षणम् ॥२७॥
ददृशुस्ते महारण्यं मृगस्थली-समुद्भवम् ।
नानापुष्पसमाकीर्णं जग्मुस्तत्र वनं पुनः ॥२८॥
ततस्तदुच्चशैलेन्द्रमागत्य विबुधेश्वराः ।
अधोऽवलोक्य ते देवा अद्राक्षुस्तं मृगोत्तमम् ॥२९॥
शिलातले सुखासीनं मृगैश्च परिवारितम् ।
सर्वभूधरमध्यस्थं काञ्चनाद्रिर्यथा बभौ ॥३०॥
तिष्ठतो मृगयूथस्य मध्ये गुप्तस्य सर्वतः ।
एकश्रृंगं तथैकांघ्रिं तप्तहाटकवर्च्चसम् ॥३१॥
चारुवक्त्राग्निदशनं श्वेतग्रीवोदरोत्तमम् ।
सितविद्धक्ष्चितपृष्ठे नानाचिह्नैर्विराजितम् ॥३२॥
पीनोन्नत-कटिस्कन्धं निमग्नाग्र-शिरोधरम् ।
विम्बौष्ठं ताम्रजिह्वास्यं दंष्ट्रांकुरविराजितम् ॥३३॥
सर्व्वावयवशोभाढ्यं चित्ररोमविराजितम् ।
प्रणम्य दण्डवद्देवा शनैर्हृदा पठन्स्तवम् ॥३४॥
ॐनमःशिवाय रुद्राय पशूनां पतये नमः ।
पशुरूपाय सर्व्वाय पशुपाय नमो नमः ॥३५॥
नमामश्चरणं तेऽद्धा व्रजामः शरणं हि ते ।
रक्ष पाहि विभो नस्त्वं त्वच्छरणागतान्हर ॥३६॥
ततस्ते विबुधाः सर्वे शिखरात्संप्रधाविताः ।
जिघृक्षया गृहीतुं तमरुन्धन् सर्व्वतो दिशः ॥३७॥
ततः प्रणतया शीघ्रं अलद्वा इव निःसृताः ।
जगृहुः सहसा श्रृङ्गं ब्रह्मविष्णुपुरन्दराः ॥३८॥
श्रृङ्गाग्रं प्रथमं गत्वा गृहीतं वज्रपाणिना ।
मध्यं धात्रा ततस्तस्य गृहीतं प्रणतो व्रजन् ॥३९॥

…केशवश्चापि मूलं तस्य मृगात्मनः ।
…रेव गृहीतं तत्त्रिधा कृत्वा बभंज हि ॥४०॥
…डं पतितं शृङ्गं त्यक्त्वा तेषां करेषु सः ।
… सहसाकाशं भगवान्हरिणेश्वरः ॥४१॥
…न्काले सुरास्तत्र विषण्णवदना मुने ।
…हिंते गतेऽभूमन् वक्त्रं प्रेक्ष्य मिथो हरेः ॥४२॥
… गगनमुत्प्रेक्ष्य उद्धायास्यासु चंचलम् ।
…यञ्जलिमाधाय त्रिदशास्तुष्टुवुस्तदा ॥४३॥

देवा ऊचुः ।

…मःशिवाय शर्व्वाय सर्वेषां पतये नमः ।
… रुद्राय रौद्राय रौद्राणां पतये नमः ॥४४॥
…देवाय देवाय देवानांपतये नमः ।
… रूपाय लक्ष्याय तेजसां पतये नमः ॥४५॥
…व्यक्तस्वरूपाय नमो व्यक्तिविभूतिने ।
…स्वरूपिणेऽजाय प्रपञ्चागोचराय च ॥४६॥
…रूपाय विश्वाय विश्वेषां पतये नमः ।
…य परमेशाय परातीताय वै नमः ॥४७॥
…पराय पालाय पार्वतीवल्लभाय च ।
…य हरिणेशाय हरिणाङ्कधृते नमः ॥४८॥
…रूपाय मान्याय व्योमस्थाय नमो नमः ।
…ोऽस्तु चैकशृङ्गाय त्रिनेत्राय नमो नमः ॥४९॥
…ोऽस्तु चैकपादाय दंष्ट्राविभूषिताय च ।
…रूपाय भव्याय पशुपाशविनाशिने ॥५०॥
…भिः क्रीडयमानाय पशूनां पतये नमः ।
…देहं समाश्रित्य प्रमथैः पावने वने ॥५१॥
…च्छया संचरायेश पशुरूप नमोऽस्तु ते ।
…कनिर्वाणबीजाय एकरूपविधारिणे ॥५२॥
…दानैकदक्षाय स्थित्युपकारिणे नमः ।
…त्रे च भक्तिनां नित्यं पशुरते नमोऽस्तु ते ॥५३॥
…क्तो भव महेशान व्यक्तो भवात्र चाम्बरात् ।
…ां शरणागतानां नो दीयतां दर्शनं विभो ॥५४॥

स्कन्द उवाच ।

…वं स्तुत्वाऽमरास्तस्मै मृगरूपाय शंभवे ।
…योमस्थाय ह्यलक्ष्याय प्रणमंस्तं मुहुर्मुहुः ॥५५॥
…ामभिर्विविधैः पुण्यैः स्तुत्वा त्रिभुवनेश्वरम् ।
…णेमुश्च सुराः शेषाः दण्डपत्पातयंस्तनुम् ॥५६॥
… तद्व्योम्नि तेजः प्रतिबिम्बरूपं
…ते चोद्गतास्या ददृशुस्तदा तम् ।
नीहारसंच्छाद्य विहायसि स्थितं ।
मार्त्तण्डबिम्बं च यथा हि लोकाः ॥५७॥

❀इतिश्रीस्कन्दपुराणे हिमवत्खण्डे पशुक्रीडने शृङ्गग्रहणं नाम द्व्यशीतितमोऽध्यायः ॥८२॥

स्कन्द उवाच

ततः स्तवोत्तमं श्रुत्वा त्रिविधोक्तं नतिं तदा ।
सुभक्तिं प्रेक्ष्य तेषां च तुतोष भगवान् विभुः ॥१॥
सर्वलोकोपकाराय तेभ्यः प्रबोधितुं पुनः ।
द्योतयन्प्रभयाकाशं भगवानिदमब्रवीत् ॥२॥

हरिणेश्वर उवाच ।

भो भो देवा वचो यूयं शृणुत प्रोच्यतेऽधुना ।
हितार्थं चैव सर्व्वेषां संसारिणां विशेषतः ॥३॥
शृंगमात्रेण सन्तुष्टा भवन्तु सुरसत्तमाः ।
किंकार्य्यं वः शरीरेण हारिणेन पुनर्मम ॥४॥
विहरणे समाप्ते मे मृगरूपेण मल्लितौ ।
प्रबोधितो हि यद्येवं शृणुत भारतीं सुराः ॥५॥
यद्येतद्वपुर्वं गृह्य संस्थापितं भवेन्मम ।
चतुष्पादोऽखिलो धर्म्मः सर्व्वो मुक्तिं गमिष्यति ॥६॥
ततो लोका विनङ्क्ष्यन्ति रसा पुण्या भविष्यति ।
तव परिश्रमो यत्नो मोघो विबे भविष्यति ॥७॥
मत्कारणानि शृङ्गाणि भवता करणानि च ।
एतानि स्थापयिष्यन्तु भवन्तो हि सुरोत्तमाः ॥८॥
संस्थिते विग्रहे लिङ्गे स्थाने चास्मिन्मनोहरे ।
सुभिक्षं महती वृष्टिर्भविष्यति न संशयः ॥९॥
पुण्यतरेऽत्र मत्क्षेत्रे सर्व्वदुष्कृतनाशने ।
यावन्ति भुवि तीर्थानि आसमुद्रस्सरांसि च ॥१०॥
ममाज्ञया गमिष्यन्ति गिरिगह्वरसंभवात् ।
तिस्रः कोट्योऽर्द्धकोटीनां तीर्थानां च सुरोत्तमाः ॥११॥
स्थानानि च भविष्यन्ति एकैकांशैर्निरन्तरम् ।
अहं चात्र स्थिते लिङ्गे दीप्तितेजोमयानने ॥१२॥
ज्योतिरूपे मयि क्षेत्रमेतद्ध्रदो भविष्यति ।
वाणपुत्रो बली दैत्यो ब्रह्मणो वरदर्पितः ॥१३॥
भ्रातृभिः सममत्रैव रुन्धिष्यति च वाग्मतीम् ।
नागह्रद इतिख्यातं निरुद्धं वाग्मतीजलम् ॥१४॥
स्वच्छदर्प्पणसंकाशं पद्मोत्पलविभूषितं ।
झषनक्रसमाकीर्णं सारसं हंससेवितम् ॥१५॥
नानाशैवलसंकीर्णं भीषणं मकरादिभिः ।
तस्मिन्नागह्रदे भीषमे स्थास्याम्यन्तर्जले चिरम् ॥१६॥
त्रिंशद्वर्षसहस्राणि सर्व्वलोकैरगोचरम् ।

❀ अत्रावसरे कस्मिंश्चित्पुस्तके शिवसहस्रनाम वर्त्तते

जग्राह केशवश्चापि मूलं तस्य मृगात्मनः ।
त्रिभिरेव गृहीतं तत्त्रिधा कृत्वा बभंज हि ॥४०॥
त्रिखण्डं पतितं शृङ्गं त्यक्त्वा तेषां करेषु सः ।
उद्ययौ सहसाकाशं भगवान्हरिणेश्वरः ॥४१॥
तस्मिन्काले सुरास्तत्र विषण्णवदना मुने ।
अन्तर्हिते गतेऽभूमन् वक्त्रं प्रेक्ष्य मिथो हरेः ॥४२॥
ततो गगनमुत्प्रेक्ष्य उद्धायास्यासु चंचलम् ।
शिरस्यञ्जलिमाधाय त्रिदशास्तुष्टुवुस्तदा ॥४३॥

देवा ऊचुः ।

ॐनमःशिवाय शर्व्वाय सर्वेषां पतये नमः ।
नमो रुद्राय रौद्राय रौद्राणां पतये नमः ॥४४॥
महादेवाय देवाय देवानांपतये नमः ।
तेजो रूपाय लक्ष्याय तेजसां पतये नमः ॥४५॥
व्यक्ताव्यक्तस्वरूपाय नमो व्यक्तिविभूतिने ।
प्रपञ्चरूपिणेऽजाय प्रपञ्चागोचराय च ॥४६॥
विश्वरूपाय विश्वाय विश्वेषां पतये नमः ।
पराय परमेशाय परातीताय वै नमः ॥४७॥
परापराय पालाय पार्वतीवल्लभाय च ।
हराय हरिणेशाय हरिणाङ्कधृते नमः ॥४८॥
मृगरूपाय मान्याय व्योमस्थाय नमो नमः ।
नमोऽस्तु चैकशृङ्गाय त्रिनेत्राय नमो नमः ॥४९॥
नमोऽस्तु चैकपादाय दंष्ट्राविभूषिताय च ।
पशुरूपाय भव्याय पशुपाशविनाशिने ॥५०॥
पशुभिः क्रीडयमानाय पशूनां पतये नमः ।
पशुदेहं समाश्रित्य प्रमथैः पावने वने ॥५१॥
स्वेच्छया संचरायेश पशुरूप नमोऽस्तु ते ।
लोकनिर्वाणबीजाय एकरूपविधारिणे ॥५२॥
वरदानैकदक्षाय स्थित्युपकारिणे नमः ।
अत्रे च भक्तिनां नित्यं पशुरते नमोऽस्तु ते ॥५३॥
व्यक्तो भव महेशान व्यक्तो भवात्र चाम्बरात् ।
त्वां शरणागतानां नो दीयतां दर्शनं विभो ॥५४॥

स्कन्द उवाच ।

एवं स्तुत्वाऽमरास्तस्मै मृगरूपाय शंभवे ।
व्योमस्थाय ह्यलक्ष्याय प्रणमंस्तं मुहुर्मुहुः ॥५५॥
नामभिर्विविधैः पुण्यैः स्तुत्वा त्रिभुवनेश्वरम् ।
प्रणेमुश्च सुराः शेषाः दण्डपत्पातयंस्तनुम् ॥५६॥
तद्व्योम्नि तेजः प्रतिबिम्बरूपं
ते चोद्गतास्या ददृशुस्तदा तम् ।
नीहारसंच्छाद्य विहायसि स्थितं ।
मार्त्तण्डबिम्बं च यथा हि लोकाः ॥५७॥
❀इतिश्रीस्कन्दपुराणे हिमवत्खण्डे पशुक्रीडने शृङ्गग्रहणं नाम द्व्यशीतितमोऽध्यायः ॥८२॥

स्कन्द उवाच

ततः स्तवोत्तमं श्रुत्वा त्रिविधोक्तं नतिं तदा ।
सुभक्तिं प्रेक्ष्य तेषां च तुतोष भगवान् विभुः ॥१॥
सर्वलोकोपकाराय तेभ्यः प्रबोधितुं पुनः ।
द्योतयन्प्रभयाकाशं भगवानिदमब्रवीत् ॥२॥

हरिणेश्वर उवाच ।

भो भो देवा वचो यूयं शृणुत प्रोच्यतेऽधुना ।
हितार्थं चैव सर्व्वेषां संसारिणां विशेषतः ॥३॥
शृंगमात्रेण सन्तुष्टा भवन्तु सुरसत्तमाः ।
किंकार्य्यं वः शरीरेण हारिणेन पुनर्मम ॥४॥
विहरणे समाप्ते मे मृगरूपेण मल्लितौ ।
प्रबोधितो हि यद्येवं शृणुत भारतीं सुराः ॥५॥
यद्येतद्वपुषं गृह्य संस्थापितं भवेन्मम ।
चतुष्पादोऽखिलो धर्म्मः सर्व्वो मुक्तिं गमिष्यति ॥६॥
ततो लोका विनङ्क्ष्यन्ति रसा पुण्या भविष्यति ।
तव परिश्रमो यत्नो मोघो विधे भविष्यति ॥७॥
मत्कारणानि शृङ्गाणि भवता करणानि च ।
एतानि स्थापयिष्यन्तु भवन्तो हि सुरोत्तमाः ॥८॥
संस्थिते विग्रहे लिङ्गे स्थाने चास्मिन्मनोहरे ।
सुभिक्षं महती वृष्टिर्भविष्यति न संशयः ॥९॥
पुण्यतरेऽत्र मत्क्षेत्रे सर्व्वदुष्कृतनाशने ।
यावन्ति भुवि तीर्थानि आसमुद्रम्सरांसि च ॥१०॥
ममाज्ञया गमिष्यन्ति गिरिगह्वरसंभवान् ।
तिस्रः कोट्योऽर्द्धकोटीनां तीर्थानां च सुरोत्तमाः ॥११॥
स्थानानि च भविष्यन्ति एकैकांशैर्निरन्तरम् ।
अहं चात्र स्थिते लिङ्गे दीप्तितेजोमयानने ॥१२॥
ज्योतिरूपे मयि क्षेत्रमेतद्वरदो भविष्यति ।
बाणपुत्रो बली दैत्यो ब्रह्मणो वरदर्पितः ॥१३॥
भ्रातृभिः सममत्रैव रुन्धिष्यति च वाग्मतीम् ।
नागह्रद इतिख्यातं निरुद्धं वाग्मतीजलम् ॥१४॥
स्वच्छदर्पणसंकाशं पद्मोत्पलविभूषितं ।
झषनक्रसमाकीर्णं सारसं हंससेवितम् ॥१५॥
नानाशैवलसंकीर्णं भीषणं मकरादिभिः ।
तस्मिन्नागह्रदे भीष्मे स्थास्याम्यन्तर्जले चिरम् ॥१६॥
त्रिंशद्वर्षसहस्राणि सर्व्वलोकैरगोचरम् ।

❀ अत्रावसरे कस्मिंश्चित्पुस्तके शिवसहस्रनाम वर्त्तते

तपसोग्रेण सार्द्धं वै अत्र वासुकिना मुदा ॥१७॥
सुखं स्थास्याम्यहं देवाः कश्चित्कालं जलान्तरे ।
वृष्णिकुलोद्भवो यर्हि विष्णो त्वं च भविष्यसि॥१८॥
स कृष्ण इति विख्यातो दानवान्स हनिष्यति ।
प्रद्युम्न इति विख्यातः कलौ हि त्वत्सुतो बली ॥१९॥
स हनिष्यति तान्दैत्यान्विपक्षांश्च दिवौकसाम् ।
निहते वाणपुत्रे च तदैव पद्मसंभव ॥२०॥
सेतुं विदार्य्य कृष्णेन विमोचिष्यति वाग्मतीम् ।
वाग्मत्यां च नदीभूते वने जाते च मण्डले ॥२१॥
समुत्पश्यामि विष्णोऽज तच्छरीरशिलातनूः ।
सुरभीक्षीरधाराभिः प्रसिंचेत्तत्र चिह्निते ॥२२॥
तदाहं दृश्यते म्लेच्छैः खनितेन च शैकते ।
मां मूर्तिनं हि जानीयाज्ज्योतिर्लिङ्गोपरि स्थितम् ॥२३॥
यथा प्राग्भविता देशः सर्व्वम्लेच्छैरधिष्ठितः ॥२४॥
ततोऽहमहतैर्म्लेच्छैरपि धर्म्मविवर्ज्जितैः ।
चम्पकद्रुमछायाभिराच्छादनप्रशोभनम् ॥२५॥
तान्निहत्य हरे धातर्यूयं सर्व्वे महोत्सवैः ।
करिष्यथ सुखं राज्यमत्रैव च यथापुरा ॥२६॥
त्रिसहस्रसमान्ते च किरातैर्भुज्यते पुनः ।
क्षत्रियैस्तान्निहत्त्याज तद्राज्यं च तथा पुनः ॥२७॥
ततो जानपदस्तत्र भविष्यति महत्पुरं ।
धर्मनिष्ठाग्रजैः पुण्यं सर्व्ववर्णाश्रमैर्युतः ॥२८॥
धर्म्मः संस्थाप्यते तत्र ब्राह्मणैः स्वाश्रमाश्रितैः ।
सम्यक् प्रवृत्तयो भूयो भविष्यंत्यत्र तत्कलौ ॥२९॥
करिष्यन्ति महत्कीर्त्तिमनेकां मम शासनात् ।
प्रजाः पुण्यतराः सर्व्वा धर्म्मिष्ठाश्च नराधिपाः ॥३०॥
अतिक्रान्ते रसापूर्णे जम्बूद्वीपे किरातकैः ।
मत्प्रभावाद्धि मत्क्षेत्रं नोऽत्र स्थानं भविष्यति ॥३१॥
एवं सम्यक्स्थितं चात्र देशे पौरजने कलौ ।
॥ मामर्च्चयिष्यन्ति सर्व्वलोकाश्च सर्वदा ॥३२॥
भूयोऽहं यैः सकृद् दृष्टो विधिवद्वन्दितस्स्तवैः ।
मम लोकं प्रयास्यन्ति मद्ध्यानैर्दग्धकिल्बिषाः ॥३३॥
इमं देहं मृगोद्भूतं कूटागारोदरस्थितम् ।
प्रणमतीड्यभक्त्या यः पशुजन्मविवर्जितः ॥३४॥
गंगाया उत्तरेणाज दक्षिणेनाश्ववक्त्रतः ।
क्षेत्रं हिमवतं पुण्यं योजनानां शतार्द्धतः ॥३५॥
हिमाद्रितुङ्गशृङ्गाढ्या(द्या)मन्मुखसम्भवा नदी ।
वाग्मती शिवगंगार्य्या तथा ब्रह्मसरस्वती ॥३६॥
गंगा शतगुणं ज्येष्ठा पवित्रं सलिलं भवेत् ।
वाग्मत्यां किल मत्क्षेत्रे स्नातो नारायणो भवेत् ॥३७॥
पूर्व्वेण चन्द्रभागाया अन्ततश्चोत्तरतस्तथा ।
वाग्मतीसलिले स्नातो विष्णो तव पुरं व्रजेत् ॥३८॥
यावत्स्रवन्ति तोयानि हिमाद्रेः सानुशेखरात् ।
कटककन्दरोद्भूता गंगासमा च सर्व्वदा ॥३९॥
वाग्मतीजलसंस्नाता महापातकिनोऽपि वा ।
त्यक्त्वा देहं नरा यान्ति ममलोकं न संशयः ॥४०॥
स्रवन्तीनां वरा पुण्या वाग्मती मन्मुखोद्भवा ।
पञ्चवर्षसहस्रान्ते सा हि गंगा भविष्यति ॥४१॥
कीर्त्तनादेव संशुद्धा दर्शनाद्भूतिमाप्स्यति ।
पानावगाहनात्तस्यास्तारयन्त्वात्मकं कुलम् ॥४२॥
लोकपालास्तु चत्वारः तीर्थं कांक्षन्ति तत्स्वयम् ।
तत्र स्नात्वा दिवं यान्ति ये मृतास्तेऽपुनर्भवाः ॥४३॥
भीतार्त्तैः संयुतो दुःखी व्याधिभिः पीडितस्तथा ।
ग्रहभूतापमृत्युप्रयुक्तोऽपस्माररुग्युतः ॥४४॥
वाग्मत्या जीवने स्नात्वा प्रविश्य च यथाविधि ।
तत्तदोपजपीडाभिस्तस्य शान्तिर्भविष्यति ॥४५॥
वाग्मत्त्यामत्र ये स्नात्वा मामर्चयन्ति सन्ततं ।
उद्धरिष्ये च तान्प्रीत्या घोरात्संसारसागरात् ॥४६॥
यस्तस्याः वारिणा पूर्णमेकं वा घटमुद्धरेत् ।
स्नापनार्थं च नियमी भक्तिश्रद्धान्वितो बुधः ॥४७॥
अश्वमेधफलं प्राप्य मम लोके महीयते ।
अम्भसां विन्दवो यावत्तावद्वर्षं च संख्यया ॥४८॥
अन्तस्तीरेण तस्यां च मन्मूलादभिनिःसृतं ।
मृगशृङ्गोदकं नाम परं तीर्थं भविष्यति ॥४९॥
संगमे विधिवत्स्नात्वा उपस्पृश्य यथाविधिः ।
यावज्जीवकृतं पापं तत्क्षणादेव नश्यति ॥५०॥
संस्पृश्येमां तनुं धीरो मम लोकं व्रजिष्यति ।
अत्र षर्व्वरिका नाम वाग्मत्याः पूर्वके तटे ॥५१॥
तत्रापि च कृतस्नानात्पार्व्वती परितुष्यति ।
तयोर्योगेन वाग्मत्त्यां तीर्थे आर्य्याभिधानके ॥५२॥
सकृत्स्नात्वाशु निष्पापो मम लोकं गमिष्यति ।
सर्व्वजन्मार्जितैः पापैर्विमुक्तः सान्वयः शुचिः ॥५३॥
स्नातः पर्व्वसु मल्लोकभाग् विहाय च संभवं ।
उमायास्तत्र मद्धेतोः कृत्वा संध्या जपार्च्चनम् ॥५४॥
संसाराभिभयं त्यक्त्वा मल्लोके स्थास्यति ध्रुवम् ।
षष्टीधनुःसहस्राणि यानि पालति वाग्मती ॥५५॥
प्रमाणानि च तावन्ति मुक्तितीर्थं विदुः सुराः ।
नासौ पापं कृतघ्नो वा कदाचित्प्राप्नुयान्नरः ॥५६॥
शौचिताः श्रद्धया युक्ताः सत्यसन्धाश्च धीरये ।
वाग्मत्त्यां ते नराः स्नात्वा लभन्ते चोत्तमां गतिम् ॥५७॥

दुःखितो वा रुजार्त्तो वा अपि पातकसंयुतः ।
वाग्मत्या जीवने स्नात्वा पश्येद्यो मां सुपूजितम् ॥५८॥
तस्य शान्तिर्भवेत्सद्यो देहान्ते शांकरं व्रजेत् ।
मत्प्रवाहजले स्नात्वा सर्व्वं नश्यति किल्बिषम् ॥५९॥
ईश्वरश्च समुत्तीर्णा भविष्यन्ति यदामराः ।
पूजयन्ति च मां स्नात्वा प्रशमं यान्त्यशेषतः ॥६०॥
वाग्मती सरितां श्रेष्ठा यत्र यत्रावगाह्यते ।
तत्र तत्र फलं तेषां राजसूयाश्वमेधयोः ॥६१॥
विविधान्यत्र तीर्थानि सन्ति पुण्यानि सर्व्वदा ।
तज्जलस्पर्शमात्रेण सर्व्वपापैः प्रमुच्यते ॥६२॥
कोषरूपं भवद्भिश्च संहृत्य तच्च निर्म्मलं ।
तीर्थं कोषोदकं नाम पुण्यं सुरर्षिसुप्रियम् ॥६३॥
तत्र स्नात्वा नरो धीमान् सत्यसंधो जितेन्द्रियः ।
सर्वैनोभिर्विनिर्मुक्तः सर्वमेधफलं लभेत् ॥६४॥
अनासक्तं भवेद्यस्तु दक्षिणेन महात्मनः ।
शैलेश्वरस्य पुरुषो लप्स्यते च परां गतिम् ॥६५॥
यो भृगुपातनं कृत्वा कामक्रोधविवर्जितः ।
विमानेन दिवं गच्छेद्वृतः सोऽप्सरसां गणैः ॥६६॥
भृगुमूलं परं तीर्थं ब्रह्मंस्ते निर्म्मितं पुरा ।
ब्रह्मोद्भवमिति ख्यातं तस्यापि शृणु यत्फलम् ॥६७॥
संवत्सरं बुधस्तत्र स्नायते विबुधो यमी ।
ब्रह्मलोके वसेन्नित्त्यं ब्रह्मणा सह मोदते ॥६८॥
तत्र गोरक्षकं नाम गोवृषपदवीक्षितं ।
आलोक्य तम्पुमान्देवं गोसहस्रफलं लभेत् ॥६९॥
अतः पूर्व्वोत्तरे भागे गुह्येश्वरीति नामतः ।
मम मूर्त्तिश्च सा शक्तिर्भक्तानां मोक्षकृत्सदा ॥७०॥
ते वै गुह्यां न जानन्ति मम मायाविमोहिताः ।
तपस्तपोधनानाञ्च सिद्धिक्षेत्रेऽनिशं स्थिता ॥७१॥
देवदानवगन्धर्व्वाः सिद्धविद्याधरोरगाः ।
मुनयोऽप्सरसो यक्षा मोहिता मम मायया ॥७२॥
प्रभासाच्च प्रयागाच्च नैमिषात्पुष्करादपि ।
कुरुक्षेत्राच्च विबुधाः क्षेत्रमेतद्विशिष्यते ॥७३॥
गौरीशैलं च तत्रैव गच्छेत्सिद्धनिषेवितं ।
तत्र सन्निहिताऽजस्रं पार्व्वती शिखरप्रिया ॥७४॥
लोकमाता भगवती लोकरक्षार्थमुद्यता ।
प्रणमेत्तां च गुह्याख्यां मुक्तः स एव किल्बिषैः ॥७५॥
पंचोपचारकैर्भक्त्या परिक्रम्य जपैः स्तवैः ।
यो मेऽर्च्चति प्रियां मंत्री सायुज्यं लभते कृती ॥७६॥
त्यजति यस्तनुं तस्या अधस्ताद्वाग्मती तटे ।
महीयते स मल्लोके विहाय कष्टसंसृतिम् ॥७७॥

स्तनकुण्डे उमाया यः स्नाति तत्र च मानवः ।
स्कन्दलोकमवाप्नोति देहान्ते दहनच्छविः ॥७८॥
तीर्थं पञ्चनदं नाम पुण्यं ब्रह्मर्षिसेवितं ।
अग्निष्टोमफलं तत्र स्नानमात्रेण लभ्यते ॥७९॥
शूलोद्भङ्गे शुभे तीर्थे स्नायते यस्तु मानवः ।
जातिस्मरणमाप्नोति पापैर्मुक्तो न संशयः ॥८०॥
तस्मादुत्तरतस्तीर्थं परमं सिद्धसेवितं ।
नाम्ना प्रातर्कं पानीयं गुह्यं गुह्यकरक्षितम् ॥८१॥
पूर्णसंवत्सरं यस्तु तत्र स्नायेद्बुधोऽनिशम् ।
भविष्यति गुह्यकश्रेष्ठो ममानुचरवल्लभः ॥८२॥
देव्याः शिखरवासिन्यो ज्ञेयं पूर्वोत्तरेण च ।
दक्षिणेन तु वाग्मत्याः प्रसृतं कन्दरोदरात् ॥८३॥
तीर्थं ब्रह्मोदयं नाम पुण्यं पापप्रणाशनं ।
तत्र ब्रह्मन् जलं स्पृष्ट्वा स्नात्वा वाप्युत्तरेण वा ॥८४॥
न गच्छेन्मृत्युलोकं स न पापैर्लिप्यते कदा ।
प्रव्रजन्सुन्दरीतीर्थे समारुह्याद्रिशेखरम् ॥८५॥
आप्लुत्य सो लभेद्रूपं देहान्ते चोत्तमां गतिं ।
वाग्मत्त्या मणिमत्याश्च संविद्धे रुद्रधारया ॥८६॥
स्नायते विधिवद्भक्त्या सर्वैनोभिर्विवर्जितः ।
पूर्व्वजन्मार्ज्जितैनोभिः स मुक्तो नात्र सशयः ॥८७॥
वर्णाश्रमो हि यः कश्चित्स्नात्वा दद्यात्तिलोदकं ।
तृप्ताश्च पितरस्तस्य भवेयुर्यर्हिवत्सरम् ॥८८॥
कव्यं यः कुरुते तत्र त्रिसप्तकुलमाशु च ।
अधःस्थानपि धीरोऽसौ समुद्धरति न संशयः ॥८९॥
शंखासुरो हि मद्भक्त्या नित्त्यं मां तत्र पूजयन् ।
अवध्यस्तस्य मूलं तच्छंखमूल इति श्रुतः ॥९०॥
शंखमूले महातीर्थे करिष्यामि जलाप्लवं ।
इति कृत्वा धिया धीरः स्वाश्रमान्निःसृतः पथि ॥९१॥
फलं प्राप्नोति सम्पूर्णं वाजपेयाश्वमेधयोः ।
सप्तजन्मार्जितं पापं सन्त्यज्य मत्पुरं व्रजेत् ॥९२॥
यत्र कुत्रापि वाग्मत्यां स्नायते विधिवन्मुदा ।
पशुतिर्यक्तनुं त्यक्त्वा समृद्धे जायते कुले ॥९३॥
सर्व्वपर्वसु यत्नेन कृत्वा स्नानं विशेषतः ।
जपार्च्चनाच्छिवध्यायी नरो नारायणो भवेत् ॥९४॥
मन्मनुं जप्यते तत्र गन्तासौ मत्पदं परं ।
वाग्मत्या विष्णुपद्याश्च संभेदे देवसेविते ॥९५॥
तीर्थे पंचनदे नाम्नि स्नातो यास्यति शांकरं ।
वाग्मत्याश्च प्रभावत्याः संगमे मुनिसेविते ॥९६॥
स्नायते विधिवद्भक्त्या कामक्रोधविवर्जितः ।
गंगाद्वारफलं यावल्लब्ध्वा यास्यति वैष्णवम् ॥९७॥

पश्येमां पूजयेद्भक्त्या पशुयोनिञ्च मासिकां।
मुच्यते पशुपाशेभ्यः कामसिद्धिश्च लभ्यते ॥९८॥
पशुयोनिजलं पीत्त्वा पशुयोनौ न जायते।
अत्र विद्याधरा देवाः सिद्धाश्च मुनयोऽमराः ॥९९॥
मां पूजिष्यन्ति संस्नात्वा यक्षोरगाश्च राक्षसाः।
स्वल्पेनाप्यत्र यत्किञ्चिद्द्विजेभ्यो दीयते धनम् ॥१००॥
तदक्षयं भवेदाशु दानपुण्यफलं महत्।
तत्तत्सर्व्वं प्रयत्नेन कर्त्तव्यं चैव देवताः ॥१॥
बलिष्ठं क्षेत्रमन्येषां त्रिषु लोकेषु न विद्यते।
अपि दुष्कृतकर्म्माणः क्षेत्रेऽस्मिन्निवसन्ति ये ॥२॥
सततं पुरुहूतस्य सितस्थाने वसन्ति ते।
श्वसुरो मे स्थितो यत्र हिमवान्भूधरेश्वरः ॥३॥
प्रभवन्ति यतः सर्व्वा गंगाद्याः सरितां वराः।
तस्मात्क्षेत्रवरे पुण्ये पुण्याः सर्वाश्च निम्नगाः ॥४॥
सर्वा प्रस्रवणाः पुण्याः सर्वे पुण्या शिलोच्चयाः।
यत्र यत्र स्थिताः स्थाने मे लिङ्गमूर्त्तयोऽनिशम् ॥५॥
तत्तत्स्थानं प्रियं शश्वत्सर्वदुष्कृतनाशनं।
आश्रमो मेऽत्र भविता सिद्धर्षिसुरसेवितः ॥६॥
जलेश्वर इति ख्यातो मल्लिङ्गस्थं जलान्तरे।
योजनाभ्यन्तरं क्षेत्रं समन्तात्सर्वतोदिशम् ॥७॥
मूलक्षेत्रं तु विज्ञेयं मयात्राधिष्ठितं चिरं।
अतः पूर्वोत्तरे भागे वासुकिर्नाम नागराट् ॥८॥
वृतो नागसहस्रेण द्वारि तिष्ठति मेऽनिशम्।
स विघ्नं कुरुते नृणां मत्क्षेत्रं विशतां सदा ॥९॥
प्रथमं स नमस्कार्य्यस्ततोऽहं क्रमशः पुनः।
अनेन विधिना पुंसामविघ्नं विशतां भवेत् ॥१०॥
वन्दते परया भक्त्या यो मामत्र दिवौकसः।
सार्वभौमो भवेद्राजा सर्वलोकनमस्कृतः ॥११॥
गन्धमाल्यैश्च मे मूर्त्तिमभ्यर्च्चयति यो नरः।
सर्वपापानि संत्यज्य मम लोकं गमिष्यति ॥१२॥
घृतेन मधुना वापि दधिक्षीरसपूतकैः।
गन्धोदकेन क्षीरेण शीतोदकेन वा पुनः ॥१३॥
मम स्नानं प्रदत्तास्य महत्पुण्यफलं लभेत्।
अनेनैव लभेत्स्वर्ग्गं लब्धभोगः क्रमान्मम ॥१४॥
घृतेन मम लोकं च मधुनामासुलोककं।
दध्ना वै वैष्णवं लोकं मच्छासनाद्व्रजिष्यति ॥१५॥
विद्याधरपदं भूयात्स्नायतीक्षुरसेन च।
गन्धोदकेन गन्धर्वं क्षीरेण शशिनः पुरम् ॥१६॥
शीतोदकेन निष्पापं उष्णोदकेन पोषकं।
अङ्गपूजान्तु यः कुर्य्यात्पुनर्नानाविधैर्मम ॥१७॥

सर्वकामफलं भुक्त्वा मोदते स ममालये।
अङ्ग प्रदीपमालां यो भक्त्या मम करिष्यति ॥१८॥
देवदेहो भवेदन्ते मम पार्श्वचरोऽनिशं।
अङ्ग प्रदक्षिणं धीरः करिष्यति च भक्तिमान् ॥१९॥
स रूपवान् भवेदत्र निष्पापः परमं व्रजेत्।
अत्र पूजान्तु यो दद्यान्मम भक्त्यातियत्नतः ॥२०॥
आयुष्मान्बलवान्भूत्वा जायते स महीपतिः।
दीपवृक्षन्तु यो दद्याद्भवने मम शोभकम् ॥२१॥
चक्षुष्मांश्च भवेन्नित्यं तेजस्वी जन्मजन्मनि।
गुग्गुलुं दहते यो मे नानाधूपानि भक्तिमान् ॥२२॥
जन्मान्तरकृतैः पापैः स मुच्यते न संशयः।
सुवर्णं चैव वस्त्राणि मदाता मम लोकभाक् ॥२३॥
सवत्सां कपिलां दत्वा भूयो यज्ञफलं लभेत्।
गीतवादित्रनृत्यैश्च स्तुतिभिर्जागरेण वा ॥२४॥
ये मे कुर्वन्ति सेवां वै गमिष्यन्ति ममालयं।
यो दद्याद्भोजनं भक्त्या विप्रेभ्यः श्रद्धयान्वितः ॥२५॥
सोऽमृताशी भवेत्स्वर्गे तृपितामरपूजितः।
व्रतोऽपचारकैर्होमैर्नैवेद्यैश्चारुभिस्तथा ॥२६॥
यजते ब्राह्मणाचार्यो मां श्रद्धया समन्वितः।
षष्टिवर्षसहस्राणि तुषितो दिवि मोदते ॥२७॥
ऐश्वर्य्यं प्रतिपद्येत मम लोके पुनः पुनः।
ब्राह्मणः क्षत्रियो वैश्यः शूद्रः स्त्रीर्वापि संशयः ॥२८॥
शैलेश्वरं तु संस्नाप्य मे मूर्त्तिं यदुपासते।
मत्पार्षदो भवेत्स्वैरं मत्प्रियप्रमथैः सह ॥२९॥
शैलेश्वरं परं गुह्यं गतिः शैलेश्वरे परा।
शैलेश्वरं परं क्षेत्रं न क्वचिद्भुवि विद्यते ॥३०॥
ब्रह्महा गुरुहा गोघ्नः स्पृष्टो वै सर्वपातकैः।
क्षेत्रमेतदनुप्राप्ते निर्म्मलो हि भवेत्तनुः ॥३१॥
अत्र श्लेष्मान्तकारण्ये पुण्ये त्रिदशवन्दिते(सेविते)।
यत्र यत्र मया देवाश्चरता मृगरूपिणा ॥३२॥
आशितं शयितं यातं विहृतं च समन्ततः।
तत्र तत्राभवत्सर्वं पुण्यं क्षेत्रं हि सर्वतः ॥३३॥
मृगस्थलीगिरिं भ्राम्य व्रीहिं विक्षेपयेत्कृतं।
सुवर्णरतिकातुल्यं व्रीहिमेकं च यत्फलम् ॥३४॥
मार्गकृष्णचतुर्दश्यां मत्प्रियायां तिथौ मया।
मृगरूपं धृतं तत्र पशुयोनिपरं विदुः ॥३५॥

स्कन्द उवाच।

इत्युक्त्वा भगवान्व्योम्नि विरराम तदा मुने।
श्रावयंश्च स्वकीयां तां वाणीं लोकोपकारिणीम् ॥३६॥
ये शृण्वन्ति वचः पुण्यं पवित्रं पापनाशनं।

श्रद्धावन्तो हि तद्भक्त्या हरिणेशमुखाच्च्युतम् ॥३७॥
आयुः कीर्तिं यशः सौख्यं प्राप्नुवन्ति न संशयः ।
इह लोके सुखं भुक्त्वा गच्छन्ति शिवलोकम् ॥३८॥
श्रुत्वेति तस्माद्विबुधा वचस्तद्,
कृत्वेति तथ्यं मुमुहुर्भृशं वै ।
ब्रह्मा पुनर्वक्तुमियेष तूर्णं-
हस्तस्य शृङ्गस्य वचो हि हेतोः ॥१३९॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे हरिणेश्वरवाक्यं-
नाम त्र्यशीतितमोऽध्यायः ॥८३॥

—❀❀❀—

ब्रह्मोवाच ।

दुःखार्णवनिमग्नानां प्राणिनां मोक्षहेतुकं ।
यदुक्तं भवता नोऽद्य पुराणं यत्सुधारसम् ॥ १ ॥
त्वन्मुखान्निःसृतं सारं पवित्रं परमेश्वर ।
शृणोति विधिवद्भक्त्या तस्य स्वर्गः करे स्थितः ॥२॥
भूसन्महत्तरं पुण्यं पुराणं पापनाशकं ।
भक्त्या शृणोति यो धीरः स्वर्गस्तस्य न दूरतः ॥३॥
मत्करस्थेन शृंगेण विष्णोर्हस्तगतेन च ।
पुरन्दरकरस्थेन किं विधेयं वदेश्वर ॥४॥

स्कन्द उवाच ।

निशम्यैतद्वचो रुद्रो व्योमस्थः परमेष्ठिनः ।
प्रत्युवाच पुनस्तत्र भगवान्हरिणेश्वरः ॥५॥
यस्त्वत्करस्थितं शृंगं हारिणं मम मध्यगं ।
तत्रैव स्थाप्यतां ब्रह्मन् चन्द्रभागातटे शुभे ॥६॥
गोकर्णेश्वर इत्येवं मेदिन्यां ख्यातिमेष्यति ।
दशग्रीवः स्वकं कार्य्यं साधयिष्यति तत्र माम् ॥७॥
तत्करस्थमिदं विष्णो शृंगमूलं सुशोभनं ।
नीत्वा रसातले रम्ये स्थापनीयं प्रयत्नतः ॥८॥
तं च संपूज्यते भक्त्या नागदानवराक्षसैः ।
शृंगेश्वरमिति प्रोक्तं पातालतलवासिभिः ॥९॥
शृंगाग्रं हारिणं पुण्यं मामेकं त्रिदिवेश्वर ।
नीत्वाऽमरावतीं रम्यां स्थापनीयं हि तत्र वै ॥१०॥
यदा हरति रक्षेन्द्रः त्वत्पुराद्बलदर्पितः ।
स च दक्षिणगोकर्णो भविष्यति पुरन्दर ॥११॥

स्कन्द उवाच ।

इत्युक्त्वा भगवान्तेभ्यः सुरासुरनमस्कृतः ।
द्योतयन्प्रभयाकाशं तत्रैवान्तर्दधे विभुः ॥१२॥
श्रुत्वैतद्वचनं तस्य ब्रह्म-विष्णु-पुरन्दराः ।
विस्मयं परमं जग्मुर्विलीने शंकरे ततः ॥१३॥

संगृह्य सहसा शक्रो हारिणं शङ्कराज्ञया ।
मुदाऽमरावतीं रम्यां निर्ययौ सहसाऽमरैः ॥१४॥
तत्रैव स्थापितं सम्यक् हारिणं च पुरन्दरः ।
नानोपहारकैर्नित्यं पूजितस्म महोत्सवैः ॥१५॥
शृङ्गमूलं तु तन्नीत्वा पाताले रक्षदीपिते ।
स्थापयामास सहसा भगवान्मधुसूदनः ॥१६॥
अपूपूजन्मुदा नित्यं रक्षःपन्नगदानवाः ।
नानोपहारकैर्भक्त्या अद्यापि च तमीश्वरम् ॥१७॥
मध्यमं हारिणं शृङ्गं चन्द्रभागासरित्तटे ।
वाग्मत्याः पश्चिमे तीरे तयोः पूते सुसंगमे ॥१८॥
स्थापयामास तत्रैव भगवान्कमलोद्भवः ।
आनर्च्च विधिवद्भक्त्या श्रुतिभिश्च स्तवैर्मुदा ॥१९॥
ब्रह्मणा स्थापितं श्रुत्वा गोकर्णेशमिति श्रुतं ।
संप्राप्ता मुनयः स्वर्गात्तीर्थयात्राटनार्थिनः ॥२०॥
यावन्ति भुवि तीर्थानि गंगादीनि वनोत्तमे ।
प्रभावाद्देवदेवस्य संभूतानि शुभानि च ॥२१॥
अशेषाणि परिभ्रम्य मुनयः संशितव्रताः ।
ब्रह्माणं प्रणिपत्योचुः गोकर्णं परिपूज्य च ॥२२॥

ऋषय ऊचुः ।

भगवन् त्वां विना स्वर्गे स्थातुं नेच्छामहे चिरं ।
तस्मात्स्वर्गमलं कर्त्तुं प्रसादं कुरु लोकसृक् ॥२३॥

स्कन्द उवाच ।

इत्याकर्ण्य वचस्तेषां पितामहस्तदात्मजं ।
निवासायादिशत्तत्र पौत्रं विश्रवसं ध्रुवम् ॥२४॥
वत्साईयेश्वरं लिङ्गं मदीयं पितृतारकं ।
साधकं योगिनां स्वान्तं लोककामफलप्रदम् ॥२५॥
अहोरात्रमहं स्थास्ये स्वर्गे देवान्प्रबोधयन् ।
यावत्प्रत्यागमिष्यामि तावदत्र प्रपालय ॥२६॥
देवर्षयो हि मां सर्वे यूयमत्राश्रितं विदुः ।
कौणपाद्ये तपिष्यन्ति साधिष्यन्ति प्रसादतः ।
भाद्रकृष्णचतुर्दश्यां लिंगे संस्थापिते कुहौ ॥२७॥
स्नापयन्स मुनीन्देवान्तीर्थे गन्तुं प्रचक्रमे ।
ततो ब्रह्मा ययौ स्वर्गं ब्रह्मलोकं सनातनम् ॥२८॥
तमर्च्चितुं समादिश्य सर्वैश्च मुनिभिः सह ।
(अत्र गोकर्णेश्वरसहस्रनामोल्लेखः कंचित्पुस्तके दृश्यते)
देवाश्च शेषाः प्रययुर्हि नाकं,
संपूज्य लिङ्गं सहसा च भक्त्या ।
गोकर्णरुद्रं विविधार्हणैश्च-
आधाय वाक्यं हरिणेश्वरस्य ॥२९॥
विश्रवाश्च ततस्तत्र तपस्तेपे भृशन्तदा ।

मात्रा सह कुबेरस्य गोकर्णेशं प्रपूजयन् ॥३०॥
कुबेरस्तत्र सन्तेपे भक्त्येशमर्हयन्सदा ।
द्वादशाब्दं समारभ्य यावत्तत्पंचविंशतिम् ॥३१॥
नृत्यगीतैः स्तवैर्वाद्यैः पितामहः प्रतोषितः ।
ददौ लंकां कुबेराय राज्यं स्वर्णमयं विभुः ॥३२॥
अवात्सीत्तत्र पौलस्त्यः कौणपवर्गसेवितः ।
भुञ्जन्सहस्रवर्षान्तत्पुष्पकेणाचरन्मुदा ॥३३॥
कश्चित्कालान्तरे धीमन् सुमाली राक्षसाधिपः ।
अप्रेषयद्दुहितरं पार्श्वं विश्रवसो मुनेः ॥३४॥
गतासौ नैकसी देवी पितुर्वचनकारिणी ।
ब्रह्मारण्यं महद्रम्यं तत्र वै विश्रवा मुनिः ॥३५॥
कन्यां रूपवतीं प्रेक्ष्य तन्वंगीं सुपयोधरां ।
धर्म्मेण वरयामास विधिवन्मुनिपुङ्गवः ॥३६॥
रराम स तया सार्द्धं कामसोहवशङ्गतः ।
तुतोष नैकसी चापि लब्ध्वा विश्रवसं पतिम् ॥३७॥
तस्या देव्या विशालाक्ष्या गर्भादेव भयंकरः ।
सुषुवे नैकसी पुत्रं दशग्रीवं महाबलम् ॥३८॥
तस्य संजातमात्रेण कम्पते धरणी भृशं ।
मांसाभिलाषिनिष्टा ये पतन्ति दिवि पक्षिणः ॥३९॥
ववर्ष रुधिरं चैव मेघो घोरस्वरोऽभवत् ।
निष्प्रभं चैव तं नित्यं निशाकरो व्यजायत ॥४०॥
पुत्रं दशशिरोयुक्तं नीलाञ्जनचयप्रभं ।
संप्राप्य विश्रवास्तत्र तुतोषातिशयन्मुदा ॥४१॥
दशभिः कर्मभिर्युक्तो मन्त्रप्रदानदीक्षितः ।
कालेन वर्द्धयामा भ्रातृभिः सह तद्वपुः ॥४२॥
वीर्य्येण वयसा वापि संश्रितः संबभूव हि ।
केचिद्दिने च संप्राप्ते धनेशं पुष्पके स्थितम् ॥४३॥
अद्राक्षीद्रावणस्तत्र पुष्पकेन समागतं ।
दृष्ट्वा दशशिराः श्रीमानपृच्छन्मातरं हि तम् ॥४४॥
दिनान्तार्कवर्णेन आयतं को वदस्व मे ।
स च कस्य सुतो मातः श्रोतुमिच्छामि साम्प्रतम् ॥४५॥
विमानं पुष्पकं पुण्यं केनोपायेन विद्यते ।
पुत्रस्य वचनं श्रुत्वा नैकसी चारुहासिनी ॥४६॥
अब्रवीन्मधुरं वाक्यं विस्मयोद्धतमानसा ।

नकस्युवाच ।

तवाग्रजो ह्ययं पुत्र धनेशो लोकसम्मतः ॥४७॥
अर्जितं तपसाऽनेन विमानं पुष्पकं सुत ।
त्रैलोक्यमपि वश्यं स्याद्यदि पुत्र त्वमिच्छसि ॥४८॥
आराध्यतां पितुर्वाक्याद् गोकर्णं भुवनेश्वरं ।
अप्रार्थयन्मनुं भक्त्या पितरि पूजनायतम् ॥४९॥

लब्ध्वा मनुं पितू रक्षः तपः कर्त्तुं प्रचक्रमे ।
भस्मांगी चैव रुद्राक्षी जजाप तन्मनुं मुदा ॥५०॥
संपूज्य विधिवद्भक्त्या तल्लिङ्गं राज्यलिप्सया ।
जुहोतिस्म हविर्वह्नौ मन्त्रपूतं यथाविधिः ॥५१॥
छित्वा छित्वात्मनः शीर्षं पूर्णाहुतिमकल्पयत् ।
सर्पाणां हि सहस्राणि दशपूर्णे दशाननः ॥५२॥
एतत्कालमसौ तेपे भक्त्या तत्र शिवात्मना ।
आविर्भूतो महालिङ्गाद्रुद्रो दातुं च तद्वरम् ॥५३॥
ब्रह्मा तदा ययौ तत्र वरं दातुं स्वलोकतः ।
व्याजहाराम्बराद्रुद्रस्तस्मै हि वचनं मुदा ॥५४॥
तत्तापसा प्रसंन्तुष्टो भगवान्भक्तवत्सलः ।

गोकर्णेश्वर उवाच ।

वरं वरय भक्त त्वं रावण सुमहातपः ।
तपसा ते कठोरेण सन्तुष्टोऽहं न संशयः ॥५५॥
दास्यामि सांप्रतं तुभ्यं यत्ते मनसि वाञ्छितं ।
दुःप्राप्यमपि वीरार्य्य सर्वलोकसुदुर्ल्लभम् ॥५६॥

रावण उवाच ।

ॐनमः शिवाय भद्राय शंकराय नमो नमः ।
संसारसाररूपाय शंभवे शूलिने नमः ॥५७॥
सर्वज्ञाय च रुद्राय रौद्ररूपाय ते नमः ।
ब्रह्मेश्वराय देवाय सर्व्वदाय नमो नमः ॥५८॥
गोकर्णाख्याय भीमाय अगोचराय भूमने ।
पैतामहाय लिङ्गाय पितृणां पतये नमः ॥५९॥
पराय परमेशाय परापरात्मने नमः ।
परब्रह्मस्वरूपाय पालकाय नतोऽस्म्यहम् ॥६०॥
भक्तेभ्यो वरदानेश व्यक्ताङ्गधारिणे नमः ।
वक्तवत्सल देवेश सर्व्वात्मने नमो नमः ॥६१॥
यदि चेन्मे हि दातव्यं वरं भगवता ध्रुवं ।
याचेऽहं तद्वरं त्वं हि यद्वाञ्छितं हृदा मम ॥६२॥
त्रैलोक्ये संश्रिता लोकास्तिष्ठन्तु मम शासने ।
देवासुरैरवध्यं च तदुद्भवैः तथा परैः ॥६३॥

स्कन्द उवाच ।

ततश्चाकर्ण्य तत्प्रोक्तं स्वीकारं कृतवान्विभुः ।
कौणपाय वरं दत्वा तल्लिङ्गेऽन्तर्दधे ध्रुवम् ॥६४॥
ब्रह्मापि प्रददौ भूयः प्रपौत्राय वरोत्तमं ।
पंचाशद्युगयावद्वै राज्यं सुखं हि भोक्ष्यसि ॥६५॥
ब्रह्माप्यन्तर्दधे तत्र दत्वा वरं स्वभक्तिने ।
श्रुत्वा लब्धवरं तत्र आययुस्तं हि राक्षसाः ॥६६॥
सुमाली माल्यवांश्चैव प्रहस्तश्च तथापरे ।
रावणं च मुदालोक्य लब्धवरमपूपुजत् ॥६७॥

अमन्त्रयत्तदा तत्र रावणो राक्षसैः सह ।
राज्यं कर्तुं च लंकां वै रुद्राजवरदर्पितः ॥६८॥
राजनीतिविशालज्ञो माल्यवानब्रवीत्तदा ।
गन्तुकामः पुरीं लङ्कां सभामध्ये यदृच्छया ॥६९॥
दिव्यां तां नगरीं लङ्कां स्वर्णमयीं विराजितां ।
राक्षसेश्वर ते योग्या यस्यान्तिष्ठति यक्षराट् ॥७०॥
यद्यपि रोचते तस्यां राज्यं कर्तुं च ते सुखं ।
रत्नसुवर्णमय्यां वै गन्तव्यं कौणपेश्वर ॥७१॥
ततो निशम्य तद्वाक्यं माल्यवतो हि रावणः ।
आहूय सर्व्वसैन्यानि प्रस्थितवान् हि सांप्रतम् ॥७२॥
परित्यज्य ययौ रक्षः समुञ्जपदुपत्यकां ।
उपलङ्कां सुवेलाद्रिं रत्नाकरतटाश्रितम् ॥७३॥
सुवेलं स समासाद्य दूतं प्रेषयदाशु वै ।
तस्यां प्रविश्य दूतौऽसौ धनेशमब्रवीत्तदा ॥७४॥

दूत उवाच ।

शृणु कुवेर तद्वाक्यं यदुक्तं रावणेन ते ।
अस्ति चेज्जीवितुं कामः कुवेरे मां पुरी त्यज ॥७५॥
नश्चैतां राजधानीं वै भोक्तुमावाञ्छसि ध्रुवं ।
एतस्याश्चाधिकारी स रावणो द्वारि चाप्तवान् ॥७६॥

स्कन्द उवाच ।

इत्याकर्ण्य वचस्तस्य दूतस्याशु धनेश्वरः ।
मुमूर्च्छ च रुषाविष्टः सभामध्ये व्यवस्थितः ॥७७॥

कुवेर उवाच ।

विकटास्य - वचो यूयं शृणुत सतो गर्हणं ।
दशास्योऽहं च कृत्वेति प्रजगल्भे रुषाश्रितः ॥७८॥
नाहं भीषयितुं शक्यो दशास्य पौरुषेण ते ।
निःसृतोऽहं पुराद्योद्धुं कोपिना सह सांप्रतम् ॥७९॥
वदैतद्वचनं सूक्त दशास्याय प्रकोपिणे ।
भोज्ये लंकां सुखं राज्यं त्वां प्रशास्याधुनाथ वा ॥८०॥

स्कन्द उवाच ।

ततश्चादाय सन्देशं निधिपतेः मुखाच्च्युतं ।
तत्सर्वमब्रवीद्दूतो रावणायान्तिकं व्रजन् ॥८१॥
निशम्य वचनं दूतात् कटुकं कर्णविप्रियं ।
चुकोप रावणोऽत्यन्तं ज्वालाग्निः सर्पिषा यथा ॥८२॥
तस्मिन्विनिर्ययौ द्वारात्सहसैन्यैर्धनाधिपः ।
युद्धार्थं राक्षसैः सार्द्धं पुष्पकस्थो महोज्वलः ॥८३॥
अभूद्युद्धमहत्तत्र सैन्ययोरुभयोर्भृशम् ।
नानावाद्योद्भवैर्नादैः कोलाहलमभूत्पुनः ॥८४॥
रथस्था रथिभिः सार्द्धं पदातयः पदातिभिः ।
शस्त्रास्त्रैर्मुहुरुद्दिश्य मिथो जघ्नुर्भृशं रणे ॥८५॥
पुष्पकस्थः कुवेरोऽपि गदया सत्वरं रुषा ।
जघान कौणपान्सैन्यान्प्रमर्दयत्समन्ततः ॥८६॥
रावणोऽपि स्वकान्सैन्यान्मर्दयन्तं ददर्श तम् ।
अमर्षैः पूरितो रक्षो हन्तुं ब्रह्मास्त्रमाददे ॥८७॥
अब्रवीदनिलो व्योम्नो धनदं कर्णतर्प्पयन् ।
मायाहव्यं कुवेराद्यमहेशवरभूतिना ॥८८॥
ब्रह्मास्त्रयोजितो रक्षः अजेयस्त्रिदशैरपि ।
त्यज्यैमां नगरीमन्यं गच्छ जीवन् हि सुस्थितं ॥८९॥
निशम्य वचनं वायोर्गुह्यकेशः ससंभ्रमः ।
प्रत्याययौ पुरीं भूयः अनीकैः सह सांप्रतं ॥९०॥
संस्थाप्य पुष्पके सैन्यान् पदार्थान्गुह्यकेश्वरः ।
त्यक्त्वा लंकां पुरीं व्योम्ना ययौ विश्रवसोऽन्तिकं ॥९१॥
गोकर्णेशः स्थितो यत्र गत्वा पित्रे निवेदितः ।
हिमाद्रि (द्रेः) शिखरे सर्व्वं तच्चेष्टां दीनशोभनः ।
तच्चेष्टां च समाकर्ण्य रावणस्य धनाधिपात् ॥९२॥
समाश्वास्य च पौलस्त्यं व्याचष्ट विश्रवा वचः ।
मा मा दुःखय पुत्र त्वं प्राप्तव्यं तपसः फलम् ॥९३॥
तेन तपस्विने रुद्रो ह्यवश्यं दास्यते फलं ।
आराधयेश्वरं वत्स हिमवच्छेखरे ततः ॥९४॥
आशुतोषः फलं शीघ्रं ते दास्यति न संशयः ।
ययौ मुदा तपस्तप्तुं स्वर्णकूटे हिमाचले ॥९५॥
पितुर्वाक्यमिति श्रुत्वा धनेशः सह गुह्यकैः ।
स एव दिक्पालवरोऽभवद्वै,
अद्याप्युदीच्यां दिशि सर्वकर्त्ता ।
वरं च लब्ध्वा गिरिशप्रसादा-
ज्ज्ञानाख्यतीर्थे सलिलाप्लवाद्वै ॥९६॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे रावणतपःसिद्धिर्नाम-
चतुरशीतितमोऽध्यायः ॥८४॥

—❀❀❀—

स्कन्द उवाच ।

ततः स्वर्णमयीं लंकां प्रविवेश दशाननः ।
स्वसैन्यैर्मन्त्रिभिः सार्द्धं मुमुदे तत्र वै सुखम् ॥१॥
राज्याभिषेचितस्तस्यां सरक्षोभिर्महोत्सवैः ।
सम्मंत्र्य मंत्रिभिः सार्द्धं युद्धोद्योगं चकार वै ॥२॥
ततो लङ्कां ययौ पूर्वं रावणो राक्षसैः समं ।
आदाय पुष्पकं जित्वा गुह्यकानगमत्ततः ॥३॥
धनदस्य पुरीं जित्वा पातालमविशत्पुनः ।
प्रयुयोधासुरैः सार्द्धं निर्जित्य सहसा स तान् ॥४॥
अनन्तभवनं प्रेक्ष्य सर्वरत्नोपशोभितम् ।

मुमोद रावणस्तत्र जिघृक्षू रत्नसर्वशः ॥५॥
रत्नजिघृक्षुणा सार्द्धं फणितो युयुधुर्भृशं ।
सहस्रवदनस्तत्र तमालोक्य चुकोप हि ॥६॥
उच्छश्वास सहस्रास्यः तच्छ्वासेन स कोपितः ।
उद्धूतं रावणं सैन्यं सहस्रयोजनं च तत् ॥७॥
दीनमुखः ससैन्योऽसौ शक्रपुरीं ययौ पुनः ।
देवेन्द्रं प्रार्थयामास युद्धायाशु दशाननः ॥८॥
जित्वा शक्रं महद्युद्धं मेघनादस्य मायया ।
अमरावतीं समं सैन्यैः प्रविवेश दशाननः ॥९॥
लिङ्गं हि हारिणं प्रेक्ष्य पूजितं वज्रपाणिना ।
उत्पाट्य च करे कृत्वा मुमुदेऽतिशयन्तदा ॥१०॥
शतमप्सरसां सार्द्धं रत्नानि सुबहूनि च ।
गृहीत्वा स्वबलैः सार्द्धं प्राप्तवांश्च महोदधिम् ॥११॥
दक्षिणोदधिवेलोर्म्मिमालावलिसुमण्डिते ।
विद्रुमद्रुमसंघाते सन्ध्यासमयसन्निभे ॥१२॥
मुक्तागुटिकसंकीर्णे रत्नोपलविभूषिते ।
नागदानवनारीणां क्रीडास्थाने मनोरमे ॥१३॥
शृङ्गाग्रं हारिणं पुण्यं सुरेन्द्रभवनाहृतं ।
त्रिकूटमूले संस्थाप्य सन्ध्यामास्ते दशाननः ॥१४॥
सन्ध्यावन्दननिर्वृत्तो रावणो लोकरावणः ।
न शशाक तमुद्धर्त्तुं वज्रकल्पमिव स्थितम् ॥१५॥
शृङ्गाग्रं हारिणं दृष्ट्वा वज्रकल्पमिव स्थितं ।
तं त्यक्त्वा स्वपुरीं लङ्कां प्रविवेश दशाननः ॥१६॥
अथ हृष्टमनो भूत्वा रावणो रुद्रभक्तिमान् ।
निर्म्ममे निलयं तस्य रत्नतोरणदीपितम् ॥१७॥
गोकर्णमेव संकल्प्य पूजनाद्रावणेन वै ।
स च दक्षिणगोकर्ण इति विख्यायते भुवि ॥१८॥
अद्यापि पूजितो भक्त्या राक्षसैर्धर्मकांक्षिभिः ।
नित्यमेव समागत्य नानोपहारकैर्मुदा ॥१९॥
विभीषणोऽपि चागत्य संपूजति तमीश्वरं ।
लब्धवरः शिवाद्यत्र पंचोपचारकैः सदा ॥२०॥
यत्र लब्धं वरं पूर्व्वं वज्रनाभेन तीर्थके ।
तत्रैव स तपः कृत्वा विभीषणोऽमरोऽभवत् ॥२१॥
इन्द्रोऽपि भगवान्स्वर्गे ब्रह्मणा भूरितेजसा ।
अभिषिक्तः स्वयं राज्यं पालयामास चोत्सवैः ॥२२॥
अथ वक्ष्याम्यहं भूयो माहात्म्यं तस्य शूलिनः ।
यो गच्छति नरस्तत्र यत्र गोकर्णशंकरः ॥२३॥
पथि गमनमात्रेण तमीश्वरं प्रदर्शितुं ।
इहजन्मकृतैः पापैः स मुक्तो हि न संशयः ॥२४॥
कदाचिद्दैवयोगेन यः पश्यति तमीश्वरं ।
सप्तजन्मकृतैः पापैर्विमुक्तः परमं व्रजेत् ॥२५॥
यः संस्पृश्यति तल्लिङ्गं तदात्मा भक्तितो नरः ।
सर्व्वपापैर्विनिर्मुक्तः परमं तं समासते ॥२६॥
जप्योपहारकैर्दिव्यैर्भक्तः पूजति यो हि तं ।
नैव पुनर्भवं तस्य कार्य्यं लीनं भवेत्परे ॥२७॥
अद्यापि च भवेत्सुते राक्षसा हि महाबलाः ।
तमेवाश्रित्य गोकर्णं दक्षिणाख्यं प्रपूजनात् ॥२८॥
हारिणस्य प्रवक्ष्यामि माहात्म्यमद्भुतं तथा ।
विष्णुना स्थापितं पूर्व्वं बलि सद्मनि तस्य च ॥२९॥
वासुकिर्नागराजेन्द्रो नित्यमर्हति हारिणं ।
शृंगेश्वरं मुदा भक्त्या नानोपहारपूजनैः ॥३०॥
तस्माद्वरोत्तमं प्राप्य शृंगेश्वरप्रपूजनात् ।
दधार निश्चलां क्षोणीमद्यापि पन्नगेश्वरः ॥३१॥
बलिश्चाप्यनिशं भक्त्या तमर्हति च हारिणं ।
तस्माद्वरं स मे लब्ध्वा राज्यं करोति तत्र वै ॥३२॥
तमर्च्चति सदा भक्त्या विष्णुर्महोत्सवैर्मुदा ।
पाताले प्रवसन्सार्द्धं बलिना प्रदधे महीम् ॥३३॥
सलोमा कालनेमी च हिरण्यकशिपुस्तथा ।
अनुह्लादश्च संह्लादो निकुंभो हि महाबली ॥३४॥
इत्यादिभिः सदा दैत्यैः पूज्यते हारिणेश्वरः ।
नानोहारकैर्दिव्यैर्भक्त्या जपैस्तवार्च्चनैः ॥३५॥
एते दैत्या महावीराः सप्त रसातलानि वै ।
दधति न्यायतोऽद्यापि शृङ्गेश्वरप्रसादतः ॥३६॥
तत्रस्था सुखिनो नित्यं सर्व्वलोका भवन्ति वै ।
शृंगेश्वरप्रसादात्ते यैर्यैर्दृष्टं तमीश्वरम् ॥३७॥
ये शृण्वन्ति तमध्यायं हारिणानां प्रशंसनं ।
भक्त्या तमात्मनो भूत्वा तेषां पुण्यफलं शृणु ॥३८॥
यावन्नैव श्रुतं लोकैर्माहात्म्यं हारिणस्य च ।
तावत्कृतानि पापानि मुच्यन्ते श्रवणात्क्षणात् ॥३९॥
धनं धान्यं सुताञ्जायाः प्रभुत्वञ्च सुदुर्ल्लभं ।
प्राप्नुवन्ति च तत्सर्व्वमेतन्माहात्म्यमादतः ॥४०॥
संग्रामे जयमाप्नोति रिपुं विद्रुत्य सांप्रतं ।
असाध्यान्साधयत्याशु लोकमान्यं पदे पदे ॥४१॥
स्त्रियः सौभाग्यमाप्यन्ति श्रुत्वा चैतत्कथां मुदा ।
पतिप्रेष्ठा भविष्यन्ति पुत्रवत्यः पतिव्रताः ॥४२॥
देहान्ते ता उमालोके गच्छन्ति पतिभिः समम् ।
आसते पतिना सार्द्धं महासुखं निरन्तरम् ॥४३॥
हारिणेश्वरमाहात्म्यं ये शृण्वन्ति नरोत्तमाः ।
जाम्बूनदमयैर्यानैर्गच्छन्त्यन्ते परां गतिम् ॥४४॥

एतन्माहात्म्यं कथितं मया ते,।
शृंगेश्वराणां महतां त्रयाणां ।
त्रैलोक्य—संधारण—कारणानां,
सर्व्वाशुभानि प्रहतेश्वराणाम् ॥४५॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे दक्षिणगोकर्णेश्वर-शृंगेश्वराणां माहात्म्यं नाम पंचाशीतितमोऽध्यायः ॥८५॥

—❀❀❀—

अगस्त्य उवाच ।

माहात्म्यं चैव वाग्मत्याः श्रुत्वा तव मुखोद्भवं।
चित्रं मे जायते स्वान्ते दृढं किल्बिषनाशनम् ॥१॥
वाग्मतीति सुविख्याता दुःखसंसृतितारिणी।
कस्मिन्नवसरे जाता महत्पुण्यतमा परा ॥२॥
एतच्छ्रोतुं च वाञ्छामि वद मे सुरसत्तम ।

स्कन्द उवाच ।

साधु मुने महाप्राज्ञ सारं पृच्छसि मामिह ॥३॥
लोकानां पापमोक्षार्थं पुराणं परमं श्रुतम् ।
श्रूयतामभिधास्यामि यमशासननाशकम् ॥४॥
शंकरेण पुरा प्रोक्तं कुलाद्रौ मे पुराणकं।
पूर्वस्मिन्सृज्य सप्तर्षीन्सनकादींश्च योगिनः ॥५॥
ब्रह्माण्डं कपिलं सौदं कश्यपं नारदं भुवः।
संसृज्य मनसैवैतान्धाताऽवसीददतिस्म च ॥६॥
ववृधिरे प्रजा नाजः पेद्य शश्वत्कथंचन ।
दिव्यवर्षशतान्ते च एकमेकं पितामहः ॥७॥
असृजन्मनसा कष्टात्ततोऽवसादनाश्रितः।
तप्तुमना ययौ धाता शिवकूटं हिमालयम् ॥८॥
विना कृपां महेशस्य कथं सृजामि तान्निति।
सस्मार धाता गिरिशेखरे त—
त्स्नानक्रियार्थं प्रथमं हि गंगां।
प्रादुर्भवा सा च ततोऽद्रिकूटात्
स्वच्छा सुकल्लोलकला ववाह ॥९॥
साऽभूद्ब्रह्मवती गंगा सुभद्रा नाम नामतः।
रराज रुचिरं दिव्या वसोधारा इवोत्सवे ॥१०॥
धाता मुमोद तां प्रेक्ष्य अकरोद्धि जलाप्लवं।
भस्मोद्धूलनदेहोऽसौ रुद्राक्षान्प्रदधार वै ॥११॥
रुद्रसूक्तिभिरीशानमृचाभिश्चतुराननः ।
ईशानाद्यैश्च तद्भक्त उपतस्थेऽद्रिशेखरे ॥१२॥
गायत्री चैव सावित्री जलरूपेण संभवे।
ब्रह्मणस्तत्र संध्यायां शक्तीं सुनिर्मले परे ॥१३॥
परमात्मानमात्मानं निर्गुणं तेजसा परं।
स्वकीयांसमहोरात्रं धाताराधितवान्हरम् ॥१४॥
भक्तिभिस्तोषितो धातुः शक्त्या युक्तो महेश्वरः।
गगनाद्वृषकेतुर्वै तद्वरेण्यं समाययौ ॥१५
ब्रह्मध्वनिं समाकर्ण्य चतुरास्येरितं हरः।
मुमोदातिशयं देवस्तां तां प्रेक्ष्य नदीं पराम् ॥१६॥
हर्षोत्साहाट्टहासं स धात्रे प्रोवाच शेखरे।
साधु साधु विधे ब्रह्मन् ब्रूहि वरय यद्वरम् ॥१७॥
इत्युक्ते सहसा धात्रे ईश्वरे चन्द्रशेखरे।
स्वच्छं शंकरजिह्वातो ब्रह्मबिन्दुः पपात वै ॥१८॥
रुद्रहासोद्भवो बिन्दुर्निर्मलं गिरिशेखरात्।
प्रस्यन्दिनी ववाहाशु तरङ्गमालिनी शुभा ॥१९॥
समाप्लावानां कलुषप्रहारिणीं,
ददर्श धाता सुखमाप्रवाहिनीम्।
ददर्श गंगामभिवाहिनीं पुरा
महेशमूर्ध्नि प्रविलास—शालिनीं ॥२०॥
गिरीश - जिह्वाग्रनिसृत्य गामिनीं,
सुशीतलांभः सुतरङ्गमालिनीं।
ततश्च जिह्वाग्रविसारिणीं विभो—
र्विलोक्य धाताशु तुतोष तां नदीं ॥२१॥
प्रणिपत्य महेशानं प्रेक्ष्याम्बरागतं हरिं।
अभिधानं चकाराजः शंकरः सुखजन्मिनाम् ॥२२॥

ब्रह्मोवाच ।

देवि प्रयान्तमर्यादि तेऽभिधानं भविष्यति।
यतो रुद्रमुखोद्भूता वाग्मतीति भवि(वदि)ष्यति ।२३।
त्रिंशद्वर्षसहस्राणि नृणां कलौ हि वाग्मती।
गते पंचसहस्राब्दे सुरसरिद्भविष्यति ॥२४॥
देवासुरमनुष्यैस्त्वं यक्षगन्धर्वकिन्नरैः।
सेविता फलदा तेभ्यश्चतुर्वर्गं च दास्यसि ॥२५॥
वागीशे वाग्भवे वाणि भारति भयहारिणि।
वाग्विभूति भवेशानि भवप्रिये नमोऽस्तु ते ॥२६॥
ब्रह्मशब्देऽनिशं ब्राह्मी वाचिके शब्दरूपिणी।
वाक्य च भाविते भावा नानारूपे नमोऽस्तु ते ॥२७॥
यां विना जीविनः सर्वे शवा एवाचलांगिनः।
वाग्विभूत्यम्बिके सा त्वं शब्दरूपे नमोऽस्तु ते ॥२८॥

विष्णुरुवाच ।

मूलशक्तेः समुद्भूता शंभोर्जिह्वाग्रनिःसृता।
जलरूपेण ते नाम ब्रह्मसरस्वती च सा ॥२९॥
त्रेताद्वापरयोर्मध्ये त्रिंशद्वर्षं सहस्रकं।
ब्रह्मसरस्वती गंगा वाग्देवि त्वं भविष्यसि ॥३०॥
लोका यं यं प्रकांक्षन्ति स्नातकास्त्वयि भारति।

तं तं दत्त्वेप्सितं तान्तान्संसारादुद्धरिष्यसि ॥३१॥
ब्राह्मी माहेश्वरी दुर्गा वाराही कमला शिवा ।
चामुण्डा वैष्णवी काली कौमारी वासवी परा ॥३२॥
गौरी पद्मेश्वरी मेधा सावित्री विजया जया ।
हृष्टिः पुष्टिः स्वधा तुष्टिः स्वाहार्य्या ह्रीश्च मङ्गला ॥३३॥
अणिमाद्यष्टधा चेमा मातरस्ते विभूतयः ।
भारति जलरूपेणावतरसि नमोऽस्तु ते ॥३४॥
ईश्वर उवाच ।
मम जिह्वासमुद्भूता यतस्त्वं देवि वाग्मति ।
वाग्भूपिणी महापुण्या भव सरिद्वराऽनिशम् ॥३५॥
भविता शिवगंगा त्वं मत्तः समुद्भवा यतः ।
सर्वलोका वदिष्यन्ति ते नाम भारती शिवे ॥३६॥
त्रेतादौ सत्यशेषे त्वं दिव्यवर्षशतं सति ।
शिवगङ्गेति संमान्या सर्वलोकैः प्रपूजिता ॥३७॥
भुक्तिमुक्तीप्सितं कामं चतुर्वर्ग्गाजरामृतं ।
स्नातकेभ्यश्च ते तोये दास्यसि सति वाग्मति ॥३८॥
पूजयिष्यन्ति लोकास्त्वां बहुमान्यपुरःसरैः ।
लोकानां फलदा जस्रं भविष्यसि ततोऽनिशम् ॥३९॥
स्नायन्ते त्वयि ये भक्त्या सर्वदा च निरन्तरं ।
विधूतकिल्विषास्ते वै गमिष्यन्ति ममालयम् ॥४०॥
जपार्च्चनं प्रकुर्व्वन्ति त्वत्तटे स्नातकाः शुचौ ।
योगिनस्ते भविष्यन्ति मयि भक्त्या सदात्मनः ॥४१॥
यत्र यत्र किल स्नाता नदीनां संगमे त्वयि ।
लभिष्यन्ति फलं पूर्णमन्यच्छतगुणं सदा ॥४२॥
सर्वपर्वसु यत्नेन स्नात्वा त्वयि वरानने ।
त्वत्तोयैर्मत्प्रियैर्यो मामभिषेचति भक्तितः ॥४३॥
उद्धरिष्याम्यहं तं वै दुःखसंसारसंसृतेः ।
भूतकामेन भूतिं च मद्भक्तिभ्यो ददाम्यहम् ॥४४॥
या स्वशक्त्याऽबला भर्त्तुः प्राणान्ते सहगामिनी ।
त्वयि स्नात्वा परं लोके स्थास्यति पतिना सह ॥४५॥
ततो व्याचष्ट भूतेशः प्रेक्ष्य हरिं पितामहम् ।
सन्तुष्टात्मा ऋचाभिस्तत्सर्वभूतगुहाशयः ॥४६॥
तपसा चैश्वरेणैव त्वया तप्तं यतश्चिरं ।
तस्माद्वै मत्प्रसादात्त्वं जीविनो मिथुनैः सृज ॥४७॥
ततः प्रजाः प्रवर्द्धन्ते चतुरशीतिलक्षकं ।
जातीनां सकलं शश्वन्नान्यप्रकारतो विधे ॥४८॥
विष्णो प्रपालय त्वं तान्स्वकर्म्मभुंजिनोऽनिशम् ।
पश्यामो हरेर्गंगां मच्छक्तिं लोकतारिणीम् ॥४९॥
वाग्मतीं तां मुमुक्षूणां गतिं परां च जीविनां ।
नो गतिर्वाग्मती देवी नराणां वाग्मती गतिः ॥५०॥
नास्ति येषां गतिः कापि तेषां हि सा गतिर्ध्रुवं ।
मम शक्तिः परा देवी वाग्मतीत्यभिधीयते ॥५१॥
स्कन्द उवाच ।
दत्त्वेप्सितं वरं तेभ्यः प्रययौ शंकरः परम् ।
यत्रैव तेजसां लिङ्गं तत्र स्थानं स्वकं सुराः ॥५२॥
प्रतप्त्वा तत्र विष्णुर्वै तन्मनुप्रजपी ध्रुवं ।
सवरो द्वादशाब्दान्ते स्वलोकं प्रययौ मुने ॥५३॥
ससर्ज्ज मिथुनेनैव सर्व्वलोकं पितामहः ।
ररक्ष हि प्रजा विष्णुः स्वकर्म्मवशगाः सदा ॥५४॥
ततो वर्षसहस्रान्ते ज्ञात्वा विधिमुखात्सुराः ।
सप्तर्षिभिः समं सिद्धैः प्रययुश्च हि वाग्मतीम् ॥५५॥
वर्षयन्पुष्पवर्षं च ययुरप्सरसां गणाः ।
वाग्मती प्रभवा यत्र स्नातुं तस्यां मुदान्विताः ॥५६॥
ययुस्तीर्थानि वाग्मत्यां तिस्रः कोट्योऽर्धकोटयः ।
संगमाय तया सार्द्धं तस्यां स्नातुं च दर्शितुम् ॥५७॥
तदादि तां न मुंचन्ति तानि स्वैः स्वैर्मुदांशकैः ।
वाग्मतीतटगामिनि दिव्ये नैपालिके शुभे ॥५८॥
देवर्षयो न मुंचन्ति क्षेत्रे पाशुपतेऽनिशम् ।
वाग्मत्यां च मुदा स्नात्वा तिष्ठन्ति तत्र भक्तितः ॥५९॥
तदा सा राजते देवी वाग्मती विश्वपावनी ।
हेमपद्मतटोद्भूतै र्हैमवल्लीद्रुमैर्भृशम् ॥६०॥
विमलाम्बुनदी श्रेष्ठा उमाद्रिकन्दराच्छ्रिता ।
देव्याः शृङ्गारसंभूता सा तया राजते समम् ॥६१॥
वाग्मती राजतेऽत्यन्तं सानौ मुंजवतो गिरेः ।
महाश्मशकलाकीर्णा प्रपातेन रसातले ॥६२॥
चन्द्रभागा नदी श्रेष्ठा तयोः समागमेन सा ।
प्रवाहेन बभौ तीव्रं स्वच्छकल्लोलमालिनी ॥६३॥
पितृभिः सेव्यमाना सा लोकपापविनाशिनी ।
फलदा स्नातकानाञ्च वाग्मती सा विराजते ॥६४॥
वाग्मतीप्रभवे पुण्ये सुरासुरनिषेविते ।
तत्र गत्वा दिवं यान्ति विमुक्ताः सर्व्वकिल्बिषैः ॥६५॥
यश्चारोहति संस्नातुं वाग्मती - प्रभवं गिरिं ।
पदे-पदे फलं विन्द्याद्वाजपेयाश्वमेधयोः ॥६६॥
तस्यां स्नात्वा नरो भक्त्या हाटकेन रथेन सः ।
सर्व्वैनसा विनिर्म्मुक्तः शिवलोकं स गच्छति ॥६७॥
सर्व्वपर्व्वसु यत्नेन तत्र स्नात्वा ददाति यः ।
स्वर्णादिकं च दानानि अक्षय्यं फलमाप्नुयात् ॥६८॥
मेषस्थेऽर्के विशेषेण तदुत्पत्तिदिने शुभे ।
तत्र स्नातः सुनिष्पापो ग्रहणे चन्द्रसूर्य्ययोः ॥६९॥

कोटिकोटिगुणं पुण्यं सर्व्वतीर्थोद्भवाल्लभेत् ।
स्नात्वा तत्रैव यत्किञ्चिद्ददाति भक्तितो बुधः ॥७०॥
श्रद्दधान उमाशैले सर्व्वपापैर्व्विवर्ज्जितः ।
हिरण्मयरथस्थोऽसौ रुद्रलोके सुखी वसेत् ॥७१॥
उमातीर्थं समासाद्य स्नायते यस्तु भक्तितः ।
स्त्रीषु सौभाग्यमाप्नोति स्त्री च पुंसि न संशयः ॥७२॥
श्राद्धं करोति तत्रार्य्यः अमायां तु विशेषतः ।
पितॄन्सम्यक् समुद्धृत्य पितृलोके महीयते ॥७३॥
जपार्च्चनमुमातीर्थे यः करोति सदायकः ।
इह लोकं परित्यज्य रुद्रलोकं स गच्छति ॥७४॥
यस्मिन्काले च संभूता वाग्मती तत्र पार्व्वती ।
अहोरात्रं मुदा तेपे उमातीर्थं भवेत्परम् ॥७५॥
स्नानशृङ्गारसंभूता उमाया ह्यपरा नदी ।
सुन्दरीति समाख्याता सौन्दर्य्येण ववाह सा ॥७६॥
तया समाजके तीर्थे वाग्मत्याः पापहारिणि ।
स्नातो जापी मतो धीरो योगी स तपसां वरः ॥७७॥
स्नायते यः सुभद्रायां ब्रह्मगंगाभिधानके ।
इह लोकं समुत्सृज्य ब्रह्मलोकं परं व्रजेत् ॥७८॥
ब्रह्मगंगा समन्तीर्थं नास्ति द्वीपेषु सर्व्वदा ।
ब्रह्मद्रवमयी साक्षाद्देवर्षिभिः प्रसेविता ॥७९॥
अनन्ताख्ये महातीर्थे स्नात्वा विकिल्बिषो भवेत् ।
नागभयं समुत्सृज्य इह च परत्रके सुखी ॥८०॥
अनन्तेन पुरा तप्तं यत्र ह्रदोत्तमे नरः ।
स्नात्वा तत्रैव निष्पापो विभीतस्त्रिदिवं व्रजेत् ॥८१॥
लोमहर्षण उवाच ।
श्रुत्वाऽगस्त्यो महत्क्षेत्रं तपः सिद्धं गुहाद्ध्रुवं ।
तप्तुं तत्रैव वाञ्छयार्य्यो रुद्रभक्तो महामनाः ॥८२॥
द्वादशाब्दं तपस्तेपे आराध्य शंकरं मुदा ।
तत्क्रियार्थं समुद्भूता स्वच्छाम्बुवाहिनी नदी ॥८३॥
वाग्मत्याः सङ्गमे तस्याः सस्तुर्देवर्षयः पुरी ।
अगस्त्यतीर्थं विख्यातं तदा देवैर्महाफलम् ॥८४॥
तत्र स्नात्वा दिवं यान्ति सर्व्वपापैर्व्विवर्ज्जिताः ।
अन्त्यजोऽपि द्विजो भूत्वा देहान्ते च न संशयः ।८५।
अगस्त्यतीर्थमासाद्य स्नायते मुनिभिः सदा ।
तत्र स्नात्वा [illegible]वं यान्ति अगस्त्यभवने सुखम् ॥८६॥
शृणुध्वं मुनयो भूयः विमलाम्बुप्रसंशनं ।
वदन्तिस्म यथा पूर्व्वं तस्मै स्कन्दः स्वभक्तिने ॥८७॥
स्कन्द उवाच ।
विमलाम्बवन्तिके चासीत्सुन्दरो नाम नागराट् ।
तार्क्ष्येण भूषितः सत्यात्त्यक्तवाशनं दयाश्रिता ॥८८॥

अगस्त्य उवाच ।
सन्त्यज्य भक्षणं तार्क्ष्यस्तेनाहिना विभूषितः ।
दयालुरभवद्धृद्ये कथमेतद्वद प्रभो ॥८९॥
स्कन्द उवाच ।
कद्रुसुतान्समालोक्य प्रहर्षितवती सदा ।
सुन्दरविग्रहान्तुष्टास्तनया प्रतिमानना: (प्रीतिमानसाः)
विनता स्वात्मजौ प्रेक्ष्य दीनानना बभूव सा ।
पक्षिणमुरुहीनं च विकटास्यं प्रदुःखिता ॥९१॥
कस्मिंश्चिद्दिवसे नागाः संसदि मातरं मुदा ।
ववन्दुर्युगपद्गत्वा विमातरं प्रलोक्य च ॥९२॥
सभ्रातृगरुडं तस्मिन्तादृशं मातरं स्वकां ।
उच्चैः प्रजहसुर्नागाः प्रेक्ष्यमाणाः समं हि तौ ॥९३॥
विनता दुःखिताकर्ण्य वचः पुत्रोपहासकं ।
सपत्नजमुखोद्भूतं प्रेक्ष्य विषमविग्रहौ ॥९४॥
स पृच्छतिस्म दीनास्यां पक्षिराट् मातरं मुहुः ।
आलोक्य जननीं दीनामनुरुश्चापि शङ्कितः ॥९५॥
गरुड उवाच ।
किन्ते दीनाननं मातः कस्माद्भयमुपस्थितं ।
पित्रा वा गर्हितं तेऽद्य अन्यैर्व्वाशु वदाधुना ॥९६॥
विनतोवाच ।
किं वो वदयामि वत्साद्य विमातृजोपहासकैः ।
त्वदीक्षणोपहासैर्मे नित्यं मनः प्रमाथिनम् ॥९७॥
स्कन्द उवाच ।
श्रुत्वा मातुर्वचस्तार्क्ष्यः विमातृहास्यहेतुकं ।
अमर्षैः पूरितो मात्रे प्रोवाच सहसा रुषा ॥९८॥
गरुड उवाच ।
वधोपायं हि मे मातर्जयिष्यामि च तत्सुतान् ।
जित्वा तान्भक्षयिष्यामि विपक्षान्हि विमातृजान् ॥९९॥
विनतोवाच ।
कद्रुसुताः कथं जेयाः त्वया पतत्रिणा सुत ।
रुद्रवरोद्धता वीराः कञ्चिचसे तदलङ्कृताः ॥१००॥
रचितव्यमुपायन्ते प्रालब्धं येन दृश्यते ।
अपारास्यां गतिर्धातुः सतोऽयमसतोऽपरः ॥१०१॥
विमलाम्बुमहातीर्थे तप्तं यत्रोभया पुरा ।
उपदेशं पितुर्नीत्वा हिमवति प्रतप्यताम् ॥१०२॥
स्कन्द उवाच ।
उपदिष्टो जनन्या स पित्राशु मनुनार्च्चितः ।
वाग्मतीसम्भवो यत्र प्रययौ पततांवरः ॥१०३॥
विमलाम्बुमहातीर्थे जितक्रोधो जितेन्द्रियः ।
आराधयद्विधिं भक्त्या द्वादशाब्दं खगेश्वरः ॥१०४॥

अरुणस्तत्र तेपेऽसौ आराधयन्पितामहं ।
संयमेन्द्रियवर्गो वै निराहारो हि पर्वसु ॥१०५॥
उभौ द्वादशवर्षान्ते उमातीर्थे जलाप्लुतौ ।
सिते पक्षे हि कार्त्तिक्या कृत्तिकर्क्षे भृगोर्दिने ॥१०६॥
नक्षत्रातीतेऽह्नि संभूते समुत्तीर्णे जलात्खगौ ।
ददृशातु स्वमात्मानं सौवर्णं कनकामयम् ॥१०७॥
ददौ धाता वरं ताभ्यां तदन्तिकं समाव्रजन् ।
वत्स तार्क्ष्य महावीर पक्षिणोरीदृशं तपः ॥१०८॥
तुष्टोऽहं तपसा वोऽद्य ददामि ह्यचलं वरं ।
अद्यादि भवितारौ च सततं जीविनौ चिरम् ॥१०९॥
देवासुरैर्नरैश्चान्यैः पशुपक्षिसरीसृपैः ।
अजेयौ भवितारौ वः सर्व्वोपरि बलान्वितौ ॥११०॥

खगेश्वर उवाच ।

पुरा कृतप्रतिज्ञोऽहं याच्येते त्वां पितामह ।
लब्धं भवत्प्रसादात्तच्छत्रूमर्दनमौजसम् ॥१११॥

स्कन्द उवाच ।

ओमिति च प्रतिश्रुत्य ब्रह्मलोकं ययौ विधिः ।
दत्त्वा वरं हि तार्क्ष्याय अरुणाय तथाविधम् ॥११२॥
तत्क्षणे सुन्दरो नागश्चरयामास तत्र वै ।
तं द्रुतं प्रेक्ष्य दुद्राव तार्क्ष्यो रुषा जिघृक्षया ॥११३॥
जग्राह सुन्दरं तार्क्ष्यो ग्रावे जानुं प्ररोपयन् ।
स चुक्रोश भृशं भृत्यान्तदुत्सारव्यथान्वितः ॥११४॥
ते दुद्रुवुस्तदाकर्ण्य तार्क्ष्यं प्रतिभुजंगमाः ।
युयुधुः सह तार्क्ष्येण ताडयन्करलांगुलैः ॥११५॥
यावत्पंचसमां व्याप्य दंष्ट्रा नखैः प्रसारयन् ।
मुहुः प्रोड्डीनयामास पक्षाभ्यां खगतः खगः ॥११६॥
तद्वातैर्व्यथिता नागाः सन्त्यज्य सुन्दरं मुने ।
विलानि दुद्रुवुः शीघ्रं संत्यज्यायोधनं तदा ॥११७॥
भक्षितुमुद्यतस्तार्क्ष्यो विलाभिमुखसुन्दरं ।
भृशं रुषाकरोत्सार्क्ष्यः सोऽप्यधर्षदुवाच तम् ॥११८॥
भ्रातर्भक्षय मा मा मां वक्तव्यं शृणु मद्वचः ।
यदि मां भक्षसे वीर एक एव हि नापरः ॥११९॥
विमुच्यतां महावीर सहस्राणि प्रभुंक्षसे ।
नागान्तकाऽभिधानं ते मा त्यज्यैव भविष्यति ।१२०।

तार्क्ष्य उवाच ।

कथं ते लक्ष्यते त्रासिन् विवरे गूढरूपिणः ।
नौ देहे ह्युपहार्या स्याद्द्विजिह्वाः शत्रवो मताः ॥१२१॥

सुन्दर उवाच ।

एकाकिनं परित्यज्य स्वं स्वं विलं प्रदुद्रुवुः ।
आयोधनं सजीवं मां द्विजिह्वाजातिचेष्टिताः ॥१२२॥
अतस्तान्दर्शयिष्येऽहं भवन्तं त्यक्तविग्रहः ।
अद्यपि भवता भ्रातर्यन्त्रस्थगूढरूपिणः ॥१२३

तार्क्ष्य उवाच ।

यद्येवं भाषसे नाग दर्शयिष्यसि मां हि तान् ।
त्वद्विग्रहेण देहोऽयं विभूष्यते मयानिशं ॥१२४

नाग उवाच ।

क्षन्तव्यं भवता मेऽद्य अहोरात्रं खगेश्वर ।
सतीं पत्नीं च सम्बोध्य तस्यै सन्यस्य बालकान् ।१२५
अत्र प्रत्यागमिष्यामि श्रीमतामन्तिके ध्रुवम् ।
यद्येवं नागमिष्यामि शपेयं शृणु वीरराट् ॥१२६
यावदस्ति च मेदिन्यां वृजिनं कलुषात्मनाम् ।
असह्यं मारमेनोऽद्यां यदविवेकिनां दृढं ॥१२७
पतिष्यतु ह्ययं देहो क्षिप्र एतैश्च किल्बिषैः ।
यद्येवं नागमिष्यामि भविष्याम्यशनं तव ॥१२८

स्कन्द उवाच ।

प्रतिश्रुत्य खगो नागं प्रस्थापयन्स्वकं विलम् ।
गत्वाऽसौ वर्णयामास भृत्येभ्यश्च प्रबोधयन् ॥१२९
भृत्यैर्निषेधिते नागन्नानाश्वास्य प्रबोधयन् ।
न त्याज्यं जीवनैः सत्यं यदि कल्पान्तजीविभिः ।१३०
प्रत्याययौ समाश्वास्य भृत्यान्खगरुडान्तिकम् ॥१३१
साधु साध्विति तं तार्क्ष्यः सत्यात्मा त्वं चिरायुषः ।
तमाहृत्य समादाय उरोहारं चकार सः ॥१३२
सुन्दरेण ततस्तार्क्ष्यं तच्छुपिरमदर्शयत् ।
उद्विदार्योर्ध्वयं क्षिप्रनन्तं पततां वरः ॥१३३
अनन्तोऽपि रुषाविष्टो विनिर्ययौ द्रुतं विलात् ।
सहस्रभोगसंयुक्तो ललज्जिह्वः सुभीषणः ॥१३४
उद्ददंशे रुषा तार्क्ष्यो जिह्वाभिर्लाङ्गुलैर्वृता ।
वैनतेयो रुषा-पूर्णः पक्षपातानिलैर्भृशाम् ॥१३५
अनन्तं ताडयामास रुद्रः क्षये यथा पुरा ।
तापयन् विषतप्तास्ये स ददंश खगेश्वरम् ॥१३६
युगपत्सर्व्वभागैः सः शलभास्यैरिव द्रुमं ।
मुखपूरिततोयैः सः पक्षपातानिलैर्नखैः ॥१३७
वर्षन्तं पीडयामास काल इव क्षयागमं ।
गरुडे प्रवरे वीरे अप्रयत्ने त्वहीश्वरे ॥१३८
उद्भूतो नागभोगात्स विष्णुश्चतुर्भुजोऽव्ययः ।
प्रणमन्भक्तितोऽङ्गेन सन्त्यज्यायोधनं महत् ॥१३९
तुष्टाव गरुडो विष्णुं परिक्रम्य मुहुर्मुदा ।
हृद्वागंगैर्नतोस्म्याद्यं ह्यनन्थाय विष्णवे नमः ॥१४०
देहाभ्यन्तरसंस्थेन प्रोज्जृम्भितासुहृद्गणः ।
किङ्करोऽहं तवेशस्य भविता प्राक् सुपुण्यतः ॥१४१

नमस्ते विश्वसृग्देव गोविन्दाच्युत केशव ।
न्तव्यं मे तदागो वा भवता सह युद्धजम् ॥१४२॥
नामभिर्विविधैश्चान्यैरेवं तत्स्तुतिभिर्विभुः ।
तुष्ट उवाच तस्मै सः वरं दातुं हरिस्तदा ॥१४३॥
भक्त तार्क्ष्य महावीर तुष्टोऽहं ते पराक्रमैः ।
अष्टौ च भोगिनो हित्वा सन्मूर्त्तिनस्त्वहीश्वराः १४४
भक्षय भुजगांश्चान्यान्प्रतिज्ञा यर्हि विद्यते ।
वहनीयो ह्यहं नित्यं यच्छ्रुत्वा इति पक्षिराट् ॥१४५॥
वहे ह्यहं विभुं भूमन्दासत्वेन निरन्तरं ।
मां क्षणमपि मा मुंच यस्माद्भद्रं हि लप्स्यते ॥१४६॥
प्रतिश्रुत्य हरिश्चैव आरुरोह खगेश्वरं ।
दोलाचलं ययौ विष्णुस्तस्थौ स्वकीयमाश्रमम् ॥१४७॥
अद्यापि भक्षयामास प्रावृट् काले भुजंगमान् ।
विष्णुभक्तो द्विजश्रेष्ठः सुन्दरेण प्रसूचितान् ।१४८।
तत्तीर्थे पूषणः स्नात्वा अद्राक्षीदरुणं पुनः ।
मधुरयंश्च सत्येन अकरोत्तं स्वसारथिम् ॥१४९॥
ये शृण्वन्ति च वाग्मत्याः प्रोद्भूतायाः शिवाद्गिरा ।
दिव्यां कथां महापुण्यां तेषां पुण्यफलं शृणु ॥१५०॥
जन्मार्ज्जितैर्महत्पापैर्व्विनिर्मुक्तो हि सान्वयः ।
दिव्ययानैर्महोल्लासैर्गच्छन्ति शिवमन्दिरम् ॥१५१॥
कुष्ठवान्मुच्यते कुष्ठात् श्रुत्वा चैतत्कथां शिवां ।
दुःखात्प्रमुच्यते दुःखी रोगी रोगैश्च मुच्यते ॥१५२॥
अपुत्रो लभते पुत्रं निर्धनो धनवान्भवेत् ।
तथैव च हि नारीणामेतां श्रवणतः कथाम् ॥१५३॥
सा वाग्मती लोकसुपावनी वै,
रुद्राख्यया निम्नगया च सार्द्धं ।
शंभोर्हि चूडोद्भवया च भूयः ।
त्रैलोक्यपुण्या रुरुचे स्पृहोदा ॥१५४॥
इति श्रीस्कन्दपुराणे हिमवत्खण्डे वागमतीसंभवो नाम षडशीतितमोऽध्यायः ॥८६॥

—❀❀❀—

अगस्त्य उवाच ।

वागमृतेन मां स्कन्द तल्लोलुपं प्रसिंचय ।
रुद्रधारेति विख्याता तदुत्पत्ति-कथां वद ॥१॥
मणिमत्याः कथं तात माहात्म्यं संभवं पुनः ।
तासां च संगमे तीर्थे स्नानात्कियत्फलं लभेत् ॥२॥
एतत्सर्वं महासेन श्रोतुकामाय दिश्यतां ।

स्कन्द उवाच ।

आसीच्छंखासुरः पूर्व्वं रुद्रभक्तो हि निर्ज्जनः ॥३॥
वाग्मत्या मणिमत्याश्च संगमे जीवने स्रवन् ।
द्वादशाब्दं तपश्चक्रे आराधयन्महेश्वरम् ॥४॥
शिव शिवेति रुद्रेति शंखो ह्यहर्निशं ब्रुवन् ।
वरं दातुं ततस्तस्मै हर्षोत्फुल्लेक्षणो हरः ॥५॥
अम्बरात्प्रययौ तत्र स्वरूपं तं प्रदर्शयन् ।
तत्र पातालगंगा सा ऊर्ध्वान्निःसृत्य चाययौ ॥६॥
स्नापयन्पादुकां भक्त्या रुद्रस्य शिरसोऽपतत् ।
ततश्च सा महापुण्या नदी भूता सुनिर्म्मला ॥७॥
प्रववाहानिशं सम्यक् तयोः सुसंगमे परे ।
तदादि रुद्रधारेति विख्याता भुवि दुर्ल्लभा ॥८॥
त्रैलोक्यपावनी साभूत्सर्व्वलोकेप्सितप्रदा ।
रुद्रधारोदयं तीर्थं प्रेक्ष्य पापैः स मुच्यते ॥९॥
स्नात्वा तत्र नरो भक्त्या रुद्रलोकं प्रगच्छति ।
ततो रुद्र उवाचेदं भक्तिने शंखवत्सलः ।१०॥
अद्यादि त्वं चिरं जीव्याः सर्वलोकैरवध्यतः ।
मा मुंच मत्प्रियं तीर्थं सर्वं कलुषनाशनम् ॥११॥

शंखासुर उवाच ।

तिष्ठाम्यत्र विभो नित्यं तव पादावर्च्चयन्मुदा ।
यावज्जीवो हि देहान्ते समर्चयन् त्वेष्यति प्रभो ।१२।
प्रतिश्रुत्य विभुस्तस्मै तिरोधानं ययौ दिवि ।
दर्शयन् विश्वरूपं स्वं सौम्यं भीमवहं तदा ॥१३॥
तदादि सन्ततं शंखो न मुंचति कदापि वै ।
तासां सुसंगमे तीर्थे ब्राह्मणलक्षासुतोऽभवत् ॥१४॥
शंखासुरस्य सुस्थानं दृढमूलं यतोऽभवत् ।
लब्ध्वा महावरान् रुद्राच्छंखमूलस्ततः स्मृतः ॥१५॥
मणिमती नदी पुण्या रुद्रमौलिसमुद्भवा ।
वाग्मतीशमुखोद्भूता सर्वलोकप्रपाविनी ॥१६॥
तयोश्च संगमाभ्यासे स्रोतस्यूर्ध्वं प्रनिःसृता ।
जलं पातालगंगाया रुद्रपादोद्भवं शिवम् ॥१७॥
पवित्रं परमं तीर्थं स्नातकानां महत्फलं ।
रुद्रधाराजलं पुण्यं भवेत्पापार्तिहारकम् ॥१८॥
अत ऊर्ध्वं प्रवक्ष्यामि मणिमत्याः समुद्भवं ।
रुद्रचूडामणेस्तीर्थं सर्व्वकामफलप्रदम् ॥१९॥
आसीच्च मणिमान्शैलो दोलाद्रेरुत्तरे दिशि ।
तच्छेखरे विधात्रा च सुनिर्मितह्रदः पुरा ॥२०॥
मणिधातुमये शैले तीर्थे मणिशिलान्तरे ।
तत्र जजाप धातासौ सर्वलोकहिताय च ॥२१॥

ह्रदमध्ये ततो धाता आवाहयन्महेश्वरं ।
तन्मध्ये च समुद्भूतो मणिमौलिर्महाप्रभुः ॥२२॥
मणिलिंगमहेशस्य मणिचूडामणेर्मुने ।
प्रस्रवति जलं पुण्यं तस्मान्मणिमती नदी ॥२३॥
भूत्वा तरङ्गिणी श्रेष्ठा प्रववाहाद्रिशेखरात् ।
नित्यं विराजते गंगा रुद्रमौलिसमुद्भवा ॥२४॥
अष्टम्यां स्नायते यस्तु मेषस्थेऽर्के च पर्वसु ।
गोसंहस्रफलं प्राप्य रुद्रलोकं स गच्छति ॥२५॥
श्रावणीपूर्णिमायां यः स्नायपे द्विविधवत्सकृत् ।
गवां कोटिफलं लब्ध्वा रुद्रलोकं व्रजेत्किल ॥२६॥
हव्यं कव्यं जपं स्नायी दायं करोति तत्र यः ।
सप्तजन्मर्जितं पापं त्यक्त्वा प्राप्नोति शांकरम् ॥२७॥
मणिमती नदी श्रेष्ठा वाग्मती लोकपूजिता ।
रुद्रधारा महत्पुण्या त्रिगंगा स्यादिमाश्च ताः ॥२८॥
मणिलिङ्गस्य शीर्षाद्या उत्पपाताद्रिशेखरात् ।
तस्मात्पूज्या सुरैर्देवैर्मणिमतीति विश्रुता ॥२९॥
सा चैव पावनी लोके सर्वलोकेप्सितप्रदा ।
सैव प्रसेविता देवैर्मुमुक्षुभिर्विशेषतः ॥३०॥
प्रत्यब्दं स्नायते यस्तु तद्ध्रदे परमं लभेत् ।
फाल्गुनस्य सिताष्टम्यां संक्रान्तिषु कुहौ तथा ॥३१॥
मणिमत्त्यां महत्पुण्यं यत्र कुत्रापि पण्डितः ।
स्नायते विधिवद्भक्त्या शिवलोके महीयते ॥३२॥
स्नायते मणिमत्यां च या नारी पापवर्जिता ।
रूपवती प्रिया भर्त्तुः पतिवश्या भवेद्ध्रुवम् ॥३३॥
वन्ध्यापि सूयते पुत्रं रूपगुणसमन्वितं ।
स्नेहवती पतेर्नित्यं भवेज्जमननि जन्मनि ॥३४॥
योगकूटा त्स्रवन्ती या योगगंगा सुसङ्गमं ।
योगतीर्थं तया युक्तं योगिभिः सेवितं सदा ॥३५॥
स्नात्वा यत्र वज्राख्यां भक्त्या पश्यति योगिनीम् ।
योगिनां च फलं प्राप्य स लभतपरमां गतिम् ॥३६॥
देवानां दुर्लभस्थाने तिष्ठति योगिनीगणैः ।
दर्शनाद्योगिनी देवी योगीश्वर स एव च ॥३७॥
मणिमत्त्यां च यो धीरः स्नात्वा भक्तियुतो मुने ।
दोलाद्रिं च समारुह्य पश्यति गरुडध्वजम् ॥३८॥
सर्वपापैर्विनिर्मुक्तः परिवारैः समन्वितः ।
सूर्य्यप्रतिमयानस्थो गच्छति वैष्णवं पुरम् ॥३९॥
मणिमत्त्या च कामीयाः संगमे तार्द्यतीर्थके ।
स्नात्वेक्षति हरिं भक्त्या नागभयैः स मुच्यते ॥४०॥
तस्मान्मणिमती श्रेष्ठा सर्व-नदीवरा च सा ।
वाग्मत्त्या संगमाद्भूयस्तस्याः किं वच्म्यहं फलम् ॥४१॥

वाग्मती रुद्रधारा च मणिमती नदी वरा ।
तासां च संगमे पुण्ये शिवतीर्थमुदाहृतम् ॥४२॥
कोटीश्वरो हि यत्रास्ते विश्वरूपो निरन्तरं ।
दैत्येभ्यश्चैव भक्तेभ्यो वाञ्छितार्थप्रदायकः ॥४३॥
तत्र तत्र च महालिङ्गो देव्या च प्रमथैः सह ।
विश्वरूपं स्वयं रुद्रः शंखासुराय दर्शयन् ॥४४॥
कश्यपश्च तपस्तेपे सुकठोरं मुनीश्वरः ।
कोटीश्वरं समभ्यर्च्य लोकानां सृष्टये पुरा ॥४५॥
विष्णुस्तेपे पुरा तत्र लक्ष्मीकामेन शांकरे ।
तस्मात्प्रलब्धतानेन रुद्रलब्धवरेण वै ॥४६॥
विभीषणस्तपस्तेपे रक्षो लंकेप्सया ततः ।
धातुर्लब्धवरोऽद्यापि लङ्कायामासते चिरम् ॥४७॥
रुद्रह्रदं समासाद्य कोटीश्वरं प्रपूजितः ।
ससर्ज प्राणिनो नूनं रुद्रवराच्च कश्यपः ॥४८॥
तद्ध्रदे च नरः स्नात्वा कोटीश्वरं प्रपूजयन् ।
सकृज्जन्मार्ज्जितैः पापैः स मुक्तो नात्र संशयः ॥४९॥
वाग्मत्या मणिमत्याश्च संगमे देवसेविते ।
स्नायते विधिना यस्तु सर्व्वकाममवाप्नुयात् ॥५०॥
संगमे च तदभ्यासे स्रोतस्यूर्ध्वविनिःसृतेः ।
रुद्रधाराजलं नाम तीर्थकोटिफलप्रदम् ॥५१॥
स्फटिकाभावलीस्वच्छमम्भोबुद्बुदपंक्तिमत् ।
रुद्रधारोदकं प्रेक्ष्य सर्व्वपापैः प्रमुच्यते ॥५२॥
तस्मिन्तीर्थे वरे पुण्ये विधिना यस्तु स्नायते ।
विमानेनार्कवर्णेन रुद्रलोकं स गच्छति ॥५३॥
कृष्णाष्टम्यां चतुर्दश्यां संक्रान्तौ पूर्णिमाकुहौ ।
स्नात्वा कोटिगुणं प्राप्य रुद्रलोके महीयते ॥५४॥
नाभिकुण्डसमुद्भूतं यत्तेजः शंकरस्य तु ।
जिह्वाग्राज्जलरूपेण पपात हिमगह्वरे ॥५५॥
वाग्मती शिवगंगेति सा वै ब्रह्मसरस्वती ।
देवसुरर्षिभिर्नित्यं प्रसेविता मुमुक्षुभिः ॥५६॥
वाग्मती सरितां श्रेष्ठा वाग्मती मोक्षदायिनी ।
गतिः सैव मुमुक्षूणां वाग्मती लोकपावनी ॥५७॥
तासां च संगमं तीर्थं शंखमूलमुदाहृतं ।
तिस्रः कोट्योऽर्द्धकोटीनां पवित्रं परमं कलौ ॥५८॥
धन्यं पाशुपतं क्षेत्रं यत्र विराजतेऽनिशम् ।
शंखमूलं महातीर्थं सर्व्वतीर्थोत्तमोत्तमम् ॥५९॥
स एव मानवश्रेष्ठो यस्तत्र स्नायतेऽनिशम् ।
दुर्लभं मानुषं जन्म समप्राप्यासारसंसृतेः ॥६०॥
चपलं जीवनं लोके चपलं यौवनं मुहुः ।
मत्वेति स्नायते तत्र स एव मुक्तिभागभवेत् ॥६१॥

फलं विद्धि च वाग्मत्याः भागीरथ्याः शतं गुणं ।
शंखमूले च देवेज्ये त्रिमासानां च पर्वसु ॥६२॥
स्नानमहं करिष्यामि शंखमूलेऽद्य चेतसा ।
इति कृत्वा बहिर्गन्तुं गृहात्तस्य फलं शृणु ॥६३॥
पदे पदे फलं विद्याद्राजपेयाश्वमेधयोः ।
गंगायां दशधा स्नानात्तत्फलं लभते हि सः ॥६४॥
सर्वजन्मार्जितैः पापैर्विमुक्तः स्नातकः शुचिः ।
महायानेन भौतेशं गच्छत्यन्ते परं पदम् ॥६५॥
दर्शनात्स्पर्शनात्स्नानाद्यथाक्रमात्फलं लभेत् ।
शंखमूले नरो धीमान् प्राप्नोति सुकृतिं ध्रुवम् ॥६६॥
शंखमूलेति यो ब्रूयादसामर्थ्यो नरो यदि ।
स्नानस्यार्द्धफलं तत्र स लभेन्नात्र संशयः ॥६७॥
स्नायते विधिवद्भक्त्या शंखमूले शिवामृते ।
पुनर्भूतं समुत्सृज्य प्राप्नोति परमं पदम् ॥६८॥
योऽर्च्चेति भक्तितो लिङ्गं वालुकपांसुनिर्म्मितं ।
शंखमूले मुदा स्नात्वा तस्य पुण्यफलं शृणु ॥६९॥
यावत्तद्वालुका संख्या तावच्छिवपुरे वसेत् ।
सर्वसुखमये भद्रे सेवयन्निव पादुकाम् ॥७०॥
यो ददाति च दायानि यत्किञ्चिद्वा वसूनि च ।
अन्यत्कोटिगुणं प्राप्य रुद्रलोके प्रमोदते ॥७१॥
श्राद्धं करोति यस्तत्र त्रिसप्तकुलमुद्धरेत् ।
तृप्ता यांत्यप्यधःस्था ये मोदन्ति सुचिरं दिवि ॥७२॥
उमामाहेश्वरं तीर्थं सर्वकामफलप्रदम् ।
यः स्नायते धिया स्मृत्य तस्य पुण्य[illegible]शृणु ॥७३॥
कोटिपापैर्विर्निर्म्मुक्तः स[illegible]स गच्छति ।
वसेत्तत्र महत्सौख्ये स[illegible]ज्य पुनरावृत्तिम् ॥७४॥
या गतिर्योगयुक्तस्य वाराणस्यां मृतस्य च ।
सा गतिः स्नानमात्रेण वाग्मत्यां हरिवासरे ॥७५॥
आभाकासितपक्षे च मैत्र (अनुराधा) श्रवणरेवती ।
द्वादशी बुधवारेण संयुता हरिवासरी ॥७६॥
हरेः शयनकाले च प्रस्वप्रावर्त्तनोत्सवे ।
स्नात्वार्च्चेति शिवं भक्त्या शंखमूले शिवस्थले ॥७७॥
कोटिकोटिगुणं लब्ध्वा शिवलीनो भवेद्ध्रुवं ।
आर्त्तो भीतश्च कुष्ठी वा व्याधितोऽव्याधितोपि वा ।७८।
ग्रहभूतोऽपमृत्युर्वा अपस्माररुजान्वितः ।
शंखमूले परे स्नात्वा विधिवद्विबुधोऽनिशम् ॥७९॥
तस्य शान्तिर्भवेन्नित्यमुमामहेश्वरं स्मरन् ।
ब्रह्मा तेपे यथापूर्वं कोटीश्वरं प्रपूजयन् ॥८०॥
तथा देवाः सगन्धर्वा वाञ्छितार्थाय तेपिरे ।
व्रजनाभोऽसुरश्रेष्ठस्तेपे तत्र भृशं पुनः ॥८१॥
नारदवचनात्सम्यक् रुद्रधाराजलाप्लुतः ।
तेनैव दमितः शक्रो देवासुरे सुसंगरे ॥८२॥
आददौ वसुसर्वाणि अवलुंठ्यामरावतीं ।
तद्वसूनि च सर्वाणि समादाय च सर्वशः ॥८३॥
आययौ सुप्रभाराज्यं यत्रास्ते चन्दनेश्वरः ।
तस्मात्तीर्थवरं पुण्यं देवलोकैः प्रसेवितं ॥८४॥
कोटीश्वरो हि यत्रास्ते त्रिगंगासंगमे यतः ।
शंखमूलसमं तीर्थं नास्ति नास्ति रसातले ॥८५॥
तस्मात्सुलभ्यते लोकैर्भुक्तिमुक्तिफलोत्तमम् ।
शतगङ्गा-समं ज्ञेयं शंखमूलं महत्फलम् ॥८६॥
चतुर्वर्गफलं तत्र स्नातकानां न संशयः ।
ये शृण्वन्ति त्रिगंगायाः सङ्गमस्य सुभक्तितः ॥८७॥
शंखमूलस्य माहात्म्यं तेषां पुण्यफलं शृणु ।
आजन्मार्ज्जितपापैस्ते विनिर्मुक्ता न संशयः ॥८८॥
तत्र स्नानात्फलं धीराः प्राप्नुवन्ति न संशयः ।
देहान्तेऽद्भुतयानेन रुद्रलोकं गताः खलु ॥८९॥
या काचिदबला चापि शृणोति भक्तितो मुदा ।
धन्यं यशः सा सुभगं च पुत्रं
पतिप्रियासौ प्रलभेद्धि सौख्यं ।
सौन्दर्य्यरूपं सुतनुं हि लोकैः
सुदुर्ल्लभं लोकसुवाञ्छितं वै ॥९०॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे शंखमूलमाहात्म्यं नाम सप्ताशीतितमोऽध्यायः ॥८७॥

—❀❀❀—

अगस्त्य उवाच ।

अत्यद्भुतं महत्पुण्यं वाग्मत्यां स्नानतोऽनिशं ।
लब्धं लोकैश्च तातेति त्वत्प्रसाच्छ्रुतं मया ॥१॥
क्रमं च श्रोतुमिच्छामि स्नातकानां तथा विधिं ।
स्नानं दानं पुनर्देयं तत्सर्वं मे वद प्रभो ॥२॥

स्कन्द उवाच ।

शृणु सर्वं प्रवक्ष्यामि निष्पन्नं च फलं यतः ।
स्नातकानां च तीर्थेषु साधारणक्रमं मतम् ॥३॥
सायं प्रक्षाल्य पाण्यंघ्री प्रसुप्तो दन्तधावनः ।
संकल्प्य संयतस्तीर्थे गमिष्ये स्नातुमित्यतः ॥४॥
प्रातः कृत्यं समुत्तीर्य्य यथाविभवविस्तरैः ।
प्रसन्नमानसो भूत्वा तीर्थस्नानोत्सुको भवेत् ॥५॥
उपस्करं समादाय गृहात्प्रनिःसृतो बहिः ।
स्नातुं गच्छामि वाग्मत्यां कृत्वेति मनसा व्रजेत् ॥६॥
आर्य्यातीर्थे जलाप्लावं कर्त्तुं गच्छामि सांप्रतं ।
वाचोक्त्वामनसा चिन्त्य गृहाद्बहिः पथि व्रजेत् ॥७॥

शंखमूले महातीर्थे स्नानं कर्त्तुं व्रजाम्यहं ।
संचिन्त्य मनसा वाचा यमी गृहात्पथि व्रजेत् ॥८॥
तस्मिन्तीर्थवरे स्नानं कर्त्तुं गच्छाम्यहं ध्रुवं ।
भक्त्या पथि व्रजेत् गेहात्साधारणमतं मुने ॥९॥
स्नातकश्चैव तत्तीर्थे भक्तियुक्तो हि संयतः ।
पदे-पदेऽश्वमेधानां वाग्मत्यां सफलं लभेत् ॥१०॥
वाजपेयाश्वमेधानां फलं विद्यात्पदे-पदे ।
त्रिगंगा-संगमे पुण्ये स्नातकः सर्वकर्मसु ॥११॥
द्विगुणं तत्फलं विद्यात्पातको हि पदे-पदे ।
आर्य्यातीर्थे महत्पुण्यं लिंगं प्रेक्ष्य चतुर्गुणम् ॥१२॥
पितामह-महातीर्थे त्रिगुणं तल्लभेत्तथा ।
वाग्मती-संभवे पुण्ये चतुर्गुणफलं पुनः ॥१३॥
एवमेव हि तीर्थेषु साधारणमतं मुने ।
दूराद्धिमाद्रिजेष्वार्य्यं स्नातो महत्फलं लभेत् ॥१४॥
अश्वयानस्तदर्द्धं स्यात् गोयानस्तदधो फलं ।
नरयानश्चतुर्थांशं तीर्थस्नानफलं लभेत् ॥१५॥
तथोपानत्प्रयानस्य भागं गृह्णाति तत्पशुः ।
षडंगं च फलं स्नातुः सर्वतीर्थेष्वयं विधिः ॥१६॥
समर्थोयानगोऽज्ञश्च, तीर्थस्नायी सुनिष्फलः ।
कायः क्लेशान्महत्पुण्यं असामर्थ्यं विना लभेत् ॥१७॥
प्रपश्य दूरतस्तीर्थं प्रणमेद्दण्डवद्भुवि ।
भक्तियुक्तो हृदा भाव्यं सर्वं दुष्कृतनाशकम् ॥१८॥
स्मरणात्पूयते गात्रं तीर्थानां कुम्भसंभव ।
नित्यं कृतोद्भवैः पापैः प्रधानानां विशेषतः ॥१९॥
तीर्थप्रदर्शनात्सद्यः संसारतः प्रमुच्यते ।
दृष्टिदोषोद्भवैः पापैः साधारणमतं मुने ॥२०॥
ॐनमस्ते देवि वाग्मत्यै सर्वदुष्कृतनाशिनि ।
अद्य मे धूलितं पापं त्वद्दर्शनाच्चिरार्जितम् ॥२१॥
संस्पर्शनाच्च तीर्थानां विमुच्यते स दुष्कृतैः ।
अंगदोषोद्भवैर्गाढैरमेध्यस्पर्शजैरपि ॥२२॥
तीर्थासुपाततोऽगस्त्य जंतुः पापैर्विमुच्यते ।
सुखदुःखोद्भवैः सद्यः शपथजैरपि ध्रुवम् ॥२३॥
पानावगाहनान्मर्त्यो मुच्यते किल्विषैः क्षणात् ।
मानसदोषजैश्चापि स्नानाभिपानतोऽनिशम् ॥२४॥
प्रणम्य गौरवात्तीर्थं बद्धशीर्षो यथा विधिः ।
कुशोदकं समादाय संकल्पन्ते हि वाक्यतः ॥२५॥
तिङ्सुबन्तयुतं वाक्यं आत्मने यदि युज्यते ।
सव्ये कामं च हेतुं च तिथ्यादि वाक्यमुच्यते ॥२६॥
मासं पक्षं तथा वारं तिथिं नक्षत्रमेव च ।
योगं नाम स्वगोत्रं च श्रद्धादिकामये नहि ॥२७॥

अद्यामुष्मिन् यथा मासे यथापक्षे दिने तिथौ ।
नक्षत्रे च यथायोगे अस्मिन्तीर्थे ततः परम् ॥२८॥
वदेत्स्नानमहं सर्वं साधारणमतं मुने ।
कामलिप्सोश्च सङ्कल्पं वक्ष्यामि शृणु तत्पुनः ॥२९॥
अद्यादिभिः पदं ग्राह्यामुकगोत्रोऽहमेव च ।
शर्म्मा वर्म्मा सुरो दासः स्वनाम्ना युज्यते पदम् ॥३०॥
भूतिनिर्वाणकामेन हृत्कामेनाथ वा पुनः ।
अस्मिन्तीर्थे त्वहं स्नानं कुर्वे कुशोदकं त्यजेत् ॥३१॥
संकल्पेन विना कर्म्म स्नानं दानार्च्चनं मखं ।
यत्करोति तपो धीरस्तत्सर्वं निष्फलं भवेत् ॥३२॥
तस्मात्पूर्वं प्रयत्नेन संकल्पः क्रियते बुधैः ।
यस्मात्प्राप्नोति तत्सर्वं स्नानादिसंभवं फलम् ॥३३॥
इष्टेशः प्रीतिकामेन वाक्यं कुर्य्याद्विचक्षणः ।
स्नाने दाने जपे होमे कोटिकोटिगुणं फलम् ॥३४॥
न नदीषु नदी ब्रूयात्पर्वतेषु च पर्वतं ।
नान्यत्प्रशंसेत्तत्रस्थस्तीर्थेष्वायतनेषु च ॥३५॥
भक्त्या प्रपठ्यते स्तोत्रमावाहनमथो विधिः ।
मंत्री मंत्रेण गंगा च ऋचाभिर्वैदिकी तथा ॥३६॥
ॐवरुणाय च देवाय अंम्भसां पतये नमः ।
रुद्रात्मने जलेशाय रसानां पतये नमः ॥३७॥
पवित्रितं जगत्सर्वं जगदुद्धारणाय च ।
येन प्रतिष्ठितं तस्मै जीवनाय नमो नमः ॥३८॥
न दोषा पूतसलिला हरमूर्त्तिरियं स्मृता ।
स्नाता तस्य विमुच्यन्ते जलमूर्त्ते नमोऽस्तु ते ॥३९॥
एवं स्तुत्वाशु तीर्थाय प्रगृहीत्वोपहारकं ।
दद्यात्तीर्थाय भक्त्या तच्चिंतनीयन्ततःपरम् ॥४०॥
सरस्वतीं महादेवीं तीर्थे स्वान्तेन भावयेत् ।
नाभिकुंडसमुद्भूतां शंभोर्वक्त्राद्विनिःसृताम् ॥४१॥
मुक्तास्फटिकचूर्णाभां वालुस्खलितवाहिनीं ।
वाग्मतीं तांडवीभूतां सर्व्वलोकैः प्रसेवितताम् ॥४२॥
शुद्धस्फटिकसंकाशां त्रिनेत्रां चारुहासिनीम् ।
चतुर्भुजां महेशानीं मकरकुण्डलाञ्चिलताम् ॥४३॥
संपूर्णेन्दुमुखीं देवीं सर्वाभरणभूषितां ।
दधानां सर्वशो हस्ते पाशांकुशवराभयान् ॥४४॥
एवं संचिन्त्य तीर्थे तां आनाभिजलमाविशेत् ।
मौनी द्विवस्त्रधृक् स्नायाद्विधिवत्सुविचक्षणः ॥४५॥
अन्येषां संगमानां च शंखमूले शतं गुणं ।
स्नाता लभेत्फलं धीमान्तस्माच्छ्रेष्ठं मृगोदकम् ॥४६॥
शतगंगा-समं तीर्थं त्रिगंगं हरिवासरे ।
तस्माद्दशगुणं ज्ञेयं आर्य्यातीर्थं महत्तरम् ॥४७॥

वाग्मत्याः संभवे तीर्थे सहस्रं च गुणं फलम् ।
संगमे समुपातीर्थे कोटिकोटिगुणं फलम् ॥४८॥
स्नातो फलं लभेत्स्नानाद्वाजपेयाश्वमेधयोः ।
शतं सहस्रकं कोटिं त्रिषु तीर्थेषु तत्क्रमात् ॥४९॥
सर्व्वपर्वसु यत्र न स्नायते विधिवद्बुधः ।
प्रोक्तं फलं लभेत्तावद्यथानुसारतोऽन्यतः ॥५०॥
महापातकिनः स्नानात्पातकैर्मुच्यन्ते क्षणात् ।
अगम्या-गमनोद्भूतैः परदाराविमर्द्दनात् ॥५१॥
स्त्रीणां च तादृशं तत्र स्नातकानां विमुच्यते ।
मुनिहत्योद्भवैः पापैः पतिषु वचनोद्भवैः ॥५२॥
ऋतूद्भूतस्पृशे द्रव्य-दोष-सम्भव-किल्बिषैः ।
त्रिषु स्नानात्स्त्रियः सद्यः त्रिगंगेवाथ मुच्यते ॥५३॥
मलिनी मैथुनान्मर्त्यः स्नानात्पापैः प्रमुच्यते ।
तादृशी स्त्री त्रिगंगायां जारदोषोद्भवैस्तथा ॥५४॥
दीयते सकलं दानं विप्रेभ्योऽम्बरहाटकं ।
सफलं स्नानजं पुण्यं स्नानं दानमिति श्रुतम् ॥५५॥
यं प्राप्तमर्थिनं दीनं त्यक्त्वा पात्रमुदीक्षिते ।
न परमार्थदानं तत्तीर्थे क्षेत्रे न शोधयेत् ॥५६॥
यः प्राप्तप्रार्थिने दानं यस्मै कस्मै ददाति वै ।
तद्दानं सफलं दातुर्द्वन्द्वभावैर्विवर्जितः ॥५७॥
उद्दिश्येशं शिवां विष्णुं दायं विप्राय यो ददेत् ।
यस्मै कस्मै त्वनिर्णीत्य तद्दानं परमं महत् ॥५८॥
काचिन्मुक्ता पुरा नारी शंखमूले घटोद्भव !
पातकैर्लिप्तगात्रा सा पतिवंचनजैः शृणु ॥५९॥
विशालनगरे चासीद्धर्म्मभक्तो हि विद्वरः ।
तस्य पत्नी वधुश्रेष्ठा माधवी नाम विश्रुता ॥६०॥
यूनां हृद्दामिनी नित्यं रूपसौन्दर्य्यशालिनी ।
यतः सौन्दर्य्यता प्राप्ता तया च मुनिसत्तम ॥६१॥
पूर्वजन्मनि सा सस्नौ चन्द्रभागा मृगोत्तमे ।
रूपमेवं हि संकल्प्य युवभिः पीडनोत्सुका ॥६२॥
अतोऽभूद्रमणी नारी माधवी सुन्दरी मुने ।
प्रार्थ्यमाना युवभिः सा कामोन्मथितचेतनैः ॥६३॥
युवभिः सहसा रेमे पतिना ताडितापि च ।
ताड्यमाना मुहुर्दुःखान्मातृकानां हि सेविता ॥६४॥
सा स्नात्वा संगमे तीर्थे वाराही चन्द्रभागयोः ।
हृदि कामं समाधाय तद्याम्ये दिशि चाव्रजत् ॥६५॥
वाराहीप्रमुखा देव्यो मातृगणाः प्रसेविताः ।
कोलतीर्थे च संस्नात्वा उपचारैः समर्हणैः ॥६४॥
वश्यो भवतु मे स्वामी नित्यं प्रकापितो यतः ।
कालास्या प्रमुखा देव्यो याचेऽहं भवतीमिति ॥६७॥

इषे शुक्लनवम्यां सा भक्त्या मातः समर्हयन् ।
तुष्टा देव्याः वरं प्राप्य समाययौ स्वकं गृहम् ॥६८॥
निर्म्माल्यं प्रददौ देव्याः वश्येप्सया प्रियाय सा ।
वश्यो भवतु मेऽद्यादि प्रोक्तेति हृदयेन वै ॥६९॥
तदादि पुरुषस्तस्या दासवद्धि निरन्तरं ।
युवभिः सहसा रेमे प्रार्थ्यमाना नरोत्तमैः ॥७०॥
विदूरस्थो युवा कश्चित्कर्दमो नाम विश्रुतः ।
तस्यासौ भावमालोक्य तच्चरित्रपरीक्षकः ॥७१॥
संख्या चालेखिता तस्या यावत्सुरतसंभवा ।
परप्रियैः समं कृत्वा तेनैव सततं मुहुः ॥७२॥
तन्वता तेन तल्लेखा यावत्पंचशतं भवेत् ।
प्रेक्ष्य परमुखाच्छ्रुत्वा अन्यद्भर्तृ गणं पतेः ॥७३॥
कुष्ठव्रणैः प्रलिप्ताङ्गस्तस्याः सुरतिपापजैः ।
व्रणांकितः कृशाङ्गोऽसौ क्षयमानो दिने दिने ॥७४॥

अगस्त्य उवाच ।

योनिदोषोद्भवैः पापैर्भार्य्यया लिप्यते पतिः ।
इत्युक्तं भवता पूर्वं कर्त्तैव किल पापभुक् ॥७५॥
एककृतोद्भवैः पापैरन्यः कथं प्रलिप्यते ।
अन्यकृतेन सश्चान्यो भोक्ता ह्येतत्कथं वद ॥७६॥

स्कन्द उवाच ।

न दोषो दूषयेत्स्त्रीणां मद्यानि गणयेन्नच ।
पंचनखादिसीमन्ताग्राग्रधात्रा पवित्रिता यतः ॥७७॥
पुमांसो मूर्त्तयो न स्युः स्त्रियस्ते मूर्त्तयः प्रिये ।
मत्तो गरीयसी त्वार्य्ये इति श्रुतं शिवास्यतः ॥७८॥
तस्मान्नैव बुधः कुर्य्याद्वधूभ्यः कुत्सितं कदा ।
ताड्यमानां नचैवैतां शिक्षया बोधयेत्सदा ॥७९॥
धर्मभक्तोऽनिशं तस्याः सुवश्यो दासवच्चरेत् ।
प्रेक्ष्यं चरित्रं सौभावं मधुरयंश्च प्रियां मुहुः ॥८०॥
भाद्रे च पूर्णिमायां सा भरण्यां संयुते रवौ ।
शंखमूले समं स्त्रीभिस्तीर्थयात्राटनं ययौ ॥८१॥
भविष्यामि च देहान्ते राजकन्या त्वहं पुनः ।
मां प्रेक्ष्यका युवा वृद्धा मोहिष्यन्तु निरन्तरम् ॥८२॥
कृत्वेति स्वैरिणीचित्ते पदे-पदे गृहाद्बहिः ।
नमस्कृत्य महेशानं तीर्थराजं च भक्तितः ॥८३॥
उन्मज्ज्योन्मज्ज्य तीर्थे सा उत्तीर्य्य सहसा जलात् ।
विप्रेभ्यः प्रददौ दायं याचकेभ्यो हि भक्तितः ॥८४॥
सौम्ये सुन्दरि देहीति यावत्ते तां वसुं द्विजाः ।
करमुत्तानकं कृत्वा देहि-देहीति भाषते ॥८५॥
यावन्ति भूषणान्यंगात्तेभ्यो विमुच्य सा ददौ ।
परिधानविना वस्त्रं भक्तियुक्तेन सा मुदा ॥८६॥

ववर्ष पुष्पवृष्टिं च व्याम्नो नादं ननाद च ।
साधु साध्वित्यभूच्छब्दं दिवि देवगणैरितम् ॥८७॥
सूर्य्यश्चार्चिविमाने तामास्थाय प्रमथाद्रुतं ।
निन्युर्व्योम्नो दिवं शैवं समक्षे सर्वजीविनाम् ॥८८॥
अयुताब्दं सुखं भुक्त्वा उमा-माहेश्वरे पुरे ।
सोद्भूता च पुनस्तत्र सुप्रभाख्ये महत्पुरे ॥८९॥
सा वै प्रभावती नाम्नी बलेःपुत्री सुलक्षणा ।
जहार तां द्रुतं कामः कामस्यातिप्रियाऽभवत् ॥९०॥
पत्न्या विरहितो वैश्यो दुःखदग्धो निरन्तरं ।
रुद्रात्मा निर्ज्जनोऽजस्रं स्नानदानार्च्चने रतः ॥९१॥
धर्म्मभक्तो ययौ स्नातुं तीर्थे मृगोदके ततः ।
कार्त्तिकी पूर्णिमायां स कृत्तिकायुक् कलानिधौ ॥९२॥
भविष्यति ह्ययं देहो देहान्ते नृपविग्रहः ।
इति चिन्त्य हृदा वैश्यः सस्नौ तीर्थे मृगोदके ॥९३॥
याचकेभ्यो द्विजातिभ्यो ददौ दायं यथाविधि ।
प्रसन्नमानसो भूत्वा स्वार्थमुद्दिश्य विट्वरः ॥९४॥
ध्यायमाने शिवे तस्मिन्नादिमृगान्तिके मुदा ।
अवतेरुर्गणा व्योम्नस्तत्र विमानपालयः ॥९५॥
गणा याने तमास्थाय निन्युः शिवपुरं क्षणात् ।
सविग्रहं विशन्तत्र सहस्राब्दं सुखाप्तवान् ॥९६॥
प्रादुर्भूतस्तदन्ते स कांचीपुर्य्यां नृपात्मजः ।
स एव सूर्य्यकेतुः स्याद्विशालनगरेऽवसत् ॥९७॥
कुष्ठव्रणांकितः शूद्रो व्रह्मपद्यां जलं पपौ ।
धौतांघ्रिहस्तवक्त्रश्च अशक्तो वेपथुर्त्तदा ॥९८॥
कथं भवेन्नु विप्रो मद्देहोऽयमिति भावयन् ।
राधा शुक्लतृतीयायां इति कृत्वा जलं पपौ ॥९९॥
कश्चित्कालान्तरे शूद्रः पंचत्वं प्राप्तवान्पुनः ।
अन्तर्वेद्यां समुद्भूतः श्रोत्रियस्य कुले द्विजः ॥१००॥
द्विजाधमोऽभवत्सोऽपि पूर्वजन्म-विपाकतः ।
असंकल्प-कृतस्नानाद्विरूपाक्षोऽभिधानतः ॥१०१॥
एवं च बहवो मर्त्त्या तीर्थेषु जीवनाप्लवात् ।
सुकृतिं लेभिरे शश्वद् दुर्लभं सर्वजीविनाम् ॥१०२॥
अष्टमी नवमी सर्वा अमावास्या चतुर्दशी ।
पूर्णिमा कुहुसंक्रान्तिस्ताः पूज्याः पक्षयोर्द्वयोः ॥१०३॥
सामान्यतः सदाष्टम्यां स्नातस्य द्विगुणं फलं ।
तथाष्टम्यां नवम्यां च शतगुणं फलं लभेत् ॥१०४॥
चतुर्दश्यां द्विसाहस्रं कुह्वावयुतमेव च ।
सङ्क्रान्त्यां च गुणं लक्ष्यं पूर्णिमायां च कोटिशः १०५
द्वयोरिन्दुपरागेषु वाग्मत्यां स्नायते बुधः ।
दान-यज्ञार्चनानां च कोटि-कोटि-गुणं लभेत् ॥१०६॥
योगनक्षत्रयुक्तेषु स्नानात्तिथिषु सर्वदा ।
कोटिकोटिगुणं पुण्यं प्रोक्तेषु लभते नरः ॥१०७॥
ताभ्यः श्रेष्ठेषु वाग्मत्यां तद्धरिवासरेषु च ।
पंडितो विधिवत्स्नानात्कोट्यायुतफलं लभेत् ॥१०८॥
स्नायते यो हि वाग्मत्यां युगादिषु च पर्वसु ।
ब्रह्महत्यादिभिः पापैर्मुक्तो गच्छति शांकरम् ॥१०९॥

माहात्म्येतत् वरवाग्मवाया
नद्याश्च तेऽगस्त्य मया सुपुण्यं ।
श्रुत्वा च नित्यं लभते हि मुक्तिं,
वाञ्छन्ति देवाः श्रवणोत्सुकास्तत् ॥११०॥

इति श्रीस्कन्दपुराणे वाग्मतीमाहात्म्यं तीर्थयात्राक्रमणं नामाष्टाशीतितमोऽध्यायः ॥८८॥

—❀❀❀—

लोमहर्षण उवाच ।

श्रुत्वा चैतत्कथां दिव्यां भृशं मुमोद कुंभज ।
वाग्मत्याः किल माहात्म्यं तेषां मुक्तिं तथाद्भुतम् ॥१॥
भक्त्या स्कन्दं प्रणम्यादौ अपृच्छत्कुंभजो मुदा ।
नेपालस्यैव माहात्म्यं हिताय ज्ञानिनां तथा ॥२॥

अगस्त्य उवाच ।

भगवन्सर्व्ववित्स्कन्द त्वत्प्रसादाच्छ्रुतं मया ।
माहात्म्यं चैव वाग्मत्या अद्भुतं पापनाशकम् ॥३॥
भूयोऽहं श्रोतुमिच्छामि माहात्म्यं त्वयि कार्तिक ।
अन्यासां सरितां तत्त्वं तीर्थानां च विशेषतः ॥४॥
लिङ्गानां च समुद्भूतं नेपालभुवि जन्मिनाम् ।
चतुःषष्टीप्रसंख्यानां माहात्म्यं हि तथा पुनः ॥५॥
प्रकाशितानि लिङ्गानि केन केन च कानि च ।
कैः कैर्लब्धं वरञ्चैव तेभ्यश्चाराधनाद्विभो ॥६॥
तत्तत्तीर्थेषु च स्नानात्क्रियन्ति च फलानि च ।
लब्धं कैःकैः कदा स्कन्द स्थानप्रमाणमेव च ॥७॥
कस्मिन्कस्मिन्हि काले च स्नातव्यं यद्दिनेषु च ।
तीर्थयात्रादिकं सर्व्वं वद मे शंकरात्मज ॥८॥

स्कन्द उवाच ।

अहो धन्यतमोऽगस्त्य यद्बुद्धिरीदृशी तव ।
तत्कथा नौ प्रवेशेन भवाब्धिं तारयेद्यया ॥९॥
नेपालानां च लिंगानां तीर्थानां च विशेषतः ।
शृणु वक्ष्यामि तत्सर्वं माहात्म्यं च यथाभवेत् ॥१०॥
पूर्वोक्तो यो द्विजोऽगस्त्य विरूपाक्षोऽभिधानकः ।
अन्तर्वेद्यां नगर्य्यां स कूले महत्यंजायत ॥११॥
पूर्वजन्मविपाकेन पापाचारोऽभवद्धि सः ।

मातृगमनसंभूतं कश्चित्सुरापानरतोऽनिशम् ॥१२॥
मांसाहारी त्वनाचारी वेश्यागमनतत्परः ।
जातिभ्रष्टोऽन्वयैस्त्यक्तो वेदशास्त्रविवर्जितः ॥१३॥
किंचित्कालान्तरेऽसौ हि देशाद्विनिर्ययौ मुने ।
त्यक्त्वा प्रियां प्रियं गोत्रं व्रीडया व्यथितोद्विजः ॥१४॥
भ्रमतिस्म क्षितिदेशान्निर्ज्जनः कुष्ठपीडितः ।
हिमाद्रिं प्राप्तवांल्लंघ्य देशाद्देशं वनाद्वनम् ॥१५॥
त्रिकूटानां च मध्ये स प्राप्तवान्कुलपीठकं ।
यत्र ववाह गंभीरं लीलावती च कौशिकी ॥१६॥
यत्रास्ते आदिलिङ्गो वै सर्वलोकैः प्रपूजितः ।
लोकवाञ्छाप्रदो नित्यं पूजकानां च भक्तितः ॥१७॥
ततस्तटं च कौशिक्या अगमद्रोगपीडितः ।
ध्यात्वा स्रवन् स्थितं तत्र ददर्श नेमुनिं हि सः ॥१८॥
तत्र संध्यावसानेऽसौ अगमच्च तदन्तिकं ।
प्रणनाम हितं भक्त्या मेदिन्यामश्रु मोचयन् ॥१९॥
प्रेक्ष्य कुष्ठांकितं विप्रं भक्तियुक्तं सुनिर्ज्जनं ।
व्याचष्टे नेमुनिस्तस्मै प्रष्टुं करुणया तदा ॥२०॥

नेमुनिरुवाच ।

कोऽसि भवान्ससेकाकी कुतश्चात्र समागतः ।
निर्ज्जने विपिने भीष्मे सिंहशार्दूलसेविते ॥२१॥
कथं त्वं कुष्ठवात्रोगी मलिनैः संयुताननः ।
यज्ञसूत्रोपवीतांग ईदृशी ते दशा कथम् ॥२२॥

विरूपाक्ष उवाच ।

तात मुने हि पापात्मा विरूपाक्षोऽभिधानकः ।
धर्म्मशर्मसुतोऽहं च धर्म्मकर्म्मविवर्ज्जितः ॥२३॥
श्रोत्रियकुले प्रसूतोऽपि भ्रष्टाचारो भवाम्यहं ।
दैवयोगविपाकेन महत्पापाचरो मुने ॥२४॥
महत्पापविलिप्तांगो व्रणी कुष्ठी सुविह्वलः ।
परिभ्रम्य क्षितिं देशान्दिष्टेनैवमिहागतः ॥२५॥
कस्माच्च मुच्यये पापैरहं तात सुदुःसहैः ।
सुनिर्म्मलः कथं कायो मे भविष्यति तद्वद ॥२६॥
पापानलप्रदग्धोऽहं दुःखार्णव-निमज्जकः ।
उपदेशकृपारज्जु-बन्धैरुद्धृयतां विभो ॥२७॥

सिद्धर्षिरुवाच ।

सत्यमुक्तं त्वया वत्स पापात्मा पापकृद्भवान् ।
पूर्व्वजन्मविपाकेन पापाचारो न संशयः ॥२८॥
तत्पापानां विनाशाय कुरु तीर्थाटनं ध्रुवम् ।
ततः पापानि नश्यन्ति तीर्थजलस्पृशाद्द्विज ॥२९॥
दर्शनाच्चैव लिङ्गानां मुच्यते बहुपातकैः ।
स्पर्शनात्तानि पापैस्त्वं न लिप्यसे पुराकृतैः ॥३०॥

विरूपाक्ष उवाच ।

कस्मिन्तीर्थे मुने पूर्व्वं स्नायते विधिवत्कथं ।
स्पृश्यते सर्व्वविल्लिङ्गं कथं प्रपूज्यते मया ॥३१॥
विधिना केन लिंगानि स्नातव्यं पूज्यते कथं ।
एतत्सर्व्वमंजसा मह्यं वदार्य्य शुभदेशक ॥३२॥

नेमुनिरुवाच ।

तीर्थे च स्नायते चादौ विभूत्या लेपयेत्तनुं ।
कृत्वा संध्यां च रुद्राक्षी भक्त्या लिंगं प्रपूजय ॥३३॥
सायं दत्त्वा प्रदीपानि कृतजागरणेन च ।
श्रोतव्या खलु मन्तव्या तत्कथा भावतस्त्वया ॥३४॥
अत्रैव च मम क्षेत्रे समं तीर्थानि सन्ति च ।
सहस्राणि तथांशैश्च तिस्रःकोट्योऽर्धकोटिभिः ॥३५॥
चतुःषष्टी च लिङ्गानि क्षेत्रेऽस्मिन्सन्ति मे सदा ।
देवदानवगन्धर्वैरर्च्चितानि वराप्तये ॥३६॥
नेपाले पुण्यभूमौ च मम नाम्नाभिधानके ।
देव्याः प्रसादतो वत्स विन्ध्यात्पुण्यतरं स्थलम् ॥३७॥
एतस्यां स्नायतां वत्स कौशिक्यां प्राक्च भक्तितः ।
समर्च्चयादिलिंगं त्वं ततोऽन्यत्र प्रगच्छ वै ॥३८॥
यत्रयत्र स्थितं तीर्थं तत्रतत्राप्लवं कुरु ।
तत्रतत्र स्थितं लिङ्गं भक्त्या प्रपूजयानिशम् ॥३९॥
तत्रोषित्वा निशामेकां भक्तिभावैर्हरात्मना ।
भविष्यसि सुनिष्पापो लब्धकामो वरोत्तमः ॥४०॥

स्कन्द उवाच ।

इत्याकर्ण्य वचस्तस्य विरूपाक्षो हि नेमुनेः ।
स्नातुं प्रचक्रमेऽगस्त्य-वाक्येन विधिवद्यथा ॥४१॥
माघकृष्णचतुर्दश्यां मघर्क्षेण च संयुते ।
भक्त्या सस्नौ स तत्तीर्थे दुर्गाख्ये स्वस्पृहाप्रदे ॥४२॥
उपदेशं समादाय पंचोपरकैर्मुने ।
आनर्च्च सच तन्मन्त्रैरादिलिङ्गं सुभक्तितः ॥४३॥
दत्वा दीपं निशायां [illegible] रुद्रजापी विनिद्रकः ।
अपृच्छन्नेमुनिं भक्त्या माहात्म्यं तीर्थलिङ्गयोः ॥४४॥

विरूपाक्ष उवाच ।

कर्त्तव्यं धीमतां कर्म्म दानधर्म्मोपवासकं ।
तेनैव सफलं कर्म्म श्रुतिभिरिति निर्मितं ॥४५॥
श्रोतव्यं च सतां वाक्यं सम्यगुक्तं हि धीमता ।
कर्त्तव्यं निश्चितं तस्माच्छ्रोत्रा तद्धर्म्मकर्म्म च ॥४६॥
पूर्वं च श्रोतुकामो मे तत्तत्तीर्थप्रशंसनं ।
एतल्लिंगस्य माहात्म्यं तत्त्वं चैव मुनीश्वरः ॥४७॥
एतस्यां केन पूर्वं च सुस्नातं विधिवन्मुने ।
किं फलं तेन संलब्धं स्नानकेन वदाशु मे ॥४८॥

सिद्धर्षिरुवाच ।

स्नातव्यमेकचित्तेन द्वन्द्वभावं विसर्जयन् ।
गंगाभावेन तीर्थेऽस्मिन्सफलं तस्य कर्म्म च ॥४९॥
आजन्म स्वकृतैः पापैः समहापातकादिभिः ।
मुच्यते तत्क्षणादेव एतत्तीर्थजलाप्लवात् ॥५०॥
पूर्व्वजन्मकृतैः पापैः मुच्यते तत्क्षणात्तथा ।
लिंगप्रदर्शनात्सर्वो भुक्तिमुक्तिस्पृहां लभेत् ॥५१॥
देव्याः स्वेदोद्भवायां च लीलावत्याश्च संगमे ।
स्नानतः सर्व्ववाञ्छादं दुर्गातीर्थमुदाहृतम् ॥५२॥
यंयं च कांक्षितं कामं स्नात्वा तत्राशु भक्तितः ।
लब्धं लोकैः सुखं तन्तं देव्याः प्रसादतो द्विज ॥५३॥
देवैः स्नातं पुरा तस्मिन्योद्धुं वराप्तये भृशं ।
दैत्यैः सदार्च्चितं लिङ्गं स्वकीयजयमुत्सवैः ॥५४॥
दानवैश्च तथा भूयः स्वात्मनो जयमुत्सवैः ।
दुर्गातीर्थे मुदा स्नात्वा आदिलिङ्गं प्रपूजितम् ॥५५॥
लब्धवराश्च ते तस्माद्युयुधुश्च परस्परं ।
देव्याः खड्गप्रपूतांगैर्लब्धं दैत्यैः परं पदम् ॥५६॥
देवा निष्कण्टकं राज्यं चक्रुः स्वर्गे चिरं मुदा ।
देव्याहतेषु दैत्येषु शक्रमुखा भृशं द्विज ॥५७॥
सिद्धर्षयोऽप्सराश्चैव पिशाचोरगराक्षसाः ।
स्नात्वा ह्यपूजयंल्लिङ्गं भक्तिपूर्व्वं सनातनम् ॥५८॥
अवापुस्ते सुसिद्धिं वै स्नातकाः कौशिकी-जले ।
आदिलिङ्गं प्रपूज्याशु संपूर्णसिद्धमानसाः ॥५९॥
शैलान्स्रष्टुं रहो ब्रह्मा दध्यौ पुरात्र शंकरं ।
ततः समुद्भवं लिङ्गमादिलिङ्गमुदाहृतम् ॥६०॥
कश्चित् विप्रो विमुक्तः प्रागत्रैव हि शृणु द्विज ।
अन्तर्वेद्यां समुद्भूतो भ्रष्टो नाम द्विजाधमः ॥६१॥
पञ्चभिः पातकैर्ग्रस्तः पूर्व्वजन्मविपाकतः ।
स्त्री-नर-द्विज-गो-बाल-हिंसाभिरभवञ्जुकः ॥६२॥
अत्रैव च महत्तीर्थं दुर्गाख्यं सुफलप्रदं ।
दैवादपि समागत्य अपश्यद्भक्तिवर्ज्जितः ॥६३॥
चौरवृत्तिं समासाद्य अस्पृशल्लिङ्गमुत्तमं ।
तल्लिङ्गाक्तविभूत्या च अलेपि तल्ललाटकम् ॥६४॥
एतत्तीर्थजलं पूर्व्वं तन्नैवेद्यमशन्नपौ ।
ततो भ्रष्टस्तटे तस्थौ तन्निशायां हिमार्द्दितः ॥६५॥
फाल्गुनस्यासिते पक्षे अमावास्या-महानिशि ।
पंचत्वं प्राप्तवान् भ्रष्टस्तत्पूर्व्वमस्पृशच्छिवम् ॥६६॥
ततश्च शिवदूतैः स यानेनापि च वैश्वरं ।
अद्यादिसद्विजो भ्रष्टो रुद्रस्यानुचरोऽभवत् ॥६७॥
तस्मादपि च धीमद्भिश्चतुर्दश्यां महातिथौ ।
स्नातव्यं प्रथमं कार्य्यमर्च्चनीयं ततः शिवम् ॥६८॥
सर्व्वपर्व्वसु यत्नेन स्नातव्यं विधिवद्बुधैः ।
हव्यकव्यार्च्चनन्तत्र अन्यत्कोटिगुणं फलम् ॥६९॥
कुष्ठी स्नात्वादिलिंगं यो भक्त्या प्रेक्ष्य प्रपूजति ।
कुष्ठजन्म परित्यज्य रुद्रलोके वसेत्सुखम् ॥७०॥
एतद्धि तुभ्यं कथितं माहात्म्य,—
माहात्म्यलिङ्गस्य तथा च नद्योः ।
तीर्थं हि योगेसुफलप्रदं वै
भीमेश्वरो यत्र विरूप गच्छ ॥७१॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे विरूपाक्षतीर्थयात्रायां दुर्गातीर्थादिलिङ्गयोर्म्माहात्म्यं
नामैकोननवतितमोऽध्यायः ॥८९॥

—❀❀❀—

स्कन्द उवाच ।

दुर्गातीर्थे मुदा स्नात्वा प्रजहौ कुष्ठजं रुजं ।
ततः कुष्ठाद्विमुक्तोऽसौ तद्गुणैश्च घटोद्भव ॥१॥
वन्येन पारणां कृत्वा विरूपाक्षोऽगमत्पुनः ।
सिद्धर्षिणा समं यत्र भीमेश्वरो विराजते ॥२॥
तस्माद्धि दिशि कौबेर्य्यां त्रियोजने घटोद्भव ।
ताम्रचूडाचलस्याधः नद्योः सुसंगमं बभौ ॥३॥
माधकृष्णस्य पूर्णायां देवतीर्थे यथाविधि ।
सस्नौ कौशिकयोर्विप्र संगमे देवसेविते ॥४॥
स्नात्वाऽसौ विधिवल्लिंगं भक्त्यानर्च्चे विरूपधृक् ।
दीपं दत्वा मुनिं रात्रौ अपृच्छत्तत्प्रशंसनम् ॥५॥

विरूपाक्ष उवाच ।

मुनीश मुनिशार्दूल तीर्थतत्त्वविशारद ।
भवतीच्छाम्यहं चात्र प्रश्नं त्वयि दयाकर ॥६॥
भीमेश्वर इति ख्यातो भवता तत्र मे विभो ।
तस्यैव चोद्भवं चैव [illegible]कथां च मुनीश्वर ॥७॥
फलं प्रलभ्यते येन श्रोतव्यं प्राक् च भक्तितः ।
भीमेश्वरस्य तीर्थस्य माहात्म्यं वद मेऽधुना ॥८॥

नेमुनिरुवाच ।

शुंभासुरभयाद्देवा अत्रैव हि प्रदुद्रुवुः ।
कौशिकयोर्द्वयोर्मध्ये सस्नुः पराजिताश्रमाः ॥९॥
तस्माच्च देवतीर्थं च विख्यातं भुवि दुर्लभं ।
स्नात्वा शतगुणं पुण्यं फलमन्यत्र संलभेत् ॥१०॥
तत आवाहयन्रुद्रं देवास्त्रिभुवनेश्वरं ।
भक्तिभिश्च स्तवैश्चात्र दानवाद्भयविह्वलाः ॥११॥
तदोद्भूतमिदं लिङ्गं हरवक्त्रं भयंकरम् ।

कूपादुत्तीर्य्य स शीघ्रं स्थूलपाद इहात्रजत् ॥१०॥
कृत्वात्मानं च धिक्कारमित्यस्थिरं च जीवनं।
देहेनानेन किं भद्रं साध्यते हि च मे हितम् ॥११॥
ज्ञानवान्स्थूलपादोऽसौ एतल्लिंगमसेवयत्।
अलकां खलु सन्त्यज्य प्रियाप्रियं प्रभुं तथा ॥१२॥
ज्ञानकूपोद्धृतैस्तोयैर्नानापुष्पोच्चयैर्मुदा।
नित्यमुपासते लिङ्गं पर्व्वतेश वदन्निति ॥१३॥
माघकृष्णचतुर्दश्यां पंचत्वं प्राप्तवान्निशि।
भवामि तव दासोऽहं स्थूलपाद इति ब्रुवन् ॥१४॥
वर्षयन् पुष्पवर्षाणि यानहस्तास्त्विहाययुः।
रुद्रगणा मुदा तस्मै वदन्तो साधु साध्विति ॥१५॥
तमास्थाय गणा याने निन्युः शिवपुरं महत्।
उद्धूतमाना आद्रैश्च चामरैः किंकरोद्धृतैः ॥१६॥
अद्यापि च भवेत्सोऽपि रुद्रस्यानुचरो बली।
योजनपाद इत्याख्यो देवासुरैः प्रमाणितः ॥१७॥
अतो गच्छ विरूपाक्ष धनुषां हि चतुःशते।
जलमध्ये दिशि प्राच्यां यत्रास्ते हि जलेश्वरः ॥१८॥
अध्यायेऽस्मिन् हिमगिरिपतेर्यो माहात्म्यं शृणोति,
ज्ञानाख्ये यत्प्रयतजलजे स्नानतः सोऽपि कूपे।
प्राप्यार्घ्यस्तत्फलमनुमितं गच्छति स्थाणुलोकम्
ज्ञानी त्यक्त्वा कठिनकलुषं ज्ञानशास्त्रूद्भवं वै ॥१९॥
इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां ज्ञानकूपतीर्थपर्व्वतेश्वरयोर्माहात्म्यं नामैकोनपंचाशदुत्तरशततमोऽध्यायः ॥१४९॥

—❀✽❀—

स्कन्द उवाच।

भूयो जगाम सिद्धर्षिर्यत्रास्तेऽसौ जलेश्वरः।
चतुश्शते च धनुषामतस्तत्र घटोद्भव ॥१॥
जलेश्वरमहातीर्थे भक्त्या स्नात्वा विरूपदृक्।
अर्चितवान्महालिङ्गं जलमध्योद्भवं मुदा ॥२॥
राधशुक्लत्रयोदश्यां तन्निशायां स पूजयन्।
तल्लिङ्गस्य च माहात्म्यं प्रश्नं चकार नेमुनिम् ॥३॥
पृच्छयमानो मुनिश्रेष्ठो विरूपाक्षाय वै पुनः।
व्याजहार ततो रात्रौ तन्माहात्म्यं घटोद्भव ॥४॥

नेमुनिरुवाच।

आराधितं हि वाग्मत्या संस्नापितुं शिवं पुरा।
पवित्रितुं स्वतो यानां भक्तिभावेन नित्यशः ॥५॥
मां पाहि देवदेवेश पवित्रं कुरु सन्ततं।
लोकमान्या भविष्यामि त्वत्रेशसमुद्भवात् ॥६॥
आकर्ण्य तद्वचो रुद्रो वाग्मत्या नित्यमीरितं।
कार्त्तिकस्य सिताष्टम्यां लिङ्गं समुद्भवं जले ॥७॥
जलान्तरात्समुत्तीर्य्य आविर्भूतो महेश्वरः।
वचो व्याचष्ट वाग्मत्यै वरं दातुं तदा मुदा ॥८॥

जलेश्वर उवाच।

देवि वाग्मति सर्व्वाणि वरं वरय सांप्रतं।
मयि वरयसे यत्त्वं तत्सर्व्वं च ददामि ते ॥९॥
पूर्वं दत्तं वरं तुभ्यं मयाऽमरैः सुरर्षिभिः ॥१०॥
लोकवन्द्या भवाद्यापि(दि)सर्वकलुपनाशिनी।
एवं दत्तं वरं तुभ्यं प्रिये मयामरैः सह ॥११॥
तथापि याच्यतां देवि दास्येऽहं निश्चितं पुनः।

वाग्मत्युवाच।

सर्वं दत्तं पुरा मह्यं भवता त्रिदशर्षिभिः ॥१२॥
तथापि त्वयि याचेऽहं देवदेववरं पुनः।
सर्वैर्जलचरैः कीटैरसद्भिर्जन्तुभिस्तथा ॥१३॥
मे मूर्त्तिर्दूषिता नित्यं अमेध्या कलुषीकृता।
तद्दोषैर्दूषिता चाहममेध्यजीविनी सदा ॥१४॥
येन पूता भवामीश याचेऽहं तद्वरं त्वयि।
मम जलान्तरे नित्यं स्थातव्यं भवतापि च ॥१५॥
स्नापयेऽहं भवन्तं वै मत्कल्लोलैः सदार्च्चनैः।
ततस्तवार्चनैर्देव पूता जलमयी ह्यहम् ॥१६॥
भविष्यामि न सन्देहस्त्वत्प्रसादात्प्रभोऽनिशं।

जलेश्वर उवाच।

एवमस्तु महादेवि वाग्मति लोकपाविनि ॥१७॥
ददामि शृणु ते देवि वरं वरय उत्तमं।
स्नायन्ते त्वयि यावन्तो जीविनो ज्ञानवर्ज्जिताः ॥१८॥
ते भविष्यन्तु निष्पापास्त्वज्जलस्पर्शनादपि।
जलौकसां खगानां च जंगमानां च वाग्मति ॥१९॥
मलमूत्रैस्तथोच्छिष्टैः कदापि त्वं न दूष्यसे।
एतच्छंकां विधायार्य्य यः स्नायते परे त्वयि ॥२०॥
विशेषेण महानद्यां स स्यात्किल्बिषबन्धनः।
नित्यं धर्मतरंगैस्ते चात्र धर्मतरंगिणि ॥२१॥
स्नापयामि जलान्तःस्थो यावत्त्वत्प्रवाह वै।
ततो मत्स्नानतो लोकैस्ते वदिष्यन्ति वाग्मतीम् ॥२२॥
धर्मतरंगिणी चेति शिवगंगा सरस्वती।

नेमुनिरुवाच।

प्रोच्यमानः शिवश्चैवं वाग्मत्यै च तदीप्सितम् ॥२३॥
साक्षाद्दत्वा वरं शीघ्रं तिरोदधे जलान्तरे।
वाग्मती च ववाद्यार्घ्यं बहुतरंगिणी मुदा ॥२४॥

अभ्यर्च्य खलु तल्लिङ्गं स्वच्छकल्लोलपूजनैः ।
देवर्षिभिस्तथा सिद्धैरेतल्लिङ्गं प्रपूजितम् ॥२५॥
कालान्ते च ततो मुक्तः कश्चिद्दैत्योऽत्र वै शृणु ।
पूर्वजन्मनि विप्रोऽसौ गुरोर्गां हतवान्द्विज ॥२६॥
पितनुद्दिश्य चारण्ये निर्ज्जने पालको रहः ।
अनिवेद्य स्वयं पित्रे तन्मांसं भुक्तवान्सुखी ॥२७॥
तत्पापैरवलिप्तः कठोरैश्च त्रिभिस्तदा ।
गुरोर्गां प्रहतेनाशु पित्रेऽनिवेद्य भक्षणात् ॥२८॥
तस्माल्लोकैः समाहूतस्त्रिशंकुरिति विश्रुतः ।
जन्मान्ते सोऽभवद्दैत्यस्तत्पापलिप्तविग्रहः ॥२९॥
त्रिशंकुरिति विख्यातो वाणासुरात्मजो बली ।
स एव दृष्टवान्पूर्वमेतल्लिङ्गप्रपूजितम् ॥३०॥
देवर्षिभिर्मुदा भक्त्या वाग्मतीं रुन्ध्य पर्वसु ।
दुद्राव तरसा देवान्छरवर्षं प्रवर्षयन् ॥३१॥
स त्रिशंकुरिति प्रोच्य तिष्ठध्वं रेऽमराः क्षणं ।
तं प्रेक्ष्य दुद्रुवुर्देवा दिशः सिंहं मृगा इव ॥३२॥
ततो भक्त्या ननामेशं त्रिशंकुश्च परिक्रमन् ।
सरुन्ध्य वाग्मतीं नित्यं गोकर्णे कन्दरे मुहुः ॥३३॥
संपूजतिस्म भक्त्या स एतल्लिंगं महासुरः ।
एवं प्रपूजितं लिंगं त्रिशंकुना हि सन्ततम् ॥३४॥
एकसंवत्सरं व्याप्य त्रिसन्ध्यं भक्तितो मुदा ।
आविर्भूतः शिवो लिङ्गाद्वरं दातुं निशान्तरे ॥३५॥
कार्त्तिकस्य सिताष्टम्यां सर्वायुधोपशोभनः ।

जलेश्वर उवाच ।

दास्येऽहं ते वरं भक्त यद्वाञ्छितं हृदा तव ॥३६॥
तत्सर्वं खलु निष्पाप शृणु मनःसमाहितः ।
अद्य प्रभृति वत्स त्वं संजीव्याः सततं पुनः ॥३७॥
ममानुगो भवाग्र्याशु देवासुरैश्च दुर्ज्जयः ।

नेमुनिरुवाच ।

इत्युक्त्वान्तर्दधे लिङ्गे जलान्तरे जलेश्वरः ॥३८॥
वरदः सर्ववन्द्येशस्त्रिशंकुं श्रावयन्वरम् ।
ततो याने समास्थाय त्रिशंकुं प्रमथा मुदा ॥३९॥
निन्युः शिवपुरं शीघ्रं गीतवाद्यैः प्रसेवयन् ।
तत्र गच्छ विरूपाक्ष यत्र गुह्येश्वरो विभुः ॥४०॥
सप्तजन्मार्जितैः पापैरत्र स्नानाद्विमुच्यते ।

शृणोति योऽध्यायमिदं सुभक्तितः,
स तत्र संस्नानफलं प्रलभ्य वै ।
प्रयाति नूनं शिवलोकमङ्गलं,
नरो हि सन्त्यज्य कृतं स्वकिल्बिषम् ॥४१॥

इतिश्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां जलेश्वरमाहात्म्यं नाम पंचाशदुत्तरशततमोऽध्यायः ॥१५०॥

—❀❀❀—

स्कन्द उवाच ।

भूयोऽगमद्विरूपाक्षो यत्र गुह्येश्वरो विभुः ।
गुह्येश्वरीमहातीर्थे स्नात्वा भक्त्या षटोद्भव ॥१॥
राधशुक्लचतुर्दश्यां भक्त्या पंचोपचारकैः ।
देव्या सह महारात्रौ गुह्येश्वरमपूपुजत् ॥२॥
संपूज्य विधिवल्लिङ्गमपृच्छन्नेमुनिं निशि ।
लिङ्गस्य चैव देव्याश्च माहात्म्यं भक्तितो मुदा ॥३॥
आकर्ण्य तद्वचोऽगस्त्य विरूपाक्षस्य नेमुनिः ।
व्याजहार तदा वाक्यं तन्माहात्म्यं प्रशंसयन् ॥४॥

ऋषिरुवाच ।

अगोचरमहादेव्या अगोचरस्य शूलिनः ।
तथाऽप्रत्यक्षरूपायाः कथं वच्मि विरूपदृक् ॥५॥
मनसा कर्मणा वाचा भक्तिवर्ज्जितदेहिनाम् ।
लिंगस्यागोचरायाश्च ते कथं वच्म्यगोचरम् ॥६॥
योगीश्वरस्य योगिन्या महायोगैश्च योगिनां ।
अप्यल्पप्राप्तरूपाया अस्य च वच्म्यहं कथम् ॥७॥
तथापि योगरूपाय माहात्म्यं वच्म्यहं शृणु ।
देव्याश्च व्यक्तरूपाया लिङ्गस्यैतदपि ध्रुवम् ॥८॥
गुह्येश्वर्या महादेव्या गुह्येश्वरस्य सिद्धिभाक् ।
अस्या अस्मात्सुरैर्लब्धं वरान्शृणु पुरा द्विज ॥९॥
ब्रह्मणा ब्रह्मपदं लब्धं वैकुण्ठं विष्णुना पुनः ।
रुद्रेण व्यापकं लब्धं शङ्करत्वं च सर्वदा ॥१०॥
दिक्पतिभिश्च लब्धं वै दिशांपाल्यं निरन्तरं ।
एतस्या योगरूपायाः प्रसादाद्धि न संशयः ॥११॥
ऋषिभ्यश्चार्हणत्वं च सिद्धेभ्योऽजस्रजीवनं ।
स्वभक्तेभ्यो ददौ देवी सिद्धः स्वान्तेप्सितं तथा ॥१२॥
काचित्स्त्रिया वरं लब्धं,एतस्याश्च पुरा शृणु ।
पतिना त्यक्तयावश्यं तथान्यैस्त्यक्तरूपया ॥१३॥
सा स्वच्छन्दगतिश्चाभून्मारुते पूर्वजन्मनि ।
पतिं विहाय नित्यं वै प्रियाध्यक्षे निशाचरी ॥१४॥
अन्यैः सा पुरुषैः सार्द्धं रतिं चकार नित्यशः ।
मृते गंगातटे पत्यौ सा चाभूत्सहगामिनी ॥१५॥
गंगातीरे मृतात्पुण्याद्भर्त्तुः संगमनात्पुनः ।
बभूव तस्य राज्ञो वै महिषी सा विरूपदृक् ॥१६॥
नापश्यत्तन्मुखं भर्त्ता पूर्वजन्मविपाकतः ।
दुःखातुरा ततोऽभूत्सा पृथक् शय्या निरन्तरम् ॥१७॥

कश्चिद्यतिमुखात्सा च अशृणोद्धि विरूपदृक्।
एतस्याश्चैव माहात्म्यं वश्यस्तम्भनशंसनम् ॥१८॥
पिङ्गला सा महारात्रौ विनिःसृता पुरात्तदा।
एकाकिनी समं सख्या एनां प्रदर्शितुं खलु ॥१६॥
देशाद्देशान्तरं लंघ्य लोकानपृच्छत्तत्पथं।
अत्र प्राप्तवती सा च ईषे कृष्णाष्टमीदिने ॥२०॥
तत्र स्नात्वा समं सख्या पिंगला सा च भक्तितः।
गुह्येश्वरीमहातीर्थे संपूज्य विधिवन्मुदा ॥२१॥
लिङ्गेन संयुतां देवीं संप्रेक्ष्य सा ननाम च।
कृष्णाष्टम्यां निराहारा अपूपुजन्महानिशि ॥२२॥
विशेषेण पतिश्चान्यो वश्यो भवतु मे ध्रुवं।
एवं प्रोक्त्वा धिया स्वान्ते भावमास्थाय चेतसा ॥२३॥
नानापुष्पैः समानीतैरर्चयित्वाशु भक्तितः।
नवम्यां सा महारात्रौ संपूजयति पार्वतीम् ॥२४॥
अशृणोद्गगनाद्वाणीं पिङ्गले चेति शर्वरीं।
सिन्दूरं कज्जलं चैतत्प्रगृह्य भूषयानिशम् ॥२५॥
पिंगलेति वचः श्रुत्वा किमिति चकितेक्षणा।
सिन्दूरं कज्जलं चात्र ददर्श सा महानिशि ॥२६॥
तत्कज्जलं च सिन्दूरं साध्वी जग्राह तत्क्षणात्।
तद्वाक्यं सा समाकर्ण्य हर्षविस्फुल्लमानसा ॥२७॥
दशम्यां सा ततः प्रातः स्नात्वाभ्यर्च्य शिवां पुनः।
चकार पारणं साध्वी सख्या सह वनोद्भवैः ॥२८॥
अभिधानं ततो भर्त्तुः संगृह्य मनसा सती।
देव्या मन्त्रं पठन्ताभ्यां भूषयामास चाननम् ॥२६॥
कुरु जन्मनि वश्यत्वं मत्पतिं सहसा शिवे।
इत्युक्त्वा भूषयामास सा भालं लोचनं मुदा ॥३०॥
ततो वन्द्य भवानीं वै परिक्रम्य स्तुवन्मुहुः।
विनिर्ययौ ह्यतः साध्वी स्वदेशाय हसन्मनाः ॥३१॥
पश्यन्तिस्मायने ये ये यान्तीं सुवदनीं हि तां।
तत्रैव मुमुहुस्ते ते स्थगितगतयो भृशम् ॥३२॥
तत्प्रयोगेण राज्ञश्च चुक्षुभे च मनो भृशं।
सहस्रयोजनानां च दूरस्थस्यापि सिद्धिभाक् ॥३३॥
मनःक्षोभस्ततो राजा अन्वेषितुं प्रियां प्रति।
विनिर्ययौ पुराच्छीघ्रं हा पिंगले प्रिये त्विति ॥३४॥
एवं प्रोक्त्वा मन्त्रिभी राजा सुदन्तो हि व्रजन्पथि।
गंगातीरे ततः प्राप्ता पिंगला चैव सुन्दरी ॥३५॥
हा प्रिये भूपतिरिति कृत्वालिलिङ्ग तां प्रियां।
क्व गतासि च मां त्यज्य प्राणानां मे गरीयसी ॥३६॥
तस्मिन्काले ततः शक्रस्तत्रायो सुरैः समं।
चकोश सहसा राज्ञीं समानेतुं स्वमालयम् ॥३७॥

हा पिंगले साधु साधु व्रज स्वर्गं ममालयं।
सर्वदेवैः प्रवन्द्या त्वं भविष्यसि न संशयः ॥३८॥
इत्युक्त्वा स्पर्शितुं तां वै शक्रः करं ससार सः।
क्षोभेन्द्रियश्च कामाक्त संप्रेक्ष्याशु वरांगिनीं ॥३६॥
ततो देव्याः प्रसादात्सा शक्राय समुवाच ह।
मा मा स्पर्शय मां शक्र पतिव्रतां कदापि च ॥४०॥
यद्यपि स्पृशसि त्वं मां देव्याः प्रसादतो वृष।
मम शापानलज्वालैर्भस्मसाच्च भविष्यसि ॥४१॥
इत्युक्त्वा प्रययौ साध्वी स्वराज्यं सहसा मुदा।
वादयन्सर्वलोकाश्च सर्वत्र साधु साध्विति ॥४२॥
अनुययौ पतिस्तस्याः सैन्यैः समं नृपः प्रियम्।
दासवत्सेवयंश्चेति किं कुर्वामः प्रिये वद ॥४३॥
शक्रोऽपि च ययौ स्वर्गं भग्नमनोरथः पुनः।
तस्याः शापभयोद्विग्नो म्लानमुखः सुरैः समम् ॥४४॥
बुभुजे सा मुदा राज्यं यावज्जीवं महासुखं।
वश्यं कृत्वा पतिं लोकान्पुत्रवती सुखी सदा ॥४५॥
देहान्ते तां ततस्तत्र समास्थाय विमानके।
समानिन्युश्च योगिन्यो देव्याः पुरं परात्परम् ॥४६॥
भूयः शृणु पुरा कश्चिन्मुक्तश्चात्र नरः परः।
एतल्लिङ्गं मुदा भक्त्या सेवनाद्धि विरूपदृक् ॥४७॥
आसीत्कश्चिद्धि चाण्डालो मिथिलायां विरूपदृक्।
त्र्यङ्गो नाम च विख्यातो मीनजन्त्वन्तकोऽनिशम् ॥४८॥
द्विजातीनां समालोक्य सुधर्म्मसंपदं तथा।
धिग्धिगित्यवदन्नित्यं चाण्डालोऽसौ स्वविग्रहम् ॥५०॥
वैद्यमुखात्समाकर्ण्य काले प्राप्ते तदात्मनः।
वाग्मत्यां गतवान् शीघ्रं सन्त्यक्तुं स्वकलेवरम् ॥५१॥
इहान्तेऽपि परत्राऽपि मां विप्रं कुरु वाग्मति।
एवं संकल्प्य तीरेऽसौ वाग्मत्यामजहत्तनुम् ॥५२॥
तत्पुण्यतोऽभवद्विप्रो जातिमात्रेण वै ततः।
नाशय मम पापं च संकल्प्यमकृतादिति ॥५३॥
स नित्यं मृगयाशीलः सर्व्वजन्तुभयप्रदः।
अनाचारे समारूढो मिथ्यावाक् खलु सर्वभुक् ॥५४॥
त्यक्तः स्वजातिभिर्विप्रो भ्रष्टाचारोऽभवत्सदा।
विख्यातो ब्रह्मचाण्डालो ह्यतिक्रूरो हि जन्तुषु ॥५५॥
कश्चिद्यतिं समासाद्य विनिर्ययौ पुराद्बहिः।
तत्संपर्केण सोऽभूद्धि शौचतो ज्ञानमाप्तवान् ॥५६॥
अत्रासौ ब्रह्मचाण्डालः प्राप्तवान्यतिना सह।
प्रेक्ष्य पशुपतिं शंभुं वाग्मत्यां स्नातको मुहुः ॥५७॥
ईषे कृष्णचतुर्दश्यां तत्रैव स्नातको यतिः।
स्नापयद्ब्रह्मचाण्डालमत्र विविशतुर्मुदा ॥५८॥

महालिङ्गं सगुह्याख्यमद्राचीज्जगदम्बिकाम् ।
ननाम दण्डवद्भूमौ भक्त्याष्टाङ्गैः परिक्रमन् ॥५९॥
एतल्लिङ्गस्पृशात्सद्यो यानेन सतनुर्ययौ ।
उत्पपाताम्बरे हर्षं पुष्पासारं ववर्ष च ॥६०॥
नीयमानं गणैः सिद्धं विद्योतयन्नविं यथा ।
स्वाध्यन्ते गगनाद्विप्रः सोऽभूद्विरक्तमानसः ॥६१॥
यावन्मां नोद्धरेल्लिङ्गं सेवे त्वां तावदीश्वरः ।
यथैव ते गणैर्नीतं स्पृहयेऽहं यतिं तथा ॥६२॥
सप्तजन्मार्जितैः पापैः समुक्त एकवत्सरात् ।
एतल्लिङ्गस्पृशात्सिद्धः अपि मन्त्रैर्विवर्जितः ॥६३॥
विभूत्या लेपयद्गात्रं रुद्राक्षान्धार्य्य वर्म्मषु ।
नानापुष्पाणि चाहृत्य प्रत्यहं समपूपुजत् ।।६४॥
ईषे कृष्णाष्टमीरात्रौ ददौ तस्मै वरं हरः ।
त्रिनेत्रं डमरुं शूलं मालां स्वसदृशीं तनुम् ॥६५॥
ववर्ष पुष्पवर्षं च नानावाद्यं ननाद च ।
साधु साध्विति चाजस्रमभून्नादो विहायसि ॥६६॥
ततोऽसौ हर्षयुक्तात्मा प्रेदय स्वविग्रहं तदा ।
त्रिनेत्रं सायुधं स्तोतुं प्रचक्रमे हरो यथा ॥६७॥

ब्रह्मचाण्डाल उवाच ।

ॐगुह्येश्वर महादेव गुह्यरूप नमोऽस्तु ते ।
गुह्येश्वरि महादेवि गुह्याख्यायै नमोस्तु ते ॥६८॥
शिवशक्त्यात्मकं लिङ्गं लिङ्गं धृताय वै नमः ।
शिवेन संयुताङ्गायै शिवात्मायै शिवे नमः ॥६९॥
शिवाय शिवरूपाय शक्तिरूपाय ते नमः ।
मायायै शिवरूपायै शिवलिङ्गधृते नमः ॥७०॥
योगेश्वराय योगाय योगानां पतये नमः ।
योगेश्वर्य्यै नमो देव्यै योगिनीकोटिसेविते ॥७१॥
सर्वागम्यचरित्राय अपाराय नमो नमः ।
वाङ्मनोऽगोचरायै तेऽयोनिजेऽगोचरे नमः ॥७२॥
ब्रह्मेश्वराय जीवाय सच्चिदानन्दरूपिणे ।
माये ह्युपाधिरूपायै ते तत्सत्प्रेरके नमः ॥७३॥
देहस्थाय च सर्वाय मायाधीनाय वै नमः ।
अन्तःस्थायै च मोक्षायै हराधीने नमोऽस्तु ते ॥७४॥
नमो व्यञ्जनरूपाय वागीशायाक्षराय च ।
मात्रायै शब्दरूपायै नादरूपे नमोऽस्तु ते ॥७५॥
मंत्राय मन्त्रदेहाय मन्त्रपूज्याय वै नमः ।
कलायै विन्दुरूपाय अर्द्धमात्रे नमोऽस्तु ते ॥७६॥
ज्ञानप्रद महादेव मुक्तिप्रदे नमोऽस्तु ते ।
क्षमस्व मेऽपराधं च भवानिशङ्करप्रभो ॥७७॥

सिद्धर्षिरुवाच ।

इत्येवं स्तूयमाने च उमामहेश्वरे द्विज ।
आययुः प्रमथा व्योम्नो रुद्राज्ञयेह वै मुदा ॥७८॥
ततस्तं प्रमथा याने आस्थाय त्वरितं द्विज ।
निन्युः शिवपुरं पूतं गीतवाद्यैः प्रमोदयन् ॥७९॥
सोऽभवत्ब्रह्मचाण्डालो रुद्रस्यानुचरः सुखी ।
एतल्लिङ्गप्रसादाद्वै अपि च पातकैर्युतः ॥८०॥
अत ऊर्ध्वं प्रगच्छाशु किरातेशो हि यत्र च ।
तीर्थेषु च पुनः स्नाहि मृगस्थल्यां श्रवस्तु च ॥८१॥

यो माहात्म्यं खलु हि शृणुयान्मानसेच्छाप्रदं वै,
गुह्येश्वर्य्या अपि कलुषभागेतदध्यायपुण्यं ।
आयुः कीर्त्तिंधनमपि यशः शत्रुनाशं च युद्धे,
प्राप्नोत्यार्य्यो हृदभिलषितं गुह्यसंज्ञस्य शंभोः ॥८२॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां गुह्येश्वरीगुह्येश्वरयोर्माहात्म्यं नामैकपञ्चाशदुत्तरशततमोऽध्यायः ॥ १५१ ॥

—❀❀❀—

स्कन्द उवाच ।

ततोऽगमद्विरूपाक्षस्तीर्थयात्रां घटोद्भव ।
सिद्धाश्रमे मृगस्थल्यां नानाद्रुमलतान्विते ॥१॥
आकर्ण्याकर्ण्य तीर्थानां माहात्म्यमुद्भवं तथा ।
पृच्छमानो मुहुस्तेषु सहनौ च भक्तितः पुनः ॥२॥
व्याजहार वचः सिद्धः पूर्णिमायां पुनस्ततः ।
प्रश्नमानो हि तेनार्य्य तीर्थानां च पृथक् पृथक् ॥३॥

सिद्धर्षिरुवाच ।

एतस्या गिरिजायाश्च तत्र पूर्व्वोत्तरे द्विज ।
दक्षिणेन तु वाग्मत्या आसीच्च पशुकन्दरम् ॥४॥
तीर्थं ब्रह्मोदयं नाम ब्रह्मणा निर्मितं पुरा ।
तत्र गत्वा जलं स्पृष्ट्वा स्नानाद्वाभ्युक्षणाच्च वा ॥५॥
न पश्येन्मृत्युलोकं च सर्व्वपापैर्विवर्जितः ।
स्नाहि भक्त्या विरूपाक्ष अत ऊर्ध्वं व्रज ध्रुवम् ॥६॥
अस्मिन्सुन्दरिकातीर्थे स्नात्वा च रूपवान्भवेत् ।
स्त्रीषु सौभाग्यमाप्नोति पूर्वैनोभिर्विवर्जितः ॥७॥
अत ऊर्ध्वं विरूपाक्ष स्कन्दतीर्थं व्रजाधुना ।
स्तनकुण्डे ह्युमादेव्याः स्नाहि कुण्डे परात्परे ॥८॥
जन्यमाने पुरा स्कन्दे उमा तस्मै ददौ स्तनं ।
भूमौ यदपतत्क्षीरं कुण्डभूतं ततः परम् ॥९॥
स्तनकुण्डे ह्युमायास्तु यः स्नायात्तत्र मानवः ।

स्कन्दलोकमवाप्नोति भूत्वा वैश्वानरद्युतिः ॥१०॥
शूलोद्गङ्गे शुभे तीर्थे स्नायतामत्र भक्तितः ।
जातिस्मरणमाप्नोति तीर्थानां प्रवरे पुनः ॥११॥
भ्राम्यमाणेऽत्र रुद्रे च शूलमारोपयद्यदा ।
तस्मात्समुद्भवा गंगा देवर्षिभिः प्रमाणिता ॥१२॥
शूलगंगे शुभे तीर्थे स्नायते यस्तु मानवः ।
जातिस्मरणतां प्राप्य ब्रह्मलोकं स गच्छति ॥१३॥
भूयोऽत्र स्नायतां सिद्ध ब्रह्मभेदे परात्परे ।
भृगुकन्दरमूले वै ब्रह्मसायुज्यमाप्नुयात् ॥१४॥
तस्यामगस्त्य वाप्यां च संस्नायतां पुनर्द्विज ।
ऋषिभिः सेवितं नित्यमेतत्तीर्थंसुरैरपि ॥१५॥
अत्रैव च भृशन्तेपे अगस्त्योऽसौ महामुनिः ।
शरदां वै शतं व्याप्य ब्रह्मणः कलशोद्भवः ॥१६॥
ब्रह्मा विष्णुश्च रुद्रश्च अत्रागत्य ददुर्वरं ।
शापायुधं चिरञ्जीवं देवर्षिभिः प्रवन्दनम् ॥१७॥
एतस्यां स्नायते तस्यामगस्त्यं संस्मरन् हि यः ।
सप्तजन्मार्जितैः पापैः स मुक्तो नात्र संशयः ॥१८॥
सप्तर्षीणां महातीर्थे अत्रैव स्नायतां द्विज ।
सप्तजन्मोद्भवैः पापैः प्रमुच्यते न संशयः ॥१९॥
पशुयोन्यां महातीर्थे स्नायतां विधिवद्द्विज ।
न पुनर्जायते योनौ पशूनां पक्षियोनिषु ॥२०॥
अत्रैव शंकरः पूर्व्वं पशुरूपं दधार वै ।
तस्मात्समुद्भवं तीर्थं देवैः सिद्धैः प्रसेवितम् ॥२१॥
पशुयोनिं च यो भक्त्या संपूज्य स्नायते मुदा ।
पशुपाशं समुत्सृज्य कामसिद्धिं समाप्नुयात् ॥२२॥
अत्र गोखुरके तीर्थे स्नायतां कामसिद्धिदे ।
तत्रैव स्नानमात्रेण सिद्धदेहो न संशयः ॥२३॥
एतद्गोखुरकं नाम गोवृषपदमीक्षितं ।
तमालोक्य पुमाञ्छ्रेष्ठो गोसहस्रफलं लभेत् ॥२४॥
अतः पूर्व्वदिशि क्षेत्रे योगकुण्डे जलोत्तमे ।
स्नायतां देववाप्यां वै योगसिद्धिमवाप्स्यसि ॥२५॥
योगकुण्डे महातीर्थे स्नायते चैकवत्सरं ।
ध्यानैर्विवर्ज्जितः सोऽपि योगीश्वरो भवेद्ध्रुवम् ॥२६॥
स्वर्णधारानदीमूले यज्ञविलविनिःसृते ।
स्नायतां विधिना सिद्धास्सर्वयज्ञफलं लभेत् ॥२७॥
यज्ञं चकार पूर्वेऽस्मिन्नत्र दक्षः प्रजापतिः ।
सर्वैश्च मृण्मयैर्भाण्डैः सिद्धदेवर्षिपूरितैः ॥२८॥
तन्मृण्मयानि पात्राणि उच्चैः संप्रेक्ष्य वै तदा ।
जहसुश्च भृशं देवाः किमिति प्रवदन् मिथः ॥२९॥
पवित्रत्वैः कृतैश्चापि मृण्मयैर्भाण्डकैः पुनः ।
लज्जितवान्तदा दक्षो हास्यमानोऽमरैर्भृशम् ॥३०॥
तदा चावाहयद्दक्षः स्वर्णरसं सुभक्तितः ।
धनाध्यक्षं प्रणम्याशु रुद्रमन्त्रेण चेतसा ॥३१॥
उत्पपात जलं पुण्यं यज्ञकुण्डाद्विनिःसृतं ।
नदीभूता ततो गंगा स्वच्छकल्लोलमालिनी ॥३२॥
व्याजहार वचो दक्षः कर्तृकेभ्यो हि तत्क्षणात् ।
एतज्जलेन भाण्डानि क्षालयध्वं ननु त्विति ॥३३॥
वचो निशम्य कर्त्तारो दक्षस्य सहसा तदा ।
प्रक्षालयंश्च तत्तोयैस्तानि भाण्डानि सर्वशः ॥३४॥
ततोऽभवन् हि भाण्डानि मृण्मयानि च तत्क्षणात् ।
स्वर्णमयानि दिव्यानि यावद्धौतानि तज्जलैः ॥३५॥
ततो देवर्षयस्तानि संप्रेक्ष्य मुमुहुर्भृशं ।
संतुष्टुवुश्च दक्षाय साधु साध्विति वै वदन् ॥३६॥
तदादि चाद्यतो विप्र स्वर्णरसा नदी त्वियं ।
स्वर्णधारेति विख्याता देवर्षिभिः प्रसेविता ॥३७॥
एतस्यां स्नायते यो हि सर्व्वयज्ञफलं लभेत् ।
धनानि विपुलं भुक्त्वा गच्छति स्वर्गमुत्तमम् ॥३८॥
भूयोऽत्र स्नाति यस्तीर्थे कोपोदके जलोत्तमे ।
सर्व्वयज्ञफलं प्राप्य स गच्छेद्ब्रह्मणः पदम् ॥३९॥
कोपात्कोपं समाहृत्य रूपं च निर्मितं सुरैः ।
तीर्थं कोपोदकं नाम पुण्यं मुनिजनप्रियम् ॥४०॥
तीर्थे कोपोदके चापि तदग्रे च नदीजले ।
तत्रैव स्नानमात्रेण सर्व्वमेधफलं लभेत् ॥४१॥
स भवेद्धि शुचिर्दक्षः सत्यसन्धो जितेन्द्रियः ।
विमुक्तः सर्व्वपापैश्च तत्र स्नानाद्भवेत्सुरः ॥४२॥
अत्र संभवतीर्थेषु अनुष्ठेयविधिं शृणु ।
स्नातकानां विशेषेण तीर्थानां च पृथक् पृथक् ॥४३॥
ईषे कृष्णे नवम्यां च गौरीतीर्थे जलाप्लवेत् ।
कार्त्तिकशुक्लपञ्चम्यां ब्रह्मोदये जलाप्लवेत् ॥४४॥
मार्गकृष्णचतुर्दश्यां सुन्दरिकाजलाप्लवेत् ।
शुक्लाष्टम्यां च पौषस्य शूलोद्गङ्गाजलाप्लवेत् ॥४५॥
माघस्य शुक्लसप्तम्यां ब्रह्मभेदे तथा पुनः ।
मार्गकृष्णचतुर्दश्यां पशुयोनौ जलाप्लवेत् ॥४६॥
मधोः कृष्णत्रयोदश्यां योगकुण्डे जलाप्लवेत् ।
वैशाखस्यासिताष्टम्यां स्तनकुण्डे तथाप्लवेत् ॥४७॥
ज्येष्ठस्य कृष्णषष्ठ्यां च प्रातोऽर्के स्नायते बुधः ।
आषाढे पूर्णिमायां वै स्वर्णधारा जलाप्लवेत् ॥४८॥
श्रावणे पूर्णिमायां च कोपोदके तथापरे ।
स्नातव्यं कार्त्तिके कृष्णे चतुर्दश्यां च गोखुरे ॥४९॥
संक्रान्त्यां वा तथा कृष्णसप्तम्यां भाद्रवस्य च ।

विधिनाऽगस्त्य तीर्थे वै स्नातव्यं धर्म्मकांक्षिभिः ॥५०॥
ब्रह्मद्वीपे महातीर्थे स्नात्वा दीपं च दीयते ।
कार्त्तिकस्य चतुर्दश्यां शुक्लायां वा विशेषतः ॥५१॥
गोरक्षनाथसिद्धोऽसौ योगेनात्र समाश्रितः ।
मत्स्येन्द्रेण समं नित्यं चौरंगिणा तथापरैः ॥५२॥
तेषां योगश्च संसिद्धस्त्वत्र मृगस्थले द्विज ।
पशुपतेः प्रसादात्ते योगं प्रापुरहर्गणम् ॥५३॥
नाना सिद्धगणैर्नित्यमत्रागत्य सुभक्तितः ।
प्रलब्ध स्तैर्महायोगो गोरक्षस्य प्रसादतः ॥५४॥
कार्त्तिकस्य चतुर्दश्यां कृष्णायां दृश्यते बुधैः ।
सिद्धाश्रमश्च तत्पादौ निष्पापास्ते न संशयः ॥५५॥
त्रिरात्रं वसते तत्र तं गोरक्षं स्मरन्धिया ।
योगीश्वरो भवेदाशु सिद्धदेहो भवेत्सदा ॥५६॥
अत एव गरिष्ठं च एतत्क्षेत्रं विरूपदृक् ।
सिद्धानामाश्रमः शश्वत्पशुपतेर्विहारकम् ॥५७॥
यो दद्यान्मे प्रिये क्षेत्रे ब्राह्मणेऽस्मिश्च भोजनं ।
सर्व्वयज्ञफलं तस्य मम लोके वसेन्मुदा ॥५८॥
इत्युक्तं खलु देवेभ्यो ज्योतीरूपेण शूलिना ।
मृगशृंगे धृते देवे यदाम्बरस्थितेन वै ॥५९॥
मार्गकृष्णचतुर्दश्यां शिवात्मा भक्तितो बुधः ।
स्नात्वारोहति वाग्मत्यामारभ्य शंकरस्थलीम् ॥६०॥
मृगस्थलीगिरिं भ्राम्य व्रीहिं विक्षेप्य यत्कृतं ।
सुवर्णरत्तिकातुल्यं व्रीहिमेकं च यत्फलम् ॥६१॥
पदे पदेऽश्वमेधस्य फलं प्राप्नोति निश्चितं ।
भ्राम्यमाणे मृगस्थल्यामित्युक्तं शूलिना पुरा ॥६२॥
एतल्लिङ्गं किरातेशं निशामेकां प्रसेव्यताम् ।
एतद्दर्शनमात्रेण नानापापैः प्रमुच्यते ॥६३॥
ये शृण्वन्तीदमखिलममलं पूतमध्यायमेत-
त्सिद्धस्थल्याः खलु पशुपतेः क्रीडमानाधरायाः ।
श्रीमत्पुण्याश्रवणनिरताः स्नानदानोद्भवानि
ते प्राप्यन्ति प्रसभमखिलं तत्फलान्याय्य तस्याम् ।६४।

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये
विरूपाक्षतीर्थयात्रायां मृगस्थलीमाहात्म्यं
नाम द्विपञ्चाशदुत्तरशत-
तमोऽध्यायः ॥१५२॥

—❀❀❀—

स्कन्द उवाच ।

वैशाखस्यासिताष्टम्यामेल्लिङ्गं पुनर्मुदा ।
रुद्रसहस्रतीर्थेषु स्नात्वाभूपुजनादिनः ॥१॥
किरातेशस्य माहात्म्यं पप्रच्छ नेमुनिं पुनः ।
अभ्यर्च्य निशि लिङ्गं स भक्त्या प्रणतचेतसा ॥२॥
आकर्ण्य तद्वचोऽगस्त्य विनयेनोदितं मुनिः ।
व्याजहार शुभं वाक्यं तन्माहात्म्यं स्वभक्तिने ॥३॥

सिद्धर्षिरुवाच ।

आसीत्पुराद्य संवादं कैलाशे शिखरोत्तमे ।
देवीशंकरयोः सार्धं ब्रह्मविष्णुगुहैर्भृशम् ॥४॥
प्रोक्तमानः शिवो देव्यैः देवेभ्यश्चाञ्जसा वचः ।
संसृष्टं च जगत्पूर्वं द्वन्द्वैः पंचात्मकैरिति ॥५॥
व्याजहार सभामध्ये ब्रह्माशु वचनं शुभं ।
देव्या मुखसमालोकात्तद्गौरवाद्विरूपदृक् ॥६॥

ब्रह्मोवाच ।

देवीं विना हरे स्कन्द चरित्रं शंकरस्य च ।
त्रिषु जगत्सु गुह्यस्य वेत्ता कोऽपि न विद्यते ॥७॥
विमुह्य त्वां पुरा विष्णो नेत्रे चासीत्तवार्य्ययोः ।
योगरूपा माहामाया सा चेयं ज्ञायतामिह ॥८॥
रुद्रोऽपि मोहितोऽजस्रं शक्तिरूपेण वै यया ।
क्षुद्राशाश्च वयं किं भो नमस्तस्मै नमोम्बिके ॥९॥

सिद्धर्षिरुवाच ।

प्रोक्तमाने विधावेवं प्रोत्फुल्ललोचना तदा ।
ईषज्जहास शर्वाणी निरीक्ष्य शंकराननम् ॥१०॥
ततोऽब्रवीत्तदा शंभुः स्कन्दाय वचनं द्रुतं ।
अन्तः कोपं समाधाय देव्या हास्योद्भवं द्विज॥११॥
स्कन्द रक्षार्य्य मे स्थाने तव बाहुबलैः सदा ।
इत्युक्त्वान्तर्दधे तस्मै तेषां विमोहितं ध्रुवम् ॥१२॥
वेषं दधार रुद्रोऽसौ किरातरूपमत्र च ।
पुण्ये श्लेष्मान्तकारण्ये जगत्सर्वं विमोहितुम् ॥१३॥
प्रबद्धजूटिकादीर्घं ललाटान्ते च रज्जुना ।
वराटकैश्च केशान्ते तद्ग्रन्थनैर्विभूषयन् ॥१४॥
प्रान्ते तदधरोष्ठस्य मसीविभूषितोत्तमम् ।
हरितालेन चर्च्चिचक्यं वन्यपुष्पस्रजोत्तमम् ॥१५॥
गुंजावतंसकर्णान्तं रुद्रकिरातरूपिणम् ।
मयूरपक्षभूपाढ्यं लतापुष्पाभिशोभितम् ॥१६॥
वल्कलकंचुकं शंभुं काष्ठेन वलयांगदं ।
वल्कलं परिधानं च गुंजास्तवकभूषणम् ॥१७॥
तीक्ष्णं बाणं वकवरगरुत्सक्तभूषाखुपुंखं ।
हस्ताब्जेन प्रवरगुणयुक्कार्म्मुकं धारयन्तं ।
संदश्यालं सुशरमपरं शुभ्रदन्तैः सकोपं ।
कक्ष्ये तूणं जठरपटले कर्त्तिकां धारयन्तं ॥१८॥
नीवारान्नं स खलु बुभुजे मुष्टिनादाय दोष्णा ।

अन्यैर्म्लेच्छैस्तदनुगमनैः सेव्यमानः किरातैः।
मुष्टिं मुष्टिं ह्यसकृदुचितं दास्यतेभ्यो यथा वै।
कुद्दालस्वप्रवरवसनाद्दृश्यमानोऽप्यजस्रम् ॥१६॥
म्लेच्छैः सार्द्धं खलु मृगगणान्वै जवानाशु नित्यम्।
बाणैरेतद्विपिनचरता म्लेच्छरूपो महेशः।
तेभ्यो भूयो मृगसुपललं तद्ददौ भागधेयं।
तान्प्रोद्धर्त्तु वृजिनचरतान्संसृताच्चाहनत्सः ॥२०॥
अचीक्रीडन्मुदात्र वै किरातैः सह कानने।
सहस्राब्दं च दिव्यानां किरातरूपधृक् विभुः ॥२१॥
तस्मिन्काले च सा देवी ज्ञातवती ततः पुनः।
चरित्रं खलु रुद्रस्य तद्रूपं धर्त्तुमिच्छति ॥२२॥
ब्रह्माणं च हरिं स्कन्दं गिरौ संवादिते सति।
अत्राययौ हि संत्यज्य भवानी सहसा च तान् ॥२३॥
सापि किरातिनीरूपं साक्षाद्दधार चात्र वै।
संमोहयन्महादेवं जगत्सर्वं चराचरम् ॥२४॥
यथा किरातिनीनां सा चेष्टामाधाय चात्र वै।
यावत्कलां समन्ताभिरचीक्रीडद्यथासुखम् ॥२५॥
कार्त्तिकस्य चतुर्दश्यां कृष्णायां चात्र शंकरः।
लिङ्गं स्थापितवानेतत्किरातरूपधृक् मुदा ॥२६॥
अगोचरेऽत्र सत्त्वानां अवात्सीच्छंकरो रहः।
किरातरूपधृग्रात्रौ एतल्लिङ्गं प्रसेवयन् ॥२७॥
तिरस्करीं च निःक्षिप्य रुद्रस्यागोचरायच।
रुद्रचरित्रमार्य्या सा ज्ञातवती तदैव हि ॥२८॥
एतल्लिंगं मुदा भक्त्या देवी किरातिनी च सा।
पूजतिस्मोपचारैश्च वन्यपुष्पैर्जलैस्सदा ॥२६॥
लिङ्गं सम्पूज्य सा देवी क्रीडन्ती सखिभिः सह।
अवसाने ततो लिङ्गं ददर्श पूजितं विभुः ॥३०॥
महारहःस्थले चास्मिन्नेतत्प्रपूजितं हि कैः।
अगोचरे च सत्वानां मयि संरक्षिके सति ॥३१॥
एवं चिन्ताकुलो रुद्रस्तत्पूजकं प्रदर्शितुम्
गूढरूपः पुरस्तस्थौ आच्छाद्य मायया तनुम् ॥३२॥
विद्यमानेऽपि तस्मिन्सा लिङ्गं प्रपूजिता सती।
दृष्टवानभवच्छंभुलिङ्गप्रपूजकां च ताम् ॥३३॥
एवमेव मिथस्तौ हि संमोहयद्रहः प्रति।
दिव्यानां वत्सरं यातं सहस्रं च विरूपदृक् ॥३४॥
ब्रह्मविष्णुमुखा देवा अभूवंश्च सुदुःखिताः।
अप्रेक्ष्य शंकरं देवीं जगत्क्षोभमसूद्भृशम् ॥३५॥
विष्णुरुवाच।
सर्वत्र मार्ग्गमाणाश्च वयं क्षीणा भवामहे।
दृश्यामहे न कुत्रापि आर्य्या रुद्रं पितामह ॥३६॥
शंकितोऽस्मि महादेवः सिद्धारण्ये तपोवने।
मृगरूपेण पूर्वेऽस्मिन्नचीक्रीडद्धि यत्र वै ॥३७॥
सिद्धर्षिरुवाच।
आकर्ण्य वचनं विष्णोः साधु साध्विति वादयन्।
ब्रह्मपुरोगमा देवा हर्षमिहाययुर्द्विज ॥३८॥
हा तात शंकरेशार्य्ये मातर्भयानि निर्ज्जराः।
इत्युक्त्वा मार्गयन्ति स्म क्षेत्रे नैपालिके शिवम् ॥३६॥
शंकरौ प्रेक्ष्यमाणास्ते ततश्चात्र समागमन्।
गुह्याख्यां वंदयामासुर्भवानीं शिवसंयुताम् ॥४०॥
मातर्देवि नमस्तुभ्यं त्वद्रूपं च शिवं च नः।
प्रदर्शयाधुना देवि खिन्नास्मोऽन्वेषणे हरम् ॥४१॥
प्रजेपुस्तुष्टुवुर्भक्त्या गुह्येश्वरीं ततोऽमराः।
षण्मासं च दिवारात्रौ व्याप्य च त्रिविधैर्मुदा ॥४२॥
ईषे शुक्लनवम्यां सा आविर्भूता महानिशि।
प्रोवाच वचनं तेभ्यो वरं दातुं च गह्वरात् ॥४३॥
भो ब्रह्मन्नमरा विष्णो रुद्रं किरातरूपिणं।
अत ऊर्ध्वं मम क्षेत्रे पश्यध्वं मां च तादृशीम् ॥४४॥
क्रीडयन्तं किरातैस्तं सार्द्धं तत्र सुखं सुराः।
सार्द्धं किरातिनीभिर्म्मादेशे विरहिते च तत् ॥४५॥
इत्युक्त्वान्तर्दधे देवी ज्योतिरूपा च गह्वरे।
श्रुत्वा तद्वचनं देवाः सत्यमिति प्रमाणिताः ॥४६॥
तेऽपि प्रणम्य तां सद्यः समारुहंस्तपोवनं।
हरं द्रष्टुं यथापूर्वं पंक्तिक्रमेण रुन्धयन् ॥४७॥
एतल्लिङ्गान्तिके रुद्रं किरातरूपिणं मुदा।
किरातानां च मध्यस्थं ददृशुस्तेऽत्र वै वने ॥४८॥
चर्वयन्तं च नीवारान्किरातैः सह शंकरं।
किरातरूपिणं त्र्यक्षमद्राक्षुस्ते धनुर्धरम् ॥४६॥
रक्षणाय च लोकानां व्यक्तीकृत्य किरातिनीं।
तद्रूपेणात्र देवी च इहाययौ तदा पुनः ॥५०॥
उपचारैर्यथा नित्यं किरातरूपिणी पुनः।
दर्शयन्स्वं शिवं साक्षादेतल्लिङ्गमपूपुजत् ॥५१॥
धारयित्वासनाद्रुद्रो मधुरयन्समाद्रयन्।
आनीय स्वान्तिके देवीं स्वासनमुपवेशयन् ॥५२॥
ततश्चालिंग्य रुद्रोऽसौ देवीं किरातरूपिणीं।
व्याचष्ट वचनं हर्षं तस्यै स्मिताननो हरः ॥५३॥
किरात उवाच।
अनेन ब्रह्मणा शैले सत्यमुक्तं पुरा च नः।
सर्वज्ञोऽपि ह्यहं देवि माययेति विमोहितः ॥५४॥
सर्वेशशब्दरूढोऽपि तव मायाविमोहितः।
त्वत्प्रसाददहं ज्ञातो देवि त्वां तमसः परम् ॥५५॥
सिद्धर्षिरुवाच।
समाकर्ण्य वचो देवी रुद्रमुखाच्च्युतं पुनः।
व्याजहार वचो रुद्रं कैलाशगतिहेतुकम् ॥५६॥

देव्युवाच ।
भवता नैव वक्तव्यं लोकवन्द्येन शंकर ।
त्वत्प्रसादान्मया लब्धं सुवरं वाञ्छितं पुरा ॥५७॥
बहुकालं च नैवात्र स्थातव्यं भवताऽधुना ।
ममैव हि रहः स्थाने तपोवनोत्तमे प्रभो ॥५८॥
किरात उवाच ।
नाहं समुत्सहे देवि त्यक्तुमेतत्स्थलं पुनः ।
कञ्चित्कालं मुदा चात्र क्रीडयामो यथासुखम् ॥५९॥
वैशाल्याधिपतिर्यावन्नात्र जनिष्यति प्रिये ।
तावत्क्रीडामहे चात्र रूपेणानेन वै सुखम् ॥६०॥
ब्रह्मन् विष्णोऽमराः शक्र क्रीडंतामत्र चाद्यतः ।
किरातवेषमाधाय सहस्राब्दं मया सह ॥६१॥
सिद्धर्षिरुवाच ।
इत्युक्ते तद्वने रुद्रो निचीक्रीडद्ध्यन्मुदा पुनः ।
किरातरूपिणा देव्या सरित्कुञ्जेषु वै समम् ॥६२॥
प्रणिपत्य ततो रुद्रमचीक्रीडन्मुदाऽमराः ।
किरातरूपमास्थाय मृगयां तेन वै समम् ॥६३॥
सहस्रवत्सरान्ते तद्दिवि यातेऽमरान्वये ।
कश्चिन्मुक्तः किरातोऽत्र एतल्लिङ्गे शृणु पुरा ॥६४॥
आसीत्कश्चित्किरातोऽत्र शुकवक्त्रो महाबली ।
एकदा मृगयायाते एतल्लिङ्गं स दृष्टवान् ॥६५॥
गन्धर्व्वाः खलु संपूज्य गीतवाद्यमहोत्सवैः ।
नित्यं सेव्य ययुः स्वर्गमेनं मुहुर्ददर्श सः ॥६६॥
सोऽपि ह्यपूपुजल्लिङ्गं वन्यैः पुष्पोपहारकैः ।
वाग्मतीसंचरैर्नित्यं गंडपूर्णाद्धृतैर्मुदा ॥६७॥
मृगमांसं निवेद्यार्य्य भक्त्या स शूलिनेऽब्रवीत् ।
एतत्प्रपूज्यतां देव सद्यः सुखमिति प्रभो ॥६८॥
काले काले फलान्यार्य्य निवेदति स्म शूलिने ।
स्वादूनि पक्वानि दन्तैर्दश्य परीक्ष्य च ॥६९॥
फलान्यन्नानि मांसानि निवेदतिस्म तानि सः ।
परीक्ष्य जिह्वया दन्तैः स्वादूनि यानि यानि च ॥७०॥
एकसंवत्सरं यावद्देवमुपासते शिवं ।
ततः सन्तुष्टवान्रुद्रस्तस्य भक्त्या प्रपूजनात् ॥७१॥
कार्तिकस्य चतुर्दश्यां कृष्णायां प्रमथा हि तं ।
निन्युर्य्यानेन वै शैवं पूज्यमाने सविग्रहम् ॥७२॥
स एव प्रमथश्रेष्ठोऽभवन्म्लेच्छश्शुकाननः ।
रुद्रस्यानुचरो नित्यं रुद्रौजसा समायुतः ॥७३॥
विरूपाक्ष उवाच ।
अनेनैश्च तथोच्छिष्टैर्मंत्रहीनैश्च पूजनैः ।
सर्वं च भगवान्तुष्टः पापाचारस्य तस्य च ॥७४॥
धर्म्मोपवासमंत्राणि स्नानं विनार्य्य तेन वै ।
सदेहेन कथं प्राप्तं शिवसादृश्यविग्रहम् ॥७५॥
नेमुनिरुवाच ।
मनोबुद्धिचिदानन्दबोधरूपो महाविभुः ।
तत्तद्रूपेण चान्तःस्थो जृम्भते जीविनोऽनिशम् ॥७६॥
सच्चिदानन्दरूपोऽसौ सर्वस्वान्ते विभासते ।
सगुणे सर्वसाक्षी वै व्योम्नीव राजते रविः ॥७७॥
अलक्ष्यो मूलरूपो यः अव्यक्तो भासते हृदि ।
स कथं लिप्यते पापैः पद्मपत्रं जलैरिव ॥७८॥
भोक्ता स एव चान्तःस्थो भोज्यं नानाविधं सुखं ।
कामरूपेण सर्वेज्यः अमेध्यैर्लिप्यते कथम् ॥७९॥
मनसा कामरूपेण आगृह्णाति च तत्करैः ।
जन्तोर्मुखेन चान्तःस्थो जृम्भमानाय जीविनाम् ॥८०॥
तत्प्रेरणेन तेनार्य्य जिह्वादन्तैः परीक्ष्य च ।
पदार्थानि च यद्दत्तं तदुच्छिष्टं कथं भवेत् ॥८१॥
तज्जिह्वादन्तयोः कार्य्यं शिवशक्त्यात्मकं रसं ।
ताभ्यां यत्स्पर्शनाद्द्रव्यं तदमेध्यं कथं भवेत् ॥८२॥
श्रद्धाभक्त्यार्द्रहीनो यः सोऽब्जो ददाति शूलिने ।
तदमेध्यं तथोच्छिष्टं न गृह्णाति कदापि सः ॥८३॥
एतल्लिङ्गस्पृशान्म्लेच्छः ज्ञानी श्रद्धी ह्यभूद्भृशं ।
जातिदोषेण धीमन्स मेध्यामेध्यं न बुध्यते ॥८४॥
स्नेहवाञ्छद्धया युक्तो यैः कैः पूजति शङ्करं ।
तद्गृह्णाति मुदा रुद्रो भक्तियुक्तैश्च किं पुनः ॥८५॥
एतैर्युक्तः किरातोऽसौ मंत्रहीनोऽपि तद्विधैः ।
अपूपुजत्तथा रुद्रं लब्धवांश्च परं पदम् ॥८६॥
किरातार्ज्जुनमत्रैव अभूद्युद्धं पुरा द्विज ।
दत्तो वरश्च रुद्रेण अर्ज्जुनाय महत्तरः ॥८७॥
शैलैः प्रसेवितं नित्यं हिमवत्प्रमुखैर्द्विज ।
तस्माच्छैलेश्वरं प्रोक्तं तेषां वाञ्छार्थसंप्रदात् ॥८८॥
शृणोति माहात्म्यमिदं नरोत्तमः
किरातलिङ्गस्य परापरात्मनः ॥
तदर्च्चनाद्धि प्रभवं फलं च;
स हृदीप्सितं वै लभते च भक्तितः ॥८९॥
इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां किरातेश्वरमाहात्म्यं नाम त्रिपञ्चाशदुत्तरशततमोऽध्यायः ॥१५३॥

—❀❀❀—

विरूपाक्ष उवाच ।
नमस्ते मुनिशार्दूल सर्ववार्त्ताविशारद ।
भूयोऽहं श्रोतुमिच्छामि एतल्लिङ्गप्रशंसनम् ॥१॥

अभूद्युद्धं तयोःपूर्वं किरातार्ज्जुनयोः कथं ।
सहवान्कथमीशोऽभूदागांसि सोऽर्जुनस्य च ॥२॥
ऋषिरुवाच ।
पांडवे च वने याते धर्म्मपुत्रोपदेशितः ।
गूढरूपोऽर्ज्जुनो धन्वी तीर्थयात्रामिहाकरोत् ॥३॥
सिद्धक्षेत्रोद्भवेऽप्यार्य्य स्नात्वेह प्राप्तवान्पुनः ।
वामत्यां संगमे स्नात्वा पशुपतिमपूपुजत् ॥४॥
तत्र यावन्ति लिङ्गानि संपूज्यात्रायया शनैः ।
युधिष्ठिरमुखाच्छ्रुत्वा एतल्लिङ्गं प्रपूजितम् ॥५॥
संददर्श किरातान्स धनुर्धरान्समन्ततः ।
भोजयन्तः फलान्यार्य्य एकग्रावे मिथो मुदा ॥६॥
तदार्द्रहृदया म्लेच्छा आजुहूवुश्च जिष्णवे ।
भो सखे त्वमिहागच्छ भुंक्ष्व चेति तमब्रुवन् ॥७॥
श्रुत्वाशु वचनं तेषां पांडवः क्रोधमूर्च्छितः ।
आधायाभ्यन्तरे कोपं तेभ्य उवाच सोऽर्जुनः ॥८॥
अर्जुन उवाच ।
भोक्तुं नेहागतो मूढा युष्मत्सकाशतो ह्यहं ।
आराधनाय तल्लिङ्गं जानीत नन्विहागतः ॥९॥
अहो वनौकसां चेष्टा वागीदृशी यतो भवेत् ।
पात्रापात्रं न जानन्ति मर्कटा इव किंकराः ॥१०॥
ऋषिरुवाच ।
सम्मंत्र्य सहसा म्लेच्छा रुषाविष्टास्ततः परं ।
आकर्ण्य तद्वचो विप्र व्याचष्टुर्वचनं च ते ॥११॥
किराता ऊचुः ।
धृतवस्त्रश्च कृत्वेति शूरोऽहं किंच मन्यसे ।
कृत्वाऽवज्ञां च नो मूढ इति वल्कलवेषिणा ॥१२॥
अपि धनुर्धरं त्वां च क्षुद्रं न गणयामहे ।
हन्यमाने च काले त्वामेकं को वद रक्षकः ॥१३॥
यदि नोपेक्षसे जीवं नमस्व पादुका हि नः ।
नो चेद्बाणाश्च सोढव्याः क्षुद्र त्वद्रक्तलोलुपाः ॥१४॥
ऋषिरुवाच ।
ततः प्रत्युत्तरं पार्थः किरातेभ्यो ददौ पुनः ॥१५॥
आमर्षैः पूरितस्तीव्रं वह्निरिव घृतेन्धनैः ।
अर्जुन उवाच ।
न बहु वल्गिनः शूरा दर्शयन्ति पराक्रमम् ।
इदानीं दर्शयध्वं वो नः किंकराः पराक्रमम् ॥१६॥
ऋषिरुवाच ।
आकर्ण्य तद्वचो म्लेच्छा मुमूर्च्छुः कोपतो भृशं ।
उत्थाय त्वरितं बाणैस्ते जघ्नुः पाण्डवं तदा ॥१७॥
लक्षीकृत्य मुखं पादं पृष्ठमुरःस्थलं भुजं ।
चतुर्दिक्षु समावृत्य म्लेच्छा जघ्नुः पुनश्च तम् ॥१८॥
अमर्षी सव्यसाची च संमार्जयद्गुणं मुहुः ।
तद्बाणाहतपीडां स सह्य क्षतमपि द्रुतम् ॥१९॥
जघान त्वरितं म्लेच्छान्पाण्डुपुत्रो भृशं शरैः ।
चतुर्दिक्षु समुद्दिश्य त्रिभिस्त्रिभिः पृथक् पृथक् ॥२०॥
सन्त्यज्य कार्मुकं बाणान् शिलाशाखाद्रुमैश्च ते ।
सम्भूय पाण्डवं जघ्नुर्भृशं रुषा समन्ततः ॥२१॥
तस्मादसहमानोऽसौ गाण्डीवं त्वरितं तदा ।
सस्मार चाक्षयं तूणं नमस्कृत्य हरीश्वरम् ॥२२॥
अत्रागतं च गाण्डीवं तूणं तथा क्षयं पुनः ।
जग्राह त्वरितं पार्थः प्रणम्य प्रजपन्खलु ॥२३॥
ततः कृत्वाशु टङ्कारमयोजयद्गुणे शरान् ।
पूर्णकर्णोद्धृतैर्बाणैः किरातान्स जघान च ॥२४॥
व्रणांकिताः क्षितौ पेतुर्वज्रैरिव हता द्रुमाः ।
विसेहिरे ततो म्लेच्छास्तद्बाणाघातजान्क्षतान् ॥२५॥
त्यक्त्वा चायोधनं म्लेच्छा दुद्रुवुः शरणं प्रभोः ।
किरातरूपिणः शम्भो रक्ष रक्षेति नो वदन् ॥२६॥
जघान च द्रुतं पार्थः शरैरानतपर्वभिः ।
रुद्रं प्रसेव्यमानं तैस्तद्रूपं समजानतः ॥२७॥
अभिससार चात्रापि कृत्वा टङ्कारमीश्वरः ।
पिनाकं च समादाय समादधे शरं गुणे ॥२८॥
ववर्ष शरवृष्टिं च पांडवस्योपरि द्रुतं ।
पिनाकप्रेरितां रुद्रो यथासारैर्जगत्क्षये ॥२९॥
व्रणांकितेऽपि तद्बाणैरर्ज्जुनो वीरविक्रमः ।
शरवृष्टिं ववर्षाजौ रुद्रस्योपरि सन्ततम् ॥३०॥
युयुधतुर्मिथः क्रोधाद्धन्तुं जिघृक्षया मुहुः ।
प्रहरन्तौ मिथस्तौ हि सिंहौ मत्तौ गजाविव ॥३१॥
न सेहे चार्ज्जुनो विप्र रुद्रबाणहतव्यथां ।
संत्यज्यायोधनं सद्य एतल्लिङ्गमपूपुजत् ॥३२॥
वन्यैः पुष्पैर्जलैर्भक्त्या आनर्च्च चन्दनैर्मुहुः ।
एवं स्तुवन्परिक्रम्य युयोध तेन वै सह ॥३३॥
भूयो भूयो महद्युद्धं चक्रतुश्च भयंकरं ।
अवयवं मिथो लक्ष्य चिक्षिपतुः शरान्मुहुः ॥३४॥
रुद्रशरव्रणं पार्थो ह्यसह्य शिवमब्रवीत् ।
युद्धे परिश्रमोऽत्यन्तं तद्बले ह्यभयावहः ॥३५॥
अर्जुन उवाच ।
भो किरात परिश्रम्य शृणु मम वचः क्षणं ।
हितोपदेशमार्य्याणां श्रोतव्यमिति वै श्रुतौ ॥३६॥
अपनय श्रमं श्राम्य योद्धव्यं च परैः सह ।
इत्युक्तं मे पुरा भ्रात्रा युधिष्ठिरेण किंकर ॥३७॥
अद्य व्यतीतः कालो मे हरार्च्चनस्य किङ्कर ।
यावन्न भविता शम्भुं पूजिष्यामि सह क्षणम् ॥३८॥

ऋषिरुवाच ।

आकर्ण्य तद्वचो रुद्रः किरातांगी स्मिताननः ।
तद्भक्तिं स्वे च संप्रेक्ष्य तत्पराक्रमहर्षवान् ॥३९॥
उवाच वचनं शंभुस्तस्मै दानाय कांक्षितं ।
दन्तानां किरणैः शुभ्रैर्विद्योतयन्दिशो दश ॥४०॥

किरात उवाच ।

पूजय त्वं हरं पार्थ यथेप्सितेन चार्हणैः ।
मत्तो भयमिति त्यज्य हंत्यर्हणे च मामयंभ ॥४१॥
यथासुखं च संपूज्य लिङ्गांगं जगदीश्वरं ।
ततः प्रयुध्यतां पार्थ लब्धवरो मया सह ॥४२॥

ऋषिरुवाच ।

आकर्ण्य तद्वचो विप्र महालिङ्गमपूपुजत् ।
संत्यज्य कार्म्मुकं वाणं जलैः पुष्पोपहारकैः ॥४३॥
स्तुत्वा प्रणम्य लिङ्गं स परित्यज्य पुनः पुनः ।
आदाय कार्म्मुकं वाणं युयोध तेन वै समम् ॥४४॥
अपश्यदर्जुनो रुद्रं लिङ्गं यैर्यैः प्रपूजितम् ।
तत्पुष्पचन्दनोपेतं प्रहारयन्तमाशुगैः ॥४५॥
तच्चन्दनैश्च संचर्च्य तत्कुसुमैश्च भूषयन् ।
तज्जलैः सिक्तदेहन्तं प्रहरन्तं स्मिताननम् ॥४६॥
किंकिमिति ततः कृत्वा प्रेक्ष्य कुसुमचन्दनं ।
ईषत्प्रहसितः पार्थस्तादृशाङ्गं स्मिताननम् ॥४७॥
प्रहारितुं च तं पार्थ उद्यतोऽपि युधि द्विज ।
हृदि शंकां निधायेशं न प्रहारितवान्विभुम् ॥४८॥
हरोऽपि दर्शयन्पार्थं स्वविग्रहं पिनाकिनं ।
उद्धूय सहसा मायां तद्वलैश्च प्रहर्षितः ॥४९॥
प्रेक्ष्य पिनाकिनं पार्थस्तुष्टाव तं मुहुर्मुहुः ।
सन्त्यज्य कार्म्मुकं वाणं प्रणम्य दण्डवद्भुवि ॥५०॥

अर्जुन उवाच ।

ॐनमो हराय रुद्राय सात्वतां पतये नमः ।
त्र्यम्बकाय च रुद्राय प्रेतानां पतये नमः ॥५१॥
किरातदेहिनेऽजाय किरातवेषिणे नमः ।
किरातेशाय भर्गाय म्लेच्छरूपाय वै नमः ॥५२॥
व्यक्तायाव्यक्तरूपाय भव्याय भक्तिनां नमः ।
पिनाकिने महेशाय जगद्रक्षायिने नमः ॥५३॥
वरदाय वरेशाय प्रवरवरदायिने ।
पराय परमेशाय परापराय वै नमः ॥५४॥
विमोहितोऽहं तव देव मायया,
कृतं प्रयुद्धं भवता समं विभो ।
प्रहारितं मे त्वयि चाशुगैर्भृशं,
क्षमस्व देवेश ममापराधकम् ॥५५॥

किरातेश्वर उवाच ।

म्लेच्छोऽभूस्त्वं पुरा जन्मि किरातोऽसि ततो नरः ।
वाग्मत्यां स्नानतोऽत्रेह अर्जुनोऽसि न संशयः ॥५६॥
तुष्टोऽहं च समालोक्य अर्जुन ते पराक्रमम् ।
स्तुतिभिश्च विशेषेण तव भक्तिभिरीरितैः ॥५७॥
वरं वरय मत्तस्त्वं पाण्डुनन्दन सांप्रतं ।
विद्यते वीर यत्स्वान्ते तत्सर्व्वं ते ददाम्यहम् ॥५८॥

अर्जुन उवाच ।

सर्वज्ञ सर्ववन्द्येश जानासि मम वेदनां ।
सर्वस्वान्ते स्थितो देवः कृत्याकृत्येषु दर्शकः ॥५९॥
दुर्योधनेन नो देव अपि राज्ये हृते वयं ।
प्रेरिता वनवासाय अप्रज्ञानेन तिष्ठता ॥६०॥
क्षत्रियोऽहं महादेव याचे राज्यं स्वकं त्वयि ।
कौरवान्युधि निर्जित्य एतद्वरं च शंकर ॥६१॥

किरातेश्वर उवाच ।

कचित्कालान्तरे पार्थ एवमेव भविष्यति ।
हृदि यदस्ति ते कामं मत्प्रसादान्न संशयः ॥६२॥
स्नाहि क्षत्रियतीर्थे त्वं लब्ध्वा जयं ततोऽर्ज्जुन ।
निवृत्ते भारते शेषे मम लोकं गमिष्यसि ॥६३॥

ऋषिरुवाच ।

इत्युक्त्वा चार्ज्जुनायेशः एतल्लिङ्गे विलीयत ।
द्योतयंश्च दिशो भाभिरस्ताचल इवांशुमान् ॥६४॥
अर्जुनोऽपि प्रणम्येशमेतल्लिङ्गं परिक्रमन् ।
सस्नौ क्षत्रियतीर्थेऽसौ श्रद्धालुः खलु भक्तितः ॥६५॥
कार्त्तिकीपूर्णिमायां स लब्धवरो दशाहनि ।
तत्र स्नात्वागमच्छीघ्रं भ्रातरो यत्र वै स्थिताः ॥६६॥
नित्यं पूजितवानत्र एतल्लिङ्गं हिमालयः ।
तस्माच्छैलेश्वरं ख्यातं तेन प्रसेवनाद्द्विज ॥६७॥
शैलेश्वरं तु यः स्नानैः भक्तितः समुपासते ।
मत्पार्षदो भवेत्सद्यो विचरेत्स सुरैः सह ॥६८॥
शैलेश्वरं परं गुह्यं गतिः शैलेश्वरे परा ।
शैलेश्वरं परं क्षेत्रं न क्वचिद्भुवि विद्यते ॥६९॥
अनाशको भवेद्यस्तु दक्षिणे च महात्मनः ।
शैलेश्वरस्य मर्त्त्यो यः स गच्छेत्परमां गतिम् ॥७०॥
भृगुप्रपतनं कृत्वा कामक्रोधविवर्जितः ।
विमानेन दिवं यायादप्सरोगणसेवितः ॥७१॥
विविधान्यत्र तीर्थानि सन्ति पुण्यानि देवताः ।
येषां तोयैर्नरः स्पृष्टा सर्व्वपापैः प्रमुच्यते ॥७२॥
ब्रह्महा गुरुहा गोघ्नः स्पृष्टोऽपि सर्व्वपातकैः ।
क्षेत्रमेतदनुप्राप्य निर्म्मलो जायते नरः ॥७३॥

इत्युक्तं च पुरेशेन देवेभ्यो ज्योतिरूपिणा ।
इत्येतत्कथितं विप्र किरातेशप्रशंसनम् ॥७४॥
भूयो गच्छ विरूपाक्षं भस्मेश्वरो हि यत्र च ।
भस्मगंगामहाकुण्डं यत्रास्ते द्विज निर्म्मलम् ॥७५॥
शृण्वन्तीमं विगतकलुषं नूनमध्यायमेतत्,
प्राप्नन्तीशं परमसुकृतैर्योगिभिर्ध्यायमानं ।
शैवं धाम श्रवणनिरता निर्गतैनोविमोहा,
भुक्त्वा भोगान्सकलविभवान्सर्ववन्द्याः परत्र ७६।

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां किरातेश्वरमाहात्म्यं नाम चतुःपंचाशदुत्तरशततमोऽध्यायः ॥१५४॥

—ॐॐॐ—

स्कन्द उवाच ।

भूयोऽगमद्विरूपाक्षो यत्र भस्मेश्वरो विभुः ।
भस्मगंगाजले स्नात्वा भस्मेश्वरमपूपुजत् ॥१॥
गधकृष्णनवम्यां स लिङ्गं पूज्य महानिशि ।
अपृच्छत्खलु माहात्म्यं नेमुनिं भक्तितो मुने ॥२॥
आकर्ण्य तद्वचोऽगस्त्य व्याचष्ट नेमुनिः पुनः ।
भक्तिने लिङ्गमाहात्म्यं यथापूर्वं च संभवम् ॥३॥
सिद्धर्षिरुवाच ।
भस्मना च कृते स्नाने महारुद्रः पुरा द्विज ।
एतल्लिङ्गं च जानीयात्स्थापितवान्स्वसारिकम् ॥४॥
भस्मनाऽत्र कृतस्नानः अद्य प्रभृति शंकरः ।
तस्माद्भस्मेश्वरः प्रोक्तो भुक्तिमुक्तिफलप्रदः ॥५॥
एतल्लिंगस्पृशात्सर्वः सद्यः पूतो भवेन्नराम् ।
अपवित्रोऽपि पूतात्मा असंयतोऽपि संयतः ॥६॥
एतेन भस्मना स्नात्वा एतल्लिङ्गं निरन्तरम् ।
देवर्षयः समर्हन्ति यज्ञसंभवभस्मभिः ॥७॥
शृणु कश्चित्पुरा मुक्त एतल्लिङ्गप्रसादतः ।
ह्रस्वो नाम द्विजश्चासीत्केरले नगरे द्विज ॥८॥
विद्यमाने च संपत्तौ महाधनो वणिक् सुतः ।
कस्मैचिन्न ददौ दानं केवलं धनसंचितः ॥९॥
ततः कालान्तरे सोऽपि गंगातीरं मृतो द्विज ।
गंगातीरमृतात्पुण्यात्सोऽभूद्विप्रकलेवरः ॥१०॥
अदानात्संचयद्द्रव्याद्दरिद्रोऽभूद्द्विजो भृशं ।
कष्टवांश्च ततोऽभूत्स अन्नाभावात्क्षुधार्त्तकः ॥११॥
चौरवृत्तिं समासाद्य आहारं बुभुजे सदा ।
स्वजनस्य गृहे ग्रामे द्रव्यं नित्यमचूचुरत् ॥१२॥
त्यक्तोन्वयैर्जनैर्विप्रो भृत्यैरपि च निन्दितः ।
हितोपदेशितोऽप्याप्तैर्दिवा गूढो निशाचरः ॥१३॥

चौर्य्यमाणे जना धृत्वा बबन्धू रज्जुभिर्दृढं ।
गर्हयन्तं जनः कश्चित्कृत्वेत्यमोचयन्द्विजः ॥१४॥
कश्चिज्जघान वाक्खड्गैर्वध्यमान इतस्ततः ।
ताडयंल्लगुडैः कश्चित्कृत्वा धिगिति गर्हयन् ॥१५॥
निःसृतः स्वजनैस्त्यक्तो देशाद्देशं विलंघ्य सः ।
वाराणसीन्ततः प्राप्तः पुराणमशृणोच्छुभम् ॥१६॥
मदेतत्क्षेत्रमाहात्म्यं काश्यामाकर्ण्य हर्षितः ।
अत्रायया सुवर्णाढ्यमेतत्पुरं हिरण्मयम् ॥१७॥
पशुपतेः प्रसादाद्वै धनाढ्योऽहं भवामि च ।
स्नास्यामि च वाग्मत्यामिति कृत्वा हृदा ययौ ॥१८॥
अपश्यत्स पुरीमेतां मृत्स्नाकाष्ठेष्टिकामयीं ।
दुःखातुरोऽभवद्ध्रस्वो हा देवेति वदन्मुहुः ॥१९॥
शौचैर्विवर्ज्जितो ह्रस्वो भ्रष्टाचारश्च सर्वभुक् ।
मिथ्यावादी दिवागूढो निशिचौर्य्योत्सुकः शठः ॥२०॥
चौर्य्यवृत्तिं समासाद्य अवात्सीदत्र संततं ।
चौरो ह्रस्वो नगर्य्यां स दिवागूढ इतस्ततः ॥२१॥
एवं त्रिवत्सरं यावच्चौरश्चात्र शिवालये ।
सकृत्स्नात्वा च वाग्मत्यां ह्रस्वोऽवात्सीद्धि सन्ततम् २२
मार्गकृष्णचतुर्दश्यां कश्चिद्यतेरचूचुरत् ।
पोटलिकां स निस्वस्य आदायात्र ययौ मुदा ॥२३॥
कृत्वा किमिति ह्रस्वः स तद्ग्रन्थनममोचयत् ।
भस्मपिण्डं ददर्शाशु भक्ष्याभावात्क्षुधार्दितः ॥२४॥
भस्मं प्रेक्ष्य तदा ह्रस्वः स्नाहीति च वदन् शिवं ।
विचूर्ण्य भस्म पाणिभ्यां लिङ्गोपरि रुषाऽक्षिपत् ॥२५॥
निराहारः स विप्रोभूत्तत्र निशां व्यतीतयत् ।
उन्मत्तवत्क्षुधार्त्तो हि शिवेति च वदन्मुहुः ॥२६॥
एतद्भस्मप्रलिप्ताङ्गस्तेयितुमगमत्पुनः ।
स्तेयमाने निशि ह्रस्वं कश्चिन्नरस्तमग्रहीत् ॥२७॥
मुष्टिभिश्चरणैर्ह्रस्वं गृहस्था लगडैः पुनः ।
विविधुस्तमजस्रं तद्यावच्छक्तिश्च [illegible] ॥२८॥
ततो निःसारयच्चौरं ताड्यमानं मुहु[illegible] ।
सोऽपि शनैः शनैरार्त्त अत्रायया शिवालये ॥२९॥
अमावास्यां स मार्ग्गस्य [illegible] ।
एतद्धि भूतिगंगांभोर्[illegible] ॥३०॥
आययुर्यमदूता स्तद् [illegible] पापदृन् ।
पापं तं क्षेपयिष्यामो नरके [illegible] प्रभोः ॥३१॥
इहागत्य द्रुतं शैवा [illegible] हि [illegible] ।
निर्जित्य तरसा [illegible] शिवपुरं [illegible] ॥३२॥
सोऽप्यभवद्[illegible] [illegible]नामा महाबली ।
रुद्रस्यानुचरो नित्यं [illegible] हि यामनः ॥३३॥

एनां च वत्सलां देवीं संपूजयाशु भक्तितः ।
स्त्रीषु प्रीतिं समाप्नोति योऽर्चयेनां हरप्रियाम् ॥३४॥
तां जयमङ्गलां देवीं संपूजय जयप्रदां ।
युद्धे जयं समाप्नोति योऽर्चति जयकांक्षितः ॥३५॥
भूयो गच्छ विरूपाक्ष यत्रास्ते भुवनेश्वरः ।
देव्या च भुवनेश्वर्य्या सह निरन्तरं विभुः ॥३६॥
भस्मेश्वरस्योर्य्य शृणोति भक्त्या
माहात्म्यमेतद्धि नरो विपापः ।
प्राप्नोति कामं हृदयेप्सितं स
भुक्त्वा च भोगान्व्रजतीशलोकम् ॥३७॥

इतिश्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां भस्मगंगाकुंडतीर्थ-भस्मेश्वरयोर्माहात्म्यं नाम पंचपंचाशदुत्तर-शततमोऽध्यायः ॥१५५॥

—॥—

स्कन्द उवाच ।

भूयोऽगमद्विरूपाक्षो नेमुनिना समं मुने ।
प्रतीच्यां दिशि तस्माद्धि यत्रास्ते भुवनेश्वरः ॥१॥
ज्ञानकुण्डे ततः स्नात्वा भुवनेशमपूपुजत् ।
राधकृष्णैकादश्यां वै विनिद्रोऽभूद्विरूपदृक् ॥२॥
पप्रच्छ तस्य माहात्म्यं भुवनेशस्य नेमुनिं ।
भक्त्या निशि विरूपाक्षः श्रद्दधानो हि कुम्भज ॥३॥
आकर्ण्य तद्वचोऽगस्त्य व्याजहार च नेमुनिः ।
तल्लिङ्गस्य च माहात्म्यं महारात्रौ पुनर्मुदा ॥४॥

नेमुनिरुवाच ।

उद्धृतं च यदा चात्र पशुपतिं महाविभुं ।
देवोऽसौ भुवनाख्यश्च अत्राययौ मुदान्वितः ॥५॥
एतल्लिङ्गं तदा हर्ष स्थापितं भुवनेन वै ।
तप्तं भृशं कठोरं च दिव्यं सहस्रवत्सरम् ॥६॥
भुवनोऽपि वरं लब्ध्वा महादेवात्सुनिश्चयं ।
प्रययौ हि स्वकं राज्यं तस्थौ निश्चलविग्रहः ॥७॥
भुवनेश्वर इत्याख्यः सर्वलोकैस्तदा द्विज ।
लोकवरप्रदः साक्षात्सर्वेप्सितवरप्रदः ॥८॥
एतल्लिङ्गस्य माहात्म्यं शृणु वच्मि महात्मनः ।
कश्चिन्मुक्ता पुरा चात्र एतल्लिङ्गप्रसादतः ॥९॥
आसीद्वेश्या पुरा विप्र नाम्ना मधुश्रवा श्रुता ।
मृते भर्त्तरि विट्पुत्री स्वच्छन्दगमना निशि ॥१०॥
हस्तिनाख्यनगर्य्यां सा ध्यवासीत्पुँश्चली सदा ।
स्वगोत्रैर्बान्धवैस्त्यक्ता यावद्द्वादशवत्सरम् ॥११॥
वेश्या भूत्वापि साऽजस्रं न च जहौ हरव्रतं ।
रुद्रभक्तिरता नित्यं शिवपूजनतत्परा ॥१२॥
भ्राता ददौ विषं तस्यै लोकनिन्दात्रपेर्ष्यया ।
म्रियतामिति कृत्वा सा त्यदथामि तत्र लाञ्छनम् ॥१३॥
ज्ञातवती विषं सा च भ्रात्रा दत्तं मृताय च ।
न बुभुजे तदा क्ष्वेडं हिताय चात्मनो द्विज ॥१४॥
उदासीनमना भूत्वा निर्य्ययौ नगराद्बहिः ।
ग्रामाद्ग्रामान्तरं भ्राम्य काशीं प्राप्तवती पुनः ॥१५॥
अशृणोत्सा च माहात्म्यं तस्यां हिमवतो वरं ।
एतत्पुर्य्यास्तथा विप्र मत्क्षेत्रस्य विशेषतः ॥१६॥
पञ्चाशाब्दवयोपेता वेश्या सा लोकनिन्दिता ।
कंचिन्नरं समालम्ब्य अत्र गन्तुं प्रचक्रमे ॥१७॥
श्रुत्वा माहात्म्यमेतस्य इहाययौ मधुश्रवा ।
ज्ञानकुण्डे ततः सस्नौ वाग्मत्यां सततं पुनः ॥१८॥
अवात्सीत्सततं वेश्या अत्र लिंगालये द्विज ।
भिक्षां प्रार्थ्य जनेभ्यः सा भुञ्जीत यद्धि तत्सुखम् ॥१९॥
मार्जनेन च सा नित्यं सम्मार्जयद्धरालयं ।
प्राङ्गणेऽभ्यन्तरे वेश्या हरशिवेति वै वदन् ॥२०॥
एवं संवत्सरं चैकं यावत्सम्मार्जयत्तदा ।
एतल्लिङ्गस्य भूमिं सा सन्ध्ययोर्नाम संवदन् ॥२१॥
माघकृष्णस्य चाष्टम्यां शीतार्त्ता सा महानिशि ।
असूञ्जहौ सा अत्रैव हेरुद्र नुवती मुहुः ॥२२॥
रुद्रगणा विमाने तामाधाय त्वरितं ययुः ।
रुद्रलोकं महोत्साहं गीतवाद्यमहोत्सवैः ॥२३॥
साऽप्यभवद्भवान्या वै अनुचरी च योगिनी ।
एतल्लिङ्गप्रसादाच्च अत्र मार्जनधर्मतः ॥२४॥
कश्चिन्मुक्तः पुरा विप्रः शृणु विरूपदृक् पुनः ।
एतल्लिङ्गप्रसादाच्च ज्ञानकूपजलाप्लवात् ॥२५॥
पूर्वजन्मनि चान्येषां बुद्धिं समग्रहीन्नृपः ।
परीक्षितुं च कस्मैचित्स्वबुद्धिं नाप्रकाशयत् ॥२६॥
एतत्खर्वरिकातीर्थे सस्नौ तीर्थाटनो नृपः ।
तत्पुण्यस्य प्रभावात्स विप्रोऽभूच्छ्रुतिवर्ज्जितः ॥२७॥
प्राग्जन्मनो हि दोषेण अज्ञोऽभूद्विप्रविग्रहः ।
आर्य्यातीर्थप्रसादाच्च सत्यैर्विवर्ज्जितोऽनिशम् ॥२८॥
मर्कटास्यः पुनश्चाज्ञः अत्रावात्सीच्च निर्ज्जनः ।
याचकवृत्तिमाश्रित्य ज्ञानकूपजलं पपौ ॥२९॥
तज्जलं पीतमात्रेण स चाज्ञो ज्ञानवान्स च ।
अभूत्तदैव तत्कूपे नित्यं सस्नौ सुभक्तितः ॥३०॥
एतल्लिङ्गं समानर्च्चे भक्तिभावैश्च गीतयन् ।
यत्र पुष्पफलैस्तोयैः परिक्रम्य पुनर्हि सः ॥३१॥

चतुर्थवत्सरं यावन्नित्यमेवमसेवयत् ।
स्वात्मानं च निवेद्यार्घ्यं महादेवाय भक्तितः ॥३२॥
स मर्कटाननो भिक्षुः पंचत्वं प्राप्तवान्निशि ।
पौषकृष्णचतुर्दश्यामेतल्लिङ्गान्तिके द्विज ॥३३॥
शैवा याने तमास्थाय निन्युः शिवपुरं गणाः ।
गीतवाद्यमहोल्लासैरप्सरोभिः प्रसेवयन् ॥३४॥
सोप्यभवद्गणश्रेष्ठो रुद्रस्यानुचरोऽनिशं ।
एतल्लिङ्गप्रसादाद्वै ज्ञानकुण्डजलाप्लवात् ॥३५॥
भूयो गच्छ विरूपाक्ष रुद्रागारेश्वरो विभुः ।
रुद्रस्नानोदके कुण्डे स्नात्वा पूजयतां शिवम् ॥३६॥
ये शृण्वन्ति प्रसभमनिशं सम्यगध्यायमेत-
त्ते प्राप्यन्ति द्रुतमसुभृतां दुर्लभं लोकभद्रं ।
एनोवर्गैं रहितवपुषः प्राक्कृतैश्चाप्यसज्जै-
र्भुक्त्वाभोगानिह खलुचिरं वाञ्छितार्थाश्च यान्यान् ३७

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां भुवनेश्वरमाहात्म्यं नाम षट्पञ्चाशदुत्तरशततमोऽध्यायः ॥१५६॥

—❀❀❀—

स्कन्द उवाच ।

सिद्धोऽसौ चागमद्यत्र रुद्रागारेश्वरः पुनः ।
सिद्धर्षिणा सहागत्य उषित्वा द्वे निशे मुदा ॥१॥
राधकृष्णत्रयोदश्यां रुद्रस्नानोदकोत्तमे ।
रुद्रागारेश्वरं लिंगं स्नात्वा चापूपुजद्धि सः ॥२॥
तन्निशायां विरूपाक्षो माहात्म्यं नेमुनिं पुनः ।
भक्त्याऽपृच्छत्प्रणम्यादौ तल्लिङ्गस्य घटोद्भव ॥३॥
आकर्ण्य तद्वचो रात्रौ तन्माहात्म्यं च नेमुनिः ।
व्याजहार वचो भूयः श्रद्दधानाय भक्तितः ॥४॥

नेमुनिरुवाच ।

रुद्रेण स्थापितं पूर्वमेतल्लिङ्गं स्वयं द्विज ।
शयनाय स्वकीयाय रहः सुखेप्सया सदा ॥५॥
तस्मात्ख्यातश्च लोकैश्चेति रुद्रमन्दिरेश्वरः ।
भुक्तिमुक्तिप्रदः साक्षाद्वाञ्छितार्थिस्वभक्तिने ॥६॥
शृणु सिद्ध प्रवक्ष्यामि कश्चिन्मुक्तः पुरात्र ते ।
एतल्लिङ्गप्रसादात्स रुद्रस्यानुचरोऽभवत् ॥७॥
आसीदत्र विरूपाक्ष किरातानां गरिष्ठकः ।
शङ्कुर्नाम वली म्लेच्छः किरातैरावृतः सदा ॥८॥
तुलास्थिते रवौ कश्चिन्म्लेच्छैः सह धनुर्द्धरः ।
मृगयामगमच्छङ्कुर्वेलाकेश्वरकानने ॥९॥
धर्मेश्वरं महालिङ्गं शंकुर्ददर्श पूजितं ।
नाना पुष्पोपहारैश्च ऋषिवृन्दैर्महोत्सवैः ॥१०॥

अन्ये म्लेच्छाश्च तल्लिङ्गं स्थगितगतयः क्षणम् ।
किमिति समुपाश्रित्य प्रणेमुस्तैः प्रपूजितं ॥११॥
पश्यन्नपि ययौ शंकुर्वने इव ह्यदर्शकः ।
विहायानुचरान्सर्वस्तत्प्रेक्षणोत्सुकाँस्तदा ॥१२॥
तेऽपि तत्र द्रुतं गत्वा प्रचक्षुः शङ्कवे तदा ।
लिङ्गोत्सवस्य वृत्तान्तं हार्द्देण सहसा द्विज ॥१३॥
आकर्ण्य वचनं तेषां शंकुर्व्याचष्ट सत्वरं ।
न दृष्टं तं सर्वेऽस्माभिर्मुनिभिः पूजितं हरम् ॥१४॥
इत्युक्त्वा प्रययौ शंकुर्मृगान्हन्तुं वनेचरान् ।
मुनिभिः पूजिते रुद्रे दृश्यमानेऽनृतोक्तकः ॥१५॥
हत्वा जन्तून्वने शंकुर्यावदस्तं गते रवौ ।
तन्मांसानि समादाय गन्तुं प्रचक्रमे गृहम् ॥१६॥
तस्यापि च सखायोऽपि त्यज्य तद्गृहमाययुः ।
तद्वनेऽदृश्यमानन्ते कुत्र गत इति ब्रुवन् ॥१७॥
मांसभारं समादाय शंकुर्विनिर्ययौ वनात् ।
एतन्महास्थलीकूटे यावन्न प्राप्तवान्भवेत् ॥१८॥
तावच्छंकोर्विहीनौ द्वौ तेजोभिलोचनौ द्विज ।
मांसभारसमाक्रान्ते सन्ध्यान्ते स्थगिते सृते ॥१९॥
दृश्यमानेऽपि तल्लिंगमृषिवृन्दैः प्रपूजितं ।
नेति दृष्टं मृषा प्रोक्तं तत्पापैः सोऽन्धको ह्यभूत् ।२०।
तत्रैव पतितो रात्रौ भाराक्रान्तपरिश्रमात् ।
तेजोविहीननेत्राभ्यान्नयनागोचरोऽभवत् ॥२१॥
ततः प्राप्तो मुनिः कश्चित्तं प्रेक्ष्य कृपया युतः ।
स्वहस्तेन समालम्ब्य अत्रानीयत वै तदा ॥२२॥
चक्षुर्भ्यां च विहीनोऽसौ अस्मात्कुत्रापि नोचरेत् ।
काष्ठवत्पतितो विप्र तत्रोपधरणीतले ॥२३॥
गन्धर्वा ऋषयो नित्यमेतल्लिङ्गं प्रपूजितं ।
स्तोत्रैर्गीतैर्मृदङ्गैश्च तालैर्नृत्यैरसेवयन् ॥२४॥
तच्छब्दमशृणोच्छङ्कुः किंचित् ज्ञानान्वितः पुनः ।
अब्रवीदनिशं सोऽपि ईदृशं नाम वै द्विज ॥२५॥
हे रुद्र भो महादेव सर्वभूतदयाकर ।
चक्षुर्हीनमनाथं मां रक्ष रक्ष सदाशिव ॥२६॥
नेत्रे देहि महादेव येन जीवः सुखं हि मे ।
ततस्त्वत्सेवकोऽहं त्वां न मोक्ष्यामि क्षणं विभो ।२७।
एवं प्रोक्त्वा सदा शंकुर्बध्वाञ्जलिं ननाम हि ।
लिङ्गं तदान्तिकं गत्वा कराभ्यामस्पृशच्छनैः ॥२८॥
कार्त्तिकस्य चतुर्दश्यां घृताक्ते वर्त्तिके ददौ ।
शिखायुते च सन्ध्यायां याचयमानो जनान्खलु ॥२९॥
तद्रात्रावलभत्स्वप्ने चैकसंवत्सरान्तरे ।
रुद्राणीं ततः शंकुः यतिरूपेरितां शिवाम् ॥३०॥

एतत्कुण्डजलेनाशु नेत्रे संस्पर्श्य यत्नतः ।
दीपं ददासि लिङ्गाय दृभ्यां दर्शिष्यन्ति ध्रुवम् ॥३१॥
आकर्ण्य तद्वचः शंकुर्हर्षात्प्रफुल्लाननः ।
कैश्चित्पूजकं लिङ्गं अब्रवीदीदृशं वचः ॥३२॥
भो दातर्मे हानाथाय नेत्रहीनाय तज्जलं ।
एतत्कुंडात्समानीय दीयतां मे कृपां कुरु ॥३३॥
लिङ्गमभ्यर्च्य विप्रोऽसौ धर्मदास इति श्रुतः ।
जलमादाय तत्कुण्डात्तस्मै मृत्पात्रके ददौ ॥३४॥
देहि स्वामिन्ननाथाय इत्युक्त्वाशु मुनोद सः ।
प्रणम्य शिरसा भक्त्या तज्जलं पाणिनाग्रहीत् ।३५।
शिवेति शंकरेत्युक्त्वा करस्थेन जलेन तत् ।
अस्पृश्यल्लोचने चेति मत्वा सिद्धरसं हृदा ॥३६॥
नेत्रोन्मील्य तदा शंकुरेतल्लिङ्गं ददर्श च ।
पुरतो हि समव्यक्तं सुसुन्दरं महत्तरम् ॥३७॥
मुनोद लोचनोन्मील्य सुप्तोत्थितो यथा चिरं ।
चतुर्दिक्षु ददर्शाशु लिङ्गसद्मानि सर्वतः ॥३८॥
ननाम स महाहर्षं लिङ्गं परिक्रमन्मुहुः ।
शिवाय शंकरायेति नमो नम इति स्तुवन् ॥३९॥
आषाढपूर्णिमायां स शंकुश्च तद्दिने पुनः ।
सम्पूज्य पुष्पतोयैस्तद्विनाशनं विनिद्रकः ॥४०॥
एवं सम्पूजितं लिङ्गं शंकुना भक्तितोऽनिशं ।
यावद्वत्सरमेकं च योज्य पंचोपचारकैः ॥४१॥
तत्पूर्णिमादिने रुद्रः एतल्लिङ्गाद्विनिर्गतः ।
वरं दातुं मुदा तस्मै तद्भक्तिभिः प्रतोषितः ॥४२॥
साधु साध्विति शंको वै गृहाण स्वायुधे इमे ।
त्रिशूलं डमरुं व्यक्तं ददौ तस्मै हरः स्वयम् ॥४३॥
इति दत्वा वरं तस्मै लिङ्गे तिरोदधे हरः ।
कृतार्थतां तदा मेने ततः शंकुः प्रहर्षितः ॥४४॥
ततो रुद्रगणा याने तमास्थाय सनम्वरात् ।
निन्युः शिवपुरं भद्रं वहुमान्यपुरःसरैः ॥४५॥
सोऽप्यभवद्गणश्रेष्ठो वर्त्तिकैकप्रसादतः ।
रुद्रस्यानुचरो नित्यं कोटिनागवलान्वितः ॥४६॥
रुद्रागारेश्वरं लिङ्गमाराधय विभूतिदम् ।
प्रदीपमन्दिरं रुद्रं भुक्तिमुक्तिफलप्रदम् ॥४७॥
अतो गच्छ विरूपाक्ष यत्र नागेन्द्रवासुकिः ।
सम्पूज्य प्रथमं कार्य्यं नाना लिङ्गानि सर्वतः ॥४८॥
अध्यायेऽस्मिन्गिरिश महिमां भक्तिभावाक्तचित्ता
दीपोज्वालोद्भवहरमुदः प्रोद्गतस्वेच्छदेहाः ।
ये शृण्वन्ति प्रवरमनुजाश्चैकचित्तं विधाय,
प्राप्स्यन्त्यार्य्या गिरिशभवनं सर्वतापं विहाय ॥४९॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां रुद्रागारेश्वरमहात्म्यं नाम सप्तपञ्चाशदुत्तरशततमोऽध्यायः ॥१५७॥

स्कन्द उवाच ।

सम्पूज्य विधिवत्सिद्धो लिङ्गानि सर्वशो मुने ।
नामधेयानि सिद्धर्षिमपृच्छत्तत्र तत्र च ॥१॥

विरूपाक्ष उवाच ।

चतुरधिकषष्टीनां माहात्म्यं च श्रुतं विभो ।
भवत्क्षेत्रोद्भवानां हि भवतश्च प्रसादतः ॥२॥
लिङ्गानां नामधेयानि शेषाणां भवतः प्रभो ।
अन्येषां श्रोतुमिच्छामि पृथक् पृथक् वदस्व मे ॥३॥
वासुकेर्नागराजस्य माहात्म्यं च तथा पुनः ।
महालिङ्गस्य सिद्धर्षे पशुपतेर्विशेषतः ॥४॥

सिद्धर्षिरुवाच ।

अयुतानि च कोटीनां लिङ्गानि सन्ति चात्र तत् ।
पाशुपते महाक्षेत्रे सर्वा लिङ्गमयां क्षितिम् ॥५॥
तिलः पतति चैकोऽपि एतत्क्षेत्रोपरि द्विज ।
लिङ्गस्योपरि सम्यग्वै तिष्ठति तत्तिलो दृढम् ॥६॥
सुकृतकिल्बिषान्यार्य्य पुंसामत्र कृतानि तत् ।
तत्सर्वमक्षयं प्राप्य गच्छन्त्यन्धत्रिविष्टपम् ॥७॥
नामधेयानि तेषान्ते कथं वक्ष्ये विरूपदृक् ।
मृत्तिकाच्छादितानां च अदृश्यानां रसान्तरे ॥८॥
गरिष्ठानां च लिङ्गानां स्थापितानां सुरर्षिभिः ।
तेषां नामान्यहं वक्ष्ये अत्रस्थानां च स्वल्पिनाम् ॥९॥
ब्रह्मेश्वरमिदं लिङ्गं ब्रह्मणा स्थापितं पुरा ।
पूजकानां सदा भक्त्या ब्रह्मलोकफलप्रदम् ॥१०॥
विष्णवीश्वरमिदं लिङ्गं विष्णुना स्थापितं पुरा ।
भक्त्यै तदर्च्चकानां च विष्णुलोकफलप्रदम् ॥११॥
उग्रेश्वरमिदं लिङ्गं स्थापितं शूलिना पुरा ।
भक्तेभ्यो वरदं साक्षाच्छिवलोकफलप्रदम् ॥१२॥
शक्रेश्वरमिदं लिङ्गं शक्रेण स्थापितं पुरा ।
लिंगार्च्चकः सदा भक्त्या चन्द्रलोकं वसेत्सुखी ।१३।
अर्केश्वरमिदं लिङ्गं सूर्य्येण स्थापितं पुनः ।
सूर्य्यलोके वसेत्सौख्यं रवौ रवौ हि पूजकः ॥१४॥
चन्द्रेश्वरमिदं विद्धि सोमेन स्थापितं पुरा ।
लिङ्गार्च्चकः सदा भक्त्या चन्द्रलोके वसेत्सुखी ॥१५॥
अग्नीश्वरमिदं सिद्धं अग्निना स्थापितं पुनः ।
लिङ्गार्च्चको नरो भक्त्या अग्निलोके वसेत्सुखी ।१६।
कालेश्वरमिदं विद्धि यमेन स्थापितं पुरा ।

ततोऽर्च्चकः सकृद्भक्त्या यमलोके वसेत्सुखी ॥१७॥
नैर्ऋत्येशमिदं विद्धि नैर्ऋत्येनार्च्चितं मुदा ।
स्थाप्येदमर्च्चकानाञ्च स्वर्गलोकफलप्रदम् ॥१८॥
वरुणेशमिदं भूयः पाशिना स्थापितं पुरा ।
ततः सुखी नरो याति वरुणलोकमर्च्चकः ॥१९॥
वायुना स्थापितं चेदं वायुलोकफलप्रदं ।
वायुतुल्यबलोपेतो वायुलोकेऽर्चको वसेत् ॥२०॥
पौलस्त्येशमिदं लिङ्गं श्रीदेन स्थापितं पुरा ।
तदर्च्चको धनाध्यक्षः कुबेरस्य भवेद्ध्रुवम् ॥२१॥
स्कन्देश्वरमिदं विद्धि स्कन्देन स्थापितं पुरा ।
स्कन्दलोके वसेच्चेदमर्च्चको वै महासुखम् ॥२२॥
गणेश्वरमिदं विद्धि हेरम्बेन तथार्च्चितं ।
गजाननस्य लोके स विघ्नं विहाय वै वसेत् ॥२३॥
विश्वेश्वरं महालिङ्गमिदं विद्धि विरूपदृक् ।
काश्यां यत्तत्कृतं कर्म लभेदेतत्स्पृशाद्धि सः ॥२४॥
आगत्येशो हिमगिरिकटके पुण्यभूमिं भ्रमत्वा-
यावत्तेपे भृशमविरतं द्वादशाब्दं तपस्वी ।
आराध्याजं पशुपतिविभुं देवदासस्य हेतोः
स्थाप्यात्रेदं सकलवरदं विश्वनाथो हि लिङ्गम् २५
विश्वनाथो मुदा भक्त्या पशुपतिं ननाम च ।
लब्ध्वा वरं परिक्रम्य तस्मात्काशीं मुदाव्रजत् ॥२६।
तस्माद्विश्वेश्वरं लिङ्गं भुक्तिमुक्तिफलप्रदं ।
काश्यां यत्तत्कृतं सर्वमिदं लिङ्गं स्पृशाल्लभेत् ॥२७॥
केदारेशमिदं विद्धि केदारशूलिना पुरा ।
स्थापितमात्मनात्मानं भक्तीनां मुक्तिदं शुभम् ॥२८॥
सिद्धेश्वरमिदं लिङ्गं सिद्धेश्वरेण वै मुदा ।
स्थापितं भक्तितो विप्र योगसिद्धिकरं ध्रुवम् ॥२९॥
नीलकण्ठेश्वरं लिङ्गं नीलकण्ठेन भक्तितः ।
स्थापितं पूजकानां तत्सायुज्यवरदं परम् ॥३०॥
भद्रापदेश्वरं लिङ्गं रुद्रकोटीश्वरं तथा ।
अविमुक्तेश्वरं भूयो महाकालेश्वरं द्विज ॥३१॥
गोकर्णेशं च दीप्तीशं भद्रकर्णेश्वरं तथा ।
सुवर्णाक्षेश्वरं लिङ्गं स्थाणवीश्वरमिदं पुनः ॥३२॥
छगलंडेश्वरं लिङ्गं दुरंडेशमिदं पुनः ।
माकोटेश्वरमाद्येशं मण्डलेश्वरमीश्वरम् ॥३३॥
कालञ्जरेश्वरं लिङ्गं शंकुकर्णेश्वरं परं ।
स्थलेश्वरं महालिङ्गं स्थूलेश्वरमिदं परम् ॥३४॥
श्रीपर्वतेश्वरं लिङ्गं हरिश्चन्द्रेश्वरं तथा ।
आम्रातकेश्वरं विद्धि जलेश्वरमिदं द्विज ॥३५॥
आम्रेश्वरं महालिङ्गं आषाढीशं परन्त्विदं ।
भालेश्वरञ्च चण्डीशं मुण्डीशं भूतिशं तथा ॥३६॥
भवान्तकेश्वरं लिङ्गं नकुलीशमिदं ततः ।
ज्योतिर्लिङ्गेश्वरं विद्धि कुण्डानां शृणु वच्मि ते ।३७।
योगकुण्डं कुरुक्षेत्रं कुण्डं नखलविश्रुतं ।
कनखलं महाकुण्डं तत्कुण्डं विमलोदकम् ॥३८॥
महेन्द्राख्यमिदं कुण्डं भीमकुण्डमिदं पुनः ।
प्रयागाख्यं महाकुण्डं गङ्गासागरविश्रुतम् ॥३९॥
प्रभासं नैमिषं कुण्डं ब्रह्मकुण्डं हरस्य च ।
हरिद्वारं महाकुण्डं विष्णुकुण्डमिदं महत् ॥४०॥
स्कन्दतीर्थं महाकुण्डं अगस्त्यकुण्डमाश्रुतम् ।
सप्तर्षीणां महाकुण्डं सनकानां तथापरम् ॥४१॥
अगस्त्येशमिदं लिङ्गं व्यासेश्वरमिदं द्विज ।
मामकीयमिदं लिङ्गं यतो लब्धं महद्वरम् ॥४२॥
ग्रहेश्वराणि लिङ्गानि स्थापितानि नवग्रहैः ।
तद्दिनेऽर्च्चति तस्याशु ग्रहशान्तिर्भवेद्ध्रुवम् ॥४३॥
सप्तर्षीणां च लिङ्गानि एतानि स्थापितानि तैः ।
सप्तर्षीणां हि लोके स तत्पूजको वसेत्सुखी ॥४४॥
लिङ्गान्येतानि भक्तेभ्यो ददति चेप्सितानि वै ।
अन्येषां चैव लिंगानां तथाविधं विरूपदृक् ॥४५॥
वासुकिर्नागराजोऽसौ पुरा तप्तो महत्तपः ।
तार्क्ष्यभयादिहागत्य वाग्मत्या जीवनासुतः ॥४६॥
पशुपतिं समाराध्य वाक्कायमानसैरिह ।
सहस्राब्दं मुदा व्याप्य भक्त्यातन्नाम संस्मरन् ॥४७॥
कार्त्तिकीपूर्णिमायां च साक्षात्पशुपतिर्विभुः ।
व्यक्तीकृत्य तनुं तस्मै वरं दातुमुवाच हि ॥४८॥

श्रीपशुपतिरुवाच ।

शृणु दास्ये वरं तुभ्यं नागराज महातपः ।
यस्मादाराधितं मां च त्रिविधैस्तोषितोऽनिशं ॥४९॥
यस्मात्स्मरसि मां नित्यं हृदयस्थं च कण्ठतः ।
कण्ठस्य भूषणं मे त्वं भविता नागराट् सदा ॥५०॥
अपरं तक्षको भूत्वा तिष्ठ नाग मदन्तिके ।
द्वारं निधिं मम क्षेत्रं सर्वकालं प्ररक्षयन् ॥५१॥
प्रथमं न नमस्कृत्य त्वां मद्वारि नराधमः ।
यः प्रवेशति मां द्रष्टुं निःफलात्मा भवेन्नरः ॥५२॥
त्वां पश्य मां प्रपश्यन्ति नरास्ते क्षीणकिल्विषाः ।
तेभ्यो ददाम्यहं नाग भुक्तिं मुक्तिं हृदेप्सितान् ॥५३॥
भूषय मेऽधुनाहं त्वामुरोदेशं ममोरग ।
सर्वभूषोन्नतश्रीस्ते भविता मत्प्रसादतः ॥५४॥

नेमुनिरुवाच ।

इत्युक्त्वा भूषयामास स्वात्मानं सहसा मुदा ।
वासुकिना ह्युरोदेशे कराभ्यां धृत्य शङ्करः ॥५५॥

नमन्ति सर्वलोकास्तं सशङ्करं च वासुकिम् ।
हराङ्गभूषणोद्योतं ततः प्रभृति चाद्यतः ॥५६॥
ततः पशुपतिः क्षेत्रं नन्दिभृंगिगजाननम् ।
हाऽर्देण तान्समाहूय इदं वचनमब्रवीत् ॥५७॥

श्रीपशुपतिरुवाच ।

भो लम्बोदर भो क्षेत्र नन्दिभृंगिदिशांवराः ।
यूयं रक्षथ मत्क्षेत्रं स्थित्वा द्वारेषु सन्ततं ॥५८॥
न पश्य येऽनमन्युष्मान् आयान्ति च मदन्तिकम् ।
विघ्नं ददत यूयं वै तेभ्यो देवाः पदे पदे ॥५९॥
प्रणम्य गौरवाद्युष्मान्मां प्रपश्यन्ति ये नराः ।
गमिष्यन्ति च मे लोकं पशुजन्मानि मोचयन् ॥६०॥
सकृत्पश्यति यो मां हि पशुजन्मानि मोचयन् ।
सर्वजन्मार्जितैः पापैर्निर्म्मुक्तो याति मे पुरं ॥६१॥
सत्कृत्य मयि यो भक्त्या पश्यति त्रिविधैश्च माम् ।
पुनर्जन्म परित्यज्य मम लोके महीयते ॥६२॥
मदर्च्चनैः स्तवैर्यो मां जाप्यैः पश्यति भक्तितः ।
तत्कुलानि समुद्धृत्य स योगी मयि लीयते ॥६३॥

सिद्धर्षिरुवाच ।

इत्युक्त्वाऽन्तर्दधे लिङ्गे साक्षात्पशुपतिर्विभुः ।
ते देवास्तस्थुर्द्वारेषु सर्वकालं प्ररक्षयन् ॥६४॥
तस्मात्प्राक् वासुकिं भक्त्या प्रणम्यार्च्य विचक्षणैः ।
माहात्म्यं ये सुकृतितनवो वासुकेर्नागराजः,
अध्यायेऽस्मिन्विगतदुरिता धीर शृण्वन्ति भक्त्या ६५
यान्ति त्यक्त्वा परकृतभयं जन्मसंभूतपापं,
सर्वागम्यं परशिवपुरं सान्वयं हर्षवन्तः ।

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां वासुकिवरप्रदानं नामाष्ट-पंचाशदुत्तरशततमोऽध्यायः ॥१५८॥

—❀❀❀—

सिद्धर्षिरुवाच ।

स्कन्देनैवं यदुक्तं मे दिव्यं वृत्तान्तमैश्वरं ।
वक्ष्यामि ते हि ते सर्वं शृणुष्वैकाग्रमानसः ॥१॥
पशुपतेश्च माहात्म्यमधुना तच्छृणु द्विज ।
पुरोद्भूतं च संवादं देवीशंकरयोर्हि यत् ॥२॥

देव्युवाच ।

शान्ताय शान्तरूपाय पशूनां पतये नमः ।
पञ्चात्मकाय देवाय पंचास्यव्यक्तिने नमः ॥३॥
भगवन्देवदेवेश पञ्चभूतविधायक ।
यत्सृष्टा जन्तवः सर्वे लीयन्ते कर्म्मभिश्च ते ॥४॥
भवदंशाश्च ये देवाः ब्रह्मादयो दशात्मकाः ।
क्षये कुत्र विलीयन्ते कर्म्मपाशैर्विवर्जिताः ॥५॥
ब्रह्मा विष्णुर्गणो दुर्गा सोमः सूर्य्यो जलोऽनिलः ।
भूरग्निमूर्त्तयो हीमां इत्युक्तं भवता च मे ॥६॥
मा जानीहि कदाप्यन्यद्देवा इमे दशात्मकाः ।
मन्मूर्त्तयोऽनिशं विद्धान्ममात्मका इमे प्रिये ॥७॥
इत्युक्तं च पुरा देव भवता मेऽनुकंपया ।
श्रोतुमिच्छामि तद्देवा लीयन्ते चैव कुत्र वा ॥८॥

सिद्धर्षिरुवाच ।

आकर्ण्य वचनं देव्याः पशुपतिर्विरूपदृक् ।
मुमोद च भृशं तस्यै शंकरो लोकशंकरः ॥९॥
पृच्छ्यमानो हरश्चैवं देव्या चात्रैव भक्तितः ।
व्याजहाराशु यत्पृष्टं तत्सर्वं खलु हर्षवान् ॥१०॥

पशुपतिरुवाच ।

एवमेव महादेवि मम ते मूर्त्तयोऽमराः ।
यदुक्तं च त्वया चात्र सत्यमेतन्न संशयः ॥११॥
आवयोर्मूर्त्तयः सर्वे अजादयो भवानि ते ।
नोपि चेन्नात्मनो ह्यंशाः सतो भवाहितेऽसतः ॥१२॥
ब्रह्माहमच्युतोऽहं च गणेशोऽहं तथानिलः ।
सोमः सूर्य्योऽनलो दुर्गा भूर्जलोऽहं तथापरः ॥१३॥
द्यौरहं यजमानोऽहं यज्ञरूपोऽहमीश्वरः ।
मंत्रोऽहं खलुऽभोक्ताहं हवनीयं च भोज्यकम् ॥१४॥
मनोऽहं बुद्ध्यहं चित्तो गर्वो जीवस्तथाश्रितः ।
आनन्दोऽहं जगत्सर्वं तद्रूपैर्जृम्भयाम्यहम् ॥१५॥
मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितं ।
मयि सर्वं लयं याति तद्ब्रह्मास्म्यहमव्ययम् ॥१६॥
पश्य देवि त्विदानीं तान् विलीयन्तेऽमरा मयि ।
यतो यतः पुरोद्भूतास्तस्मिंस्तस्मिंस्तनौ मम ॥१७॥

सिद्धर्षिरुवाच ।

इत्युक्त्वाशु महादेव्यै विरराम महेश्वरः ।
पञ्चात्मको महालिङ्गस्तस्थौ स्थावरवद्यथा ॥१८॥
दर्शयन्स्वे भवानीन्तां तत्क्षणे च प्रवेशिताम् ।
ज्योतिर्मयं महालिङ्गं तस्थौ तदेवमेव च ॥१९॥
आददे मूर्त्तितो देवान्पशुपतिः स्वकीयकान् ।
दीपशिखेव तैलानि वर्त्तिकातः शनैः शनैः ॥२०॥
ऊर्ध्वे चैशानवक्त्रे वै अलीलियद्रविर्यथा ।
प्रदोषेऽस्ताचले व्योम्नः स्वभाभिर्द्योतयञ्जगत् ॥२१॥
सोमोऽपि च तथा तत्र भाभिर्विद्योतयञ्जगत् ।
नक्षत्राणां गणैः सार्द्धं ज्वालकीलामहत्तरे ॥२२॥
अलीलियत्ततो ब्रह्मा प्राच्यां तत्पुरुषानने ।

शक्त्या युक्तो हि लिङ्गस्य देवानपि प्रदर्शयन् ॥२३॥
याम्येऽघोराननेे विष्णुः पशुपतेरवीविशत् ।
ज्वालामये महावह्नौ अस्मिँल्लिङ्गे तथानलः ॥२४॥
सद्योजाताननेऽवाच्यां लम्बोदरो ह्यवीविशत् ।
प्रभञ्जनस्तथा सद्यः ह्ययानले यथा जगत् ॥२५॥
पशुपतौ महालिङ्गे प्रेक्ष्य देवान्प्रवेशकान् ।
साभूद्देवी सुचित्रात्मा रुद्रेणाकर्षिता पुनः ॥२६॥
उदीच्यां वामदेवास्ये भवानी साप्यवीविशत् ।
दीप इव शिखायां वै आकर्षितेश्वरेण च ॥२७॥
विलिल्युः सर्वभूतानि सुरासुराश्च सर्वतः ।
अस्मिञ्ज्योतिर्मये लिङ्गे ज्वालाग्नौ शलभा इव ॥२८॥
एक एव तदा विप्र पशुपतिर्जलान्तरे ।
दीप इव क्षपामध्ये ज्योतिर्लिङ्गो विराजते ॥२९॥
त्रिंशद्वर्षसहस्राणि दिव्यानाञ्च विरूपदृक् ।
एक एव हरस्तस्थौ सर्वलोकैर्विवर्जितः ॥३०॥
ततः ससर्ज लोकांश्च पशुपतिर्हि चात्मनः ।
प्रथमं च भवानीन्तां ततश्चान्यं शृणु द्विज ॥३१॥
कार्त्तिकी नवमी शुक्ला रविवारेण संयुता ।
तस्यां विनिर्ययौ सूर्यस्तस्माद्विद्योतयन्दिशः ॥३२॥
सोमोऽपि च तथेशानाद्विनिर्ययौ सतारकः ।
आह्लादयन् दिशः पूर्णाः क्षीराब्धाविव पर्वणि ॥३३॥
ब्रह्मा विनिर्ययौ भूयः पूर्ववक्त्राद्विरूपदृक् ।
पठन्वेदांश्च पंचास्यः सर्वलोकसिसृक्षया ॥३४॥
अघोरवक्त्रतो विष्णुर्विनिर्ययौ महाद्युतिः ।
अनलोऽपि दिशः सर्वाः हेतिभिर्द्योतयन्पुनः ॥३५॥
सद्योजाताननाद्भूयो लम्बोदरो विनिर्ययौ ।
वायुरपि महावीरो ववौ पुनर्विनिःसृतः ॥३६॥
सोपस्यदेवताः सर्वा लिङ्गाद्विनिःसृतास्तथा ।
मुमोद च भृशं मेने ईश्वरः सत्यमित्यजः ॥३७॥
ब्रह्मणः कारणाद्भूयो जगत्सर्वं चराचरं ।
एवमेव यथापूर्वमासीत्सत्यं विरूपदृक् ॥३८॥
कल्पान्ते पुनरेतस्मिँल्लिङ्गे सिद्धैः सुरर्षिभिः ।
सर्वभूतैश्च लीयन्ते यथा गृहेषु रात्रितः ॥३९॥
आलयः सर्वभूतानां तस्मात्स जगदालयः ।
लीयन्ते सर्वलोकैर्वै तस्माल्लिङ्गं च विश्रुतम् ॥४०॥
वेदीभूतां भवानीन्तां विद्यात्लिंगं तथेश्वरं ।
उमामहेश्वरी मूर्त्तिमेतल्लिङ्गं परात्परम् ॥४१॥
भुक्तिमुक्तिप्रदः साक्षात्पशुपतिरयं विभुः ।
सकृत्पश्यति यो लिङ्गं तस्य पुण्यफलं शृणु ॥४२॥
वाजपेयसहस्राणि अश्वमेधसहस्रशः ।
सर्वक्रतूद्भवं पुण्यं सर्वदानोद्भवं फलम् ॥४३॥
आदाय शिवलोकं स निष्पापः खलु गच्छति ।
देहान्ते च कलौ विप्र अन्येषु च सविग्रहः ॥४४॥
भक्त्या प्रेक्ष्य नमेल्लिङ्गं दण्डवत्पातयेत्तनुं ।
तिर्यक्योनिं परित्यज्य दुःखसंसारसंसृतिम् ॥४५॥
तेषां फलं समादाय व्रजेच्छैवं पुरं परं ।
परिक्रमति यो भक्त्या लिङ्गं पशुपतिं परम् ॥४६॥
सर्वजन्मार्ज्जितैः पापैर्मुक्तः परं स गच्छति ।
तन्मनुं प्रजपेदत्र अभ्यर्च्च्य पशुपेश्वरम् ॥४७॥
भस्माङ्गी खलु रुद्राक्षी तस्य पुण्यफलं शृणु ।
यावच्च जीवतीहासौ रुद्रवद्विचरेद्भुवि ॥४८॥
देहान्ते लीयते लिङ्गे सदेहो वाथवा शिवः ।
देवासुरर्षिभिः सिद्धैः सेव्यते लिङ्गमीश्वरम् ॥४८॥
त्रैलोक्यभवनं त्यक्त्वा अत्रैव प्रवसन्मुहुः ।
शृणु कश्चित्पुरा मुक्तः काम्बोजो नाम विश्रुतः ॥५०॥
म्लेच्छो हिमवतश्चाधोभुव्युत्तरदिशि स्थितः ।
जातिस्मरणतीर्थेऽसौ त्रिवारं तज्जलं पपौ ॥५१॥
प्राग्जातिस्मरणं प्राप्तो म्लेच्छो नामाधिपो द्विज ।
त्यक्त्वा प्रियां प्रियं राज्यं सर्वस्वं तृणवन्नृपः ॥५२॥
राज्याद्विनिःसृतो म्लेच्छोऽअस्थिरां संसृतिं विदन् ।
तदाधावन्निरोद्धुं तं भार्य्या पुत्राश्च मन्त्रिणः ॥५३॥
पथि संरुध्य भूपं ते ऊचुर्मधुरयन् गिरा ।

भृत्या ऊचुः ।

क्व यास्यसि महाराज त्यज्य राज्यं सुखं च नः ॥५४॥
तदुत्थिता कथं स्वान्ते विरक्तिर्भूपते तव ।

काम्बोज उवाच ।

कस्य पुत्रः सुखं राज्यं भार्य्या सर्वस्वमर्थकं ॥५५॥
तत्सुखानि च भो भृत्याः भुक्त्वा जीवति कश्चिरम् ।
शृणु भृत्या पुरा यत्तज्जन्म लब्धं सहस्रशः ॥५६॥
ततो लब्धोऽप्ययं देहः सिद्धेश्वरप्रसादतः ।
बहुयोनिषु संजातः स्वेदजेष्वण्डजेषु च ॥५७॥
उद्भिजोऽहं ततः कालाज्जरायुजो बहुः पुनः ।
नियुतवत्सरान्तेऽहं वाग्मत्या निधनात्पुनः ॥५८॥
लब्ध्वा विप्रतनुं काश्यां प्रतिग्राह्यभवं पुनः ।
असत्प्रतिग्रहात्तस्यां तदुपजीवनादहम् ॥५९॥
अभवं मर्कटोऽहं च तस्माल्लब्धो हिमाचलः ।
ततः पशुपतेः पुण्ये अवात्सं सिद्धकानने ॥६०॥
फलमूलाशनोऽजस्रं सिंह व्याघ्रभयातुरः ।
पशुपतेर्हि कौबेर्य्यां यत्र सिद्धेश्वरो विभुः ॥६१॥
भुक्त्वा बिल्वफलान्याशु बिल्ववृक्षे तदन्तिके ।

तत्पत्राणि समाकृष्य प्रक्षिप्तं सहसा मया ॥६२॥
सम्यक् तान्यपतद्भृत्यास्तल्लिङ्गोपरि सांप्रतम् ।
कार्त्तिकीपूर्णिमायां च प्रातः कालेऽवसत्कुजे ॥६३॥
मामुद्दिश्य धनुः पापी तत्रागत्य विभीषयन् ।
जघान सहसा पापी मे पृष्ठं छद्मगेन च ॥६४॥
निर्दयमपि सक्रोधो मृगयाभिरतस्ततः ।
शरप्रहारतस्तस्य पीडितोऽहं च तत्कुजात् ॥६५॥
अवतार्याशु दुद्राव आर्य्यातीर्थमवाप्नुवन् ।
आर्य्यातीर्थजलं प्राश्य तत्रैव निधनं गतः ॥६६॥
तच्छरीरं समैवाशु रुद्रलोकं च लब्धवान् ।
शतंयुगं स्थितं तत्र सर्वतो विगतज्वरः ॥६७॥
सिद्धेश्वरप्रसादाद्वै तत्तीर्थे निधनात्पुनः ।
तत्पुण्यसंक्षयात्तस्माद्भ्रष्टोऽहमत्र वै पुनः ॥६८॥
एतां तनुं मया लब्धां लोकवन्द्यां नृपोत्तमां ।
एतत्तीर्थजलं पीत्वा त्रिवारं च मया पुनः ॥६९॥
पूर्वजातिपरिज्ञानं लब्धं तयोः प्रसादतः ।
अतोऽधुना ह्यहं तात लिङ्गं पशुपतिंपरम् ॥७०॥
व्रजामि सेवितुं पुण्ये यत्र ववाह वाग्मती ।
राज्यं नेच्छामि हेभृत्या लोभमोहभयाकुलम् ॥७१॥
गच्छत स्वाश्रमं यूयं तं सेवितुं व्रजाम्यहं ।

भृत्या ऊचुः ।

गृहस्थानां समो धर्मः परं नास्ति नृपोत्तम ॥७२॥
स्वागतेनाह्वयः प्रीतिरशनेन शतक्रतुः ।
विष्णोश्च पादशौचेन अर्च्चनैर्ब्रह्मशंकरम् ॥७३॥
होमेन पितृदेवाश्च ययुः स्वर्गं विधीयते ।
सर्वफलं भवेत्तस्य यथोक्तं यस्तु पोषयेत् ॥७४॥
अतिथिपालनान्नित्यं स्वर्गं तस्य गृहेषु च ।
वनेऽपि दोषाः प्रभवन्ति रागिणां,
गृहेऽपि पञ्चेन्द्रियनिग्रहस्तपः ।
अकुत्सिते कर्म्मणि यः प्रवर्त्तते
निवृत्तरागस्य गृहं तपोवनम् ॥७५॥

काम्बोज उवाच ।

कामः क्रोधस्तथा लोभो देहे तिष्ठन्ति तस्कराः ।
मुशन्ति ते जगत्सर्वं तस्मात्त्याज्यामिमां तनुम् ॥७६॥
स्नेहकामानले कुण्डे होतारो मोहविलुताः ।
नराणां तत्र हूयन्ते यौवनानि धनानि च ॥७७॥
यत्र स्नेहो भयं तत्र स्नेहो दुःखस्य भाजनं ।
स्नेहमूलानि दुःखानि तानि त्यक्त्वा परं सुखी ॥७८॥
बालत्वे चरिते धर्म अनित्यं खलु जीवितम् ।
फलानामिव पक्वानां जायते नरके ध्रुवम् ॥७९॥
गगनमिव मर्त्याश्च पुत्रदारधनान्विताः ।
जायन्तेऽपि म्रियन्ते च अनन्तनिधनोद्भवाः ॥८०॥
राज्येष्वपि (स्ति) बहुदुःखं लोभमोहमदाकुलं ।
पुत्रादपि भयं यत्र तं सन्त्यज्य परं सुखी ॥८१॥
सहस्रेषु ह्यहं जातो मयि जातः सहस्रशः ।
सुतेन हि सुतो जातः पशुमायाविमोहितः ॥८२॥
जन्मसंसारभीतोऽस्मि जन्मनि च पुनःपुनः ।
जन्ममरणसंयुक्तो देहोऽयं पाञ्चभौतिकः ॥८३॥
क्षुधा तृष्णा महत्तीव्रं गर्भवासेषु दारुणं ।
इन्द्रियाणि चलत्वेन दह्यन्ते जठराग्निना ॥८४॥
तस्माज्जन्म न कार्य्यं मे राज्यं पुत्रं धनं प्रियां ।
गच्छामि शरणं तात पशुपतेः परात्परम् ॥८५॥

सिद्धर्षिरुवाच ।

इत्युपदिश्य तेभ्योऽसौ म्लेच्छाऽधिपश्च सत्वरं ।
तान् त्यज्य निशि चैकाकी जगाम हिमवद्गिरिम् ।८६।
म्लानश्रियस्ततो भृत्याः पुरोधाय नृपात्मजं ।
जग्मू राज्यं च ते तस्मै अभिषेकं ददुर्मुदा ॥८७॥
विलंघ्य हिमवन्तं च काम्बोजोऽसाविहाययौ ।
आर्य्यातीर्थे मुदा सस्नौ पूर्वजन्मविपाकतः ॥८८॥
कार्त्तिकीपूर्णिमायां स सस्नौ तीर्थेषु भक्तितः।
आर्य्यातीर्थे त्रिवेण्यां च खर्व्वरिके मृगोदके ॥८९॥
स स्नात्वा विधिवत्तेषु सिद्धेश्वरं समर्च्चितः ।
आज्ञां प्रार्थ्य ततो रुद्रात्प्रणम्यात्राययौ पुनः ॥९०॥
ननाम वासुकिं लिङ्गं पंचवक्त्रं सुतेजसं ।
दण्डवत्पातयन्देहं भूमौ भक्त्या पुनः पुनः ॥९१॥
आदाय चोपदेशं स क्रतुमुनिवरान्नृपः ।
परिक्रम्य महालिङ्गं भक्त्यानन्या यथाविधि ॥९२॥
संपूज्य विधिवल्लिङ्गं वाद्यैः पंचोपचारकैः ।
जजाप तन्मनुं भक्त्या यावद्विप्र हरं निशि ॥९३॥
वरपुलकितदेहो ध्यायमानो हृदब्जे,
स्मरहरहरमाद्यं ज्योतिरूपं हि साक्षात् ।
परिकरशिखयासौ नूनमग्राहि तत्र,
शलभ इव कृशानावीश्वरेण स्वकीये ॥९४॥
म्लेच्छाधिपेन पूर्वं च प्रसादात्तीर्थलिङ्गयोः ।
पुरा कृतेन यल्लब्धं सायुज्यं पशुपेश्वरे ॥९५॥
एवं लब्धं च सायुज्यं वेदगर्भेण शर्मणा ।
संगमेषु च वाग्मत्याः स्नात्वा लिङ्गप्रदर्शनात् ॥९६॥

विरूपाक्ष उवाच ।

भगवञ्छ्रोतुमिच्छामि भूयोऽहं भवति ध्रुवम् ॥९७॥
वाग्मत्याः संगमान्यन्यैरित्युक्तं भवताऽधुना ।
किं तीर्थञ्च समारभ्य स्नातव्यं केषु केषु च ॥९८॥

एतद्ब्रूहि मुनिश्रेष्ठ सर्व्ववार्त्ताविशारद ।
सिद्धर्षिरुवाच ।
सेतुभिन्नं महातीर्थमारभ्य स्नायतां द्विज ॥९९॥
आवाग्मत्युद्भवा यत्र ततः कामं लभिष्यसि ।
माहात्म्यं ये वरपशुपतेर्यत्र शृण्वन्ति नूनं,
चाध्यायेस्मिन्सुकृतिनिपुणैर्लभ्यमैशं हि लोकं ।
संप्राप्यार्य्याः परशिवपदं तत्र भक्त्येशचिन्ता,
मोदन्ते ते सुसुखमनिशं संविहायेह लोकम् ।१००।

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां पशुपतिसिद्धेश्वरयोर्माहात्म्यं नामोनषष्ट्युत्तरशततमोऽध्यायः ॥१५९॥

—❀❀❀—

स्कन्द उवाच ।
उपदेशं समाकर्ण्य विरूपाक्षश्च नेमुनेः ।
वाग्मत्यां च पुनः सस्नौ सर्वेषु संगमेषु च ॥१॥
सेतुभिन्नं समारभ्य विरूपाक्षो घटोद्भव ।
वाग्मतीसंभवं यावद्भक्त्या सस्नौ हि तेषु च ॥२॥
मुनिं पप्रच्छ माहात्म्यं नामधेयानि सर्व्वशः ।
संगमानां च वाग्मत्यां तेषु स्नात्वा हि तत्र सः ॥३॥
विरूपाक्ष उवाच ।
माहात्म्यमभिधानानि तीर्थानां च मुनीश्वर ।
वाग्मतीसङ्गमानां हि नानापगाभिः संयुतम् ॥४॥
कस्यां कस्यां तिथौ तेषु स्नातव्यं हि वदस्व मे ।
कानि कानि फलं स्नानाल्लभ्यन्ते स्नातकैः पुनः ॥५॥
नेमुनिरुवाच ।
तीर्थानां तिथिभावं च शृणु वक्ष्ये विरूपदृक् ।
स्नात्वा फलानि लभ्यन्ते स्नातकैः सकलानि च ॥६॥
सेतुभिन्ने महातीर्थे शुक्लाष्टम्यां मधोर्हि वा ।
सर्व्वयज्ञफलं प्राप्य रुद्रलोके महीयते ॥७॥
सर्व्वपर्व्वसु यत्नेन स्नातव्यं धीमताऽनिशं ।
विशेषेण मधोर्मासे कोटिगुणफलं लभेत् ॥८॥
सर्व्वतीर्थमये तीर्थे स्नानदानानि यत्कृतं ।
तत्सर्व्वमक्षयं प्राप्य रुद्रलोके वसेत्सुखी ॥९॥
वियोगं कान्तया यस्य यस्याश्च पतिना पुनः ।
तद्योगं वाञ्छितं प्राप्य उभौ शिवपुराश्रितौ ॥१०॥
ततो गोपालतीर्थे च स्नातव्यं द्वादशीयुते ।
मधोः सितासिते वापि गवां कोटिफलं लभेत् ॥११॥
वनजन्तूद्भवैः पापैर्व्विमुक्तोऽसौ पुराकृतैः ।
स्नात्वा तत्र व्रजेच्छैवं लब्ध्वा गवां सहस्रकम् ॥१२॥
दामोदरमहातीर्थे तदुपरि विरूपदृक् ।
एकादशीं मधोः शुक्लां स्नातव्यं भक्तितो बुधैः ॥१३॥
पशुजन्मार्ज्जितैः पापैर्व्विमुक्तः स्नातकस्ततः ।
गोमेधानां फलं प्राप्य गवां लोके महीयते ॥१४॥
सर्व्वौषधिरसे तीर्थे स्नातव्यं भक्तितो नरैः ।
सर्व्वे रोगाः प्रणश्यन्ति स्नातकानां च तत्र वै ॥१५॥
पुराकृतैनसोद्भूतैः पापरोगैर्व्विमुच्यते ।
स्नानात्तत्रैव पुण्यात्मा रुद्रलोके महीयते ॥१६॥
भृगुपातगणेशाख्यं महातीर्थं सुसिद्धिदं ।
राधसिताचतुर्थी च तस्यां स्नातव्यमार्य्यकैः ॥१७॥
संस्नात्वार्च्चेति विश्वेशं गाणपत्यं लभेद्ध्रुवं ।
अग्निष्टोमफलं प्राप्य विकिल्बिषश्च सिद्धिभाक् ॥१८॥
प्रमोदाख्ये महातीर्थे द्वादश्यां स्नायते यदि ।
सितायामसितायां वा मधोस्तस्य फलं शृणु ॥१९॥
विनशने हरद्वारे स्नानाद्यावत् फलं लभेत् ।
तावद्दशगुणं प्राप्य विष्णुलोके महीयते ॥२०॥
यंयमिच्छन्ति कामञ्च स्त्रियो वा पुरुषाश्च वा ।
सद्यस्तं तं लभेयुर्वै स्नानात्तत्रैव पर्व्वसु ॥२१॥
सर्व्वदानोद्भवं पुण्यं भक्त्या स्नानाल्लभेन्नरः ।
अश्वमेधफलं प्राप्य रुद्रलोकं स गच्छति ॥२२॥
पूर्व्वजन्मविपाकेन कुरूपा यदि निष्प्रभा ।
सुन्दरी सा प्रभायुक्ता निर्मलो विग्रहः पुमान् ॥२३॥
कायनिर्म्मलतीर्थे च स्नानान्निष्पापविग्रहः ।
प्रगच्छति मुदा स्वर्ग भुक्त्वा भोगान्यथेप्सितान् ॥२४॥
मधोः शुक्लतृतीयायां स्नातात्तत्रैव मानवः ।
दशगवां फलं प्राप्य रुद्रलोकं स गच्छति ॥२५॥
तदुपरीन्द्रतीर्थे च शक्रस्नाते विकिल्बिषः ।
मनसा चेप्सितं प्राप्य स्नातो याति सुरालयम् ॥२६॥
भाद्रशुक्लस्य षष्ठ्यां च स्नाता षष्टिगुणं फलं ।
षड्वर्षजेन स मुक्तः शक्रलोकं व्रजेत्सुधीः ॥२७॥
तदुपरि महातीर्थे पंचनदमिति श्रुतं ।
चैत्रे सितेऽसिते स्नाता अष्टम्यां त्रिदिवं व्रजेत् ॥२८॥
ईषे शुक्ले च पञ्चम्यां स्नातुस्तस्य फलं शृणु ।
पञ्चजन्मार्जितैः पापैः स मुक्तो नात्र संशयः ॥२९॥
सर्व्वपर्व्वसु यो भक्त्या स्नायते विधिवत्पुनः ।
दशाश्वमेधजं प्राप्य रुद्रलोकं स गच्छति ॥३०॥
कालतीर्थे नरः स्नात्वा कालपाशैर्व्विमुच्यते ।
कालस्य च द्वितीयायां रुद्रलोकं व्रजेत्सुखी ॥३१॥
मृत्युञ्जये महातीर्थे स्नातुस्तस्य फलं शृणु ।

सप्तजन्मार्जितं पापमपमृत्युर्विनश्यति ॥३२॥
दशगंगासमे पौषे स्नाता रुद्रालयं व्रजेत् ।
अश्वमेधफलं प्राप्य नवम्यामेकवत्सरात् ॥३३॥
तत उपरि तीर्थं च महापातकनाशनं ।
सहोदरवधान्मुक्तः कश्चित्स्नानात्पुरा शृणु ॥३४॥
हत्वा भ्रातॄन्नृपो म्लेच्छो लोभात्तद्ग्रहीद्धनं ।
तत्पापैर्लेपितः कुष्ठी प्रजात्यक्तो विनिर्य्ययौ ॥३५॥
बम्भ्रम्य मेदिनीं शश्वत्प्राप्तवानत्र पार्थिवः ।
नारदस्य मुखाच्छ्रुत्वा सस्नौ तत्रैव भक्तितः ॥३६॥
पौषशुक्लचतुर्दश्यां तज्जलस्पर्शनात्ततुं ।
कुष्ठव्रणैर्विनिर्मुक्तो रुग्भिस्तत्कृतसम्भवैः ॥३७॥
एकसंवत्सरं यावत्तत्र सस्नौ स नित्यशः ।
सोऽपि ययौ विमानेन ततो मृते त्रिविष्टपम् ॥३८॥
पञ्चाशद्धनुषां दूरे तीर्थराजमुदाहृतं ।
तदुत्तरप्रयागाख्यं सर्वदुष्कृतनाशनम् ॥३९॥
शंखमूलं महातीर्थं सर्व्वतीर्थोत्तमोत्तमम् ।
देवर्षिदानवैः सिद्धैः सेवितं भुवि दुर्लभम् ॥४०॥
वैशाखे कार्त्तिके माघे स्नायते यो निरन्तरं ।
सप्तजन्मार्जितैः पापैर्मुक्तः सप्तजनूद्भवैः ॥४१॥
पंचभिः स महापापैस्त्रिविधैश्च विवर्जितः ।
ज्ञानतोऽज्ञानतः कृत्यैः पद्मदलं जलरिव ॥४२॥
सर्व्वपर्वसु यत्नेन स्नातव्यं विधिवद्बुधैः ।
द्वयोर्हि पूर्णिमायां च चतुर्दश्यां कुहौ तथा ॥४३॥
शताश्वमेधजं पुण्यं वाजपेयसहस्रकम् ।
स्वर्णतुलाशतोद्भूतं सुस्नानाल्लभते सकृत् ॥४४॥
वालुकया सुनिर्माय लिङ्गमर्च्चति वै सकृत् ।
इहलोकं परित्यज्य व्रजेदीशं परात्परम् ॥४५॥
ईषे शुक्लमहाष्टम्यां यः स्नायते सकृद्यपि ।
रुद्रधारामहातीर्थं वाग्मत्यां संयुगे द्विज ॥४६॥
सहस्रजन्मजैः पापैः स महापातकादिभिः ।
सर्वपर्वसु यत्नेन स्नात्वारोहति तत्स्थलीम् ॥४७॥
कोटिजन्मार्जितैः पापैर्मुच्यते सैकवत्सरात् ।
वाजपेयसहस्राणामश्वमेधशतस्य च ॥४८॥
तल्लिङ्गमर्च्चकः प्राप्य रुद्रलोके महीयते ।
ततोऽमरावतीतीर्थे स्नातव्यं विधिना पुनः ॥४९॥
भाद्रशुक्लचतुर्दश्यामेकादश्यां तथैव च ।
यावज्जीवकृतैः पापैः स्नातकस्तत्र मुच्यते ॥५०॥
मौशलमखजं प्राप्यामरावत्यां महीयते ।
धनुषां दशदूरे तत्तीर्थं च विमलावतीम् ॥५१॥
स्नातव्यं कार्त्तिके शुक्लसप्तम्यां च विशेषतः ।
स्नायते विधिना यत्र दशापापक्षयेप्सया ॥५२॥
अग्निष्टोमफलं प्राप्य अग्निलोकं स गच्छति ।
तन्निर्मलावतीतीर्थे कार्त्तिकस्य सितेऽसिते ॥५३॥
षष्ठीदिने हि यः स्नात्वा तस्य पुण्यफलं शृणु ।
भ्रूणहत्यादिभिः पापैर्मुक्तः शतगवां फलम् ॥५४॥
दशतुलाफलं प्राप्य रुद्रलोकं स गच्छति ।
वायुवतीमहातीर्थे स्नातव्यं सततं बुधैः ॥५५॥
फाल्गुनपूर्णिमायां च चतुर्दश्यामथापि वा ।
वायुतुल्यबलो भूत्वा स्नानाद्भुनक्ति वै सुखम् ॥५६॥
दशकोटिहुतं पुण्यं लब्ध्वा यात्यनिलालयं ।
योगकुण्डे महातीर्थे स्नातकस्य सितस्य च ॥५७॥
कार्त्तिकस्य नवम्यां च योगसिद्धिर्भविष्यति ।
अष्टमीनवमीयुक्ते मूलार्के भार्गवे दिने ॥५८॥
अपि योगैर्विहीनोऽपि स्नानाद्योगीश्वरो भवेत् ।
सर्व्वकर्म्मोद्भवैः पापैः स मुक्तो नात्र संशयः ॥५९॥
सर्व्वयज्ञार्च्चनं पुण्यं प्राप्य योगी व्रजेत्परं ।
मणितीर्थे पुनः स्नात्वा तृतीयायां मधोः सिते ॥६०॥
दशगवां फलं लब्ध्वा शक्रलोकं स गच्छति ।
ततस्तीर्थे प्रयागाख्ये मकरस्थे रवौ सदा ॥६१॥
संक्रान्त्यां च विशेषेण स्नातव्यं भक्तितो बुधैः ।
दशधा स प्रयागाख्ये स्नात्वा हि यत्फलं भवेत् ॥६२॥
तत्फलं च समादाय स्वर्गे कोटिसमां वसेत् ।
पीठिकाख्ये महातीर्थे स्नात्वा दशगवां फलम् ॥६३॥
नवम्योश्च द्वयोर्माघे देवीलोकं स गच्छति ।
त्रिविक्रमे महातीर्थे स्नात्वा च गोसहस्रकम् ॥६४॥
एकादश्यां द्वयोर्माघे विष्णुलोकं प्रगच्छति ।
स्वर्णतीर्थे ततः स्नात्वा स्वर्णतुलादशोद्भवम् ॥६५॥
तावल्लब्ध्वाशु निष्पापो रुद्रलोके वसेत्सुखी ।
ब्रह्मतीर्थे ततः स्नात्वा माघप्रतिपदि द्वयोः ॥६६॥
सर्व्वयज्ञफलं प्राप्य ब्रह्मलोकं स गच्छति ।
ततः क्षत्रियतीर्थञ्च मधोः षष्ठ्यां तथा द्वयोः ॥६७॥
राजसूयफलं प्राप्य स्नातः शक्रपुरं व्रजेत् ।
राजेश्वरीमहातीर्थे नवम्यामाश्विने द्वयोः ॥६८॥
सप्तजन्मार्ज्जितैः पापैः स मुक्तो नात्र संशयः ।
रोहिण्यृक्षेण युक्तायां स्नायते यदि धीमता ॥६९॥
इहलोकं परित्यज्य देवीलोके महीयते ।
उमापतिमहातीर्थे अमावास्याजलाप्लुतः ॥७०॥
सोमपानं हुतं प्राप्य रुद्रलोकं स गच्छति ।
यदि सोमेन युक्तायां तत्रैव स्नायते बुधः ॥७१॥
कोटिजन्मार्जितान्पापान्स्त्यक्त्वा गच्छति शांकरम् ।

विष्णुतीर्थे च वैशाख्यां द्वादश्यां स्नायते द्वयोः ।७२।
गोसहस्रफलं प्राप्य निष्पापो याति वैष्णवं ।
तज्जयमङ्गलातीर्थे स्नातव्यं जयकांक्षिभिः ॥७३॥
मधोः कृष्णाचतुर्दश्यां सर्वपापैर्विमुच्यते ।
आकाशभैरवे तीर्थे मधोः कृष्णाष्टमीदिने ॥७४॥
ब्रह्महत्यां परित्यज्य स्नातो रुद्रपुरं ब्रजेत् ।
श्रीवत्सलामहातीर्थे स्नातको विधिना पुनः ॥७५॥
ज्येष्ठे सितदशम्याञ्च दशपापैर्विमुच्यते ।
हस्तर्क्षेण युतायां च स्नायते यदि धीमता ॥७६॥
गोकोटिजं फलं प्राप्य दुर्गालोकं स गच्छति ।
कोपोदके महातीर्थे स्नातव्यं विधिना नरैः ॥७७॥
जन्मार्जितैनसा मुक्तः पंचम्यां पक्षयोर्द्वयोः ।
ज्येष्ठर्क्षेण युतायां च यदि संस्नायते पुनः ॥७८॥
दशाश्वमेधजं प्राप्य रुद्रलोकं ब्रजेन्मुदा ।
सौभाग्यदे महातीर्थे स्नानात्पापैर्विमुच्यते ॥७९॥
मधोः कृष्णत्रयोदश्यां स याति परमां गतिं ।
अभागिनी सदा चेत्स्त्री स्नात्वा सौभागिनी भवेत् ।८०।
सुन्दरी सा पतिप्रेमा भवेज्जन्मनि जन्मनि ।
कुबेराख्ये महातीर्थे चतुर्दश्याम्मधोर्द्वयोः ॥८१॥
स्नानाद् कुबेरतुल्यौजा भवेदिह महाधनः ।
पूर्णिमायाममावास्यां स्नाता तत्र त्रिमासतः ॥८२॥
इहलोके धनं भुक्त्वा रुद्रधनाधिपो भवेत् ।
गौरीतीर्थेऽवला श्रेष्ठा स्नायते विधिवद्यदि ॥८३॥
ज्येष्ठे सिते तृतीयायां तस्याः पुण्यं फलंश्रृणु ।
नारीणां सा भवेच्छ्रेष्ठा सर्व्वपापैर्विवर्जिता ॥८४॥
पतिपुत्रान्वितेहान्ते रामा गौरीपुरं ब्रजेत् ।
गौरीतीर्थात्परं तीर्थं नास्ति ज्ञेयं सुदुर्लभम् ॥८५॥
नारीणां कामदं शश्वन्मनसा यद्यदीप्सितं ।
तीर्थराजस्य माहात्यं श्रृणु वच्मि विरूपदृक् ॥८६॥
त्रयाणां च विशेषेण आर्य्यातीर्थस्य वै पुनः ।

अध्यायेऽस्मिन्खलु नरवरा धीर श्रृण्वन्ति भक्त्या,
तीर्थानां ये विपुलवरदं वै माहात्यं च शश्वत् ।
तेषु स्नानाद्धृदयवरदं सन्ति पुण्यानि याव-
त्प्राप्यन्त्यार्य्यास्तदखिलफलं पाठकोस्यैव तद्वत् ॥८७॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये-
विरूपाक्षतीर्थयात्रायां तीर्थानां माहात्म्यं नाम
षष्टयुत्तरशततमोऽध्यायः ॥१६०॥

—❀❀❀—

नेमुनिरुवाच ।
मृगोदके महातीर्थे कार्त्तिकस्याष्टमीतिथौ ।
स्नायते विधिवद्भक्त्या मुच्यते पशुजन्मभिः ॥१॥
कृष्णाष्टम्यां ततस्तस्यां रुद्रात्मा स्नायते यदि ।
यो व्याप्य कार्त्तिकं मासं तस्य पुण्यफलं श्रृणु ॥२॥
शताश्वमेधजं पुण्यं वाजपेयोद्भवं तथा ।
लब्ध्वा सर्व्वतनुं त्यज्य रुद्रलोके महीयते ॥३॥
खर्वरिकामहातीर्थे नवम्यां कार्त्तिकस्य च ।
स्नायते कृष्णपक्षस्य तस्य पुण्यफलं श्रृणु ॥४॥
नरदेहार्जितैः पापैः स मुच्यते पुरा कृतैः ।
गवां कोटिफलं प्राप्य रुद्रलोके महीयते ॥५॥
आर्य्यातीर्थे महापुण्ये त्रिवेणीसङ्गमे शुभे ।
स्नातव्यं कार्त्तिके मासि सर्व्वपर्व्वसु यत्नतः ॥६॥
तन्मासं यो मुदा व्याप्य स्नायते यत्र धीमता ।
पूर्णिमायां विशेषेण तस्य पुण्यफलं श्रृणु ॥७॥
लक्षाणां चतुराशीनां जन्मार्ज्जितैश्च किल्विषैः ।
स्नानाद्विमुच्यते सद्यः पूर्णिमायां विशेषतः ॥८॥
ब्रह्महत्यादिभिः सर्व्वैर्महापापैः प्रमुच्यते ।
पातकैः पञ्चभिः सद्यः स्नानात्संवत्सरैकृतः ॥९॥
विधवा सधवा वापि या काचित्स्नायतेऽवला ।
मासराट्कार्त्तिकं व्याप्य तस्याः पुण्यफलं श्रृणु ॥१०॥
सप्तजन्मार्जितैः पापैर्वाक्कायमानसोद्भवैः ।
नेत्रार्ज्जितैश्च वालघ्नैश्चतुर्दश्यां हि मुच्यते ॥११॥
भर्त्तुश्छन्दोद्भवैर्नोभिर्विमुक्ता सुन्दरी भवेत् ।
दीर्घजीवी पतिस्तस्याः पुत्रवती धनान्विता ॥१२॥
ललाटे भूपिता तस्याः सिन्दूरैः सततं ततः ।
देहान्ते च विमानेन आर्य्यालोके वसेन्मुदा ॥१३॥
नारायणमहातीर्थे द्वादश्यां कार्त्तिके द्वयोः ।
स्नात्वा मुक्तो महापापैर्विष्णुसायुज्यमाप्नुयात् ॥१४॥
पावनिकाख्ये तीर्थे तद्द्वितीयायां जलासवात् ।
गोसहस्रफलं प्राप्य रुद्रलोकं स गच्छति ॥१५॥
ततोऽगस्त्य महातीर्थे स्नातकस्य फलं श्रृणु ।
भाद्रशुक्लद्वितीयायां संक्रान्त्यां वा विशेषतः ॥१६॥
स्नात्वाऽसावन्त्यजो वापि मुनिराजप्रसादतः ।
लब्ध्वा विप्रतनुं चान्ते अगस्त्यभवनं ब्रजेत् ॥१७॥
नीलकण्ठे महातीर्थे स्नातव्यं पूर्णिमादिने ।
ज्येष्ठे सितदशम्यां च तस्य पुण्यफलं श्रृणु ॥१८॥
नीलकण्ठे फलं यावत्स्नानदानजपोद्भवम् ।
गवां कोटिफलं प्राप्य शिवलोके महीयते ॥१९॥
वासुकिनामतीर्थेऽस्मिन्पञ्चम्यां श्रावणस्य च ।

स्नात्वा नागभयं त्यक्त्वा विष्णुलोके महीयते ॥२०॥
गोखुराख्ये महातीर्थे श्रावणीपूर्णिमादिने ।
गोसहस्रफलं प्राप्य स्नाता गच्छति शांकरम् ॥२१॥
भृगुपतनतीर्थे यः स्नातकः सर्व्वपर्व्वसु ।
अश्वमेधफलं प्राप्य शक्रलोके प्रगच्छति ॥२२॥
वाग्मत्यामुद्भवायां च यदेहागत्य निर्जराः ।
संभूयात्र मुदा सस्नुर्देवघट्टस्ततः श्रुतः ॥२३॥
देवघट्टमहातीर्थे संक्रान्त्यां मकरस्य च ।
सर्व्वदेवार्च्चनं पुण्यं प्राप्य स्नाता व्रजेद्दिवम् ॥२४॥
सहस्रात्मा विधिर्भूत्वा सस्नौ चात्र मुदा भृशम् ।
ब्रह्मसहस्रतीर्थं तत्सर्वलोके त्विति श्रुतम् ॥२५॥
ब्रह्मसहस्रतीर्थे यः प्रतिपद्यां शुचेः सिते ।
सर्व्वमेधफलं प्राप्य स्नात्वा ब्रह्मपदं व्रजेत् ॥२६॥
सहस्रात्मा हरिर्भूत्वा वाग्मत्यां च पुरा यदा ।
उद्भूता वाग्मती सस्नौ तस्मादेव इति श्रुतम् ॥२७॥
विष्णुसहस्रतीर्थेऽस्मिन्द्वादश्यां च द्वयोः शुचेः ।
मेरुदानफलं प्राप्य विष्णुलोकं स गच्छति ॥२८॥
वाग्मती सा यदोद्भूता सहस्रात्मा मुदा हरः ।
सस्नौ हि तद्दिने तस्माद्रुद्रसहस्र आश्रुतः ॥२९॥
रुद्रसहस्रतीर्थेऽस्मिंश्चतुर्दश्यां द्वयोः शुचेः ।
गवां कोटिफलं प्राप्य स्नात्वा गच्छति शांकरम् ॥३०॥
सूर्य्यभागामहातीर्थे स्नायते यो रवौ हि वा ।
संक्रान्तिषु च सर्व्वेषु तस्य पुण्यफलं शृणु ॥३१॥
सर्व्वजन्मनि निष्पापः पूर्व्वपापैर्विवर्ज्जितः ।
दशकोटिगवां प्राप्य सूर्य्यलोके महीयते ॥३२॥
चन्द्रभागामहातीर्थे पूर्णिमायां च सर्व्वशः ।
स्नायते यश्च सोमे वा तस्य पुण्यफलं शृणु ॥३३॥
सर्व्वरोगैर्विनिर्म्मुक्तो भवेज्जन्मनि जन्मनि ।
दशाश्वमेधजं प्राप्य चन्द्रलोकं प्रगच्छति ॥३४॥
मनःकामे हि तीर्थे यो दशम्यां स्नाय[illegible] शुचेः ।
मनःकामफलं प्राप्य रुद्रलोके वसेत्सुखम् ॥३५॥
जिह्वालोलमहातीर्थे स्नात्वा षष्ठ्यां शुचेः सिते ।
मिथ्याशपथसम्भूतैः पापैर्मुक्तो व्रजेच्छिवम् ॥३६॥
अनन्ताख्ये च तीर्थे यः पञ्चम्यामसिते मधोः ।
सर्व्वजन्मोद्भवैः पापैः स्नातो मुक्तः पुरा कृतैः ॥३७॥
बालश्मशानतीर्थे यः प्रतिपदि मधोः पुनः ।
बालदोषैर्विनिर्मुक्तः स्नातो बाल्येऽविपद्यते ॥३८॥
भैरवाख्ये महाकुण्डे सर्व्वपापैर्व्विवर्जितः ।
राधकृष्णचतुर्दश्यां स्नातो गच्छति शांकरम् ॥३९॥
जलेश्वरे महातीर्थे अष्टम्यां माधवस्य च ।
उभयोश्चैव निष्पापः स्नातो याति शिवालयम् ॥४०॥
गुह्येश्वरीमहातीर्थे नवम्यामाश्विनस्य च ।
उभयोः स्नायते भक्त्या तस्य पुण्यफलं शृणु ॥४१॥
सर्व्वमेधफलं प्राप्य पुमान्याति हरालयम् ।
सर्वभोग्यसुखं भुक्त्वा नारी याति शिवालयम् ४२
विनायके च तीर्थेऽस्मिंश्चतुर्थ्यामाश्विनस्य च ।
निर्विघ्नं तद्भवेत्कार्य्यं सर्व्वं स्नातुर्न्निरन्तरम् ॥४३॥
पशुगणमहातीर्थे वैशाखसप्तमीदिने ।
पशुपाशैर्व्विनिर्मुक्तः स्नाता याति त्रिविष्टपम् ॥४४॥
श्लेष्मान्तकं ततस्तीर्थं राधकृष्णाष्टमीतिथौ ।
बहुपापं परित्यज्य स्नाता याति वृषालयम् ॥४५॥
ताम्रचूडे(ले)ततस्तीर्थे द्विषष्ठ्यां माधवस्य च ।
षष्टिसंवत्सरोद्भूतैः पापैः स्नाता विमुच्यते ॥२६॥
उत्तरवाहिनीतीर्थे चतुर्थ्यां माधवस्य च ।
शतगवां फलं प्राप्य रुद्रलोके महीयते ॥४७॥
विष्णुना च धृता पृथ्वी यदा वराहरूपिणा ।
तच्चैलात्पतिताम्भो यच्चैलगङ्गेति विश्रुता ॥४८॥
चैलगङ्गामहातीर्थे राधकृष्णतृतीयके ।
तज्जन्मदिवसे स्नातुः फलं शृणु विरूपदृक् ॥४९॥
सहस्रजन्मजैः पापैः स्नानान्मुक्तो हि तत्क्षणात् ।
काम्यतो हि कृतैः पापैः स्त्रीणां विशेषतो द्विज ॥५०॥
सहस्राणां मखोद्भूतान् वाजपेयांस्तथैव च ।
तत्फलानि समादाय विष्णुलोकं स गच्छति ॥५१॥
हत्यामोचनतीर्थे च ज्येष्ठेस्य दशमीयुते ।
सोमे हस्तान्विते स्नातुस्तस्य पुण्यफलं शृणु ॥५२॥
ब्रह्महत्यादिभिः पापैः स मुक्तः स्नातकः क्षणात् ।
गवां कोटिफलं प्राप्य रुद्रलोकं स गच्छति ॥५३॥
ब्रह्मणः पञ्चमं शीर्षं हतपापान्वितो हरः ।
तत्र स्नानाद्विमुक्तोऽसौ तद्धत्यया महेश्वरः ॥५४॥
कैलाशाख्ये ततस्तीर्थे स्नातुस्तस्य फलं शृणु ।
ज्येष्ठकृष्णचतुर्दश्याममावास्यां विशेषतः ॥५५॥
सर्वयज्ञफलं प्राप्या सर्वतपोद्भवं फलम् ।
समादाया स निष्पापः कैलाशं हि प्रगच्छति ॥५६॥
हिमवतो महातीर्थे स्नाता स्वर्गं व्रजेन्मुदा ।
ज्येष्ठशुक्लचतुर्दश्यां प्राप्या सर्वं तपःफलम् ॥५७॥
द्वादश्यां च द्वयोश्चैत्रे युतायां हि बुधेन च ।
यो विष्णुपादुकातीर्थे स्नातिः पुण्यफलं शृणु ॥५८॥
तत्तीर्थे खलु निष्पापः स्नाता पिण्डन्ददाति वै ।
त्रिसप्तकुलमुद्धृत्या विष्णुलोकं प्रगच्छति ॥५९॥
भृगुपाते ततस्तीर्थे स्नाता देहं पतेत्खलु ।

सप्तजन्म परित्यज्य रुद्रलोकं व्रजेत्सुखी ॥६०॥
आषाढ्याः पूर्णिमायां च चन्द्रतीर्थजलाप्लुतः ।
चन्द्रकान्तिमुखो भूत्वा सौभाग्यमतुलं लभेत् ॥६१॥
आषाढ्या संक्रमे सौरे सूर्य्यतीर्थे जलाप्लुतः ।
सप्तजन्मार्जितैः पापैः स मुक्तो नात्र संशयः ॥६२॥
गोकर्णेश्वरतीर्थे यः स्नाता रुद्रालयं व्रजेत् ।
भाद्रकृष्णचतुर्दश्यामष्टम्यां च विशेषतः ॥६३॥
तथोत्तरगयातीर्थे स्नात्वा पिण्डं ददाति यः ।
विशेषात्तदमावास्यां तस्य पुण्यफलं शृणु ॥६४॥
मातुः पितुस्तथा बन्धोः श्वशुरस्य कुलानि च ।
समुद्धृत्य शतं साग्रं पितृलोकं स गच्छति ॥६५॥
गदाधरमहातीर्थे स्नात्वा फलं तथैव च ।
शतगुणं फलं प्राप्य विष्णुलोकं स गच्छति ॥६६॥
पितामहमहातीर्थे कोटिकोटिगुणं फलम् ।
कुलकोटिं समुद्धृत्य ब्रह्मलोकं व्रजेत्सुधीः ॥६७॥
चन्द्रभागामहातीर्थे स्नाता याति विधोः पुरम् ।
सोमार्क्कपूर्णिमायां वै सोमपानफलान्वितः ॥६८॥
नारदाख्ये ततस्तीर्थे सप्तम्यां श्रावणस्य च ।
मिथ्यापापैर्विनिर्म्मुक्तः स्नात्वा गच्छेत्त्रिविष्टपम् ६९
ततः सप्तर्षितीर्थे यः संक्रान्त्यां नभसो रवौ ।
सप्तजन्मार्जितैः पापैः स्नाता मुक्तो दिवं व्रजेत् ॥७०॥
कपोतगिरितीर्थे यो भाद्रशुक्लतृतीयके ।
स्नाता विकिल्विषः सद्यो याति माहेश्वरं पुरम् ॥७१॥
कान्तिभैरवतीर्थे यो नवम्यामाश्विनस्य च ।
देहजैः किल्विषैर्मुक्तः स्नाता याति हरालयम् ॥७२॥
वाग्मतीपतने तीर्थे नवम्यां कार्त्तिके सिते ।
गवां कोटिफलं प्राप्य स्नाता याति हरालयम् ॥७३॥
कृतोत्थाना पवित्रांगा भूमौ सती मनोरमाः ।
सौन्दर्य्येण नदी श्रेष्ठा सुन्दरी नाम विश्रुता ॥७४॥
सुन्दरिकामहातीर्थे स्नाता याति शिवालयम् ।
मार्गकृष्णचतुर्दश्यां लब्ध्वा कोटिमखोद्भवम् ॥७५॥
विमलाम्बुमहातीर्थे नवम्यां स्नायते बुधः ।
पौषकृष्णनवम्यां वा तस्य पुण्यफलं शृणु ॥७६॥
कोटिजन्मार्जितैः पापैर्मुक्तः स्वर्णविमानगः ।
सर्वदानफलं प्राप्य रुद्रलोकं स गच्छति ॥७७॥
अप्सरोगणतीर्थे या पूर्णिमायां जलाप्लुता ।
कुरूपा स्त्री च या काचित्तस्या पुण्यफलं शृणु ॥७८॥
तुल्याप्सरस्तनुर्भूत्वा आह्लादसुन्दरैर्गुणैः ।
इह लोके सुखं भुक्त्वा उमालोकं व्रजेत्सुखम् ॥७९॥
ब्रह्मसरस्वतीतीर्थे स्नाता तस्य फलं शृणु ।
सर्वपर्वसु यत्नेन चैत्रिकस्य विशेषतः ॥८०॥
यच्च शताश्वमेधानां वाजपेयस्य वै तथा ।
कपिलाशतकोटीनां स्नानात्प्राप्नोति तत्फलम् ॥८१॥
स्वर्णतुलासहस्राणां सर्वदानगुणं शतम् ।
सर्वयज्ञोद्भवं पुण्यं स्नाता प्राप्नोति तत्फलम् ॥८२॥
सर्वतीर्थेषु यत्पुण्यं सर्वव्रतेषु यत्पुनः ।
सर्वदेवार्च्चनं पुण्यं स्नाता प्राप्नोति तत्फलम् ॥८३॥
इह लोके सुखं भुक्त्वा यावज्जीवं कुलान्वितः ।
स्वर्णयानेन यात्यैशं देहान्ते स परात्परम् ॥८४॥
तीर्थान्येतानि ते विप्र कथितानि मयाऽधुना ।
संगमानि च वाग्मत्या मनोवाञ्छाप्रदानि च ॥८५॥
तीर्थेष्वेतेषु यो धीरः स्नायते तद्धि पर्वसु ।
यद्यत्प्रोक्तं फलं प्राप्य शिवलोकं परं व्रजेत् ॥८६॥

स्कन्द उवाच ।

स्नात्वाऽसौ सर्वतीर्थेषु नेपालेषु घटोद्भव ।
अर्चितवांश्च लिङ्गानि तत्क्षेत्रे खलु सर्वशः ॥८७॥
तस्थौ तत्र विरूपाक्षः पाशुपते समाहितः ।
शिवक्षेत्रे मुदा भक्त्या पशुपतिं प्रसेवयन् ॥८८॥
भवेत्सिद्धो हि विप्रोऽसौ अद्यापि कुम्भसम्भव ।
प्रसादात्तीर्थलिङ्गानां सिद्धैः सह प्रमोदते ॥८९॥
सिद्धैर्विनिर्मुनिः श्रेष्ठो मणिचूडाचलेऽग्रतः ।
अन्यैः सिद्धैः समन्तस्थौ वज्रां देवीं प्रसेवयन् ॥९०॥
कथितं ते मयेत्येतद्विरूपाक्षस्य कुम्भज ।
तीर्थयात्राटनं पुण्यं किं भूयः श्रोतुमिच्छसि ॥९१॥
तीर्थानां ये खलु नरवरा भक्तिशक्त्यात्मकाश्च,
माहात्म्यं वै परम-सुखदं धीर शृण्वन्ति शश्वत्
तेषु स्नानात्तदमृतवरे सन्ति यद्यत्फलानि
आदायार्य्याः परमपदवीं यान्ति तत्तत्कृतानि ।९२।

इतिश्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये
विरूपाक्षतीर्थयात्रायां वाग्मतीसंगमतीर्थानां
माहात्म्यं नामैकषष्ट्युत्तरशततमोऽध्यायः ॥१६१॥

अगस्त्य उवाच ।

नमस्ते भगवन्स्कन्द त्वत्प्रसादाच्छ्रुतं मया ।
नेपालस्य च माहात्म्यं सर्वपापविनाशनम् ॥१॥
वक्त्रारविन्दच्युतशीतलं ते
सुधारसं पास्य सुशीतलोऽस्मि ।
गङ्गोदकं धर्म्मकृशाङ्गिनो हि
यथैव पङ्कानि विदीर्णितानि ॥२॥
भूयोऽहं श्रोतुमिच्छामि त्वयि सर्वज्ञसूनुके ।
माहात्म्यं खलु वाग्मत्याः कामुको वद मे प्रभो ॥३॥

पुरी पाशुपती ख्याता सत्यवती कथं भवेत् ।
तस्यां सुवर्णमय्यां किं विमुक्तः कोऽपि विद्यते ॥४॥

स्कन्द उवाच ।

आसीन्म्लेच्छः पुरा कश्चिद्वितण्डो धनवाञ्छुतः ।
कुन्दाचले ह्यवात्सीत्स परिवारैः समं सुखम् ॥५॥
तस्य दासोऽनिशं क्रोधी रुद्रो नाम धनुर्धरः ।
मृगयाभ्रमणोऽरण्ये अतिक्रूरो बलान्वितः ॥६॥
सोऽजस्रं हतवाञ्जन्तून् पशुपक्षिमृगान्मुने ।
जलजान्निर्दयः क्षुद्रान्पौगण्डनिधनावधि ॥७॥
अलाभे मृगयाजन्तौ निराशो गतवान्गृहे ।
निर्भर्त्स्याशु वितण्डस्तं लगुडेन ह्यताडयत् ॥८॥
निरशनो हि तद्रात्रौ हा कष्टेति रुरोद सः ।
क्व गच्छामीति चैकाकी धिग्जीवन्परसेवकः ॥९॥
तन्निशायां गृहं त्यज्य क्षेत्रं पाशुपतं ययौ ।
धिगिति जीवनं कृत्वा पराशः परसेवकः ॥१०॥
कार्त्तिकीपूर्णिमायां स पञ्चत्वं प्राप्तवान्मुने ।
रेवत्या संयुतायां च बुधे तत्र निशान्तरे ॥११॥
तद्दिने प्रेरणार्थाय तमानेतुं हि किङ्करान् ।
निर्दिशयति कालेशः व्याचष्ट वचनं च तान् ॥१२॥

चित्रगुप्त उवाच ।

भो यम धर्मराट् मृत्यो काल वैवस्वतान्तक ।
दध्नौदुम्बरनीलार्य्य परमेष्ठिन्वृकोदर ॥१३॥
चित्रभूतघ्न भोवत्स भवद्भिः पश्यतामिह ।
पट्टे कृतानि तस्यैव चित्राणि विकिल्विषाणि च ॥१४॥
अहोऽद्भुतानि कर्माणि म्लेच्छस्य पापिनो मुने ।
केवलं संचितं पापं नास्ति धर्मो मनागपि ॥१५॥
सहस्राणां चतुर्थानां तेन चतुष्पदा हताः ।
तथैव पक्षिणां संख्या तल्लक्षं जलजन्मिनाम् ॥१६॥
क्रूरेण निहतं सर्वं वृद्धान् यूनोर्भकानपि ।
जले स्थले निरालम्बे रुषान्वितेन निर्दयम् ॥१७॥
अद्यैवानीय तं पापं यातनापूर्वकं पथि ।
तर्जयन् ब्रह्मदण्डेन प्रबन्ध्या ताडयन्मुहुः ॥१८॥
वल्कलपक्षकेशानां यावत्संख्या च विद्यते ।
हतानां वत्स तावत्स नरकेषु प्रपच्यताम् ॥१९॥

स्कन्द उवाच ।

एवं प्रदर्श्य तान् पट्ट प्रास्थापयद्धटोद्भव ।
बध्वापट्टं यमेन्द्रोसौ महेशानमपूपुजत् ॥२०॥
आकर्ण्य तद्वचो दूतास्तत्पाशदण्डपाणयः ।
ययुः पाशुपतं क्षेत्रं तमानेतुं रुषा द्रुतम् ॥२१॥
बध्वा पाशेन तं चण्डो दण्डमुष्टितले रुषा ।
ताडयन्पथि चानिन्युः संयमनीं मुहुस्तदा ॥२२॥
स्वकृतं पापभुङ्क्ष्वेति वदन्निर्भर्त्सयँश्च ते ।
पुरतश्चित्रगुप्तस्य उपहारः कृतः स तैः ॥२३॥
सोऽपि न बुबुधे मार्गे ताड्यमानो मुहुस्तदा ।
यातनावाक्प्रहारैश्च पुष्पैर्माल्यैर्यथा द्विपः ॥२४॥
किमेतस्येह कर्त्तव्यं प्रभो तद्यातनां पुनः ।
क्षेपणीयमिमं कस्मिन्प्रथमं नरकालये ॥२५॥
श्रुत्वा वचो हि तेषां स समाप्य देवपूजनम् ।
उद्घाट्य पट्टकं यत्तच्चित्रगुप्तो ददर्श वै ॥२६॥
तत्कृतानि च यावन्ति प्रलुप्तानि ददर्श सः ।
संप्रेक्ष्य तानि चित्राप्तः किमिति किञ्च संभ्रमः ॥२७॥
कस्येदं कर्म चित्राप्त इति चिन्ताकुलोऽभवत् ।
आहूय किंकराँल्लुप्तमपृच्छत्तत्कृतं यमः ॥२८॥

चित्रगुप्त उवाच ।

वत्साः केनापि पट्टेस्मिन्नेतस्य पापिनोधुना ।
यल्लिखितं मया तद्धि लुप्तं कथय निश्चितं ॥२९॥

यमकिंकरा ऊचुः ।

संलिखितं प्रभो यस्य यत्तद्धि भवता खलु ।
कः समर्थो हि तल्लोप्तुं देवोपि च न विद्यते ॥३०॥

चित्रगुप्त उवाच ।

अहोद्भुतं महत्कर्म्म बहुपापात्मनोऽधुना ।
मल्लिपेर्लोपकः कोस्ति विधातारं विनेति च ॥३१॥
नो चेत्तद्धेतुकं वत्सा अस्याथवा भविष्यति ।
गत्यपारा तदीशस्य विज्ञापितुं परं व्रजे ॥३२॥

स्कन्द उवाच ।

प्रययौ चित्रगुप्तोसौ ब्रह्मणः सदनं मुने ।
आश्चर्यमोहितैः सार्द्धं त्यक्त्का तत्रैव पापिनम् ॥३३॥
प्रणिपत्याशु धातारमवोचद्वचनं हि सः ।
विमुच्य पट्टकं सद्यः अदर्शयद्विधिं च तत् ॥३४॥

चित्रगुप्त उवाच ।

विभो चित्रप्रवृत्तिं च आकर्ण्यतां निवेदये ।
आजन्म पापिनस्तात धर्म्मैर्हि वर्जितस्य च ॥३५॥
लिखितं त्वत्प्रसादाद्वै विभो मया हि सर्वशः ।
असुभृतां च कर्म्माणि किल्बिषाणि शुभानि च ॥३६॥
रुद्रनामकिरातस्य आजन्मपापकर्म्मणः ।
लिखितं बहुपापानि मनाङ्न विद्यते शुभम् ॥३७॥
यन्मया लिखितं पट्टे तत्कृतं कलुषं विभो ।
लुप्तं केनापि बोद्धव्यं नार्हकिणा न विद्महे ॥३८॥

स्कन्द उवाच ।

आकर्ण्य तद्वचो ब्रह्मा दध्यौ परात्परे मुने ।

तद्धेतुकावबोधाय परमेण समाधिना ॥३९॥
ध्यात्वा क्षणं परं ब्रह्म ब्रह्मा लोकदयाकरः ।
व्याचष्ट वचनं तस्य तस्मै प्रवृत्तिहेतुकम् ॥४०॥
ब्रह्मोवाच ।
शृणुत मद्वचः सम्यग्धर्म्मराज ऋतं विदुः ।
रुक्षस्यैव प्रवृत्तिं च त्रिकालेषु भविष्यति ॥४१॥
दासोसौ हि वितण्डस्य पूर्वदायं प्रदस्य च ।
तस्माद्धि धनिनस्तीव्रं सोऽदानान्निर्द्धनो ऽभवत् ॥४२॥
किंकरस्तस्य दुःखार्त्तो वाक्छरैः पीडितोऽनिशम् ।
ताडितो लगुडैः क्रोधादेकदा पतिना गृहे ॥४३॥
दुःखार्त्तः क्रन्दमानोसौ हाकष्टेति वदन्पथि ।
ययौ पाशुपते क्षेत्रे परित्यज्य गृहन्निशि ॥४४॥
एतद्देहान्तरं देहो भविष्यति नृपो बली ।
स्वर्णालये सुखं स्थास्ये चेति दास्यति मे शिवः ॥४५॥
आधाय मनसा चेति क्षेत्रे पाशुपते ययौ ।
निर्द्धनान् जन्मिनो धिग्धिक् जीवनं परिवर्त्तनम् ॥४६॥
सिद्धाटवीमागतवान्स चैकः संपूर्णचन्द्रेह्युडुकृत्तिकाक्ते
तत्कार्त्तिकस्यानशनः क्षुधार्त्त
अन्वेषणाहारमदर्शयत्तत् ॥४७॥
रुक्षोष्ट्रमूर्त्तेर्मुखसंभवायां मत्स्यान्ग्रहीतुं जलमाविशद्वै
संप्रेक्ष्य रुक्षो विपिनाद्व्रजन्तं
पीत्वाशु रक्तं त्वहत्करेण ॥४८॥
तज्जन्तोराममांसाशी भूत्वा स एव राक्षसः ।
तस्य हन्ताद्य वत्सासौ वाग्मत्या भूपतीर्थके ॥४९॥
भविष्यति त्वसौ क्रव्यात्किराताधिपतिर्बली ।
वाग्मतीजलसंस्पर्शात्तद्दिने ज्ञानवर्जितः ॥५०॥
करिष्यति ह्यसौ राज्यं तत्रैव प्रवसंश्चिरम् ।
भविष्यति ततो भूयो नरनारायणात्मकः ॥५१॥
तस्मान्न बुबुधे रुक्षो युष्मत्ताडनजां व्यथाम् ।
वाग्मतीतोयसंस्पर्शान्निष्पापौ तौ य... खलु ॥५२॥
भविष्यति च रुक्षोपि मध्यदेशे नृपोत्तमः ।
अर्कान्वये वरो राज्यं कंचित्कालं करिष्यति ॥५३॥
योगीश्वरमुखाच्छ्रुत्वा पशुपतेः प्रशंसनम् ।
तपोवनं शुभं क्षेत्रं तत्रैव स व्रजिष्यति ॥५४॥
निर्जित्यासौ किरातान्वै तत्र राज्यं करिष्यति ।
विशालनगरीं कृत्वा तपोबलात्सुधार्मिकः ॥५५॥
वैशालाधिपतिस्तस्माद्भविष्यति नृपोत्तमः ।
पाशुपतीं पुरीं प्रेक्ष्य तत्र हेतुं करिष्यति ॥५६॥
आराध्य पशुपेशानं निर्जित्य सकलान्सुरान् ।
पाशुपत्यां ततः पुर्य्यां सुराज्यं स करिष्यति ॥५७॥

चित्रगुप्त उवाच ।
चित्रं मे जायते स्वान्ते पापात्मानौ पितामह ।
लभिष्यती नृपांशौ तौ दानधर्मैः समार्जितौ ॥५८॥
आजन्मनोस्तयोर्द्धर्म्मो न विद्यते मनागपि ।
लभिष्यतः कथं तौ हि नरवन्द्यो तनू विभो ॥५९॥
ब्रह्मोवाच ।
एतद्वृत्तान्तमाकर्ण्य कथं प्राकृततां गतः ।
माहात्म्यं खलु वाग्मत्याः धर्म्मराट् समदर्शकः ॥६०॥
यो वा सो वा नरस्तत्र वाग्मत्याः जलसंस्पृशात् ।
भविष्यति स चैवार्य्यो नरनारायणात्मकः ॥६१॥
इति भगवता प्रोक्तं प्राक् शंकरेण मे सुत ।
ब्रह्मसरस्वतीं साक्षात्तन्मुखसंभवां नदीम् ॥६२॥
तद्विग्रहं परित्यज्य रुक्षोपि जायते नृपः ।
रुक्षोसौ जायते भूपः कांचीपुर्य्यां सुताऽधुना ॥६३॥
धर्मराज त्वरा गच्छ अन्येषां शासनां कुरु ।
स्नातकानां च भक्तानां मा मा मा यातनां कुरु ॥६४॥
स्कन्द उवाच ।
आकर्ण्य तद्वचोगस्य धर्मराजपुरःसराः ।
वाग्मतीजलमहात्म्यं मुमुदिरे भृशं तदा ॥६५॥
प्रणम्य ते हि धातारं संयमनीं ययुर्मुदा ।
सर्वभूतात्मने तुभ्यं नमस्कृत्येति भक्तितः ॥६६॥
चित्रगुप्तोपि तैः सार्द्धमागत्य वाग्मतीजले ।
संसस्नौ विधिवद्भक्त्या संयमनीं समागमत् ॥६७॥
रुक्षो जातो नृपो भूत्वा काञ्चीपुर्य्यां महासुखी ।
रुक्षो जातो हि तत्रैव किराताधिपतिः सुखी ॥६८॥
पूर्वोत्तरे महास्थाने पशुपतेर्विदूरतः ।
स चकार सुखं राज्यं किराताधिपतिश्चिरम् ॥६९॥
कश्चिच्चकार राज्यं स धर्मदत्ता ऽभिधानतः ।
ततो दशात्मजास्तस्य बभूवुः शृणु चाव्ययम् ॥७०॥
धर्मकेतुस्तथा सूर्य्यकेतुर्बलध्वजो मुने ।
चन्द्रकेतुः पुनर्विश्वकेतुः सत्यध्वजोऽपरः ॥७१॥
युद्धकेतुर्यज्ञकेतू रुक्मकेतुर्मखध्वजः ।
देवासुरैरजेयास्ते सत्यवाचोऽमितौजसः ॥७२॥
एतैस्सदात्मजैर्भूपः काञ्चीराज्यं शशास वै ।
शताब्दं स सुखं भुक्त्वा काशीं समाव्रजत्किल ॥७३॥
ददर्शासौ मुने काशीं काशिराजेन दीपिताम् ।
त्रिदशानात्मसात्कृत्य शशास तां सुखं नृपः ॥७४॥
स्वर्णमयीं पुरीं काशीं सादृप्राकारतोरणाम् ।
धर्मदत्तो हि तां प्रेक्ष्य तद्वदिपेप पट्टनम् ॥७५॥
कंचिद्योगीश्वरं गत्वा पृच्छतिस्म मुदा नृपः ।

तद्द्राज्यं कथं लभ्यं तुभ्यं नमोस्तु मे वद ॥७६॥
निशम्य तद्वचो योगी ध्यानेक्षणः स्मिताननः।
व्याजहार शुभं वाक्यं धर्मदत्ताय कुम्भज ॥७७॥
योगीश्वर उवाच।
विनोग्रतपसा तात तुङ्गस्थानं न लभ्यते।
किं न ददाति भक्तेभ्य आराधने स्पृहाप्रदः ॥७८॥
तादृशीं नगरीं राजन् राज्यं यदीच्छसे खलु।
व्रज पाशुपतं तत्र करिष्यसि तपो भृशम् ॥७६॥
स्कन्द उवाच।
आकर्ण्य तद्वचोगस्त्य हर्षैः प्रपूरितो नृपः।
योगिनां तथ्यमेवेति वचः कृत्वा गृहं ययौ ॥८०॥
संमन्त्र्य सह भूपोसौ बुद्धिक्षेमेण मन्त्रिणा।
अभिषेकं ददौ सम्यक् तद्राज्यं बलकेतवे ॥८१॥
पाशुपतं ययौ पुत्रैस्तेनाशु मंत्रिणा समम्।
संत्यज्य तृणवद्राज्यं तत्रास्थायात्मजं नृपः ॥८२॥
विशालनगरीं रम्यां किरातैः पूरितां मुने।
धर्मदत्तो ददर्शादौ साट्टप्राकारतोरणाम् ॥८३॥
कथं जेयाः किरातास्ते इति चिन्ताकुलोऽभवत्।
अस्मिन् राज्ये कथं स्थास्ये बुद्धिक्षेमाशु मे वद ॥८४॥
बुद्धिक्षेम उवाच।
विनोग्रतपसा हृद्यं कामं न लभ्यते प्रभो।
तत्कांक्षा विद्यते स्वान्ते भवतां चेत्प्रतप्यताम् ॥८५॥
आधाय चित्तामृतजे शिवार्क-
भक्त्याशुतोषं शिववाग्भवायां।
स्नात्वा तमेवार्च्चय तत्तटे वै-
श्रीमत्स्पृहां प्राप्स्यसि सत्वरं तत् ॥८६॥
स्कन्द उवाच।
संश्रुत्वा वचनं भूयो बुद्धिक्षेमस्य कुम्भज।
तप्तवान्यत्र सिद्धर्षिर्म्मणिचूडाचलं ययौ ॥८७॥
योगेश्वरीं प्रणम्यादौ सिद्धर्षिः स च भक्तितः।
शुभेहनि ऋषेस्तस्मादुपदेशं समाददे ॥८८॥
आप्लव्य वाग्वतीतोये धर्म्मदत्तो यथाविधि।
प्रतेपे सुन्दरीतीर्थे तद्राज्यकाङ्क्षया हृदा ॥८६॥
मार्गकृष्णचतुर्दश्यां लिङ्गं वालुमयं नृपः।
संपूज्य विधिवत्तेपे मासमेकं निराशनः ॥६०॥
मासान्ते किल वाग्देवी तत्तीर्थात्संभवाहनि।
व्याचष्ट वचनं राज्ञे वरदानाय कुम्भज ॥६१॥
शृणु राजन्वरं दास्ये यत्ते मनसि विद्यते।
जित्वा किरातराजानं तद्राज्यं लप्स्यसि ध्रुवम् ॥६२॥
इति दत्त्वा वरं देवी तस्मै तद्वाञ्छितं मुने।
तिरोदधे हि वाग्मत्यां तुष्टाच्चर्चनस्तवैर्भृशम् ॥६३॥
वाग्देव्यै जगतां धात्र्यै वरदायै नमो नमः।
एवं स्तुत्वा परिक्रम्य हृदि भावं दधे नृपः ॥६४॥
सोपि वै भूभुजां श्रेष्ठो देव्या लब्धवरस्तदा।
ययौ शक्राचलं क्षिप्रं हर्षपूरितमानसः ॥६५॥
तत्रस्थो हि समं लोकैर्दूतमप्रैषयन्नृपः।
किरातपतये वक्तुं धर्मशीलं द्विजोत्तम् ॥६६॥
सोप्यागत्य द्रुतं तत्र अवोचद्वचनं मुने।
यदुक्तं धर्म्मदत्तेन संसदि संस्थिते नृपे ॥६७॥
दूत उवाच।
शृणु राजन् यदुक्तं ते धर्म्मदत्तेन भूभुजा।
तद्धेतोरागतश्चात्र दूतोहं ज्ञायतां द्विजः ॥६८॥
राजशब्दो हि नोऽवश्यं प्रजा रञ्जयतीति वा।
शासनैर्भरणैर्द्रव्यैस्तद्धर्म्मैः पालनान्नृपः ॥६६॥
म्लेच्छानां हि तथाऽन्येषामेतच्छद्रः प्रचक्ष्यते।
गणनायक इत्याख्यः प्रसिद्ध इति सर्वदा ॥१००॥
त्वं म्लेच्छनायकः शश्वद्वनौकसां गणोत्तमः।
प्रसिद्धवर्त्तमानोयं शीलस्वभावजातिभिः ॥१॥
वनमेव वरं स्थानं वनौकसां वरं स्मृतम्।
क्षत्रियाणां हि तद्राज्यं भद्राय प्रोचितं वरम् ॥२॥
अस्मद्योग्यमिदं राज्यं संत्यज्य नः पदौ द्रुतम्।
प्रणिपत्य वनं गच्छ जीवितुं यदि कांक्षसे ॥३॥
धूम्रकेतुः समुद्भूतो ह्यद्य तवान्तरायकः।
धर्मदत्तो विभुर्नो चेत्पापीयसां सदान्तकृत् ॥४॥
स्कन्द उवाच।
आकर्ण्य तद्वचोऽगस्त्यम्लेच्छाधिपोपि संसदि।
कोपं चक्रे तदात्यन्तं मपि म्लेच्छः स्वभावतः ॥५॥
निर्भर्त्सयन्द्विजं दूतं खड्गं निःसारयद्द्रुतम्।
खड्गोद्यतकरो भूयो व्याचष्ट वचनं रुषा ॥६॥
शङ्कुरुवाच।
विना मां भुवि वाचान्यः नृपतिरिति विश्रुतः।
कः क्षुद्रोत्र समायाति वनौकाः कोपि विद्यते ॥७॥
अन्वेषयतशनं राज्ये चान्नं नास्ति वने किमु।
अथवा कांक्ष्यते राज्यं क्षुद्रैर्बुभुक्षितैः खलु ॥८॥
धिग्धिक्त्वजीवनं मेऽद्य वनौकोभिर्यतोऽधुना।
प्रकांक्षते हि मद्राज्यं जीविते मयि सान्वये ॥६॥
हत्वा सैन्यं च पापस्य तं हनिष्यामि सान्वयम्।
आत्मशक्तिमविज्ञाय वल्गमानमजातिनम् ॥१०॥
निःसारयत्विमं दूतं मदग्रतो धुरन्धर।
नोचेद्दूतं ध्रुवं हन्मि अपिचान्यं द्विजं किमु ॥११॥

स्कन्द उवाच ।

इत्याकर्ण्य वचो मन्त्री रसिको नाम भूभृतः ।
निःसारयत्पुराद्दूतं वाङ्मधुरैश्च सान्त्वयन् ॥१२॥
सोपि ययौ त्वरायुक्तो धर्म्मदत्तो हि यत्र च ।
राज्ञे न्यवेदयत्सर्वं म्लेच्छाधिपस्य यद्वचः ॥१३॥
आकर्ण्य वचनं भूपो दूतमुखाच्च्युतं तदा ।
अमर्षैः पूरितः सद्यः सुप्ताहिश्चालनादिव ॥१४॥
व्याचष्ट वचनं राजा सैन्येभ्यो मन्त्रिणे पुनः ।
आहूय सर्वसैन्यानि स्वात्मजानपि कुम्भज ॥१५॥

धर्मदत्त उवाच ।

मन्त्रिन्भो सुत युद्धज्ञा नह्यन्तां कवचैर्द्रुतं ।
वाहनानि च रुह्यन्तां नानाशस्त्रोच्चतैर्भृशम् ॥१६॥
अद्यैव निशि तद्राज्यं लुण्ठिष्यामो हि झंपनैः ।
म्लेच्छपार्थं हनिष्यामः पदातीन्युद्धकान्पुरे ॥१७॥

स्कन्द उवाच ।

निशम्य तद्वचः सैन्यं साधुसाध्वित्यभाषयत ।
संनह्य कवचैः सद्यो मन्त्री प्रनिःसृतो निशि ॥१८॥
नानावाहनसंरूढं सैन्यं ययौ महोद्भटम् ।
व्यूहमास्थाय भूपोपि प्रययावात्मजैः समम् ॥१९॥
पौषशुक्लद्वितीयायां सैन्यानि नगरं हि तत् ।
तद्रात्रौ झंपयामासुरुल्कां प्रज्वालयन्पुरम् ॥२०॥
दह्यतेस्म तदा राष्ट्रमुल्काभिश्च समंततः ।
महत्कोलाहलश्चा भूत्प्राणभृतां भयोदितः ॥२१॥
नारीणां बालकानां च क्रन्दमानोद्भवो भयात् ।
खरोष्ट्रवाजिनागानां हेषितादभव द्रवः ॥२२॥
वीराणामभवद्रावो हन्यतां गृह्यतामिति ।
जघ्नुर्वीरा मिथोऽजस्रं शस्त्रास्त्रैर्ज्ज्वालयन्निशि ॥२३॥
तद्राष्ट्रं शुशुभेत्यन्तं अग्निज्वालोत्तमैर्मुने ।
वलभीदुग्धवच्छब्दैर्दावानलैर्यथा जगत् ॥२४॥
निशम्य तद्रवं राजा त्वरमाणोत्थितो निशि ।
ब्रुवन् किमिति धर्मात्मा हर्म्याद्विनिःसृत सुधीः ॥२५॥
आलोक्य तादृशं राष्ट्रं स्वसैन्यनिधनं निशि ।
रिपुसैन्यं किरातार्य्यो भयाद्विनिःसृतः पुरात् ॥२६॥
एकाकी ह्यवसच्छङ्कुः कंचित्कालं वने च तत् ।
मुक्तः स एव वाग्मत्यां नरो नारायणोऽभवत् ॥२७॥
सोपि जित्वा किरातान्वै कृत्वात्मसाज्जगन्नृपः ।
अध्यासीन्नगरे नूनं समादायाभिषेचनम् ॥२८॥
विशालनगरं कृत्वा चतुर्वर्णैः प्रपूरितम् ।
धर्मेणापालयद्भूपः प्रजाः संरञ्जयन्मुहुः ॥२९॥
वैशालाधिपतिस्तस्माच्छ्रेष्ठोऽभूद्भुजां मुने ।
शतवर्षं सुखं राज्यं चकार मन्त्रिभिः सुतैः ॥३०॥

संसेव्यासौ स्वयमविरतं चण्डिकेशं हि लिङ्गं
नीताम्भोभिर्हरचरणजैः साज्यपञ्चोपचारैः ।
तस्माल्लब्धप्रवरनृपतिर्धर्मसंशं च कृत्वा,
दत्वा ताभ्यः खलु वरसुखं चान्वभुंक्ते शताब्दम् ।१३१।

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये वाग्मतीमाहात्म्यं नाम द्विषष्ट्युत्तरशततमोऽध्यायः १६२

— ❀ —

स्कन्द उवाच ।

विशालनगरीराज्यं वैशालाधिपतिश्चिरम् ।
सुखं चकार धर्मात्मा प्रजाः संरञ्जयन् मुने ॥१॥
कार्त्तिकीपूर्णिमायां स ध्वनिं शुश्राव च स्वरम् ।
नानावाद्योद्भवं गीतं गन्धर्वाणां नृपो निशि ॥२॥
किमिति च ब्रुवन् राजा श्रोतुकामो द्रुतोत्थितः ।
आरुह्य वलभीकोटीमश्रावीत्तद्वने स्वम ॥३॥
विमानानि समद्राक्षीद् व्योम्नोऽवतरणानि च ।
प्रदीपयन्प्रदीपैः स नानामण्युद्भवैस्तथा ॥४॥
अवतीर्य स्वयं राजा मन्त्रिणा सह निःसृतः ।
ययौ वनं हि तद्द्रष्टुं खड्गपाणिर्द्धनुर्द्धरः ॥५॥
ददर्श क्षेत्रपालं स तत्प्रान्ते सम्भवे वने ।
करालवदनं भीष्मं दंष्ट्रिणमसिहस्तकम् ॥६॥
दुद्रुवतुस्तमालोक्य तावुत्तरदिशि द्रुतम् ।
सन्त्यज्य कार्म्मुकं खड्गं कृतान्तमिव जन्तवः ॥७॥
धर्मेश्वरमुपासन्तं मार्कण्डेयं ददृशतुः ।
तदन्तिकं गतौ भीष्मादनिवेदयतां हि तत् ॥८॥
प्रणिपत्य मुनिं भक्त्या राजा वचनमब्रवीत् ।
नमस्ते मुनिराजेश सर्वप्राणिदयाकर ॥९॥
भयप्रदो वने नौ हि ऊर्ध्वकेशी भयावहः ।
करालवदनः खड्गी कालानल इवान्तकः ॥१०॥
असिचर्मोद्यतो भीष्मो मुण्डमाली त्रिलोचनः ।
भवान् सर्वज्ञहेतुज्ञः कोसौ भीष्मो वदस्व मे ॥११॥

मार्कण्डेय उवाच ।

शृणु राजन् प्रवक्ष्यामि तद्बीजं हि च सर्वशः ।
एका मूर्तिरसौ भीष्मः अष्टमूर्त्तेर्हि शूलिनः ॥१२॥
क्षेत्रपालः स विज्ञेयः सर्वक्षेत्रानुशासकः ।
रक्षकः शूलिनः क्षेत्रं पशुपतेर्निरन्तरम् ॥१३॥
वनान्तरे पुरीं दिव्यां साट्टप्राकारतोरणाम् ।
स्वर्णमयीं गवाक्षैश्च नानारत्नैः समन्विताम् ॥१४॥
तन्मध्ये भासतेऽजस्रं लिङ्गं पशुपतीश्वरम् ।

१५१९४

देवैः प्रसेव्यते नित्यं वहुवाद्यैर्महोत्सवैः ॥१५॥
तिष्ठन्ति रक्षकास्तस्य चत्वारो गोपुरेषु च ।
नन्दी भृङ्गी गणः क्षेत्रो वासुकिः पञ्चमस्तथा ॥१६॥
तेषामाज्ञां च संलङ्घ्य अकुशला प्रवेशितुं ।
रुद्राक्षलब्धवराणां च अपि देवा नराः किमु ॥१७॥

वैशालाधिपतिरुवाच ।

तमीश्वरं महायोगिन् कथं प्रेक्षन्ति सूरयः ।
सुकृतेन च केनार्य पुरीप्रवेशनं परम् ॥१८॥
कथं नालोकितं लोकैः स्वर्णपुरं च शूलिनः ।
देवैरध्यासितं नित्यं तन्मे सर्वं वद प्रभो ॥१९॥

मार्कण्डेय उवाच ।

न चर्मचक्षुभिर्मर्त्यैर्द्रष्टव्यं शूलिनः पुरम् ।
वहुपुण्यकरैर्वत्स निष्पापैर्दृश्यते खलु ॥२०॥
ज्ञानात्मभिस्तपोयुक्तैर्गुह्येश्वर्याः प्रसादतः ।
पुरीं प्रविश्य राजेन्द्र दृश्यते पशुपेश्वरः ॥२१॥
दुर्लभं मानुषं देहं लब्ध्वा येन कृतं न हि ।
दर्शनं पशुपेशस्य स चेह न भवेत्पशुः ? ॥२२॥
लक्षाणां चतुराशीनां योन्युद्भवं विहाय च ।
प्रलभेत्परमं मोक्षं पशुपतिप्रदर्शकः ॥२३॥
वाञ्छा चेद्दर्शितुं राजन् पुरीं स्वर्णमयीं पराम् ।
इमं मन्त्रार्चनैर्भक्त्या धर्मेश्वरं प्रसेवय ॥२४॥

स्कन्द उवाच ।

निशम्य वचनं तस्य वैशालाधिपतिर्मुने ।
प्रेषयामास राज्ये स्वं मन्त्रिणं शासनोत्सुकम् ॥२५॥
प्रणिपत्य मुनिं भक्त्या धर्मेश्वरं समर्चितुं ।
समादाय मनुं तस्मात्कार्तिकीपूर्णिमायुते ॥२६॥
पूर्णचन्द्रं समारभ्य कार्तिकस्य नृपो मुने ।
उपास्त शिवं भक्त्या दिव्यैः पञ्चोपचारकैः ॥२७॥
स्तुतिभिर्गीतवा... स निराहारः सुपर्वणि ।
षण्मासं नगतं यावदुपासते शिवं मुने ॥२८॥
धर्मेश्वराय रुद्राय शिवाय शिपिविष्टये ।
परातीताय देवाय परेशाय नमो नमः ॥२९॥
स्तुतिभक्त्यार्चनैस्तुष्टो लिङ्गादाविर्भवः शिवः ।
वरदानाय राज्ञे च व्याजहार वचः स्मितः ॥३०॥

धर्मेश्वर उवाच ।

प्राप्स्यसे निश्चयं राजन् पुरीं स्वर्णमयीमिमाम् ।
यदा यदि प्रजाभ्यस्त्वं धर्मं क्रमाच्चिरार्जितम् ॥३१॥
... सर्वं सुखं राज्यं स्थानं स्वान्तेप्सितं तव ।
गुह्येश्वरीं समाराध्य ततः सर्वं लभिष्यसि ॥३२॥

स्कन्द उवाच ।

इत्युक्त्वान्तर्दधे लिङ्गे धर्मेश्वरस्ततो नृपः ।
लब्धवरो मुदा युक्तो राज्यं प्रत्याययौ स्वकम् ॥३३॥
प्रजाः सम्भूय राजसौ पुत्रामात्यांश्च संसदि ।
ताभ्यः स्वकं ददौ धर्मं षडंशं शुभसम्भवम् ॥३४॥
गृहाण वत्स धर्मं त्वं चिरं जीव्याः सुखं चर ।
साधेषु व्रज वत्सार्यां धर्मं प्रधारयानिशम् ॥३५॥
इति दत्वा क्रमाद्धर्मं षड्धा विभज्य भूपतिः ।
धर्मेण पालयामास वैशालाधिपतिस्ततः ॥३६॥
ततो ददर्श खं राजा विमानसंकुलं वहु ।
पुरीं पाशुपतीं दिव्यां स्वर्णमयीं रुचियुताम् ॥३७॥
दिव्येक्षणो नृपोगस्य तपःस्थातुं मनो दधे ।
सूर्यकेतुं समास्थाय राज्ये तस्मायुवाच च ॥३८॥
पुत्र पालय धर्मेण प्रजामात्यान् पुरीमिमाम् ।
व्रजाम्यहं तपस्तप्तुं गुह्येश्वरीं महेश्वरीम् ॥३९॥
इत्युक्त्वा प्रययौ सद्यो वैशालाधिपतिर्मुदा ।
लब्धकामो हि तद्राज्यं देवीं प्रणम्य शाङ्करीम् ॥४०॥
गुह्येश्वर्याख्यके तीर्थे स्नात्वा च विधिवन्नृपः ।
गणेशं क्षेत्रपालं वै द्वारस्थां ननाम योगिनीम् ॥४१॥
आदायाज्ञां नृपस्तेषां देव्यालयं विवेश वै ।
इषे सितप्रतिपदि प्रणम्य दण्डवन्मुहुः ॥४२॥
आनर्च कालिकां भक्त्या देहद्रवचनैर्नृपः ।
राज्यकामो मुहुर्नम्य जप्यैः स्तवैरहर्निशम् ॥४३॥
नन्दादि च दशम्यन्तमानर्च विधिवत्पराम् ।
स्वदेहक्षतजैर्देवीं नवम्यां तर्पितो नृपः ॥४४॥

राजोवाच ।

कालेश्वर्यै नमो देव्यै भिन्नाञ्जनचयत्विषे ।
नमस्ते कालिके भद्रे गुह्येश्वर्यै नमो नमः ॥४५॥
दशास्यपञ्चसुन्दर्यै भद्रकाल्यै नमो नमः ।
अष्टोत्तरशताष्टाधैः करैर्विभूषिते नमः ॥४६॥
त्रिंशल्लोचनदीप्तास्ये विद्युज्जिह्वे नमोस्तु ते ।
सर्वायुधोज्ज्वले देवि मुण्डमालाविभूषिते ॥४७॥
नानाभरणभूषाढ्ये सुकुण्डलोत्तमानने ।
हारमालोत्तमाङ्गिन्यै व्याघ्रचर्मोज्ज्वले नमः ॥४८॥
नमस्ते भीमदंष्ट्रिन्यै नमोऽसिचर्मधारिणि ।
श्मशाननिलये मातर्विविधास्थैर्विभूषिते ॥४९॥
क्षतजैरुक्षितास्यायै पानासृक्क्लिन्नजिह्वके ।
शवैर्विभूषितायै च शवस्थायै नमो नमः ॥५०॥
ब्रह्ममूर्तेः परैः पुष्पैर्ब्रह्मादिभिः प्रपूजिते ।
ब्रह्मानन्दपदं मोक्षं भक्तेभ्यो ददते नमः ॥५१॥

ब्राह्मी माहेश्वरीन्द्राणी कौमारी वैष्णवी परा ।
चामुण्डा शिवदूती च वाराही ताभिराश्रिते ॥५२॥
रुद्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका ।
चच्डा चण्डवती चण्डी चण्डिका ताभिराश्रिते ॥५३॥
ब्रह्मविष्णुशिवेन्द्राद्यैर्नित्यं प्रसेविते परे ।
भक्तेप्सितप्रदे देवि गुप्तकारि नमोस्तु ते ॥५४॥

स्कन्द उवाच ।

इत्याकर्ण्य स्तवं देवी वैशालेशमुखाच्च्युतम् ।
महानिशि दशम्यां सा साक्षादाविर्बभूव हि ॥५५॥
भक्त्यर्चनैः स्तवैस्तस्य प्रसन्नवदना शिवा ।
व्याचष्ट वचनं राज्ञे वरं दातुं गणैर्वृता ॥५६॥

आर्योवाच ।

अवश्यं प्राप्स्यसे राजन् पुरीं स्वर्णमयीमिमाम् ।
यदि प्रधार्यते धर्मं स्वान्तेप्सितं च सन्ततम् ॥५७॥
सहस्राब्दं सुखं राज्यं करिष्यसि निरन्तरम् ।
धर्मं दत्वा प्रजाभ्यस्तल्लप्स्यसि परमं ततः ॥५८॥
गृहाणेममसिं वत्स सर्वलोकनिवर्हणम् ।
एवं धारणमालोक्य द्रविष्यन्ति सुरासुराः ॥५९॥

स्कन्द उवाच ।

इत्युक्त्वान्तर्दधे देवी तद्गह्वरे प्रभासयन् ।
दर्शयन्योगिनीवृन्दं अस्ताचलाद्यथा रविः ॥६०॥
खड्गं समाददे देव्याः प्रणम्य नृपतिर्मुदा ।
परिक्रमंस्तदा भक्त्या देवीं स्तुवन्मुहुर्मुहुः ॥६१॥
लब्धवरः प्रजानाथो देव्यालयाद्विनिर्ययौ ।
खड्गपाणिश्च वीरोसौ विशालनगरं ययौ ॥६२॥
आहूय सर्वशो लोकान् प्रजामात्यान् स तान्नृपः ।
संमन्त्र्य तैः समं तत्र युद्धाय नद्यतामिति ॥६३॥
विनिर्ययौ पुराद्राजा भटैः सैन्यैः समावृतः ।
रुन्धयामास तद् राष्ट्रं समावृत्य चतुर्दिशम् ॥६४॥
नादं चक्रुश्च तत्सेना ढक्कापटहडिण्डिमैः ।
भेरीगोमुखकाहालैर्जलजैः कांस्यजैस्तथा ॥६५॥
निशम्य तद्रवं भीष्मं दिक्पाला निर्ययुः पुरात् ।
नानाशस्त्रास्त्रमुद्यम्य स्वं स्वं वाहनगामिनः ॥६६॥
पुरन्दरो युयोधाशु समं हि यज्ञकेतुना ।
सन्त्रास्य सकलांल्लोकान् शस्त्रास्त्रक्षेपणैर्मुहुः ॥६७॥
युयोधाशु कृपीटश्च साकं हि चन्द्रकेतुना ।
त्रासयन्सर्वशो युद्धे अस्त्रशस्त्रप्रहारणैः ॥६८॥
कृतान्तो हि युयोधाशु सार्द्धं हि विश्वकेतुना ।
प्रहारैश्च मिथः शस्त्रैर्भीषयंस्त्रिदशान् नरान् ॥६९॥
युयोध राक्षसस्तीव्रं समं हि सत्यकेतुना ।
लोकानां जनयंस्त्रासं शस्त्रास्त्रक्षेपणैर्मिथः ॥७०॥
अपाम्पतिर्युयोधाशु सह वै युद्धकेतुना ।
अद्भुतक्षेपणैरस्त्रैर्योद्धा(धा)नां हर्षसंजयन् ॥७१॥
प्रभञ्जनो युयोधाशु जगतांकेतुना समम् ।
वेगप्रहारशस्त्रास्त्रैर्योधान्प्रहर्षयन् मुहुः ॥७२॥
धनाध्यक्षो युयोधाशु सह वै रुक्मकेतुना ।
प्राहारयत्प्रहारैश्च देवान्मर्त्यान् प्रमोदयन् ॥७३॥
युयोधाशु समीशानः साकं च धर्मकेतुना ।
ताडयन् क्षेपयन् शस्त्रैः सर्वलोकान् विभीषयन् ॥७४॥
नृपात्मजाश्च तैः साकमस्त्रशस्त्रैः प्रहारयन् ।
सत्यधर्मं पुरस्कृत्य युयुधुश्च भृशं युधि ॥७५॥
एवं ते युयुधुर्देवा नृपात्मजैः समं मुने ! ।
परिखाभ्यन्तरेऽतिष्ठन्परिश्रमात् प्रशङ्किताः ॥७६॥
प्रविश्य तद्वनं वीरा युयुधुस्तेऽमरैः समम् ।
तानभिद्रुत्य तद्वृन्दैर्मृगयूथान् वृका इव ॥७७॥
पलायितान्सुरान्प्रेक्ष्य लम्बोदरो रुषान्वितः ।
उद्यम्य परशुं सद्य एकाकी निर्ययौ पुरात् ॥७८॥
नृपात्मजानभिद्रुत्य जघान तद्बलं गणः ।
सैन्यं प्रहारयन्तं तं प्रेक्ष्याभिदुद्रुवुर्नृपाः ॥७९॥
तथैव क्षेत्रपालोऽसौ नन्दी भृङ्गी तथापराः ।
खड्गं त्रिशूलमुद्यम्य रुषा विनिर्ययुः पुरात् ॥८०॥
नृपात्मजांश्च तत्सैन्यमभिद्रुत्य भृशं द्रुतम् ।
प्रजघ्नुर्मानुषान्देवाः शूलगदासिभिर्मुहुः ॥८१॥
प्रेक्ष्य सैन्यं स्वकं राजा क्षतजोक्षितविग्रहम् ।
दुःखदग्धो ययौ सद्यो धर्मेश्वरमपूपुजत् ॥८२॥
अभ्यर्च्य विधिवल्लिङ्गं वरं प्रार्थ्य ययौ नृपः ।
पञ्चोपचारकैर्दिव्यैर्गुह्येश्वरीमपूपुजत् ॥८३॥
सुधामानीय भूपालो गुह्येश्वर्यास्रवोद्भवं ।
सिषिञ्च तत्स्वकं सैन्यमस्पृशञ्जलपाणिना ॥८४॥
तैः परिवारयन् राजा असिपाणिर्युयोध च ।
सुतुमुलं समं देवैः सस्त्रास्त्राणि क्षिपन्मुहुः ॥८५॥
तमभिद्रुत्य नन्दी च शूलमुद्यम्य वेगवान् ।
जघानोरसि राजानं पाशुपतेन कोपतः ॥८६॥
भृङ्गी तमभिदुद्राव खट्वाङ्गेन भृशं रुषा ।
जघान नृपतिं युद्धे पार्श्वदेशे चखान च ॥८७॥
अमर्षी क्षेत्रपालस्तमभिद्रुत्यासिहस्तकः ।
असिना तं जघानाशु वामपार्श्वे भृशं रुषा ॥८८॥
लम्बोदरो रुषा युक्तः परशुना जघान तम् ।
वीरशिरःसमुद्दिश्य आलोकयंश्च सर्वशः ॥८९॥
हाहाकारो ह्यभूच्छ्वाऽदरः सर्वसत्वगुणाच्च्युतः ।

सुरैः प्रपात्यमाने च खं भूद्रुमगतेक्षिणां(?) ॥९०॥
खड्गेनैव स्वमात्मानमरक्षयत्तदा नृपः ।
दैवैः प्रहारितं चास्त्रं न्यवारयत्सुहेलया ॥९१॥
तादृशं ताड्यमानन्तं व्यर्थयन्तं गतज्वरम् ।
किञ्चिदपि च निष्कम्पमालोक्याशु रुरोष सः ॥९२॥
शुण्डेनाशु तमादाय अक्षिपदग्र्यो गणः ।
दशयोजनदूरे खे उत्पपात नृपो मुने ॥९३॥
हाहाकारो ह्यभूद्भूयस्तस्मिन् सैन्यमुखोद्भवः ।
क्रन्दमानाश्च राजानः अभूवन्मलिनाननाः ॥९४॥
विमानगाश्च योगिन्य उत्पतन्तं विहायसि ।
प्रेक्ष्य ध्रुवं विमाने तं तत्रास्थाय समाययुः ॥९५॥
चत्वारो(तस्रो) विद्यमाने ताः साधु साधु तमर्हयन् ।
व्योम्नो विमानगा ऊचुर्देवेभ्यस्त्वरया रुषा ॥९६॥

योगिन्य ऊचुः ।

पुत्रा एनं कथं हन्तुमुद्यताथा(ःस्थाऽ) विवेकतः ।
हन्तुं न शक्यते देव्या भक्तो वत्साः! कदापि च ।९७
असौ दत्ता समद्यैव देव्या चैषा पुरी मुदा ।
तया दत्तमसिं दिव्यं सर्वशत्रुनिवर्हणम् ॥९८॥
अस्य करोद्यतं तीक्ष्णं दैत्यान्तकं प्रपश्यथ (युग्मम्) ।
एवं धारणमात्रेण तस्य करे जयः स्थिरः ॥९९॥
यन्नाम्नि च क्षिपेत्खड्गं स मरिष्यति तत्क्षणात् ।
करिष्यति नृपो राज्यमपि दिव्यं समद्यतः ॥१००॥
सहस्राब्दं सुरा यावद्देव्याः प्रसादतः सुताः! ।
तावत्सुखं नृपो ह्यस्यां भोक्ष्यत्यनुपमं मुदा ॥१०१॥
सन्त्यज्य नगरीमेनां यान्तु पुत्रा यथासुखम् ।
अवमानञ्च नायाति नस्तात्रद्व्रजथ ध्रुवम् ॥१०२॥

स्कन्द उवाच

प्रोक्त्वैवं वचनं तेभ्यो योगिन्यस्तं पुरो भुवि ।
दधुः "पुत्र ! पुरीं गच्छ राज्यं यथा सुखं कुरु" ॥१०३॥
वचः श्रुत्वेति योगिन्याश्चत्वारस्त्रिदशास्तदा ।
सन्त्यज्यायोधनं सद्यः, अगमन्पशुपान्तिकम् ॥१०४॥
सम्भूय त्रिदशास्तस्मै निवेदितुं समुद्यताः ।
तावत्पुरीं विवेशाशु सैन्यैः सह नृपोऽसिधृक् ॥१०५॥
नृपेशं प्रेक्ष्य दिक्पालाः खड्गपाणिं प्रदुद्रुवुः ।
अथोचञ्छूलिने सर्वं प्रणम्य दण्डवन्मुहुः ॥१०६॥
रक्ष रक्ष विभो नोऽद्य शत्रुभ्यः संकटागतान् ।
त्वां विना त्राणकः कः शं यास्यामस्तव किङ्कराः ।१०७
निशम्य तद्वचो रुद्रः कार्यकारणहेतुकः ।
व्याजहार वचस्तेभ्य ईशानो गूढविग्रहः ॥१०८॥
अवश्यं प्राप्यते वत्स ! तपस्विना फलेप्सितम् ।
सहस्राब्दं सुखं यावदत्र राज्यं हि भोक्ष्यते ॥१०९॥
सहस्राब्दं ततो यावन्नागीतं या (जा) यते खलु ।
तावन्मदाश्रमां काशीं गत्वाशु तिष्ठत ध्रुवम् ॥११०॥
ततो यूयं समत्रैव तस्मात्समागमिष्यथ ।
मदात्मना समं तत्तु काशीराजस्य हेतुतः ॥१११॥

स्कन्द उवाच ।

तदनुशिष्टमादाय परिक्रम्य तमर्हयन् ।
विनिर्ययु पुरा देवा यानस्थाः परिवारयन् ॥११२॥
व्योम्नः पुरीं समालोक्य स्थगितगतयोऽमराः ।
अरोत्सुस्ते भृशं चेति हा पुरि हा तपोवनि ! ॥११३॥
ययुर्वाराणसीं व्योम्नस्तत्रैवासन् सुखं मुने ! ।
अवात्सुस्त्रिदशाः काश्यां विश्वेश्वरं समर्हयन् ॥११४॥
वैशालाधिपतिः सम्यक् स्वर्णमयीं गृहोत्तमाम् ।
ददर्श नगरीं दिव्यां साट्टप्राकारतोरणाम् ॥११५॥
विविधमणिभी रत्नैर्गवाक्षैः खचितोत्तमैः ।
राजमानानि गेहानि ददर्श भूपतिर्मुदा ॥११६॥
चन्द्रशालासु हर्म्याणि प्रासादं धवलाश्रयम् ।
सोऽपश्यत्स्वर्णगेहानि मङ्गलाष्टकतोरम् ॥११७॥
प्रणालीः स्वच्छधाराश्च वापीः पद्मोत्पलाकुलाः ।
धातुचित्रप्रतोल्यश्च सोऽपश्यच्चित्रिताङ्गनं ॥११८॥
उद्यानानि विचित्राण्युपवनानि ददर्श सः ।
सुगन्धिकुसुमोत्फुल्लैर्बहुरङ्गैर्युतानि च ॥११९॥
नानाद्रुमलताभिश्च फलोत्पन्नैर्विराजिताम् ।
ददर्श वाटिकां दिव्यां पुष्पफलोद्भवैः सदा ॥१२०॥
अपश्यत्पारिजातं स तन्मध्ये राजितं सदा ।
पुन्नागयूथिकाजातिमन्दारकनकोत्तमैः ॥१२१॥
क्रमुकैर्लाङ्गलीतालैर्द्राक्षाखर्जूरजातिजैः ।
लवङ्गैः पनसैराम्रैर्बिल्वजंबीरजैर्वभौ ॥१२२॥
ताम्बूलैः सततोत्पन्नैर्दाडिमीबीजपूरकैः ।
कदलीसर्वदोत्पन्नैरपश्यद्राजितां च ताम् ॥१२३॥
मयूरकोकिलानांच जीवंजीवसुपत्रिणाम् ।
भृङ्गीणां निनदं तासु सुश्राव कर्णतर्पणं ।
संप्रेक्ष्य नगरीं दिव्यां हर्षपूरितमानसः ॥१२४॥
ददर्श शूलिना राजा प्रासादं तेजसां परं ।
दण्डवत्पातयद्देहं भूमौ दूराद्ययौ नृपः ॥१२५॥
प्रणम्य त्रिविधै रुद्रं भक्त्यास्तुवन् पदे पदे ।
ॐनमः शिवाय रुद्राय पशूनां पतये नमः ॥१२६॥
पंचास्यं शंकरं देवं भजेहं परमेश्वरं ।
स्तुत्वेशं भूमिपोऽगत्स्य लिंगान्तिकं समाव्रजत् ।१२७
अद्राक्षीज्ज्योनिषां लिंगं लोमाञ्चवाष्पलोचनः ।

सोऽनमत्खलु पंचास्यं शिखासिव विराजितं॥१२८॥
मालाकलशमुद्राभिरञ्चितैरष्टहस्तकैः ।
आनर्च्च विधिवल्लिङ्गं भक्त्या नृपः समर्हणैः।१२९।
वाग्मतीजीवनैः पुष्पैः परिक्रमन् प्रणम्य च ।
अलिखच्चित्रगुप्तो वै यावद्रोमाणि भूपतेः ॥१३०॥
रोम्णः कल्पं परंस्थानं दण्डवत्स्तुतिदर्शनात् ।
पदे पदे फलं यावद्वाजपेयाश्वमेधयोः ॥१३१॥
पशुपतेर्हि नामानि पाठकस्यालिखद्यमः ।
ददौ गेहानि सैन्येभ्यः स्वर्णालयं यथोचितं ॥१३२॥
दीग्पतीनां च हर्म्याणि आत्मजेभ्यो ददौ नृपः ।
आदिदेश प्रजाभ्यः स आत्मजेभ्यो हि मन्त्रिणे।१३३।
भुंद्ध्वतात्र सुखं वत्सा मन्त्रिन्पुत्राः स्वधर्मधर्म्मतः ।
देवान् विप्रान् सदा वत्स गाश्च प्रपूजयानिशं ।१३४।
सत्यसंधा ऋतं वाचः सत्यस्था भवतोनिशं ।
दिग्गीशानां वरस्थानं तिष्ठन् पालयत त्विमं ॥१३५॥
पुरस्यैतस्य दिग्पाला वत्सा भवत चाद्यतः ।
धर्म्मेण रक्ष मन्त्रिन् ताः प्रजा भरणपोषणैः ॥१३६॥
ज्येष्ठे च पितरं मान्यं स्वामि प्रसेवय प्रजा ।
धर्म्मं पालय सत्यं च चतुर्वर्गाल्लभेद्यतः ॥१३७॥
अधर्म्मवितथान्मर्त्यः स्वल्पायुर्न्नारकी भवेत् ।
स्नात्वार्घ्यं वाग्मतीतोयो पुज्यतां पशुपेश्वरः ॥१३८॥
त्रिविधैश्च स्तुवन् भक्त्या नाम गृणन् परिक्रमन् ।

स्कन्द उवाच ।

इत्यादिश्य नृपस्तेभ्यः सुखं राज्यं चकार वै ॥१३९॥
वाग्मतीसलिले स्नात्वा अभ्यर्च्चर्य पशुपेश्वरं ।
यावत्सन्ति पुरे मर्त्याः सत्यासंधा ऋतं वचः ॥१४०॥
सत्यैः प्रधार्य्यते धर्म्मं धर्म्मैश्चैवस्थिरायुषः ।
भूत्वा दिग्पालकास्तस्यांमुदावात्सुस्तदात्मजाः ।१४१।
धर्म्मैश्च मन्दिराद्वर्षं पालयन्तिस्म कृत्यतां ।
तस्मात्सत्यवती ख्याता पुरी निर्वाणदायिनी ॥१४२॥
तेपिरे त्रिदशास्तस्यां तस्मात्तपोवनी श्रुता ।
न विद्यते त्रिलोकेषु सत्यवतीसमा पुरी ॥१४३॥
न चर्म्मचक्षुर्भिर्गम्या स्वर्णमयी सुमुक्तिदा ।
सत्येन धर्म्मे प्रचलन्ति मर्त्याः
संत्यज्य मिथ्या दुरितं क्रमात्तो॥१४४॥

पश्यन्ति लिंगं पशुपेश्वरस्य गन्तार एवाशु परं पदं वै ।
शृण्वन्ति येऽध्यायमपारपुण्यं
अश्वाध्वरोद्भूतफलं समाप्य ॥१४५॥
गच्छंति लोकं परमं हि शंभोर्निर्द्धूतपंकाजनु संचिताढ्याः।

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपाल-
माहात्म्ये वैशालाधिपसत्यवती
प्रवेशन्नाम षट्षष्ट्युत्तरशतत
मोऽध्यायः ॥१६६॥

—❀❀❀—

स्कन्द उवाच ।

ततः सहस्रवर्षान्ते तस्मिन् राज्ये कृते नृपे ।
अभूत्कोलाहलं काश्यां तपःस्थकाशिराजतः ॥१॥
त्यक्त्वा काशीं गिरौ कश्चिदवसन्नीश्वरोदयः ।
तप्तुमारब्धवन्तस्ते तत्रायय़ुस्ततोऽमराः ॥२॥
ददृशुर्न्नगरीं देवाः सिद्धस्थलीं समागताः ।
समूहस्तेजसां पुंजादितिचिन्ताकुलास्तदा ॥३॥
हा सत्यवति पुर्य्यार्य्ये हा पशुपेश्वर प्रभो ।
त्वां विना देवशब्दो नो रूढौ व्यर्थो भवेदिह ॥४॥
अधिकृत्य विभो स्वर्गं सुराज्यं भवता कृतं ।
स्वयं विराजते यस्यां ज्योतिरूपं हि मुक्तिदं ॥५॥
ततः प्रवेशनं चात्र जीवनं नहि जीवनं ।
अकुशला वयं त्वां चेद्द्रष्टुं कैवल्यनायकम् ॥६॥
सिद्धस्थलीं समास्थाय कर्त्तव्यं किल चिन्तयन् ।
संप्रेक्ष्य नगरीं देवा द्वारि नृपैर्न्निषेधिताः ॥७॥
रुद्रेण रहिता देवा अकुशलाः प्रवेशितुं ।
महच्चिन्ताकुलास्तत्र अभूवन् घटसंभव ॥८॥
विश्वेश्वरोविशद्द्वारं देव्या सममनिर्गलः ।
पशुपतिं प्रणम्याशु तद्वार्त्तामनिवेदयन् ॥९॥
स्वीकारं कृतवान्तस्मै पशुपतिः स्वयं तदा ।
आत्मानमात्मनागस्त्य काशीश्वरं समाद्रयन् ॥१०॥
आयातु चात्र काशीशं यथासुखं यदृच्छया ।
स्वागतं विश्वनाथेश तद्बीजं प्रविनश्यति ॥११॥

स्कन्द उवाच ।

स्वीकारंकृत्य लिंगं स संस्थाप्याचर्य यथाविधि ।
अविशज्ज्योतिषां लिंगं दीपे दीपशिखा यथा ॥१२॥
अवोचद्द्यौपतिस्तत्र ग्रहेभ्यः शान्त्वयन्मुहुः ।
तेषां धर्म्मच्युतायाशु रुगार्त्तत्यक्तधर्म्मतः ॥१३॥

इन्द्र उवाच ।

शुभाशुभकरा यूयं विपश्य नगरीं ग्रहाः ।
पीडयध्वं च तत्रस्थान् भौम शने तमो रवे ॥१४॥
धर्म्मच्युता भविष्यन्ति भवद्भिः पीडिताः प्रजाः ।
ततः समागमिष्यामः तस्यां युष्मत्कृते खलु ॥१५॥

स्कन्द उवाच ।

ततो ययुर्ग्रहाः पंच पुरस्य गोपुरान्तिके ।
द्वारस्थेनाशु धर्म्मेण साक्षात्तदा निषेधिताः ॥१६॥

धर्मोवाच ।

मात्र विशत यूयं भो सत्याख्ये पट्टने ग्रहाः ।
षड्वर्गा वृजिनं चात्र मनागपि न विद्यते ॥१७॥
भविष्यत्यत्र वा यत्नो लोकपीडनविग्रहः ।
यः सत्यवान्दयेशात्मा तं वै रक्षे त्वहर्निशम् ॥१८॥
सत्यवत्यां समेतस्यां प्रवेशनं च वो नहि ।
दुःखादिवर्जितायां वै यथागताः प्रगच्छत ॥१९॥
कृत्वा तथ्यं ग्रहास्तत्र धर्मस्य वचनं तदा ।
प्रत्याययुः पुरद्वाराद्यत्र दिक्पतयो वृषा ॥२०॥
ऊचुः ग्रहाश्च शक्राय तद्वृत्तान्तं च संसदि ।
धर्मस्य चरितं सर्वं तत्प्रजापीडनाक्षमाः ॥२१॥
अकुशला वयं शक्र भवामो हि प्रवेशितुं ।
अपि द्वारे कुतः पुर्य्यां धर्मो यत्र प्ररक्षकः ॥२२॥
सर्वे पुरौकसः शक्र धर्मनिष्ठा ऋतंवचः ।
यज्ञशीला नृपा नित्यं दानशीलाः शिवार्चकाः ॥२३॥
इत्याकर्ण्य वचो वज्री ग्रहाणां घटसंभव ।
चुकोप सहसा तेभ्य आलसिनो यतो हि धिक् ॥२४॥
विप्ररूपं समास्थाय विवेश द्वारतः पुरम् ।
अबाधगतयो विप्राः पुरुहूतो मधुश्रवा ॥२५॥
प्रणम्य दण्डवद्देवं कृत्वा लिंगं हि कैतवः ।
आशिषं प्रददौ राज्ञे यस्मै यत्र गतः पुरे ॥२६॥
अतथ्यमभवन्नैव यस्मै दत्तोपि कैतवात् ।
यदाशीः पुरुहूतेन अमोघश्चाभवन्मुने ॥२७॥
रत्नमालाः समादाय भ्रमतिस्म गृहं प्रति ।
दर्शयन्नवला हारं अलोभयन् स्त्रियो मुहुः ॥२८॥
प्रिये सुवदने देवि हारं गृहाण मौक्तिकम् ।
रत्नमयं च ते योग्यं विद्धि मां वणिजं वपु ॥२९॥
एतन्मौल्यं रतिं कान्ते देहि मे सुरतार्थिने ।
गृहान्तरं वचः श्रुत्वा ससर्प्पुः पतिदेवताः ॥३०॥
निःसारय सखे त्वस्माद्वणिजं खिन्नरूपिणं ।
अस्याननं न न प्रेद्यं कुलस्त्री दुर्वचो यतः ॥३१॥
एवं छन्दयितुं रामाः शक्रोभ्रमद्गृहं प्रति ।
कया नालोकितं वक्त्रमपि तस्य कुलस्त्रिया ॥३२॥
कुलस्त्रीधर्मभग्नोद्यमाशक्रह्रास्यधूसरः ।
शक्रः प्रत्याययौ तस्मात्तत्र भग्नमनोरथः ॥३३॥
दिक्पालैः सह संमन्त्र्य उवाच भृंगिणे वृषा ।
प्रणम्य शिरसा भक्त्या करपुटं विधाय च ॥३४॥

इन्द्र उवाच ।

नमस्ते भृंगिणे तुभ्यमष्टमूर्त्यैकमूर्त्तिने ।
गणाय क्षेत्रपालाय नन्दिने च नमो नमः ॥३५॥
यूयं नः कुरुत कार्यं प्रविश्य नगरीं ध्रुवं ।
तान् विध्वंस्यासरस्थाने स्थापयध्वं सुरान् यथा ।३६।
भवन्तः सततं शक्ता इत्यवोचत्पुरन्दरः ।
भृंगी गच्छति ते प्रोचुः स्वकं रूपं विधाय च ॥३७॥
ततो भृंगी प्रतिश्रुत्य समास्थाय स्वविग्रहम् ।
परिभ्रम्य पुरीं दिव्यामविशन्निनदन्मुहुः ॥३८॥
संपश्य नगरीं शैव्यां वृत्तान्तं तादृशं मुने ।
परिभ्रम्य च तां भृङ्गी प्रत्यागत्याब्रवीत्तदा ॥३९॥

भृङ्ग्युवाच ।

सत्यवत्या नगर्य्याश्च वृत्तान्तं शृणुताद्भुतम् ।
नन्दिलम्बोदरक्षेत्रपालशक्रदिगीश्वराः ॥४०॥
पुरी धर्ममयी देवास्तस्या हि यावतीप्रजाः ।
सत्यवाचोऽर्हणातिथ्याः धर्मशीलाः शिवार्चकाः ।४१।
राजासौ पालकोऽजस्रं प्रजाः सुधर्मनीतिभिः ।
विभुं पशुपतिं भक्त्या उपचारैः समर्हति ॥४२॥
यज्ञशीला द्विजा सौम्याः वेदाध्ययनतत्पराः ।
सर्वशास्त्रविदोऽजस्रमस्याभासन्सुरोत्तमाः ॥४३॥
संपश्य नगरीं सर्वामितस्ततः परिभ्रमन् ।
गतोहं नृपतेर्द्वारं साष्टमंगलशोभनम् ॥४४॥
भ्रमन्तं द्वारदेशे वै निर्ह्लादयन् मुहुर्मुहुः ।
अदर्शत्तत्र मां राजा हर्षपूरितमानसः ॥४५॥
धर्मशीलः सभास्थो हि अमात्येभ्य उवाच ह ।
बुद्धिक्षेम प्रपश्याशु भ्रमन्तं भ्रमरं मुहुः ॥४६॥
सुरवं सुन्दरं द्वारि अतिश्यामलविग्रहम् ।
क्षुधानलकृशाङ्गोऽसौ मद्द्वारि चागतोऽथवा ॥४७॥
मधुं मा याचितुं चास्मै दद्यात्सरसपुष्पकं ।
निशम्य वचनं राज्ञः सुमन्त्री कुसुमं(कुड्मलं)तदा ४८
ललनाढ्यमधूत्फुल्लं वाटिकायाश्च मे ददौ ।
गृहाण मधुलिट्पुष्पं मकरन्दं पिब ध्रुवम् ॥४९॥
आवेशिकोसि चातिथ्यैरर्हणीयोऽब्रवीदिति ।
धर्मेण पालयच्चैवं राजासौ नगरीं मुदा ॥५०॥
धर्मैश्च वर्तयामासुस्तत्प्रजा मन्त्रिणः सुताः ।
कथं जेयो रसापोऽसौ अस्माभिर्वद विघ्नकृत् ॥५१॥
न दृष्टं किल्विषं तेषां मनागपि परात्मनाम् ॥५२॥

स्कन्द उवाच ।

श्रुत्वा तद्वचनं देवाः प्रचक्रुर्मन्त्रणं मुने ।
आहूय नारदं सद्य इत्यवोचत्समाद्द्रियन् ॥५३॥

देवा ऊचुः ।

नारद धीमतां श्रेष्ठ नः कार्यं कुरु साम्प्रतं ।
स्थास्यामो येन तस्यां वै सत्यवत्यां सुनिश्चितम् ॥५४॥
गत्वा तत्रेति वक्तव्यं राज्ञे तद्भवता मुने ।
गिरा मधुरयन् वाचं सामदानैश्च नीतिभिः ॥५५॥

स्कन्द उवाच ।

मनस्याधाय तत्प्रोक्तं त्रिदशैर्नारदो मुने ।
प्रययौ देवराज्यं वै गीतवाद्यमहोल्लसः ॥५६॥
प्रणम्य दण्डवद्भक्त्या पशुपेशं प्रगीतयन् ।
अविशन्नारदो राज्ञः आस्थानं च मुदान्वितः ॥५७॥
प्रपश्य नारदं राजा उदतिष्ठद्धि तैः समं ।
प्रणतास्यो मुनिं भक्त्या आसने उपवेशयेत् ॥५८॥
अभ्यर्च्य भूपतिर्दान्तमर्घ्याद्यैरुपहारकैः ।
अपृच्छत्कुशलं नम्रो लोकवार्ताप्रदेशकम् ॥५९॥

धर्मदत्त उवाच ।

स्वागतं भो मुनिश्रेष्ठ सर्ववृत्तान्तपारग ।
प्रकथय प्रवृत्तिं मे लोकानाममृतान्धसाम् ॥६०॥

नारद उवाच ।

शृणु राजन् ! प्रवक्ष्यामि यतोहमागतस्त्विह ।
तद्बीजं सर्वशस्तुभ्यं ब्रह्मादिभिर्हमीरितः ॥६१॥
ब्रह्मा विष्णुश्च शक्रश्च नन्दी भृङ्गी विनायकः ।
क्षेत्रपालो हि दिक्पाला सन्तिः सिद्धाचले नृप ॥६२॥
काशीराट्कारणाद्देवास्त्यक्त्वाकाशीमिहाययुः ।
तैः प्रोक्तं खलु राजेन्द्र अवधारय वच्मि ते ॥६३॥

देवा ऊचुः ।

श्लाघ्योऽसि सत्यसंधार्य्य नहि राज्यं करोषि वै ।
विद्राव्य नः प्रभुत्वेन उचितमिति ते नृप ॥६४॥
इदानीमपि न स्थानं संत्याज्य स्वपुरीं नृप ।
विशालनगरीं सार्द्धं परिवारैः प्रगच्छतु ॥६५॥
ततस्तत्र तपिष्यामो [illegible]र्वं सुखं नृप ।
त्वमपि च सुखं राज्ये करिष्यसि यथा पुरा ॥६६॥

स्कन्द उवाच ।

आकर्ण्य त्वरितं राजा देवानामीरितं वचः ।
नारदात्संभ्रमो मोह्य प्रत्यूवाच मुनिं पुनः ॥६७॥

धर्मदत्त उवाच ।

प्रथमोन्नमस्कार्यो पशूनां पतयेनिशं ।
त्रिदशेभ्यो मुने तुभ्यं वक्ष्याम्यहं वचस्ततः ॥६८॥
कथमेवेरितं देवैर्वचनं मे तथेदृशं ।
भवन्ति ते समर्हणाः पशुपतेश्च मूर्त्तिनः ॥६९॥
देव्यादत्तामिदं राज्यं मे पशुपप्रसादतः ।
करोम्यहं सुखं चात्र यावत्तयोरनुग्रहम् ॥७०॥
इहागत्य सुखं देवा तिष्ठन्तु नारदानिशम् ।
अर्हिष्याम्यर्चनैस्तान्वै श्रीमत्पशुपतेः समम् ॥७१॥
साङ्गदेवार्चनं पुण्यं प्रोक्तं तपः परात्परं ।
एतद्भाग्यात्परंभाग्यमन्यत्किमस्ति नारद ॥७२॥
अन्यद्राज्ये न काङ्क्षेहं त्यक्त्वैतन्नगरं मुने ।
अधिकृत्य कृतं स्वर्गं स्वर्णमयञ्च शूलिना ॥७३॥
यावदनुग्रहं देव्याः पशुपतेस्समस्ति मे ।
तावदेनां करिष्यामि भुञ्जन् परं सुखं मुने ॥७४॥
नाहं भीपयितुं शक्या अपि देवा नराः किमु ।
यावत्तयोः प्रसादं मे न त्यजामि पुरीमिमाम् ॥७५॥

नारद उवाच ।

मामेव भूप वक्तव्यं देवेभ्यो भवता कदा ।
राजञ्छृणु प्रवक्ष्यामि बीजं राज्यविसर्जनम् ॥७६॥
ब्रह्मविष्ण्वीश्वराणाञ्च न भेदोस्ति कदापि च ।
तथा गणगुहक्षेत्रनन्दिभृंगिदिगीशिनाम् ॥७७॥
ब्रह्मा विष्णुस्वयं तत्र सिद्धाचले प्रतिष्ठितः ।
नन्दिगुहगणक्षेत्रभृंगिदिगीश्वरैः समम् ॥७८॥
निवार्यते कथं राज्यं न जेया भवतामराः ।
अवश्यन्ते करिष्यन्ति राज्यं पाशुपतं खलु ॥७९॥
अन्नान्धसःसुधापाना न स्थास्यन्ति समं हि ते ।
तेऽन्नपुष्टाङ्गिनः पक्षे ? निर्जनामृतभक्षकाः ॥८०॥
ब्रह्मा ते काङ्क्षते द्वारं ततस्सुश्च प्रवेशितुम् ।
यो हि तिष्ठति जन्तूनां हृदये नलिनेषु वै ॥८१॥
येन विध्वंसितं पूर्वं दैत्यपापविपक्षकः ।
सोऽपेक्षते तव द्वारं चक्रायुधः समं गणैः ॥८२॥
सो हि लम्बोदरो राजन् आमपैः पूरितः स्थितः ।
येन विध्वंसितं पूर्वं जगद्धि स चराचरम् ॥८३॥
कार्तिकेयो महासेनस्ते द्वारं समवेक्षते ।
येन विदीर्ण्य शैलेन्द्रं तारकोऽसौ निपातितः ॥८४॥
नन्दी भृङ्गी तथाद्वारं काङ्क्षते क्षेत्रनायकः ।
रुद्रद्वेषात्प्रहन्तारः प्रविश्यन्त्यत्र निश्चयं ॥८५॥
कालोऽसौ भैरवो दण्डी प्रविश्यति पुरीमिमाम् ।
विश्वेश्वरस्य पार्श्वस्थौ प्रलयानलसन्निभौ ॥८६॥
इन्द्रादयो महावीर दिग्पतयो रुपान्विताः ।
अत्रावश्यं प्रविश्यन्ति सावधानं शृणु प्रभो ॥८७॥
त्यक्तव्यं निश्चयं राज्यं भवतेदं प्रजापते ।
यत्रार्यं सुस्थिरं स्थानं राज्यं तत्र विचिन्त्यताम् ॥८८॥
देवराज्यं न ते राजन् अर्हति सुचिरं खलु ।
तपोर्जितमपीदन्तं त्यक्त्वा परं व्रजिष्यसि ॥८९॥

स्कन्द उवाच ।

इत्युक्त्वा नारदो राज्ये प्रणम्य पशुपेश्वरम् ।
रुद्रयशांसि गायन्वै ययौ यत्रामृतान्धसः ॥९०॥
विष्णुं प्रणम्य धातारं देवसंसदि कुम्भज ।
तत्सर्वं कथयामास कलहाकारणात्मकः ॥९१॥
निशम्य तद्वचो देवा दुःखातुरास्तदाभवन् ।
हा सत्यवति ते प्रोचुर्निराशा गमनं पुरे ॥९२॥
उवाच सहसा विष्णुः संप्रेक्ष्य तादृशान् सुरान् ।
लम्बोदराय मह्यञ्च प्रवेशयितुमार्द्रयन् ॥९३॥

विष्णुरुवाच ।

लम्बोदर समर्थोऽसि निर्जित्य सकलान् गुह ।
प्रवेशनं पुरद्वारं कंदनं तत्र भविष्यति ॥९४॥
त्वत्कृते च पुरद्वारे युद्धे देवैः समं हि तैः ।
वेलातीतं च तद्धर्मं विघ्नं तत्र भविष्यति ॥९५॥

स्कन्द उवाच ।

आकर्ण्य वचनं विष्णोः साधुसाधु वदन् सुराः ।
संभूय प्रययुः सर्वे यत्र गुह्येश्वरी परा ॥९६॥
आलभ्य वाग्मतीतोये प्रणम्य दण्डवत् पराम् ।
भक्त्यानूचुः प्रजेतुस्ते प्रार्थयन्नगरीञ्च ताम् ॥९७॥
मार्गकृष्णचतुर्दश्यां लब्धवराः परिक्रमन् ।
प्रार्थ्याज्ञां निर्ययुःद्वारात् पुरद्वारं ययुः पुनः ॥९८॥
रुरुधुर्नगरीद्वारं ब्रह्मादयः समन्ततः ।
सिंहनादं प्रचक्रुस्ते शस्त्रास्त्राणि प्रहारयन् ॥९९॥
पुरीं संरुध्य दिक्पालाः समन्ततो यथाक्रमं ।
नानास्त्राणि नगर्याञ्च ववर्षुः क्षेपयन्मुहुः ॥१००॥
उपसि तदमावस्यां संत्यक्त्वायोधनं नृपः ॥१०१॥
पशुपतिं समभ्यर्च्य युयोध त्रिदशैः समम् ॥१०२॥
युयुधुस्ते मिथो देवैः नृपात्मजा भृशं सह ।
अहर्निशञ्च सप्ताहं नावकाशं प्रलेभिरे ॥१०३॥

लोमहर्षण उवाच ।

शृणुत विप्रशार्दूला विक्रमं देवयोर्महत् ।
गणकुमारयोस्तत्र संग्रामे लोमहर्षणे ॥१०४॥
मातृभी रक्षमाणे तान्नृपान्देवैः प्रपीडने ।
त्राहि त्रहीति च प्रोक्तान् भवानी पशुपेश्वरः ॥१०५॥
नन्दी भृङ्गी तथा दण्डी क्षेत्रेशः कालभैरवः ।
संभूय युगपद् द्वारं अविविशन्वरोद्धताः ॥१०६॥
प्रचक्रुः कदनं तत्र देवा रुषान्विता भृशम् ।
अरक्षन्मातरस्तांस्तान् स्वैःस्वैरस्त्रैश्च संचरन् ॥१०७॥
मा मा प्रहारयैतान्भोः पुत्रा मद्रक्षकान्कदा ।
संप्रोक्ते युधि ताभिस्तान् जघ्नुः शरवच्छरैरुषा ॥१०८॥
अविशतां पुरीं द्वारा गणाधिपशिखिध्वजौ ।
उद्यम्य परशुं शक्तिं कालाविव जगत्त्रये ॥१०९॥
प्रोद्धूय तगणो लोकान् शुशुस्वासोद्भवानिलैः ।
मातृभी रक्षमाणाश्च अपसृता इतस्ततः ॥११०॥
आदाय वाग्मतीतोयं व्योम्न्युत्पपात सर्पभुक् ।
शक्त्या जघानतान्शश्वन्नीलकण्ठास्तोम्बरात् ॥१११॥
प्रोड्डीय पक्षवातेन गगनस्थो भुजङ्गभुक् ।
अपातयच्च तान् भूमौ चञ्चुना वर्षयञ्जलम् ॥११२॥
वैश्वानरो ववर्षाजौ अग्न्यासारान् खगाचरन् ।
सर्वशो भुवि पेतुस्ते अनिलानलपीडिताः ॥११३॥
मुनिश्चेष्टा गतांल्लोकान्प्रेक्ष्य नृपो भयातुरः ।
त्राहि शंकर नोऽनाथान् मातर्देवि नमोऽस्तु ते ॥११४॥
तत्क्षणे कालिका देवी लिङ्गाद्विनिःसृता द्रुतम् ।
प्रेतस्थाष्टभुजा दंष्ट्री ललज्जिह्वा प्रकोपिता ॥११५॥
खड्गं चर्म त्रिशूलञ्च डमरुं पाशमङ्कुशम् ।
पानपात्रं च मुद्राञ्च दधाना च सृणिं स्रजम् ॥११६॥
करालवदना भीमा साभिदुद्राव देवताः ।
उन्मीलनज्वलत्कालानलेक्षाग्निकणैर्दहन् ॥११७॥
संप्रेक्ष्य कालिकां देवास्तुस्ताकालानलोपमान् ।
परित्यज्य पुरीं भीष्मात् दुद्रुवुर्दक्षिणे दिशि ॥११८॥
देवीःप्रसिञ्चमानेषु सुधाभिर्जीवितेषु च ।
स्वभक्तिषु च मर्त्येषु ब्रह्मा विष्णुः प्रधर्षितौ । ॥११९॥
ससंभ्रमौ द्रुतं देवौ लिङ्गान्तिकं प्रजग्मतुः ।
ऊचतुः शूलिने सर्वं परिक्रम्य स्तुवन्मुहुः ॥१२०॥

ब्रह्मविष्णुरुवाच ।

पञ्चात्मकाय रुद्राय पञ्चात्मभिः स्वशिल्पिने ।
पञ्चभिः पञ्चवक्त्राय पञ्चानां पतये नमः ॥१२१॥
पञ्चात्मकैश्च भूतानां सृजाय त्वन्तरालगः ।
लयाय पंचभिर्लोकान् प्रपञ्चभूतिने नमः ॥१२२॥
मातर्देवि नमस्तेऽस्तु भीमरूपे भयप्रदे ।
रक्ष रक्षाद्य नो गौरि कोपं क्षुद्रेषु संहर ॥१२३॥
विप्राः शृणुत तद्भूयः स्कन्दोक्तं कुंभजन्मने ।
आकर्ण्य तद्वचोगस्त्य स्वीकारं कृतवान् हरः ॥१२४॥

देवदेव उवाच ।

अद्यैवार्यौ गमिष्यन्ति मद्भक्ताः समतः परम् ।
परिवारैः समं धाम राजानो मन्त्रिणः प्रजाः ॥१२५॥
ममैवं भक्तिनो देव्या न प्राप्स्यन्ति पराभवं ।
योनौ पुनर्न जायन्ते मद्दर्शनात्कदापि च ॥१२६॥
देवीं पूजय विष्णोऽब्ज मातृः समर्हणैर्ध्रुवम् ।
सुनिर्विघ्ने ततो राज्ये स्थापयत विबुधैः समम् ॥१२७॥

स्कन्द उवाच ।

इत्युक्त्वा शंकरस्तेभ्यो विरराम तदा मुने ।
पशुपतिं ततोऽभ्यर्च्य तौ प्रणम्य विनिःसृतौ ॥१२८॥
संभूय त्रिदशाः सर्व अपूपुजन् हि कालिकां ।
मातृकाभिः समं भक्त्या वलिपूजोपहारकैः ॥१२९॥
मातृकासु प्रतुष्टासु यानं ददर्श पुष्पकम् ।
सूर्यायुतनिभं देवा अवतरन्तमम्बरात् ॥१३०॥
ततः संभूय तेगमस्य न न्दिभृङ्गिमुखाः गणाः ।
रुद्रवचोरताः प्रोचुर्नृपान्तिकं समाव्रजन् ॥१३१॥

प्रमथा ऊचुः ।

मा मा दुःखय राजेन्द्र संगराज्ञोपराधतः ।
क्षम्यतां हि न आगांसि ईश्वरवचनं शृणु ॥१३२॥
एतद्राज्यप्रमाणन्ते एतावत्स्थानमत्र च ।
अस्मद्दत्तं हि राजेन्द्र विसर्जनमतः परम् ॥१३३॥
गच्छ राजन् परं धाम मम लोकं सुखात्सुखम् ।
परिवारैः समं सर्वैर्यानेनाशु सविग्रहैः ॥१३४॥
कोटिजन्मार्जितैः पुण्यैः शिवभक्तिं विना नृप ।
प्राप्यते शिवलोकं न तद्धाम लभिता भवान् ॥ ३५॥
धन्योसि कृतकृत्योऽसि शिवाभक्तिन् शिवात्मकः ।
तपोभिर्धाम दुष्प्राप्यं तल्लभिता भवत्परम् ॥१३६॥
स्थीयतां सूपचारेस्मिन् परिवारैः समं ध्रुवं ।
नयामो भवतः शैवं कैवल्यभाजनं परम् ॥१३७॥

धर्मदत्त उवाच ।

किन्तु त्यक्तुमसामर्थ्यं पशुपतिं शिवाञ्च ताम् ।
वाग्मतीजलपीयूषं कथं त्यजेऽवदत्प्रमोदं ॥१३८॥
यज्ञार्चनतपोभिर्यं दानधर्मैर्महत्तरैः ।
दुष्प्राप्यं तद्धि लप्स्याम एतद्भाग्यात्परं किमु ॥१३९॥
अवश्यं नन्दिन् यास्यामो रुद्रलोकंमहत्परम् ।
ईश्वरवचनाद्भृङ्गिन् संत्यज्येमां पुरीं खलु ॥१४०॥

स्कन्द उवाच

इत्युक्त्वा नृपतिर्लिंगं परिक्रम्यानमन्मुहुः ।
गुह्येश्वरीं समं लोकैस्तस्थौ याने हि सर्वशः ॥१४१॥
ववर्ष कुसुमासारं लाजासारं समम्बरात् ।
नेदुर्दुन्दुभयो व्योम्नि जयशब्दमभूत्पुनः ॥१४२॥
परिचार्य चतुर्वर्गैर्याने चाधाय भूपतिं ।
निन्युः शिवपुरं शैवाः सर्वलोकान्प्रदर्शयन् ॥१४३॥
कश्चित्काले ततो लिङ्गाद्विश्वनाथो विनिःसृतः ।
लब्धवरो नमंल्लिंगं काशीं जगाम तैः समम् ॥१४४॥
ततो ब्रह्मादयस्तस्यां समासन् सेवयन् शिवम् ।
यथापूर्वं सुखं भुञ्जन् मुक्तज्वरा अरेश्चिरम् ॥१४५॥

न मुञ्चन्ति पुरीं दिव्यां त्रिदशा मुनयस्तदा ।
सिद्धाश्च योगिनो मर्त्या मृत्युं जित्वेश्वरार्चनात् १४६
संस्थाप्य लिङ्गानि सुराश्च भक्त्या,
अभ्यर्च्य लिंगं पशुपेश्वरं वै ।
संत्यज्य नाकं खलु तेपिरे ते,
तस्यां सुवर्णालयसौन्दरायाम् ॥१४७॥
अध्यायमेतत्सुधयो हि भक्त्या,
शृण्वन्ति चाधाय शिवं मनोज्ञे ।
माहात्म्यमाद्यं हि सरस्वतीजं,
प्राप्यन्ति मत्वा परमं फलं ते ॥१४८॥

इतिश्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये-
धर्मदत्तशिवलोकगमनं नाम चतुःषष्ट्युत्तर-
शततमोऽध्याय ॥१६४॥

—❀❀❀—

अगस्त्य उवाच ।

कथं पशुपतिः स्कन्द स्वर्णमयी पुरी भवेत् ।
त्रिदशानामधिष्ठात्री चतुर्वर्गप्रदायिनी ॥ १ ॥
सा नगरी च सेनानी तपोवनी कथं भवेत् ।
केनेयं निर्मिता पूर्वं स्वर्णरत्नमयी पुनः ॥२॥
काश्यधिका श्रुता त्वत्तश्चतुर्वर्गप्रदाभवत् ।
एतद्धि श्रोतुमिच्छामि तस्यां मुक्तश्च को वद ॥३॥

स्कन्द उवाच ।

यथा समुद्भवं लिङ्गं प्रव्यक्ते क्ष्मातलेऽचले ।
ऊचतुर्ब्रह्मविष्णू तौ स्वर्गं गन्तुं सुवन्मुने ॥४॥
प्रसादं कुरु नो देव ऊर्ध्वलोकं प्रगम्यताम् ।
अनाथास्तत्र देवाः स्युस्त्वां विनेति मलीमसा ॥५॥
आकर्ण्येशस्तयोर्वाक्यं व्याजहार वचो हरः ।
शृणुताद्धि हरे ब्रह्मन् मद्वचोयं भविष्यति ॥६॥
नाहं स्वर्गं गमिष्यामि अपि महत्सुखं परम् ।
एतत्क्षेत्रं परित्यज्य कैलासं गोपुरं तथा ॥७॥
पवित्रितं मयैतद्धि मदुत्पत्तिर्यतो हरे ।
देव्याः परं रहःस्थानं विशेषान्मे पुनर्विधे ॥८॥
तपोवनमिदं स्थानं मत्प्रसादाद्भवेत्परम् ।
अहोरात्रतपःसिद्ध अत्रान्यत्कोटिवर्षजः ॥९॥
येत्र मर्त्या भविष्यन्ति स्त्रियो देव्या मदंगिनः ।
मदर्शका लभिष्यन्ति मत्सायुज्यं मृता इह ॥१०॥
अधिकृत्य त्रिलोकं च एतत्क्षेत्रं मया कृतं ।
मध्यस्थोपि प्रसादान्मे सर्वोपरिगतो भवेत् ॥११॥

स्कन्द उवाच ।

रुद्रवचः समाकर्ण्य ब्रह्मविष्णुश्च तद्वने ।

कार्त्तिकीपूर्णिमायान्तौ तेपाते शिवभक्तितः ॥१२॥
तत्रागत्य ततो देवा दिक्पालाश्चन्द्रपूषणौ ।
संपूज्य विधिवल्लिंगं सहस्राब्दं प्रतेपिरे ॥१३॥
सप्तर्षयो मुने साकं नारदाद्यैर्मुनीश्वरैः ।
स्नात्वेश्वरं समभ्यर्च्य वाग्मत्यां किल तेपिरे ॥१४॥
संभूय त्रिदशास्तत्र मुनिभिः सह तेपिरे ।
यस्माद्धि नगरी भूता तस्मात्तपोवनी ह्यभूत् ॥१५॥
विश्वकर्मा ततस्तत्र पशुपतेः समाज्ञया ।
नानारत्नैर्हिरण्यैश्च चकार नगरीं पराम् ॥१६॥
तस्मात्स्वर्णपुरी ज्ञेया स्वर्णमयी गृहोत्तमा ।
अध्यासन् त्रिदशास्तस्यां तस्मात्स्वर्णमयी पुरी ॥१७॥
धर्मार्थकाममोक्षाणि प्राप्यन्ति तत्पुरौकसः ।
चतुर्वर्गप्रदा तस्माद्धर्मात्मानः शिवार्चकाः ॥१८॥
तत्रैव च पुरा मुक्ता मृगात्मानो नृपात्मजाः ।
मन्त्रिपुत्रेण सार्धं वै हरिणस्योपदेशतः ॥१९॥

अगस्त्य उवाच ।

क एते भूपतेः पुत्राः कश्चासौ मन्त्रिणः सुतः ।
मृगाङ्गानि कथं प्रापुर्भूत्वा भूपालजा अपि ॥२०॥
पशुरूपैश्च तैर्लब्धं मुनिर्वाणं समत्र वै ।
ज्ञानैर्विवर्जितैः शश्वत् तन्मे वीजं वद प्रभो ॥२१॥

स्कन्द उवाच ।

यद्वृत्तान्तं पुरा भूतं कुम्भयोने शृणु ध्रुवं ।
मृगाणां तत्र संवादं सिद्धारण्योत्तमे मिथः ॥२२॥
चित्रलोमा सुलोमा च हर्षलोला तथापरः ।
सूक्ष्मलोमा मृगा आसन् चारुलोमा च पंचमः ॥२३॥
राधसिततृतीयायां परिभ्रम्य वनं मृगः ।
स्तनकुण्डे पयःपानमतिष्ठत्सह तैः श्रमात् ॥२४॥
उमायाः स्तनकुण्डस्य विदूरे तैः समं कुजं ।
अध्यासीच्चारुलोमासौ बुद्धिमान् देशिको मृगः ॥२५॥
परिवारेषु तं तेषु रोमन्थसंस्थितेषु ते ।
उदासीनमुखं प्रेक्ष्य अपृच्छन्नत्कारणं हि तम् ॥२६॥

मृगा ऊचुः ।

दीनमुखो भवान् भूत्वा संतिष्ठसि कथं सखे ।
रोमन्थनं न कुर्यास्त्वं सुस्वादजीर्णभक्षणम् ॥२७॥
नो न संभाषसे किंचिन्मलीमसांचिताननः ।
चारुलोमन् सखे किन्ते हृद्यागतं हि नो वद ॥२८॥
अथवेदं वनं त्याज्यं नो भयोपस्थितो वद ।
अपि बहुसुखैराढ्यं यत्र चोपद्रवं त्यजेत् ॥२९॥
उपद्रवैर्युतं राज्यं स्वामिनो यत्र हिंसकाः ।
प्रजाक्षयकरस्त्वाशु तद्राज्यमतिभूमिः सुखप्रदा ॥३०॥

चारुलोमोवाच

न त्याज्यं काननं चेदं मनसापि कदाङ्क्षिभिः ।
बहुसुखप्रदं राजन् भुक्तिमुक्तिप्रदं हि नः ॥३१॥
किन्तु बीजं प्रवक्ष्यामि यस्माद्दीनमुखं मम ।
शृणुध्वमिह राजानो मत्तः पूर्वोद्भवां कथाम् ॥३२॥
अङ्गाख्ये नगरे भूप आसीद्धिरण्यदः श्रुतः ।
हिरण्यं प्रददौ नित्यं द्विजातिभ्यस्ततः स्मृतः ॥३३॥
रसापतेः सुता यूयं बभूवुश्चतुरो भवन् ।
तन्मन्त्री रौप्यदो नाम जनको मे विचक्षणः ॥३४॥
विमाता सुन्दरी वश्च राज्ञः प्रियतमानिशम् ।
राज्यं दातुं स्वपुत्राय तात्पर्ये संस्थिता मुहुः ॥३५॥
हत्वा वः सर्वशो राज्यं दत्वात्मजाय चिन्तिता ।
भोजयिष्ये सुखं पुत्रं भविष्यामि कदेति सा ॥३६॥
चत्वारो भ्रातरः प्रौढान् भवतः प्रेक्ष्य दुःखिता ।
एवं वश्चिन्त्यमानायां तस्यां वै मातरि प्रभो ॥३७॥
एकदा दिवसे राजन् हयानारुह्य तद्वयम् ।
स्वराज्यं भ्रमयामः स्म माल्यमण्डनभूषिताः ॥३८॥
सा प्रेक्ष्यति स्म नो ध्योऽङ्गप्रासादस्थातिसुन्दरी ।
गवाक्षेण तदा चिन्तामकरोत्तदधैर्यगा ॥३९॥
परित्यज्य द्रुतं सख्य अन्तःकोपा च पद्मनी ।
निर्वचनं ययौ कोष्ठाभ्यन्तरं विजना रहः ॥४०॥
संवर्य सकलान्द्वारान्कपाटैः सारवैर्बहु ।
पर्य्यङ्केऽशीशयद्राज्ञी रुषान्विता च नः प्रति ॥४१॥
श्रुत्वा तद्वचनं सख्यू राजा सुसंभ्रमाद्ययौ ।
तद्वारान्तिकमेकाकी तस्याः प्रेमोत्सुको वशी ॥४२॥

राजोवाच ।

प्रिये सुन्दरि चैतत्किमागतो हृदि ते ध्रुवं ।
द्वारं रुध्य दृढं शेते पर्य्यङ्के मौनिनिर्जना ॥४३॥
तवाधीनमिदं देहं मद्रूपं नगरीमिमाम् ।
दशकोटिनिधिं चैतत्किन्ते सुदुर्लभं वद ॥४४॥

चारुलोमोवाच ।

निशम्य वचनं राज्ञस्तादृशं मधुरस्वरं ।
स्वगता इति कृत्वा सा अभाषद्वचनं पुनः ॥४५॥

पद्मिन्युवाच ।

एवं चेद्भाषसे राजन् ममाधीनोभवद्भवान् ।
शपथैः क्रियतां सत्यं विश्वासो जायते मयि ॥४६॥

राजोवाच ।

शतानां महिषीणाञ्च त्वमेवासि गरीयसी ।
कथं न ज्ञायसे भीरु सुविस्मृतोऽसि तत्कलाम् ॥४७॥
प्राणैः धनैस्तथा राज्यैर्गरीयसी त्वमेव च ।

त्वां विना नास्ति कश्चिन्मे सत्यं सत्यं वदाम्यहम् ४८
पद्मिन्युवाच ।
किंचिद्याच्ये हि कार्यं त्वां तवाधीनमिदं प्रियः ।
शपथैः क्रियतां सत्यं यद्यपि मां प्रियां तव ॥४९॥
राजोवाच ।
मूर्त्तिनश्चाष्टमूर्तेर्हि साक्षिणः सन्ति सर्वदा ।
शुभाशुभकृतान् त्वत्प्रपश्यन्ति त्वहर्निशम् ॥५०॥
यद्येवं याच्यसे मां त्वं त्वदीप्सितं च सुन्दरि ।
ददामि सांप्रतं तत्ते अवश्यं वद मे प्रिये ॥५१॥
चारुलोमोवाच ।
इत्याकर्ण्य वचो राज्ञः पद्मिनी नृपतिं तदा ।
तत्कपाटं समुद्घाट्य प्रवेशयत्स्वकान्तिकम् ॥५२॥
सत्यवाग् भो विभो त्वञ्च आसने स्थीयतां प्रिय ।
इति कृत्वाशु सा राज्ञी आर्द्रयामास तं पतिम् ॥५३॥
पद्मिन्युवाच ।
एवं चेत्ते प्रिय स्वान्ते चतुर्थानां शिरोऽधुना ।
संछित्वा दीयतां मह्यं सपत्नीपुत्रकोपिनाम् ॥५४॥
अभिषिञ्च्याशु मत्पुत्रं राज्यमस्मै प्रदीयताम् ।
दीनाय तत्कनिष्टाय भवात्वशाय भूपते ॥५५॥
एवं चेद्भवता राजन् यद्यपि क्रियते हि तत् ।
जीव्यति त्वत्प्रिया सौख्यमन्यथा निधना भवेत् ५६
चारुलोमोवाच ।
आकर्ण्य वचनं तस्याः कटुकमप्रियं नृपः ।
श्रवणास्पृशत्सद्यः शिव शिव वदन् मुहुः ॥५७॥
निःसंज्ञश्च क्षणं स्थित्वा दश्वाङ्गो वचनैर्हि तत् ।
पपात विह्वलाङ्गोसौ वज्राहतद्रुमो यथा ॥५८॥
भूयोऽवदद्धि सा राज्ञे अशक्तश्चेद्भवान्प्रिय ।
जीवित्वा किं मया जीवं पश्य पश्य न धार्यते ॥५९॥
निशम्य वचनं पत्न्या भूयोवदत्प्रियंवदः ।
निःश्वस्य दीर्घनिश्वासं बाष्पेक्षणः स वेपथुः ॥६०॥
राजोवाच ।
धिगिति मे वदिष्यन्ति पत्नीहेतोर्नृपेण च ।
छित्वात्मजशिरांस्यार्या दत्तं यस्या इति प्रिये ॥६१॥
सर्वस्वं त्वत्सुतायाहं राज्यं रत्नानि हस्तिनः ।
हयानि पट्टवासांसि प्रदास्याम्यधुना प्रिये ॥६२॥
मैवमेतद्धि वक्तव्यं कुत्सितं लोकनिन्दकम् ।
तच्छिरसां च मौल्येन सर्वं दास्यामि ते प्रिये ॥६३॥
पद्मिन्युवाच ।
सत्येन धार्यते चापि अनन्तेन रसामिमां ।
सत्येन धार्यते सूर्य्यश्चन्द्रोऽनिलो नलस्तथा ॥६४॥
मूर्त्तिभिरष्टमूर्तेश्च अद्यापि धार्यते जगत् ।
सत्यैस्तपोधनानाञ्च नृपाणां तत्प्रसेविनां ॥६५॥
सत्यं कृत्वा भवान् तन्न रक्षति यदि कैतवः ।
भवादृशोपि यः कश्चित्सद्भिर्न दृश्यते मुखम् ॥६६॥
सुतथ्यविमुखो यर्हि भवान् भवेद्धि साम्प्रतम् ।
न प्रेक्ष्य त्वन्मुखं रुष्ट त्यक्त्वासून् परमं व्रजे ॥६७॥
राजोवाच ।
मा त्यज्यतामसून्देवि कुर्वे कर्म त्वदीप्सितम् ।
स्तुवन्तु मे च निन्दन्तु सत्यं धार्यो हि मानुषाः ॥६८॥
चारुलोमोवाच ।
इत्युक्त्वा निर्ययौ तस्यै राजा वहिस्त्वरान्वितः ।
तेभ्योऽब्रवीत्तदैकान्ते समाहूयाधिकारिणम् ॥६९॥
राजोवाच
वराः शृणुत मद्वाक्यं परच्छिद्रेक्षणोत्सुकाः ।
अस्मिन्काले वनं गत्वा न कार्यं कुरुत ध्रुवम् ॥७०॥
मृगयायेषु पुत्रेषु मे समन्त्रिषु कानने ।
छित्वा शिरांसि पञ्चानां रह आनीय दीयताम् ॥७१॥
चारुलोमोवाच
निशम्य वचनं राज्ञो दुःखदग्धाश्च तेऽभवन् ।
हा कष्टेति च कृत्वा तच्छासनस्था वनं ययुः ॥७२॥
मृगयाशक्तचित्तेषु अस्मासु वनदा ययुः ।
अवरुध्य पृथक् वस्ते प्रजग्नुरसिभी रहः ॥७३॥
नः शिरांसि समादाय वासोभिर्वेष्टयंश्च ते ।
ददुः पित्रे च ते राजन् पूर्वाह्णे रहसि ध्रुवम् ॥७४॥
राजा शिरांसि नस्तस्यै गृहाणेति वदन्ददौ ।
मयि तोषय निर्मूले इत्युक्त्वा विरराम हि ॥७५॥
भाद्रशुक्लचतुर्थ्यां सा आधाय संपुटे पृथक् ।
नः शिरांसि स्वकीयानां नोऽप्रेषयच्च पत्निषु ॥७६॥
उमाव्रतकृशाङ्गास्ता मे स्नुषा रचनेऽधुना ।
एतैः फलैश्च कुर्वन्तु पारणानि व्रज [illegible] ॥७७॥
तत्संपुटानि सादाय गत्वा नो हि प्रियान्तिकम् ।
ददौ ताभ्यस्तदा तानि इत्यऽब्रवीच्च तद्वचः ॥७८॥
पद्मिनी प्रेषिता सात्र कुरुत पारणानि च ।
तद्भूतैः कर्षिता यूयमेतैः फलैर्वदन् ययौ ॥७९॥
श्वश्र्वादत्तं समस्मभ्यमार्यया मातरोऽधुना ।
फलान्येतानि कृत्वेति ताभिरग्राहिषन्नृप ॥८०॥
तान्यभिवन्द्य वः पत्न्यो देव्यै निवेदिताः खलु ।
प्रीतास्तु न उमादेवी इति कृत्वा निवेदितम् ॥८१॥
प्रियेभ्यः किल दास्याम एतद्देव्याः प्रसादकम् ।
विरेमुश्च कृत्वेति उमाव्रतविकिल्बिषाः ॥८२॥

मृतसञ्जीविनी देवी तत्र तस्मिन् क्षणे वने ।
अजीवयद्गुमा सान अमृतैः सेचयन्मुहुः ॥८३॥
सुप्तोत्थिता वयं तद्वद्यथापूर्वमहत्सुखम् ।
स्वंस्वमश्वं समारुह्य आजग्मिमः स्वमन्दिरम् ॥८४॥
ताभिः फलानि दत्तानि भुक्तवन्तस्तदा वयम् ।
नारिकेरफलान्यार्यास्वादूनि मधुराणि च ॥८५॥

मृगोवाच ।

कथं देव्या प्रसिंच्या नः सञ्जीविता वयं सखे ।
नो मूर्द्धानः कथं भुक्तं तन्नारिकेरतां गताः ॥८६॥
पशुयोनिः कथं लब्ध्वा अस्माभिः किल निन्द्यताम् ।
भूत्वा राजसुता धीमन्नेतत्सर्वं च नो वद ॥८७॥

चारुलोमोवाच ।

उमाव्रतप्रभावान्नः पत्नीनां तद्व्रतौजसां ।
देव्या संजीविताः पुण्यात्प्रसिञ्चन्नमृतैर्वयम् ॥८८॥
तद्व्रतप्रभया नो हि मूर्द्धानः फलतां गताः ।
भुक्तवन्तो वयन्तानि तदा राजन्सुनिश्चयम् ॥८९॥
साक्षात्कारिता वयं चैवं नृपसुखेन नो विभो ।
तथापि वेदनां तीव्रं न बुबुधाम तद्वयम् ॥९०॥
नः पत्न्यः पश्यतेमा वै कुलस्त्रियोऽनुगाः सदा ।
तद्व्रतप्रभयाशश्वद्धरिण्यश्च प्रियंवदाः ॥९१॥
सप्तवर्षं समारभ्य आमरणावधि प्रभो ।
उमाव्रतानि चक्रुर्वै मृग्यश्चेमाः स्त्रियो हि नः ॥९२॥
केवलं वर्णितं ताभिर्वयञ्च पतयो हृदा ।
उमादेव्यां न निर्वाणं भवेयुर्नः स्त्रियोऽनिशम् ॥९३॥
तदन्ते भूप लब्धाव्दं रुद्रलोके महत्सुखम् ।
अवात्स्मः परिवारैस्तन्त्र मम पुण्यप्रभावतः ॥९४॥
क्षीणे पुण्ये ततो राजन् प्रपतिता वयं भुवि ।
सार्वभौमपतिर्भूत्वा अभोजासः सुखं पृथक् ॥९५॥
भूत्वा नराः सकृच्चापि पशुपतिमदर्शनात् ।
एतान्यज्ञानि तस्माद्वै प्राप्तवन्तो वयं न्त्विह ॥९६॥
वनान्तरं भ्रमामस्मः क्षुत्पिपासाभयाकुलाः ।
तद्धर्मप्रभयाचेह प्राप्तवन्तो वयं पुनः ॥९७॥
तपोवनीं विदुस्तत्र सिद्धारण्यामिमां स्थलीम् ।
मुक्तिमूलमिदं क्षेत्रं सर्वलोकैः प्रसेवितम् ॥९८॥

मृगा ऊचुः ।

एतत्क्षेत्रं वरिष्ठं च कथं भवेन्मृगोत्तम ।
भवान् वेत्ता कथं चात्र पूर्वजन्मोद्भवां कथाम् ॥९९॥
संत्यज्यांगानि चैतानि नृपकलेवराणि वै ।
लप्स्यामः कथं भूयस्तत्सर्वं वद नः सखे ॥१००॥

चारुलोमोवाच ।

देव्या शिखरवासिन्याः स्तनकुण्डामृतं सखे ।
एतत्पास्य पुरोद्भूतं प्रवृत्तिं ज्ञानवानहम् ॥१०१॥
पीयतां जीवनं तत्र अस्मिन् कुण्डे सखाय वै ।
पूर्ववार्ताञ्च जानीथ तस्मात्कृताकृतं यथा ॥१०२॥

स्कन्द उवाच ।

आकर्ण्य वचनं तत्र चारुलोमा मुखच्युतं ।
चत्वारो हि मृगाः सद्यः साधुसाध्विति मेनिरे ॥१०३॥
संगत्य सहसा सर्वे स्तनकुण्डामृतं पपुः ।
समार्द्रयन् मुहुर्हर्षात्तदङ्गखर्जनोत्सुकाः ॥१०४॥
हर्षोदासीनयुक्ताङ्गा जलपानावबोधकाः ।
अबूबुधन्मृगाः सर्वा वार्ता पूर्वजनूद्भवां ॥१०५॥
संभूय ते मृगाः सद्यः पूर्वजन्मावबोधगाः ।
आद्यमृगान्तिकं गत्वा तमूचुर्लहयन्मुहुः ॥१०६॥

मृगा ऊचुः ।

हास्योभाविमहास्यार्य्य अमूनि नो विभो ध्रुवम् ।
सततं लोकनिन्द्यानि ज्ञानैर्विवर्जितानि च ॥१०७॥
त्वं वेत्ता सर्ववार्त्तानां नो देशिकस्त्वमेव च ।
एते निन्द्याः कदा देहास्त्यजन्ति पुरुषं वद ॥१०८॥
लक्षाणां चतुराशीनां योन्युद्भूता वयं विभो ।
अनुभुक्तामहे कष्टान् तत्तदुत्पत्तिभिस्तदा ॥१०९॥
ज्ञानरसाञ्जनैः पुण्यैर्भवद्वाक्यशलाकया ।
नेत्राण्यञ्जयतां नो वै यास्यामः परमं यतः ॥११०॥

स्कन्द उवाच ।

तच्छ्रुत्वा वचनं तेषामादिमृगो महेश्वरः ।
ज्ञानशक्तांश्च संप्रेक्ष्य स्थावरात्मापि हर्षवान् ॥१११॥
आशुतोषोऽवदत्तेभ्यो मृगरूपेण संसदि ।
त्र्यक्षस्मिताननो भक्त्यां सर्वजीवदयाकरः ॥११२॥

आदिमृग उवाच ।

एवमेवं हि संसार असुभृतां मृगोत्तमाः ।
गंभीरनीरसंसारः सततं निधनोद्भवः ॥११३॥
तस्मिन्संसारकूपारे लोकाः क्रीडन्ति शर्म्मभिः ।
विषयग्राहसंदष्टा विवेकमतयो मृगाः ॥११४॥
परमांसानि न केचित्परार्थग्रहणोत्सुकाः ।
जन्मान्ते तादृशान्तान्वै पीड्यन्ते घ्नन्तियेऽपरान् ॥११५॥
तदंघ्रैर्लोमसंख्यातैः कोलाः प्रादुर्भवा इह ।
पशवः पापिनोऽजस्रं भ्रमन्ति च भवादृशाः ॥११६॥
स्पर्शनात्तीर्थलिंगानां भाग्यपुण्यक्रमाचिरात् ।
सत्कुले भवने जन्म भवन्नरसुदुर्लभम् ॥११७॥
लब्ध्वापि नरदेहं यः पशुपेशं न पश्यति ।

मद्योनिजीवनाख्य स उद्भवः पशुर्वरम् ॥११८॥
चतुर्विधानि भूतानि सन्ति सप्तस्थिरासु च ।
स्वकर्मवशगास्तेषु तेषां श्रेष्ठा सदाऽग्रजाः ॥११९॥
अप्यत्रसंभवो जन्तुर्यदि ज्ञानैर्विवर्जितः ।
स न प्राप्नोति निर्वाणं नर एव पुनः पुनः ॥१२०॥
संस्नाता वाग्मतीतोये अस्मत्पतिं प्रपश्यति ।
मम योनिजलं पीत्वा स निर्वाणं क्षणाल्लभेत् १२१
एकतः सर्वतीर्थानि एकतो वाग्मतीजलम् ।
ब्रह्मविष्णुतुलाभ्याञ्च धर्मदण्डेन तूलितम् ॥१२२॥
तेषां शतगुणं धन्यं वाग्मतीसलिलं गुरु ।
तस्मादपि यथाधिक्यं मद्योनिजं सुदुर्लभम् ॥१२३॥
चित्रलोमोवाच ।
यद्येवं भवता प्रोक्तमस्मज्जननतारकम् ।
विभो कुत्र भवद्योनिः प्रतिष्ठतीप्सितप्रदा ॥१२४॥
कथं च स्नायतेस्माभिः स्तृणासनैर्जलोत्तमे ।
पितृलोकैः समं जन्यं लभिष्यामि कथं पुनः ॥१२५॥
आदिमृग उवाच ।
ज्ञानरसस्तटे पूर्वे मम योनिः परात्परं ।
अतः पूर्वादपेस्तीर्थात्त्रिभिस्तीर्थैः ससं वभौ ॥१२६॥
आदिशक्तेः प्रतीच्या ह्यतः प्राच्याभ्यन्तरेनिशम् ।
क्लुषाणां कदाप्यत्र प्रवेशनं न विद्यते ॥१२७॥
देवर्षयो न मुञ्चन्ति तीर्थानि चत्वारि ध्रुवम् ।
कृताकृतानि मर्त्यानां तत्राक्षयं समुश्नुते ॥१२८॥
प्रक्षाल्य पाणिपादास्यं दन्तधावनपूर्वकम् ।
दर्भधृक् ब्रह्मतीर्थेन आचमनं त्रिधा पुनः ॥१२९॥
अर्ककुण्डतटं गत्वा संकल्प्यते कुशोदकैः ।
एतत्तीर्थादितुर्य्येषु करिष्येहं जलाप्लवं ॥१३०॥
ततः संस्नायते तेषु भक्त्येप्सितं स्मरन् हृदा ।
एवं स्नानं मनुष्याणां सर्वतीर्थेषु संयतः ॥१३१॥
प्रातर्गत्वा निराहारस्तीर्थान्तिकं हि तज्जलम् ।
अजस्रं च सुखं पानं पशूनां स्नानमीरितम् ॥१३२॥
चारुलोमोवाच ।
को मुक्तस्तत्र धीराग्र्ये मानवो वा पशुस्तथा ।
कस्मात्प्रलभ्यते धर्मः पापमसुभृतैर्नरैः ॥१३३॥
आदिमृग उवाच ।
तपोयज्ञाद्यप्लवैः कर्म नोपवासार्चनैस्तथा ।
लभ्यन्ते सुकृतिर्मर्त्यैर्यथाकृतानुसारतः ॥१३४॥
दानैः प्रलभ्यते लक्ष्मीस्तददानैर्दरिद्रता ।
पापैर्नरकसद्मानि परदुःखैश्च यातना ॥१३५॥
दारिद्र्यंतद्वयंः प्रोक्तस्तस्मादपि च पातकः ।
अशौचा दुष्टजिनौघात्मा आजन्मावधि नारकी १३६
रतिका विद्यते धर्मः पापश्चैवाचलोपमः ।
दहति कल्मषं सर्वं रतिकाग्निर्यथा वनम् ॥१३७॥
शृणु कश्चित्पुरा मुक्तो व्याघ्रस्तत्र भयंकरः ।
सिद्धारण्यसदावासी वनेचराय जीवनः ॥१३८॥
साहस्रं मृगवर्गाश्च शूकराश्च चतुःशतम् ।
नृवर्गोविंशतिपूर्वं गर्जमानेन वै हतः ॥१३९॥
तत्पापैर्लिप्तदेहोसौ अतिवृद्धो वभूव हि ।
हन्तुं न शक्तवान्यङ्कुःस्थगितगमनः क्रमात् ॥१४०॥
मम योन्या विदूरेसौ अवात्सीद्धयकृच्चिरम् ।
चतुर्षु खलु तीर्थेषु पास्यापो भक्षयन् मृगान् ॥१४१॥
मार्गकृष्णचतुर्दश्यां मदुद्भवतिथौ मृगाः ।
तृषार्तोपिपिवत्तोयं मम योन्यामसौ सकृत् ॥१४२॥
कश्चित्कालावसाने तं मृगयाचरतो नरः ।
जघान पत्रिणा धन्वी तत्रैव गतपौरुषम् ॥१४३॥
सोऽपीयेष नरं हन्तुं प्राणैः कण्ठगतैर्हृदा ।
मेषस्थे तरणौ प्राणानजुहद्व्रिवासरे ॥१४४॥
गर्ज्जमानोऽपि जन्मान्ते नरदेहमवाप हि ।
मृगयासक्तरोऽजस्रं अस्मिन्वने धनुर्द्धरः ॥१४५॥
तद्विग्रहं परित्यज्य दधार मृगविग्रहम् ।
मद्योनिजीवनाभावाद्धन्वी तत्कारणान्तरः ॥१४६॥
पिवन्तं मम योन्याञ्च जलं मृगं धनुर्द्धरः ।
उत्ससार शरं हन्तुमाकर्णं पूरितं तदा ॥१४७॥
मृगोपि तादृशं प्रेक्ष्य आत्ममृत्युं विदूरतः ।
पीतापो ज्ञानवान् भूत्वा व्याचष्ट वचनं भयात् ॥१४८॥
मृग उवाच ।
मा प्रहारय मां तात पत्रिणा शृणु मद्वचः ।
क्षणभङ्ग रजीवोऽसिमदीयमपि तादृशम् ॥१४९॥
मन्मांसैस्तर्प्यते प्राणः स्वकीयो भवतेति च ।
अवश्यन्त्यक्ष्यति प्राणो भवन्तं सुखतर्पणः ॥१५०॥
लुब्धक उवाच ।
भवतात्र हतं पूर्वमहं शरेण पीडयन् ।
वैरान्तरं गमिष्यामि हत्वा त्वां तर्प्यते तथा ॥१५१॥
मृगेश उवाच ।
इत्युक्त्वा पत्रिणं म्लेच्छस्तत्कुक्षौ निचखान वै ।
सोपि शल्यव्यथो ह्यस्मै व्याजहार वचः पुनः ॥१५२॥
मृग उवाच ।
उड्डीशेशो नृपः पूर्वं राजसीबुद्धिसंश्रितः ।
चरन्तो मृगयाऽजस्रं विप्रशापेन चेदृशः ॥१५३॥
मया च राजसीबुद्ध्या टंकाश्रमे मृगो हतः ।

एतादृशं वपुर्लब्ध्वं ऋषेरामर्षशापतः ॥१५४॥
त्वं च कान्तीश्वरस्तात किल्बिषैस्तादृशं वपुः।
तत्स्वापहारणान्यायैः प्रजाः ब्राह्मणपीडनात् ॥१५५॥
तस्माद्भवानभूद्व्याघ्रः सर्वजन्तुप्रहिंसकः ।
भवन्तं तादृशं हत्वा न पापैर्लिप्यते कदा ॥१५६॥
मृगेश उवाच ।
संत्यज्य तादृशं देहं दधार भूपविग्रहम् ।
पञ्चतीर्थेषु संस्नौ विकिल्बिषः स्मिताननः ॥१५७॥
मार्गकृष्णचतुर्दश्यां पूर्वाह्णे दर्शयँश्च तं ।
विमानेनार्कवर्णेन परं धाम मुदा ययौ ॥१५८॥
तादृशं प्रेक्ष्य तं धन्वी चित्रात्मा स्थगिताश्रितः ।
तेषु स्नानाशनाभावात्तादृशं स परं ययौ ॥१५९॥
स्कन्द उवाच ।
विनिवृत्तमृगार्ये ते अगमंस्तेषु तद्धृदि ।
वपुर्जलं समाधाय देहान्ते राजविग्रहम् ॥१६०॥
परिवारैः समायुक्तः पित्रादिभिर्नृपोत्तमः ।
भविष्याणि च देहान्ते चित्रलोमाऽमृतं पपौ ॥१६१॥
अभूत्पुत्रैः समं राजा देहान्ते च सुदर्शनः ।
सहस्राब्दं महीं भुक्त्वा ततो रुद्रो व्यजायत ॥१६२॥
भूयो धर्मैः स्वपुत्राणां धर्मदत्तोभवत्पुरा ।
चित्रलोमादिभिः पुत्रैर्धर्मकेत्वभिधानकैः ॥१६३॥
शृणोति धीरः पशुयोनिसंभवं,
विमुच्य तत्पाशसुबन्धकिल्बिषं ।
प्रयाति धामेश्वरशाश्वतं परं,
सुखञ्च भुक्त्वा नृपभोग्यदुर्लभम् ॥१६४॥
इति श्रीस्कन्दपुराणे हिमवत्खण्डे पशुयोनिमाहात्म्ये मृगोपाख्यानं नाम पञ्चषष्ट्युत्तरशततमोऽध्यायः ॥ १६५ ॥

—❀❀❀—

ऋषय ऊचुः ।
अत्यद्भुता कथा तात श्रुता मनःसुखप्रदा ।
श्रीसतां हि प्रसादाद्वै अस्माभिर्ज्ञानदायक ॥१॥
ह्रदीभूतं कथं तात तत्क्षेत्रं वद नः पुरा ।
भविष्यं श्रावितं देवान् रुद्रेणाभ्यब्रवीद्भवान् ॥२॥
सूत उवाच ।
अपृच्छदार्य्या सुतमार्दयन्मुहुः,
स कुंभयोनिः खलु तद्धि कारणम् ।
नदी ह्रदीभूतजलान्तराविलं,
मुनीश सर्वं शृणुयाद्भवञ्च तत् ॥३॥

अगस्त्य उवाच ।
भूयोऽहं श्रोतुमिच्छामि ह्रदीभूता च वाग्मती ।
यस्माद्धेतोर्महासेन नदीभूता कथं हि सा ॥४॥
स्कन्द उवाच ।
आसन्दैत्याः पुरा वीरा बाणस्य भ्रातरस्त्रयः ।
वज्रनाभो विराधश्च शंखासुरस्तथापरः ॥५॥
वज्रलग्नमभून्ना भौ पुरा दैत्यस्य संयुगे ।
पुरुहूतरुषा मुक्तं वज्रनाभस्ततः श्रुतः ॥६॥
ब्रह्मणो वरदर्पेण स्वर्गे दैत्येन वै रुषा ।
तेनैव दमितः शक्रः स इन्द्रदमनः श्रुतः ॥७॥
तच्चन्दनभराल्लब्ध्वं लिंगाच्छंखेन वै वरम् ।
गोलोकेशाद्विराधेन सहस्राब्दं तपोबलात् ॥८॥
शङ्खमूले वरं लब्धं शक्रतापेन पूर्वतः ।
लब्धवराः सुखं दैत्या बुभुजिरे हि तत्पुरे ॥९॥
आसीच्च भगिनी तेषां देवी प्रभावती श्रुता ।
रूपलक्षणसंपूर्णा प्राणादपि गरीयसी ॥१०॥
सखीभिरसकृत्तां हि वरार्थं प्रति बोधिता ।
पतिं न कांक्षते सा च दैत्यदानवयोः कुले ॥११॥
अनिच्छन्तीं समुत्पत्य भगिनीं दैत्यसत्तमाः ।
न ददुः प्रार्थमानां तां कस्मैचिदपि दानवे ॥१२॥
उद्यानानि विचित्राणि चन्दनाचलमूर्द्धनि ।
प्रीत्यर्थं कारयामासुर्भगिन्या देवशात्रवः ॥१३॥
शक्रतापप्रतापेन रचिता वरसुन्दरी ।
न शक्यते बलान्नेतुं कैश्चिदप्यमरादिभिः ॥१४॥
सा निर्भयञ्चचारार्य्या राजपुत्री प्रभावती ।
तपोयोगरता नित्यं रूपातिशयशालिनी ॥१५॥
तीरमारभ्य गण्डक्या यावत्तद्वाग्मतीतटम् ।
पूर्वपश्चाद्धि तस्याद्रेरधस्ताच्चन्दनागिरेः ॥१६॥
सुप्रभा नाम विख्याता पुरी स्वर्गपुरोपमा ।
तस्यां ते हि विराजन्ते भ्रातृभिः सह दानवाः ॥१७॥
बिम्बोष्ठ्याः गर्भसंजाता मातुर्वज्रे त्रिविष्टपे ।
शक्रदक्षिणचक्षुश्च शश्वद्धि स्पन्दते भृशं ॥१८॥
ततो बृहस्पतिं शक्रः समाहूयादिदेश च ।
परीक्षणाय तद्धेतुं चक्षुःकम्पस्य कुम्भज ॥१९॥
स्पन्दते चक्षुषे चोर्द्ध्वं दक्षिणस्य गुरो मम ।
भवान् परीक्षतां तन्मे ततो ब्रूहि शुभाशुभम् ॥२०॥
इत्याकर्ण्य वचो जीवः शक्रेणोक्तं भयान्मुहुः ।
गुरुः परीक्षयामास तस्मिन् शुभाशुभं मुने ॥२१॥
संपरीक्ष्य ततो जीवस्तस्य हेतुं घटोद्भव ।
व्याजहार वचस्तस्मै समाश्वास्याशु सर्ववित् ॥२२॥

बृहस्पतिरुवाच ।

अजायत बलेः पुत्रो हिमवद्गह्वरोत्तमे ।
सुप्रभानगरे शक्र विम्बोष्ठ्याश्चात्मजो बली ॥२३॥
कालाल्लब्धवरो भूत्वा दैत्योसौ त्वां दमिष्यति ।
शक्राधुनाद्यतो हेतोः स्वचक्षुः स्पन्दते भृशम् ॥२४॥
जातमात्रस्य दैत्यस्य अभिधानं महर्षयः ।
शुभाशुभं परीक्ष्याशु प्रचक्रुः खलु संसदि ॥२५॥
असौ बालो गुणोपेत इन्द्रस्य दमनं खलु ।
तुमुलेपि च संग्रामे सद्यो ननु करिष्यति ॥२६॥
इन्द्रदमन इत्याख्यस्तस्मादस्याभिधानकं ।
लोकेषु चेति रूढो वै ननु ख्यातिं गमिष्यति ॥२७॥
इत्युक्त्वा प्रययुः शक्र स्वं स्वं गेहं महर्षयः ।
कृत्वाभिधानके तस्य सावधानपरो भव ॥२८॥

स्कन्द उवाच ।

निवृत्ते तदा जीव इत्युक्त्वा खलु वज्रिणे ।
शक्रोऽपि तत्परोभूच्च तच्छिद्रान्वेषणे मुने ॥२९॥
ततश्च षोडशाब्दान्ते वज्रोऽपृच्छद्धि भार्गवं ।
उपदेशं प्रणम्याशु स्वाभिधानस्य कारणम् ॥३०॥

वज्र उवाच

वीर्येण वयसा न्यूनो भवाम्यहं गुरोऽधुना ।
किमर्थमजिते शक्रे मम नाम तथाविधम् ॥३१॥
कृतं महर्षिभिश्चेति लज्जया व्यथितेन्द्रियः ।
भविष्यति च मे नाम विडम्बनो न संशयः ॥३२॥

स्कन्द उवाच ।

भार्गवोपि ततोगस्त्य ज्वलितः स्वेन तेजसा ।
तस्य गुरुतरं वाक्यं श्रुत्वा हृष्टो भृशं तदा ॥३३॥
व्याचष्ट वचनं सद्यो दैत्याय भार्गवः पुनः ।
शक्रजयेप्सयागस्त्य प्रस्थापितुं हि तं मुदा ॥३४॥

गुरुरुवाच ।

रुद्रधारोदये तीर्थे क्रियतां नियमैस्तपः ।
शक्रस्य भंगकामेन स्वात्मनो हि जयेप्सया ॥३५॥
बिभीषणेन पूर्वं वै यत्र लब्धं वरोत्तमम् ।
अद्यापि सुचिरञ्जीवी भवेद्रक्षो निरन्तरम् ॥३६॥
पंचरात्रमनुव्याप्य सहस्राणि प्रजाप्यताम् ।
भक्त्याराधय धातारं स्नात्वा च वाग्मतीजले ॥३७॥
यं यं कामञ्च ते स्वान्ते विद्यते दैत्यसत्तम ।
तं तं धास्यति धाता वा वाग्मतीतपसो बलात् ॥३८॥

स्कन्द उवाच ।

उपदेशं समादाय वज्रनाभो गुरोर्मुदा ।
तपःस्थातुं ययौ भक्त्या शंखमूले जयेप्सया ॥३९॥

स्नात्वा च वाग्मतीतोये रुद्रधारोदये शुभे ।
आराधय विधिं भक्त्या तन्मन्त्रं प्रजपन्मुहुः ॥४०॥
ततश्च पञ्चरात्रान्ते आविर्भूतः पितामहः ।
विमानेनार्कवर्णेन वरं दातुं तपस्विने ॥४१॥
व्याजहार ततो ब्रह्मा तपस्विने शुभं वचः ।
तपसा तस्य संतुष्टः प्रहर्षचतुराननः ॥४२॥

ब्रह्मोवाच ।

वरं वरय दैत्येन्द्र यत्ते मनसि विद्यते ।
तं तमयि ध्रुवं वत्स दास्यामि ते न संशयः ॥४३॥

वज्र उवाच ।

त्रैलोक्यविजयं चैव शक्रस्य दमनं पुनः ।
प्रदीयतामिति ब्रह्मन् यदि तुष्टोसि मे वरम् ॥४४॥

स्कन्द उवाच ।

कालं न याचते दैत्य अजयंस्त्वं सुरासुरैः ।
सुखभोग्यं च यावद्धि धातारञ्च घटोद्भव ॥४५॥
दैत्येन्द्रवचनं श्रुत्वा भगवाँश्चतुराननः ।
प्रफुल्लनयनो भूत्वा इदं वचनमब्रवीत् ॥४६॥

ब्रह्मोवाच

अजेयस्त्वं सुरैर्भूत्वा किन्तु स्वर्गनिवासिभिः ।
त्रैलोक्यविजयी चैव भविष्यसि महासुर ॥४७॥
दमिष्यसि पुनः शक्रं तपसस्ते प्रभावतः ।
दुहितुस्तव हेतोश्च दैवात्मृत्युर्भविष्यति ॥४८॥

स्कन्द उवाच ।

इत्युक्त्वान्तर्दधे ब्रह्मा तत्रैव च घटोद्भव ।
दैत्योपि प्रययौ राज्यं सुप्रभानामविश्रुतम् ॥४९॥
ततो लब्धवरो वज्रो राज्यं चकार वै सुखम् ।
कंचित्कालं निनायार्य्य भ्रातृभिः सह सन्ततम् ॥५०॥
वज्राख्योसौ चतुरवदनाल्लब्धचित्तोप्सितो वै,
नाना सौख्यं खलु च बुभुजे सुप्रभायां विभीतिः ।
संतुष्टोनाप्तवरवरभाक् क्वापि पूर्य्यासियेष,
स्वर्गं गन्तुं पुनरयमपि स्याद्धि दैत्यस्वभावः ॥५१॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये प्रद्युम्नोत्तरे वज्रनाभवरदानं नाम षट्षष्ट्यधिकशततमोऽध्यायः ॥१६६॥

—❀❀❀—

स्कन्द उवाच ।

ततो लब्धवरो वीरो दैत्यनायकचेष्टितः ।
परिचार्यासुरगणैरभिषिक्तो रराज वै ॥१॥
सामन्तैर्बहुभिःसार्द्धं मन्त्रिभिश्चानुयायिभिः ।

कुष्माण्डं प्रेषयामास दूतं देवेन्द्रसंसदि ॥२॥
गत्वा शक्रसभामध्ये सत्वरोसुरदूतकः ।
अब्रवीद्धि तदा वाक्यं कुष्माण्डोह्योतिविक्रमः ॥३॥
कुष्माण्ड उवाच ।
दैत्येश्वरेण चात्राहं प्रेषितस्त्वयि कारणात् ।
न स्थातव्यं त्वयेन्द्रात्र यदि जीवितुमुत्सहे ॥४॥
प्रदत्तं ब्रह्मणा राज्यं मम भर्त्रे पुरन्दर ।
राज्यानि वीरभोग्यानि त्यक्तुमस्मान् त्वमर्हसि ॥५॥
स्कन्द उवाच ।
दूतस्य वचनं श्रुत्वा पारुष्यं पाकशासनः ।
व्याचष्ट वचनं तस्मै प्ररोषाद्रक्तलोचनः ॥६॥
शक्र उवाच ।
अहो मूढतराबुद्धिरीदृशी च यतो भवेत् ।
दैत्यस्य स्वल्पवीर्यस्य यतो समावहेलितम् ॥७॥
न त्यज्यते मया राज्यं विना युद्धेन दूतक ।
राज्यानि वीरभोग्यानि स द्रष्टुमर्हति ध्रुवं ॥८॥
स्कन्द उवाच ।
इत्युक्तस्य सुरेन्द्रस्य संग्रामसूचकं वचः ।
कथयामास संप्राप्तो दूतो दैत्येन्द्रसंसदि ॥९॥
स्वदूतस्य वचः श्रुत्वा ज्वलत्कोपानलाकुलः ।
उद्योगं कारयामास सैन्यं युद्धाय दानवः ॥१०॥
वाद्यं संवादयन्सेना नाना स्वनाकुला भृशम् ।
ढक्कापटहकांस्यैश्च शंखडिण्डिमभेरिभिः ॥११॥
ततस्तस्मिन् क्षणेगस्त्य संप्राप्तो भार्गवस्तदा ।
जयाय वज्रनाभस्य व्याजहार शुभं वचः ॥१२॥
शुक्र उवाच ।
जयार्थमात्मनो वीर भ्रातरं कच्छपानुजम् ।
पुरस्कृत्य प्रयातव्यं शंखं शंखसमस्वनम् ॥१३॥
तस्य नादेन वीर्येण त्रैलोक्यं जृम्भते ध्रुवं ।
जायते समरं तीव्रं रिपू णामतिविह्वलम् ॥१४॥
जित्वा शीघ्रं सुरान्सर्वान् सुरेन्द्रं समरेऽध्वरे ।
पूरणीयं त्वया पुत्र पूर्वजानां मनोरथम् ॥१५॥
स्कन्द उवाच ।
एवं प्रोक्त्वाशु शुक्रेण दत्ताशीर्दैत्यसत्तमः ।
निर्ययौ स्वबलैः सार्द्धं सुप्रभानगरान्मुने ॥१६॥
खचितैः रत्नजालैश्च नानारथैर्मनोजवैः ।
प्राप्तवान् मेरुपृष्ठं स वज्रो रथैर्बलान्वितैः ॥१७॥
ततो मेरुं समासाद्य वज्रः सैन्यैः समावृतः ।
समाह्वयद्रुषा शक्रं युद्धाय वाद्यनिःस्वनैः ॥१८॥
रिपोरागमनं ज्ञात्वा दिक्पालैः सह यानगः ।
विनिर्ययौ पुराच्छक्रो देवयोधापुरःसरः ॥१९॥
वाद्यं चक्रुस्ततो देवा भृशं युद्धविशारदाः ।
शक्रं प्रणम्य युद्धाय प्रार्थयन्ननु शासनम् ॥२०॥
वाद्यानि ताडयामासुर्दानवा रणदुर्जयाः ।
आज्ञामप्रार्थयन् वज्रं युद्धाय रणमूर्द्धनि ॥२१॥
शरवृष्टिं ससर्जादौ सुरानीके च दानवः ।
आकर्णमुद्धृतैर्बाणैः स्वस्वनामाङ्कितैर्मुने ॥२२॥
ससर्ज देवसैन्यस्य बाणवृष्टिं भृशं पुनः ।
दैत्यानीके रुषाविष्टः स्वाभिधानांकितैस्तदा ॥२३॥
अंधीभूता दिशः सर्वा नभोनिशीव वृष्टिभिः ।
स्वपरं वाहनान् यानान् नव्यलक्षन्सुरासुराः ॥२४॥
चिक्षिपुर्दानवा युद्धे प्रासशक्तीश्च तोमरान् ।
अवयवान्समुद्दिश्य देवानामुपरि ध्रुवम् ॥२५॥
चिक्षिपुर्देवता भूयः शस्त्राणि च स सर्वशः ।
दैत्यसैन्ये भृशं युद्धे समुद्दिश्यासुरान्मुहुः ॥२६॥
चिक्षिपुरुभयोः सैन्या अन्यस्त्राणि मिथो भृशम् ।
शस्त्रास्त्रैस्ते पुनर्जघ्नुः समुद्दिश्य परस्परम् ॥२७॥
शस्त्रास्त्रघर्षणोद्भूतै रग्न्यस्त्रै श्चार्चिरुद्गतैः ।
निशीव दीपखद्योतैः संग्रामं शुशुभे भृशम् ॥२८॥
बभूव तुमुलं शब्दो गर्जितैरमरद्विषां ।
गजानां क्रौञ्चरावैश्च अश्वानां हेषितैस्तथा ॥२९॥
ततो द्विपतयोगस्त्य प्रजघ्नुः कच्छपासुरम् ।
जयन्तश्चाहनच्छंखं शक्रो वज्रं तथा पुनः ॥३०॥
शंखे शंखरवं कृत्वा जघान त्वसिनामरान् ।
विनदन् कच्छपःक्रोधात्त्वगस्थिषु प्रहारतः ॥३१॥
दैत्यराजोपि च क्रोधान्नागेन्द्रं शक्रवाहनं ।
गदया ताडयामास ऐरावतो व्यालोडयत् ॥३२॥
वज्रं चिक्षेप शक्रश्च बलिपुत्रे रुषा पुनः ।
ततः स पातयद्वज्रो नाभौ बलिसुतस्य च ॥३३॥
तस्य नाभौ ह्यभूल्लग्नः वज्रस्वर्णगतो यथा ।
वज्रः शक्रेण संत्यक्तः अपिदैत्यार्द्दमन्दमः ॥३४॥
वज्रनाभ इति प्रोक्तः सर्वैस्तस्याभिधानतः ।
ततः प्रभृति दैत्योसौ वज्रनाभः प्रचक्ष्यते ॥३५॥
अवतार्य रथात्तूर्णं वज्रनाभोपि वै रुषा ।
जग्राह मुकुटं दोष्णा सकेशं हि दिवस्पतेः ॥३६॥
तस्मिन्काले ततो दैत्या जघ्नुः शस्त्रैः शरैः सुरान् ।
रथान् रथैश्च संयोज्य पदातींश्च पदातयः ॥३७॥
तस्मिन्काले शरीरस्य वागुद्बभूव चाम्बरात् ।
मा मा वज्र प्रहन्तव्यो दिवस्पतिः कदेति च ॥३८॥
अशरीरवचो वज्रः श्रुत्वा निववृते तदा ।

त्रिदशास्तद्भयत्रस्ताः प्रेक्ष्य शक्रार्दनं युधि ॥३९॥
संत्यज्यायोधनं देवाः भेजिरे हि दिशो दश ।
मुक्तकेशं पुरोधाय ब्रह्माणं शरणं ययुः ॥४०॥
शचीपतिं दमितं यस्मात्तस्माद्रक्षाय सर्वतः ।
इन्द्रदमन इत्याख्यः प्रोक्तः सर्वजनैर्हि सः ॥४१॥
तस्मिन्काले ततोऽगस्त्य दानवाः घोरविक्रमाः ।
विविशुः शक्रराज्यं वै विद्राव्य तरसाऽमरान् ॥४२॥
राज्यं कर्तुं ततो दैत्याः प्रचक्रिरे मुदान्विताः ।
रत्नालयं समालोक्य विस्मयोत्फुल्लमानसाः ॥४३॥
ततो वज्रोऽमरावत्यां राज्यं कर्तुं मनो दधे ।
तद्वार्तां ज्ञानवान् ब्रह्मा दैत्यचेष्टाञ्च तादृशीम् ॥४४॥
ततो ब्रह्मा समागत्य यानेन ब्रह्मलोकतः ।
व्याजहार वचः शीघ्रं वज्रनाभाय तत्र च ॥४५॥

ब्रह्मोवाच ।

न स्थातव्यं हि दैत्येन्द्र युष्माभिरत्र निश्चयम् ।
मे ज्योतीरक्षिते राज्ये अन्यैश्च त्रिदशान् विना ॥४६॥
लब्धकीर्तिर्भवेद्रत्र जयेनानेन सन्ततम् ।
तवेन्द्रदमनो नाम सत्यं सद्यः प्रवर्तते ॥४७॥
विविधोपद्रवैर्युक्ते न त्वं स्वर्गे निवत्स्यसि ।
वत्स्यसि सुप्रभापुर्यां जित्वा पातालदिग्पतीन् ॥४८॥
मयेनासुरमुख्येन पूर्वकाले सुनिर्मितम् ।
बिलमस्ति महाबाहो जठरे चन्दनागिरेः ॥४९॥
रत्नमयालये दिव्ये रत्नार्चिभिर्विराजिते ।
महाह्रदे रहस्ये च कमलोत्पलभूषिते ॥५०॥
इन्द्रदमन गच्छाशु आकर्ण्य मम शासनम् ।
स्थातव्यञ्च बिले तत्र सुनिर्गलज्वलोज्ज्वले ॥५१॥

स्कन्द उवाच ।

एवं संभाष्य दैत्येन्द्रं प्रस्थाप्य धरणीतलम् ।
सुरेन्द्रं रणविध्वस्तं भगवानब्रवीत् पुनः ॥५२॥

ब्रह्मोवाच ।

प्रादुर्भूतः शचीनाथ मथुरायां जनार्दनः ।
जालनेमिसमुद्भूतं कंसं नाम हनिष्यति ॥५३॥
तस्य पुत्रो महावीरः प्रद्युम्न इति विश्रुतः ।
द्वारकायां यदा जातो मधुकामांशसंभवः ॥५४॥
स काले शम्बरं दैत्यं ते रिपुञ्च हनिष्यति ।
वज्रनाभं च ते शत्रुं सभ्रातरं हनिष्यति ॥५५॥
त्यक्तव्यं खलु नो राज्यं सर्वमेव समाज्ञया ।
सुरान्पालय देवेन्द्र तच्छङ्कां त्यज्य वै खलु ॥५६॥

स्कन्द उवाच ।

एवं संबोध्य देवेन्द्रो ब्रह्मणा च घटोद्भव ।
अभिषिक्तः सहस्राक्षः प्रविवेशामरावतीम् ॥५७॥
ब्रह्मापि प्रययौ यानैर्ब्रह्मलोकं गणैः सह ।
संबोध्य त्वरितं शक्रं अभिषिच्यासुरैः सह ॥५८॥
तत शक्रोऽमरावत्यां सुखानि बुभुजे खलु ।
संपाल्य त्रिदशान् सर्वान् शत्रुतो विगतज्वरः ॥५९॥
अपीन्द्रदमनश्शीघ्रं प्रययौ मेदिनीं मुने ।
ब्रह्मणो वचनं पथ्यमादाय हर्षमानसः ॥६०॥
ततो रसातलं रम्यं प्रविवेश महासुरः ।
गर्जद्भिर्दितिभिर्वीरैः स्वसैन्यैः परिवारितः ॥६१॥
रसातलप्रविष्टे तु दानवे युद्धदुर्मदे ।
दुद्रुवुः शरणं तस्य पन्नगाः राक्षसाः पुनः ॥६२॥
तत्रौजसां हितार्थेन वासुकिर्भुजगाधिपः ।
दत्वा रत्नान्यनेकानि दैत्येन्द्रमिदमब्रवीत् ॥६३॥
जितं पूर्वं भवत्कीर्त्या सर्वमेव रसातलम् ।
जेतुं नापेक्षते राजन् पुनर्नागत्य विग्रहैः ॥६४॥
इत्युक्त्वा प्रददौ चार्घ्यं वज्रनाभाय पन्नगाः ।
ददुर्भूयो महार्हाणि नानारत्नानि भूरिशः ॥६५॥
रत्नान्यादाय वज्रोसौ मर्त्यलोकं समागमत् ।
पृथिव्यां स च भूपालान् सर्वान् समजयत्पृथक् ॥६६॥
वस्त्राभरणरत्नानि अवलुम्प्य समन्ततः ।
समादाय ततो वज्रः सुप्रभानगरं ययौ ॥६७॥
ततो मयाऽसुरं दैत्यं समाहूयादिशद्वचः ।
रत्नपुरीं निर्मनायाशु तद्रत्नैः कनकैर्बहु ॥६८॥
मयश्च निर्ममे स्वर्णैः सुप्रभानगरोत्तमम् ।
सुस्तंभैः स्फाटिकैः शुभ्रं रत्नानि खचितोज्ज्वलम् ॥६९॥

तस्मिन्राज्ये वरबहुसुखं शक्रतापः सभृत्यः
कश्चित्कालं खलु च बुभुजे देववर्गं प्रशास्य ॥७०॥

दिग्भ्यः स्वर्गात्सुविपुलकरं नित्यमादाय शश्व-
त्पातालाद्वै मणिवरचयं मेदिनीपालकाच्च ॥७१॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये
प्रद्युम्नोत्तरे इन्द्रदमनदिग्विजयो नाम-
सप्तपञ्चाशत्तरशततमोऽध्यायः ॥१६७॥

—❀❀❀—

स्कन्द उवाच ।

ततश्च मन्त्रयामास मन्त्रज्ञैः सह मन्त्रिभिः ।
रुन्धनाय च वाग्मत्याः स्वसाक्रीडनहेतुतः ॥१॥
उत्पाट्य तरसा शैलं शंखो नाम महाबलः ।
चन्दनागिरिमूले वै बबन्ध सुदृढं मुने ॥२॥
उत्पाट्य गिरिसानूनि कन्दपः सहसा पुनः ।

दोर्भ्यामादाय चाजस्रं बबन्ध दृढबन्धनं ॥३॥
नियुतानां च नागानां मत्तानां च बलान्वितः ।
स इन्द्रदमनो भूय उत्पपाट महागिरिम् ॥४॥
दोर्भ्यामुद्धृत्य शैलेन्द्रं सेतुं बबन्ध वै दृढम् ।
प्रकीर्णसर्पगोधश्च नीयमाने द्रुमोपलम् ॥५॥
चित्रं प्रापुः सुराः सिद्धाः चारणा मुनयोऽम्बरे ।
तादृशं बन्धनं प्रेक्ष्य पूर्वं इव हनूमता ॥६॥
संरुध्य वाग्मतीतोयं चन्दनागिरिमालया ।
रक्षणाय च तत्सेतुं शंखं च स्थापयत्तदा ॥७॥
आदिदेशाशु शंखाय महेन्द्रदमनो मुदा ।
रक्ष शंख त्विदं सेतुमित्यत्र प्रवसन्सदा ॥८॥
निवत्स्यसि विराध त्वं वाग्मतीशम्बरान्तरे ।
संवरात्र ह्रदेजस्रं रिपूणां मा प्रवेशय ॥९॥
प्रभावति महाभागे सखीभिः सह सन्ततम् ।
अस्मिन् ह्रदे समुद्याने विहारस्य यथासुखम् ।
भ्रातृभ्योऽसौ भगिन्यै च एवमादिश्य कुंभज ॥१०॥
कन्याशतविवाहेन प्रविवेश पुरोत्तमम् ।
स्वर्णगृहैश्च सम्पूर्णे रत्नतोरणशोभितैः ॥११॥
तडागोद्यानरुचिरे पुरेस्मिन्सुमनोहरे ।
कामिनीभिः सह स्वेच्छं सततं राजलीलया ॥१२॥
बुभुजेतिचिरं सौख्यं वज्रोसौ देवदुर्ज्जयः ॥१३॥

त्रिंशत्सहस्राब्दगतेन याव-
द्राज्यं चकाराऽसुरनायकोऽसौ ।
भूपालकन्याशतशोधभोग्यं ,
यौपालतापो विगतज्वरोऽभूत् ॥१४॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये प्रद्युम्नोत्तरे सेतुबन्धननामाष्टषष्ट्युत्तरशततमोऽध्यायः ॥ १६८ ॥

—❀❀❀—

स्कन्द उवाच ।

वाग्मती च ह्रदीभूता कमलोत्पलसंभृता ।
अगाधातिशयं स्वच्छः शुशुभे तद्ध्रदो भृशम् ॥१॥
मीनैश्च सारसैर्हंसैश्चकोरैः क्रौञ्चनादितैः ।
हिरण्यैः कमलैश्चान्यैः शुशुभेतिशयं ह्रदः ॥२॥
प्रभावती रराभार्या तद्ध्रदे धवलनिर्मले ।
सखिभिः सह कौमारी कमलोत्पलराजिते ॥३॥
बहुरत्नालये रम्ये रराम सा प्रभावती ।
क्रीडोद्यानेषु चित्रेषु फलपुष्पाकुलेषु च ॥४॥
सुरम्येषु नगामेषु कन्दरीषु दरीषु च ।
ह्रदीभूते च वाग्मत्या रराम बहुशो हि सा ॥५॥
मोहयन्ती मनो यूनां तस्या रूपेण लीलया ।
सखिभिः सह सा देवी रराम जलक्रीडनैः ॥६॥
एकदा दिवसे देवी ददर्श नारदं मुने ।
स्वर्णालयान्तरे रम्ये राजभिः पूजितं मुहुः ॥७॥
राजार्हणावसाने तं प्रणिपत्य प्रभावती ।
पप्रच्छ धर्महेतुं च वरपतीप्सया मुदा ॥८॥

प्रभावत्युवाच ।

प्रश्नकामाधुनाहं च सर्ववार्ताविदे मुने ।
स्त्रीणां ह्रदि स्थितं लभ्यं केन धर्मेण चान्यकैः ॥९॥
को धर्मः सर्वधर्माणां येन लभ्यं ह्रदेप्सितं ।
मन्दभाग्यावलायैतद्वद मे मुनिसत्तम ॥१०॥

नारद उवाच ।

विना देव्या प्रसादं च न लभ्यते तदीप्सितम् ।
योगिनामपि सिद्धानामन्येषां च सुते किमु ॥११॥
अतः पूर्वोत्तरे भागे वाग्मतीप्रभवे गिरौ ।
तत्राराधय देवीं त्वं सा दास्यति तवेप्सितम् ॥१२॥

स्कन्द उवाच ।

इत्युक्त्वान्तर्दधेऽगस्त्य ! नारदे हि प्रभावती ।
तद्वचनं समाधाय धर्मं चचार सन्ततम् ॥१३॥
तत्रागत्य प्रभादेवी प्रतिमां मृण्मयीमुमां ।
पञ्चोपचारकै भक्त्या अपूपुजन् मुदानिशम् ॥१४॥
वाग्मतीप्रभवे स्नात्वा साराधयन्महेश्वरीं ।
नियमैर्गीतवाद्यैश्च उषित्वा मासमेकतः ॥१५॥
चैत्रसितद्वितीयायां पूजिते च महानिशि ।
आविर्बभूव सा देवी वरदानाय तत्क्षणम् ॥१६॥
अभिप्रेक्ष्याशु सा देवीं योगीश्वरीं ननाम वै ।
भक्त्या च स्तुतिभिर्दिव्यैः समर्हणैरपूपुजत् ॥१७॥

अतिपुलकितदेहा प्रेक्ष्य देवीं च देवी,
विपुलवरददान्तां पूज्य पूजोपचारैः ।
प्रणतविनयभावैः संपरिक्रम्य भक्त्या ।
तुहिनगिरिसुतां सा अब्रवीत्साधु वाक्यम् ॥१८॥

प्रभावत्युवाच

योगीश्वरि नमस्तेस्तु त्वत्पादाब्जप्रदर्शनात् ।
अद्यैव सफलं सर्वं तपोदानव्रतं भवेत् ॥१९॥
जानीव देहि नौ कार्यं सिद्धं मनोरथं सति ।
मेनुरूपं प्रभुं देहि मातः सर्वमनोहरम् ॥२०॥

स्कन्द उवाच ।

श्रुत्वैतद्वचनं तस्या देवी प्रफुल्ललोचना ।
भावभक्तिं समालोक्य शुभं वचनमब्रवीत् ॥२१॥

उमोवाच

एवमेव सुरूपे ते यत्त्वया वाञ्छितं प्रियं ।
मम प्रदर्शदान्नूनं लभिष्यसि न संशयः ॥२२॥
कृष्णपुत्रो महावीरः प्रद्युम्नो नाम विश्रुतः ।
मत्प्रभावाद्धि स स्वप्नं प्राप्य त्वात्रागमिष्यति ॥२३॥
चैत्रकृष्णचतुर्दश्यामद्यतो द्वादशे दिने ।
तीर्थयात्राच्छलेनाशु दर्पकोत्रागमिष्यति ॥२४॥
चौरवृत्तिं समासाद्य विवाहेन निशि ध्रुवं ।
इमां चन्द्रवतीं त्वां च द्वारकां स प्रणेष्यति ॥२५॥
प्रभापती द्रुतं सोत्र भ्रातरस्ते वधिष्यति ।
वाग्मती च ह्रदी भूता मुक्ता गंगां हि यास्यति ॥२६॥

स्कन्द उवाच ।

इत्युक्त्वान्तर्दधे देवी दात्री ताभ्यां वरोत्तमं ।
तच्छिखरे उमागस्त्य स्वाभाभिर्भासयन्दिशः ॥२७॥
द्वारवत्यां तदा भूयः प्रद्युम्नो ह्यलभन्निशि ।
क्रीडनं च प्रभावत्या बलिपुत्र्या समं सुखम् ॥२८॥

प्रद्युम्नोभूदुषसि च भृशं विह्वलाङ्गस्तदासौ,
तद्विश्लेषेऽपि सह विगते चेष्टितं यत्तया वै ।
नेपालेष्वाप्लवनमनुतत्सर्वतीर्थेष्वपृच्छत्,
स्नानव्याजैर्हरिमपि च तां द्रष्टुकामो हि यात्राम् ।२९।

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपाल-
माहात्म्ये प्रद्युम्नोत्तारे उमावरप्रदानं
नामोनसप्तत्युत्तरशततमोऽ-
ध्यायः ॥१६९॥

—❀❀❀—

प्रद्युम्न उवाच

भगवन् गन्तुमिच्छामि तीर्थयात्रां समुत्तारे ।
यस्माद्विमुच्यते चाहं सर्वपापैर्जनार्दनः ॥१॥
नैपालेषु च तीर्थेषु स्नातव्यं क्रमशो विभो ।
नय तेषु च तां तीर्थं स्नायते त्वत्प्रसादतः ॥२॥
शम्बरस्य वधैः पापैर्लिप्तोहं च विशेषतः ।
तानि पापानि सद्योहं मोक्तुकामोऽधुना विभो ॥३॥

स्कन्द उवाच ।

इत्याकर्ण्य वचः कृष्णः प्रद्युम्नस्य तदा मुने ।
तार्क्ष्यं संस्मारयामास तीर्थयात्राहृताय च ॥४॥
बद्धाञ्जलिर्मुने तार्क्ष्य उवाच वचनं हरिं ।
किंकरोहं विभो ते तत्किं करोमि विधीयताम् ॥५॥
इत्याकर्ण्य वचः कृष्णस्तार्क्ष्यभक्तिभिरीरितम् ।
व्याचष्ट वचनं तस्मै मधुरयन् वचोत्तमम् ॥६॥
तीर्थयात्रामहं तार्क्ष्य गच्छामि चात्मजैः समम् ।
अतः संस्मारितः सद्यः हिमाद्रिसंभवेषु च ॥७॥
इत्युक्त्वा सहसा कृष्णस्तार्क्ष्यं पृष्ठं समारुहत् ।
प्रद्युम्नगदसाम्बैश्च चक्रपाणिः समं मुने ॥८॥
व्याचष्ट वचनं कृष्णो नीयमाने गरुत्मति ।
आत्मजेभ्यस्तदागस्त्य दर्शयन्स्वरात्विति ॥९॥

श्रीकृष्ण उवाच

यात्रोत्सवरतानां हि रम्यकालो हि वर्तते ।
नैपालेषु च तीर्थेषु स्नातव्यं काम चैत्रिके ॥१०॥
पश्य स्वच्छजलैः पूर्णं ह्रदं च दीर्घिकां तथा ।
प्रसन्नसलिलैः पूर्णाः सर्वाः पश्य सरिद्वराः ॥११॥
पश्याशु धरणीं रम्यां नानापक्षिगणैर्भृताम् ।
तीर्थान्येतानि पश्यार्य हिमाद्रिसंभवानि च ॥१२॥
एतां पश्याशुकावेरीं स्नायतां विधिवत्सुताः ।
एतस्यां स्नानमात्रेण अश्वमेधशतं लभेत् ॥१३॥
विगस्तिं पश्य कामाशु स्नायतां भक्तितः पुनः ।
स्नातकानां हि चैतस्यां गोकोटिफलमालभेत् ॥१४॥
पश्य महानदीं सिंचामनयोःस्नायतां पुनः ।
अनयोः स्नानमात्रेण कपिलाकोटिफलं लभेत् ॥१५॥
शतद्रुं पश्य पुत्रेमां भक्त्यास्यां स्नायतां पुनः ।
नरमेधशतं स्नानात्स्नातकः प्राप्यते क्षणात् ॥१६॥
इमां सरस्वतीं पश्य अस्यां स्नाहि च भक्तितः ।
सर्वमेधफलं प्राप्य वागीशत्वं भवेत्क्षणात् ॥१७॥
व्यासगंगां पुरः पश्य अस्याञ्च स्नायतां सुत ।
अस्याञ्च स्नानमात्रेण सायुज्यं मयि लभ्यते ॥१८॥
पश्य महानदीं गंगामस्यां च स्नायतां पुनः ।
कोटिजन्मार्जितैः पापैः स्नाता सकृद्विमुच्यते ॥१९॥
अस्याममलकनन्दायां स्नायतां स्नातकः पुनः ।
परत्रेह कृतान्पापान् त्यक्त्वा रुद्रपुरं व्रजेत् ॥२०॥
पश्य त्रिविक्रमां गङ्गां : म गादोद्भवां पराम् ।
अस्यां स्नाता च पुण्यात्मा मल्लोकं खलु गच्छति ॥२१॥
गोमत्यां स्नायतामस्यां भक्तिपूर्वं हि मन्मथ ।
गवां कोटिफलं प्राप्य गोलोकं हि व्रजेत्खलु ॥२२॥
शतरुद्रां नदीं पश्य अस्यां च स्नायतां पुनः ।
गवां कोटिफलं प्राप्य पुण्यात्मैशापुरं व्रजेत् ॥२३॥
पश्य महानदीं रेवां स्नायतां भक्तितः स्मर ।
अस्यां स्नाता हि पुण्यात्मा मम लोकं व्रजेत्सुधीः ॥२४॥
स्नायतां कालिकायाञ्च गण्डक्यां भक्तितःसुत ।
सर्वजन्म परित्यज्य मम लोकं स गच्छति ॥२५॥
गंगाख्यायां च गण्डक्यां स्नायतां विधिवत्स्मर ।

गवां लक्षोद्भवं प्राप्य रुद्रलोकं स गच्छति ॥२६॥
कौमार्यां खलु गण्डक्यामस्यां च स्नायतां पुनः ।
षण्मौषल्यफलं प्राप्य स गच्छेदैश्वरं पुरम् ॥२७॥
भद्रवत्यां महानद्यां स्नायतां विधिवत्पुनः ।
गवां कोटिफलं प्राप्य शक्रलोकं वसेत्सुखी ॥२८॥
अश्विपायच्च वैष्णव्यां गण्डक्यां स्नायतां पुनः ।
गवां नियुतजं प्राप्य मम लोकं स गच्छति ॥२९॥
स्नायतां नारसिंह्यां च अस्यां स्नाता नरोत्तमः ।
दशाश्वमेधजं प्राप्य मम लोकं स गच्छति ॥३०॥
तवो ब्राह्मयां च गण्डक्यां स्नायतां भक्तितः स्मर ।
सर्वयज्ञफलं लब्ध्वा ब्रह्मलोकं स गच्छति ॥३१॥
गणेशाख्ये महाकुण्डे स्वर्णकूटाचले पुरः ।
यः स्नायते सुधीः पुत्र कार्यसिद्धं प्रलप्स्यति ॥३२॥
गणेश्वरेण पुरा तत्र सिद्धं लब्धं च तत्र वै ।
स्नातकः सिद्धिभाग् धीरा गणलोकं स गच्छति ॥३३॥
माहेश्वर्यां च गण्डक्यामस्यां च स्नायतां सुत ।
कोटिगोमेधजं प्राप्य रुद्रलोकं स गच्छति ॥३४॥
नीलकण्ठमहाकुण्डे भक्त्या यः स्नायते स्मर ।
विहाय चोद्भवं स्नात्वा रुद्रलोकं व्रजेत्सुधीः ॥३५॥
एषु त्रिसप्तकुण्डेषु भक्त्या संस्नायतां पुनः ।
इह लोकं परित्यज्य स्नाता गच्छति वै परम् ॥३६॥
दुर्गाख्यायां च कौशिक्यां स्नातव्यं भक्तितः सुत ।
गच्छत्यस्यां परं स्नाता विहाय दुःखसंसृतिम् ॥३७॥
नारायण्यां च कौशिक्यां भक्त्या यः स्नायते स्मर ।
गवां लक्षफलं लब्ध्वा रुद्रलोकं स गच्छति ॥३८॥
स्नायते चण्डिकाख्यायां कौशिक्यां भक्तितो हि यः ।
नरमेधशतं प्राप्य रुद्रलोकं स गच्छति ॥३९॥
स्नायते शिवदूत्यां यः कौशिक्यां भक्तितः सुत ।
स्नातास्यां खलु पुण्यात्मा गवां कोटिफलं लभेत् ॥४०॥
स्नाहि पुत्र कपर्दिन्यां कौशिक्यां हि प्रणम्य च ।
दशकोटिमखं प्राप्य रुद्रलोकं स गच्छति ॥४१॥
वाराह्यां स्नायतामस्यां कौशिक्यां भक्तितः सुत ।
अश्वमेधशतं लब्ध्वा स्नाता गच्छति शाङ्करम् ॥४२॥
वासव्यां खलु कौशिक्यां स्नायतां सुत नम्य च ।
शताश्वमेधजं प्राप्य स्नाता गच्छति वै दिवम् ॥४३॥
दुर्गातीर्थे सुत स्नाहि भीमतीर्थे ततः पुनः ।
शचीतीर्थे च संस्नाहि स्वहातीर्थे विशेषतः ॥४४॥
योगतीर्थे पुनः स्नात्वा दोलाद्रिं च प्रणम्यतां ।
रत्नह्रदे खलु स्नात्वा स्नाहि शंखह्रदे पुनः ॥४५॥
मे मूर्तिं पश्य कन्दर्प योऽद्रिमाख्य पश्यति ।
मल्लोकं स व्रजेद्धीरो विहाय संसृतिं खलु ॥४६॥
रत्नवत्यां ततः स्नाहि वीरभद्रे हि दर्पक ।
गन्धर्वाख्ये जले स्नाहि विमलाम्बुजले पुनः ॥४७॥
गोदावरीसमुद्भूते स्नात्वा तीर्थे ततः पुनः ।
चित्रह्रदे जलाप्लुत्य चन्द्रवत्याश्च दर्पक ॥४८॥
प्रभातीर्थे सुत स्नाहि सरस्वत्यां च सुन्दरे ।
व्याघ्रतीर्थे ततः स्नात्वा धर्मगंगाजले पुनः ॥४९॥
कनखले ततः स्नात्वा मीनतीर्थे ततः पुनः ।
नवधाराजले स्नाहि शक्रह्रदे तथा पुनः ॥५०॥
रुद्रमतीसमुद्भूते भक्तितः स्नायतां स्मर ।
ह्रदे उशीरबीजाख्ये पवित्रे स्नायतां सुत ॥५१॥
लुंठिकाश्रममूले च स्नायते यो हि पंडितः ।
दशगवां फलं प्राप्य शक्रलोकं स गच्छति ॥५२॥
सिद्धरसाजले स्नात्वा स्कन्दतीर्थे ततः पुनः ।
विष्णुपदीसमुद्भूते स्नायतां खलु मे प्रिये ॥५३॥
नारसिंहीजले स्नात्वा ज्येष्ठिलायाः समुद्भवे ।
धर्मनदीसमुद्भूते भक्त्या च स्नायतां पुनः ॥५४॥
वाराहीसंभवे स्नात्वा मृगेन्द्राद्रिं प्रणम्यताम् ।
वाग्मतीप्रभवे स्नाहि भक्त्या प्रणम्य वाग्मतीम् ॥५५॥
कोटिजन्मार्जितैः पापैः स्नाता मुक्तो न संशयः ।
वाग्मत्यां स्नानमात्रेण महेशो भवेत्सुत ॥५६॥
अत्र मुञ्जवतः कूटे त्वं भस्मसात्कृतः पुरा ।
नेत्राग्निहेतिभिर्येन गौरी समागमे सुत ॥५७॥
प्रणम्यतां महादेवः प्रद्युम्न भक्तितो ह्ययम् ।
लिङ्गमूर्त्तिधरः शम्भुः कार्यन्ते सफलं यतः ॥५८॥
प्रणम्यतां मुनिश्रेष्ठो दुर्वासा हि तपोधनः ।
सिद्धाः सप्तर्षयो भक्त्या संस्नात्वा वाग्मतीजले ॥५९॥

स्कन्द उवाच ।

आकर्ण्य वचनं भक्त्या प्रद्युम्नो [illegible]सुस्तदा ।
वाग्मतीप्रभवे स्नात्वा वन्दयामास तांश्च तान् ॥६०॥

इत्थं हरिश्चासवयन् स्वपुत्रा,
न्तीर्थानि चोद्दिश्य मुने सुतोये ।
हेमाद्रिकुञ्जे भ्रमयन्मुहुर्वै,
एकाम्रवासीद्धि निशां सपुत्रः ॥६१॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपाल माहात्म्ये प्रद्युम्नोत्तरे प्रद्युम्नतीर्थयात्रा नाम त्रिसप्तत्युत्तरशततमोध्यायः ॥१७३॥

स्कन्द उवाच

द्वादश्यां चैत्रकृष्णस्य प्रातः सस्नौ सुतैः समं।
तन्निशायां व्यतीतायां वाग्मतीप्रभवे हरिः ॥१॥
नारदः प्रययौ तत्र वेणुं प्रवादयन् मुदा।
तुष्टाव स्तुतिभिःकृष्णं व्याचष्ट वचनं पुनः ॥२॥

नारद उवाच।

भगवन् पुण्डरीकाक्ष सूर्यकेतुर्नराधिपः।
बहुकालं स्थितस्तत्र स्वर्गे गमनकाङ्क्षया ॥३॥
सा राज्ञो दुहिता देवी प्रद्युम्नाय प्रकल्पिता।
नाम्ना चन्द्रवती ख्याता चन्द्रबिम्बनिभानना ॥४॥
तां हर्तुमीहते पापो महेन्द्रदमनोऽसुरः।
संमोहादेव दुर्बुद्धिरप्रदानान्महीपतेः ॥५॥
अतः पूर्णेन्दुवक्त्रां तां बालां बालमृगेक्षणाम्।
रूपातिशालिनीं कन्यां विवाहः क्रियतां स्मर ॥६॥
बहुकालं निरुद्धाङ्गी चन्दनागिरिमालया।
वाग्मतीयं सरिच्छ्रेष्ठा गंगां यातुं समीहते ॥७॥
आसीत्प्रभावती नाम राजपुत्री च सुन्दरी।
प्रद्युम्नं काङ्क्षते नित्यं पतित्वेन तपोबलात् ॥८॥
मधुस्त्वं पूर्वदेहेन कामश्चैव त्वमेव हि।
या माधवी मधोर्भार्या सैषा देवी प्रभावती ॥९॥
अस्माद्विकल्पमुत्सृज्य प्रतिगृह्ण त्वमादरात्।
सुप्रभानगरे तत्र अतो नैर्ऋत्यदेशतः ॥१०॥
अद्यैकां रजनीमत्र स्थातव्यं कामशेखरे।
भवतापि विभो कृष्ण दोलाद्रौ गमनं पुनः ॥११॥

कृष्ण उवाच।

अवश्यमेव गन्तव्यं दोलाद्रिशिखरं मुने।
तिष्ठ पुत्रात्र वै सार्द्धं भ्रातृभिः सह पुण्यके ॥१२॥
अवश्यमेव कामोयं पाणिग्रहं करिष्यति।
राजपुत्र्योस्तयोर्दान्त बलिपुत्रे हते सति ॥१३॥
गमिष्यति ह्यसौ राजा सूर्यकेतुश्च नारद।
शिवपुरं महत्सौख्यं परिवारैः समं पुनः ॥१४॥
मोदयसे वाग्मतीं काम चक्रेणानेन वर्चसा।
भित्वा सेतुं महद्बन्धं गंगां यास्यति वाग्मती ॥१५॥

स्कन्द उवाच।

इत्युक्त्वा प्रययौ कृष्णो दोलाद्रिं गरुडध्वजः।
उपदेशं समुद्दिश्य पुत्रायागस्त्य सांप्रतम् ॥१६॥
अवात्सीत्सह कन्दर्पो भ्रातृभिः सह कुम्भज।
मुञ्जवच्छेखरे व्यक्तं पुण्यफलं प्रकाशयन् ॥१७॥
प्रातः स्नातः सुमुनिवचनान्मुञ्जवच्छेखरेऽसौ,
भक्त्या दध्यौ निशि गिरिसुतां वाग्मतीसंभवे वै।
अभ्यर्च्यार्य्यां दितिसुतसुतां लब्धकामो हि कामः
स्तद्वाञ्छां सा वरभव ददौ सिद्धकामं च तस्मै ॥१८॥

इतिश्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये प्रद्युम्नोत्तरे नारदसमागमो नाम चतुःसप्तत्युत्तरशततमोऽध्यायः ॥१७४॥

—❀❀❀—

स्कन्द उवाच।

चैत्रसितत्रयोदश्यां स्वप्नं ततोलभन्निशि।
मुने ब्राह्मे मुहूर्त्ते सा प्रभावतीति वै शृणु ॥१॥
प्रद्युम्नेन समं कामं कामयामास वै सुखम्।
व्यतीतायाञ्च निद्रायां रुरोद सा भृशं मुहुः ॥२॥
सखी पप्रच्छ तां हंसी तन्मुहूर्त्ते तदा मुहुः।
तस्या क्रन्दनमाकर्ण्य करुणोदितसुस्वरम् ॥३॥

हंस्युवाच।

कस्माद्रोदिषि कल्याणि क्व भयमागतन्तव।
अस्मिन्ब्राह्मे मुहूर्त्ते त्वं मा रोदय प्रभावति ॥४॥
अथवा त्वत्प्रियं दृष्टं स्वप्ने तत्कांक्षितं सखि।
वद तन्मे यथातथ्यं प्रतीकारं करोम्यहम् ॥५॥

प्रभावत्युवाच।

मा पृच्छ्यतां सखे हंसि मत्स्वप्नं मां त्वयाधुना।
दैवेन वञ्चिताया मे अभागिन्या निरंतरम् ॥६॥
किं वच्म्यहमिदानीन्ते स्वप्नदृष्टं मया हि यः।
व्रीडायुक्तं वचो देवी तथापि वच्म्यहं शृणु ॥७॥
अपूर्वं सुन्दरं कान्तं दृष्टं स्वप्ने मयाऽधुना।
प्रद्युम्नाख्यो हरेः पुत्रो बालार्कसदृशप्रभः ॥८॥
स मां वै कामयामास नानाक्रीडाविधानकैः।
कामरूपो भवेत्साक्षाच्छश्वत्प्रतोषयँश्च माम् ॥९॥
मां विहायाऽधुना हंसि निद्रान्ते स गतो बहिः।
मत्प्राणञ्च समादाय स्यान्मे द्वितीयजीवनः ॥१०॥
कथं जीव्यामहं हंसि प्राणान्ते तेन वै विना।
पण्डितासि वदोपायं येन प्राणं प्रधारये ॥११॥

हंस्युवाच।

मा दुःखय प्रभादेवि स्वप्ने प्रेक्ष्य प्रियाप्रियं।
पश्यन्ति निशि लोका य स्वप्नञ्च विविधातरम् ॥१२॥
शृणु देवि प्रवक्ष्यामि स्वप्नानां च शुभाशुभं।
यं यं प्रेक्ष्य नराः स्वप्नं प्रलपन्ते शुभाशुभम् ॥१३॥
स्वप्नन्तु प्रथमे यामे वर्षेणापि फलं ददेत्।
द्वितीये चाष्टभिर्मासैस्त्रिभिर्मासैस्तृतीयके ॥१४॥
चतुर्थे चार्धमासेन दृश्यते नात्र संशयः।

अरुणोदयवेलायां दशाहेन फलं लभेत् ॥१५॥
यदि सुप्स्यति स्वप्नान्ते स्वप्नं भवति निष्फलं ।
श्रुत्वा विश्राम्यते स्वप्ने यावत्संचरते नरः ॥१६॥
भवत्या योऽधुना दृष्टः कालेऽस्मिन्नरुणोदये ।
लभिष्यसि ह्यवश्यन्तं दशाहाभ्यन्तरे दिने ॥१७॥
यदि नात्र प्रभादेवी कान्तोऽसावागमिष्यति ।
उपायं तत्करिष्यामि कातरतां च मा व्रज ॥१८॥
देवीमन्त्रोपनीताहं दुर्वाससा महर्षिणा ।
मम भक्तिप्रतोषेण वाग्मतीप्रभवे गिरौ ॥१९॥
करिष्यामि ह्युपायं तन्मन्त्रगुरुप्रसादतः ।
श्वःपश्यसि प्रभादेवि यं स्वप्ने प्रेक्षितं हि तम् ॥२०॥

स्कन्द उवाच ।

एवं संबोध्य सा हंसी प्रातःकाले प्रभावतीं ।
प्रद्युम्नागमनं द्रष्टुमुत्सुका सा बभूव हि ॥२१॥
तत्र लब्धवरो मारो भवान्या हि प्रसादतः ।
सुखंवक्त्रेलरेगत्य सिद्धमनोरथोऽभवत् ॥२२॥
चक्रुर्विमर्दणं तत्र ते प्रद्युम्नपुरःसराः ।
हरणाय प्रभावत्याः प्रदधुर्नटवेषणम् ॥२३॥
प्रययुर्यादवा वीराः सुप्रभानगरं द्रुतम् ।
नटवेषधराः सम्यक् मायाविमोहिचैत्रिके ॥२४॥
प्रचक्रुर्दानवास्तेभ्यः सत्कारं प्रेमतो भृशम् ।
स्वं देशमागतान्मत्वा तान्प्रेक्षितुं हि नर्तकान् ॥२५॥
मघोः शुक्लचतुर्दश्यां तत्र प्राप्ता हि नर्तकाः ।
पुष्पकोदये पूर्णं चुक्षुभिरे मनांसितत् ॥२६॥
ततोऽब्रवीत्प्रभावत्यै हंसी योगवती च तं ।
आलोकनाय नृत्यानां प्रद्युम्नागमनं तथा ॥२७॥

हंस्युवाच

यो दृष्टः खलु कल्याणि सुस्वप्ने पुरुषस्त्वया ।
समायाति स्वयं सोऽयं पश्यतां गोपुरान्तरे ॥२८॥
नटरूपं समास्थाय प्रद्युम्नोऽत्राङ्गणे हि सः ।
नर्तिष्यति भृशं देवि पश्य पूर्णमनोरथे ॥२९॥

प्रभावत्युवाच

भवितासि सखे हंसि त्वत्कृते पूर्णमानसा ।
समागच्छति कान्तोऽसौ न मृषा त्वद्वचः कदा ॥३०॥
त्वयाहं सहिता कान्तं द्रक्ष्यामहे हि तत्र तं ।
प्रकसन् हर्म्यके चात्र तिष्ठ मत्प्राणदेशिके ॥३१॥

स्कन्द उवाच ।

इत्युक्त्वा सहसा तस्थौ हंस्या सह प्रभावती ।
प्रद्रष्टुं कैशवीं नृत्यं हर्म्यस्योपरि वै मुदा ॥३२॥
ततस्ते यादवास्तत्र नीतिरत्यन्मुदा भृशं ।
स्त्रीपुंसां दधतो वेषान् मायाविनो हि मायया ॥३३॥
दशावतारमुद्दिश्य नरीनृत्यन् हि यादवाः ।
यच्चरित्रकं विष्णोस्तत्तद्यशांसि गीतयन् ॥३४॥
मुमुदुश्च भृशं दैत्याः समालोक्य प्रनर्तकान् ।
ऋक्षमर्कटरूपांश्च रामलक्ष्मणसेवकान् ॥३५॥
मुमुहुर्दानवा भूयो नर्तकानां भृशं मुने ।
नव रसान् समालोक्य बहुचेष्टाप्रचेष्टितान् ॥३६॥
बालवृद्धा युवन्दैत्याः प्रेक्षका योषितस्तथा ।
युद्धांश्च तादृशान्प्रेक्ष्य कपीनां विस्मयं गताः ॥३७॥
उत्थायोत्थाय नाट्यस्य विशेषेण पुनः पुनः ।
ददुर्वासांसि संतुष्टा ग्रैवेयवलयानि च ॥३८॥
हारान्मनोरमांस्तेभ्यो हैमवैडूर्यभूषितान् ।
पृथगर्थेषु दत्तेषु श्लोकैस्ते तुष्टुवुर्नटाः ॥३९॥
एवं प्रनृत्यैश्च सहानुजोऽसौ,
तान्मोहयत्तत्खलु मन्मथोऽपि ।
कान्ताप्रनृत्यैव भवेदजस्रं,
मायानुभूतिः किमु सर्वमोहः ॥४०॥
इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपाल
माहात्म्ये प्रद्युम्नोत्तरे दैत्यमोहनन्नाम
पञ्चसप्तत्युत्तरशततमोऽ
ध्यायः ॥१७५॥

स्कन्द उवाच ।

दूरादपि प्रभावत्या चित्तं विमथ्य मन्मथः ।
कामो विलोकनोद्भूतैः पञ्चबाणैर्जघान ताम् ॥१॥
रूपवन्तं गुणोपेतं प्रद्युम्नं नर्तकं मुहुः ।
मायाविनं महावीरं प्रेक्ष्याशु विह्वलीभूत् ॥२॥
लोलचित्तं समास्थाय तत्क्षणाद्धि प्रभावती ।
मन्मथोन्मथितस्वान्ता व्याचष्ट वचनं सखीम् ॥३॥

प्रभावत्युवाच

दह्यते सखि मे कायः कामस्यैव शराग्निभिः ।
परिशुष्य मुखं कण्ठं मनो मे परिमन्थितम् ॥४॥
द्वौ व्याधौ मां हतौ शश्वत् कामेक्षणशशीकरौ ।
असह्यशर एकोपि बहुशल्यं कथं क्षमे ॥५॥
अहो धूमायतेऽङ्गे श्रीदग्धस्यामे सखि प्रिये ।
कामामृतेन शीतेन सिञ्चया मां प्रजीवय ॥६॥
यदि न कुरुषे हंसि शल्यार्तस्याऽधुनौषधं ।
मत्प्राणं त्वयि संन्यस्य व्रजामि यमसादनम् ॥७॥

हंस्युवाच ।

मा मा प्रधर्षयार्ये त्वं चपलेनैव चेतसा ।

उपायं तत्करिष्यामि तां हंस्येवमबोधयत् ॥८॥
इत्युक्त्वा प्रययौ हंसि यत्र कामः प्रनर्तकः ।
भ्रमररूपमास्थाय हर्म्यस्योपरितो द्रुतम् ॥९॥
कामस्योपरितस्तत्र भ्रमतिस्माशु भृंगिणी ।
तत्कर्णे चावसत्क्षिप्रं ददंशतत्स्वरेण तम् ॥१०॥
कामश्चाप्यभवत्सद्यो भृंगरूपो मुने तदा ।
भ्रमतिस्म तया सार्द्धं नर्तकान् त्यज्य चाम्बरे ॥११॥
ततः स भ्रमरो व्योम्नि वंभ्रम्याशु समं तया ।
प्रसादोपर्य्यगच्छद्वै यत्र स्थिता प्रभावती ॥१२॥
नटाश्चाप्यर्द्धयामिन्यां प्रययुः स्वाश्रमं पुनः ।
तटांकं च समाप्याशु स्मरविरहिता मुने ॥१३॥
भृङ्गीतनुं परित्यज्य हंसी व्यक्ती बभूव हि ।
संदंश्य चाधरं तस्या व्यक्तो भवत्स्मरः पुनः ॥१४॥
बहिर्द्वारं च संरक्षन् तस्थौ हंसी निशान्तरे ।
तामारोप्य प्रभादेवीमंके स्मरोऽब्रवीद्वचः ॥१५॥

प्रद्युम्न उवाच ।

तवाननासन्निभकान्तिसंभवं,
कलानिधिं पश्य विराजितं दिशः ।
विहायसि द्योतितमंशुभिर्हिमैः,
पयोधिभङ्गैः चलितोज्वलं प्रिये ॥१६॥
उत्पतस्यसि महाभागे प्रिये चारुसुलोचने ।
व्योम्नि तारा विराजन्ते पंक्तिक्रमैश्च शोभनैः ॥१७॥
अधोमुखी प्रिये भूत्वा मां त्वं किञ्चिन्न भाषसे ।
वचोमृतैः प्रसिंच्याशु त्वयीगतं तृषार्त्तिनम् ॥१८॥
अधोमुखं विहायाशु देहि मे चाधरामृतं ।
मृणालकोमलाभ्यान्त्वं दोर्भ्यामालिंगनं कुरु ॥१९॥

स्कन्द उवाच ।

इत्युक्त्वा सहसा कामस्तस्या गंडञ्चुचुम्ब हि ।
सव्येन पाणिनालिंग्य व्यक्तौ कुचौ समस्पृशत् ।२०।
ततः प्रभावती सद्यो व्रीडाजाड्यं गता खलु ।
प्रद्युम्नाङ्गं स्पृशत्साध्वी साभूत्पुलकिताङ्गिनी ॥२१॥
सलज्जाधोमुखी भूत्वा किंचित्तीर्यगवेक्षणी ।
प्रभावती तदा तस्मै व्याजहार वचः शनैः ॥२२॥

प्रभावत्युवाच ।

प्रमर्दनं च माकार्षी गण्डस्य कुचयोर्मम ।
अविवाहितयौवत्या रमणं रमणज्ञ हि ॥२३॥
मां क्रीडयसि यद्येवं त्वं कन्यादूषको ध्रुवं ।
भविष्यति न संदेहो लोकाधमो हि नारकी ॥२४॥
देशकालानुरूपं त्वं समीक्ष्य च शुभाशुभं ।
गान्धर्वेण विवाहेन कुरुष्वानुग्रहं मम ॥२५॥
न चिरं सहते कामो मन्मनो मन्मथ संभव ।
कालो निमेषमात्रोपि युगायतेधुना प्रिय ॥२६॥

स्कन्द उवाच ।

प्रद्युम्नोपि ततः काले अजुहोत्सहसाग्निरां ।
मणिस्थाग्नौ मह्द्वेतौ पुष्पैर्मन्त्रानुदीरयत् ॥२७॥
प्रगृह्य पाणिना पाणिं प्रभावत्या हि दर्पकः ।
प्रदक्षिणं चकाराशु तन्मणिस्थानलस्य च ॥२८॥
साक्षीकृत्याशु पूर्णेन्दुं प्रभावत्या ललाटकम् ।
सचासीमन्तकं यावत्सिंदूरेणान्वभूषयत् ॥२९॥
उद्दिश्य दक्षिणां मारः संकल्पिता द्विजन्मने ।
संगृह्य पाणिना पाणिं स्वोरौ तामुपवेशयत् ॥३०॥
स्वांकस्थां स प्रभादेवीं मधुरयंश्च सान्त्वयन् ।
चुचुम्ब सनकैर्गण्डे वासयन्मुखमारुतैः ॥३१॥
प्रभावत्या पपौ वक्त्रं पद्मं मधुकरो यथा ।
आलिलिंग च सुश्रोणीं क्रमेण रतिकोविदः ॥३२॥
अरामयद्रहस्येनां न वीर्यं प्रसरेद्बहिः ।
चतुःषष्टिकलाभिश्च रतिकार्य्यविशारदः ॥३३॥
ततो ब्राह्ममुहूर्त्ते च अवोचत्कैशवविर्वचः ।
प्रियेधुना गमिष्यामि द्वारकां हि नटालयात् ॥३४॥
प्रभावती ततस्तस्मै अवोचद्वचनं पुनः ।
अहमप्यागमिष्यामि भवता सह तत्परं ॥३५॥
कथं त्वं द्वारकासस्मां (मस्माद्) गमिष्यसि प्रिये वद ।
देहेनानेव वै कान्ते प्रोत्तुङ्गधवलालयात् ॥३६॥
साहस्रैर्दरपा वीरा रक्षन्तिस्म त्वहर्निशम् ।
एतद्धवलगेहे त्वा रक्षकाः शस्त्रपाणयः ॥३७॥

प्रभावत्युवाच ।

परितुष्टे च दत्ता मे विद्या दुर्वाससा पुरा ।
तया सुविद्यया तुष्टा गिरिजा पूजनैः पुनः ॥३८॥
विद्यायाश्चैव देव्याश्च प्रभावाच्छक्तिरस्ति मे ।
यद्रूपं वीर कांक्ष्येहं तत्तद्धर्तुं क्षमा विदुः ॥३९॥

स्कन्द उवाच ।

इत्युक्त्वा सहसागस्य दधार भृंगविग्रहम् ।
प्रभावती च तत्काले समदे मदनस्य च ॥४०॥
प्रद्युम्नोपि तदा सद्यो दधार भृंगविग्रहम् ।
हंसीं सम्यक् समाश्वास्य वंभ्रमतां च भृंगिणौ ।४१।
नटालयं समागम्य व्यक्तीकुर्वन्कलेवरौ ।
पुष्पकं च तया काम आरुरुद्भ्रातृभिः सह ॥४२॥
प्रययौ द्वारकां कामो विमानेनार्कतेजसा ।
प्रभावत्या समं वीरैः सयं प्रवेशवत्क्षणात् ॥४३॥

प्रातःकाले भवति च बहुप्रोल्लसत्सुप्रभायां,
दैत्येन्द्राणामिति च भगिनी नास्ति हर्म्यात्तिमे सा ।
नाट्यागारं सुबहुकुतुकं नर्तकाः सन्ति नैवं,
चेत्याश्चर्यं सुररिपुगणैर्विक्तवोक्तं मुहुर्वै ॥४४॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये
प्रद्युम्नोत्तरे प्रभावतीहरणं
नाम षट्सप्तत्युत्तरशततमो-
ध्यायः ॥१७६॥

—❀❀❀—

स्कन्द उवाच ।

हृतायां च प्रभावत्यां सर्वदुःखातुरेऽसुरे ।
अम्बरादाययौ तत्र यदृच्छया हि नारद ॥१॥
प्रणिपत्यार्चनैरर्घ्यैरुपवेश्यासने मुनिं ।
महेन्द्रदमनो भक्त्या पप्रच्छ तन्निदानकम् ॥२॥

इन्द्रदमन उवाच ।

नमस्ते मुनिशार्दूल सर्ववार्ताविशारद ।
प्रश्नकामोऽस्ति मे तात त्वयि सर्वविदि ध्रुवम् ॥३॥
प्रासादेस्मिन्स्थिता कन्या साहस्रै रक्षिताः सुरैः ।
केन हृता न जानेहं भगिनी क्व गताऽथवा ॥४॥
तत्रस्था नर्तका भूयो न जाने क्व गता निशि ।
नानाभावैर्म्मरीनृत्य विमोह्यत्रसैर्हि नः ॥५॥

नारद उवाच ।

ये नर्तका महाराज तवाग्रे समनर्तयन् ।
ते यादवा न संदेहः सुः प्रद्युम्नपुरःसराः ॥६॥
युष्मान् प्रवञ्च्य वीरोसौ प्रद्युम्नः स्याद्धि नर्तकः ।
नृत्यैर्नवरसैः रूपं माययाच्छाद्य मोहयन् ॥७॥
मायया मोहयन् युष्मान् प्रद्युम्नो बहुनर्त्तनैः ।
हर्म्यमारुह्य रात्रौ स जहाराशु प्रभावतीम् ॥८॥
अविदूरस्थिते वीरे दोलाद्रौ गरुडध्वजे ।
तस्माद्भयं समुत्सृज्य द्वारकां तामनीयत ॥९॥

स्कन्द उवाच ।

नारदस्य वचः श्रुत्वा शक्रतापो रुपान्वितः ।
तापानलैः प्रजज्वाल स्वकौ पाणी समर्द यत् ॥१०॥
प्रद्युम्नाय त्वधिक्षिप्य क्रोधादरुणलोचनः ।
व्याजहार तदा वाक्यं नारदायेन्द्रतापनः ॥११॥

शक्रताप उवाच ।

अहो पराक्रमो मेद्य प्रद्युम्नेन विमन्थितः ।
बालिसा(शाः)कीव(ट)तुल्येन त्रैलोक्यं येन लुण्ठितम्।
मम पराक्रमो ऽजस्रं वन्हिज्वालासमातपः ।
त्रैलोक्येषु न सहन्ते सोद्य निष्फलतां गतः ॥१३॥
सत्येन स्वल्पवीर्येण सानुजे मयि जीवति ।
धिक्धिङ्मे जीवनं तात भगिनी प्रहृता यतः ॥१४॥
ईदृशी भवता वार्ता विदतापि च मे विभो ।
चेत्स्वागमद्यात्र वक्तव्या प्रतिकारं करोमि तत् ॥१५॥
ज्ञाता चेत्त्वन्मुखात्तात हनिष्यामि च यादवान् ।
तथा गरुडध्वजं मारं हन्तारं शम्बरस्य च ॥१६॥
यदिजाना मितान्कृष्णं हनिष्ये ससुतं सुखात् ।
कंसं कालं जरासन्धं हन्तारं शम्बरं पुनः ॥१७॥

स्कन्द उवाच ।

एवमुक्ते तदाऽगस्त्य शक्रतापे च नारदः ।
विहस्य त्वरितं तस्मै व्याजहार शुभं वचः ॥१८॥

नारद उवाच ।

नाधिक्षिप्य महाराज कृष्णायामिततेजसे ।
कौस्तुभसुमणिर्यस्य विद्यते खलु सोजयः ॥१९॥
खगेन्द्रवाहनं यस्य आयुधं च सुदर्शनम् ।
कौमोदकी गदा शंखः स कथं हि जयो वद ॥२०॥
येन युष्मत्कुलं पूर्वं वः प्रपितामहं सुखम् ।
प्रवेशितं हि पाताले स कथं हन्यसे वद ॥२१॥
शतायुतैश्च साहस्रैर्वलैस्त्वदधिकैर्युताः ।
हतास्ते चापि कृष्णेन स कथं हन्यसे वद ॥२२॥
प्रद्युम्नोऽपि महावीरो येन हतोपि शम्बरः ।
बालेनाप्यल्पवीर्येण स कथं हन्यसे वद ॥२३॥

इन्द्रदमन उवाच ।

त्रिगंगासंगमे तात लब्धं मया वरोत्तमं ।
रुद्रधारामहातीर्थे पितामहाद्विभो खलु ॥२४॥
तस्माल्लब्धवरोहं च लोकं न गणयामहे ।
ब्रह्मणा यद्वरं दत्तं न मिथ्या तद्भवेत्कदा ॥२५॥
तथापि च मया कृष्णो जेतव्यः स कथं वद ।
तदुपायं च वक्तव्यं येनैव जीयते हरिः ॥२६॥

नारद उवाच

मणिं च कौस्तभं त्वं तं हर्तुं शक्नोसि ते यदि ।
तदा दशगुणं वीर्यो भविष्यति तवाऽसुर ॥२७॥
यदि चेदस्ति ते कामः कृष्णं जेतुं महासुर ।
द्वारवतीं समागत्य कौस्तुभहरणं कुरु ॥२८॥
यावद्दोलाचले कृष्णे स्थिते द्वारावतीं व्रजे ।
हयनामाशु तद्रत्नं वायुवेगेन संव्रजेत् ॥२९॥
भगिन्याः हरणदुःखमस्ति ते मानसे पुनः ।
तस्यां प्रभावतीं चापि हृत्वानय यथागृहं ॥३०॥

स्कन्द उवाच ।

नारदोऽपि च दत्ताशीर्दानवेन्द्राय तत्क्षणात् ।
वीणां प्रवादयन्शश्वद् ययौ दोलाचलं मुदा ॥३१॥
तत्सर्वं वर्णयामास कृष्णाय कलहप्रियः ।
ततो द्वारवतीं भूयो गन्तुं प्रचक्रमे मुनिः ॥३२॥
गते च नारदेऽगस्त्यमहेन्द्रदमनः पुनः ।
हर्तुं मनो दधे रत्नं द्वारवत्यां महामनाः ॥३३॥
अध्यायमेतच्छृणुयाद्धि भक्त्या
विष्णोर्जयाख्यं परमं हि मर्त्यः ।
चौराद्भयन्नास्ति पराभवं च
शत्रोर्हि युद्धे तुमुलेपि तस्य ॥३४॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपाल माहात्म्ये नारदवाक्यं नाम सप्तसप्तत्युत्तरशततमोऽध्यायः ॥१७७॥

स्कन्द उवाच ।

निर्गते नारदे पुर्याः क्रोधाद्रक्तेक्षणोसुरः ।
सन्नद्धकवचो धन्वी खड्गी याने तदारुहत् ॥१॥
दानासुरेण सार्द्धं स अनुजेन बलीयसा ।
वायुवेगेन मायावी द्वारवतीं ययौ द्रुतम् ॥२॥
ततो द्वारवतीं प्राप्तो शक्रतापो हि तत्क्षणात् ।
चक्रे हर्तुमुपायं तद्रत्नस्यैवं पुराद्बहिः ॥३॥
व्याचष्ट वचनं वक्रो दानासुराय यानगः ।
राहवे चैव संध्यायां रत्नहरणलालसः ॥४॥

शक्रताप उवाच ।

राहो गत्वाम्बरं शीघ्रं यशसि त्वं सुनिर्मलं ।
उदितं सकलं चन्द्रं गगनस्थो महाबली ॥५॥
हरावो हि मणिं यावद्भगिनीञ्च प्रभावतीं ।
भूत्वा ग्रस्तो हि तावत्त्वं स्थास्यसि सहसा व्रज ॥६॥
दान त्वया स्वसारन्तां ह्रियतां निशि वेश्मतः ।
वासकोष्ठबहिः स्थित्वा माययाच्छन्नविग्रहः ॥७॥

स्कन्द उवाच ।

ततस्तस्य वचः श्रुत्वा सैंहिकेयो महाबलि ।
उत्पपात द्रुतं व्योम्नि ग्रस्तुं चन्द्रोदितं निशि ॥८॥
अग्रसीत्त्वरितं चन्द्रं सैंहिकेयोऽम्बरे निशि ।
यामस्य प्रथमे भागे ह्यन्धीभूता महानिशा ॥९॥
रूपमास्थाय कृष्णस्य शक्रतापो गृहोत्तमं ।
विवेशाशु महारात्रौ रुक्मिण्या शयनालयम् ॥१०॥
विमोहयँश्च साहस्रान् यादवाँश्चैव रक्षकान् ।
ददर्श रत्नशोभाढ्यां भित्त्यां समवलम्बनम् ॥११॥
विद्योतयन्तमाभाभिः शयनागारमुज्ज्वलम् ।
ज्वलच्छ्रियं महारत्नं सूर्यो यथाम्बरेऽपरः ॥१२॥
ददर्श स्वर्णपर्य्यङ्के रत्नाङ्के रुक्मिणीं शयां ।
निद्रावशगतां शश्वद्रत्नभाभिर्विभासयन् ॥१३॥
आदाय दानवो रत्नं शनैः शनैरुपात्रजत् ।
विनिर्ययौ बहिर्द्वाराद्रक्षकाँश्चैव लंघयन् ॥१४॥
मायया गूढरूपो हि द्वारबहिःस्थोऽवलोकयन् ।
निर्गतां भगिनीं कोष्ठाद्दानो जहार साम्प्रतम् ॥१५॥
तौ भगिनीं च रत्नानि याने स्थापयदाद्रितः ।
यानेन त्वरितं दैत्यो उत्पेततुर्विहायसी ॥१६॥
ततो मुमोच चन्द्रं स सैंहिकेयः पुनस्तदा ।
जगाम त्वरितं तस्माद्यत्रेन्द्रदमनः स्थितः ॥१७॥
तत्राययौ द्रुतं दैत्यो भ्रात्रा सहाम्बरेण वै ।
आस्थाय भगिनीं याने कौस्तुभेनेन्द्रतापकः ॥१८॥
ततः स हिमवत्कुक्षिं प्राप्तवान् यानगोसुरः ।
लब्धमनोरथो हृष्टः प्रययौ सुप्रभां पुरीम् ॥१९॥
ततो रत्नं प्रभादेवीं प्रेक्ष्य सर्वेऽसुरास्तदा ।
मुमुदुश्च भृशं शश्वच्छक्रतापं च मेनिरे ॥२०॥
बहुभिर्मङ्गलैर्दैत्या नीराजनैः प्रभावतीं ।
पुरीं प्रवेशयन्तिस्म बहुमानपुरःसरैः ॥२१॥
ऊचुर्जानपदास्तस्मै साधु साध्विति वीर च ।
दूरीकृता च नो व्रीडा एनां प्रत्यागतां यतः ॥२२॥
ततः संन्यस्य तद्रत्नं कच्छपायेन्द्रतापकः ।
अवीविशद्बिलं रम्यं चन्दनागिरिगह्वरे ॥२३॥
अरक्षत्कच्छपो रत्नं स्वगलेनावलम्बितं ।
महाकायो महावीरः अवासीद्ध्रदशम्बरे ॥२४॥
यावद्वै द्वारवत्यां च एवं कोलाहलः कृतः ।
प्रभावती च नास्तीति हृतः केनेति कौस्तुभः ॥२५॥
तस्मिंश्च नारदो धीमान् प्राप्तो द्वारवतीं मुदा ।
सर्वामवर्णयत्तस्मै दैत्येन हरतस्य च ॥२६॥

नारद उवाच ।

शक्रतापेन ते भार्या प्रभावती हृता रहः ।
कौस्तुभं मणिरत्नं च अद्य रात्रौ च मन्मथ ॥२७॥
गच्छत त्वरितं यूयं यत्र विष्णुः शिलोच्चये ।
तद्वार्तां स्मर वक्तव्या गरुडकेतवे खलु ॥२८॥
रत्नहृतस्य विष्णुर्न्नः प्रतिकारं करिष्यति ।
रत्नद्वयं समाहृत्य सुप्रभायां स्थितोऽसुरः ॥२९॥

स्कन्द उवाच ।

नारदस्य वचः श्रुत्वा प्रद्युम्नप्रमुखा मुने ।
मेनिरे तद्वचः सत्यमृतमिति समन्ततः ॥३०॥
प्रद्युम्नप्रमुखा वीरा उत्पेतुर्यादवा द्रुतं ।
अन्तरिक्षं विमानेन शक्रदत्तेन रंहसा ॥३१॥
अन्तरिक्षेद्विमानेन प्रययुर्यादवास्तदा ।
दोलाचलं क्रमेणाशु म्लानमुखा हतश्रियः ॥३२॥
प्रणम्य दण्डवद्भूमौ तार्क्ष्यारूढं च यादवाः ।
तस्मै निवेदयन्तिस्म तद्वार्तां गद्गदोदितैः ॥३३॥
श्रुत्वा तेषां वचः कृष्णो हृतं रत्नं प्रभावतीं ।
भृशं चुकोप दैत्येभ्यः स प्रलयानलोपमः ॥३४॥
मुहूर्त्तं ध्यायमानोऽपि वार्त्तां जानन् हरिर्हि तत् ।
व्याचष्ट वचनं रोषात्प्रद्युम्नाय घटोद्भव ॥३५॥

श्रीकृष्ण उवाच ।

मम रूपं समास्थाय हृतं रत्नं दुरात्मना ।
शक्रारिणा हृता रात्रौ तस्य भ्राता प्रभावती ॥३६॥
यदि प्रभावती तेन हृता दैत्येन ते गृहात् ।
हनिष्यसि ह्यवश्यन्तं पुत्र रत्नप्रहारिणम् ॥३७॥
हत्वा तं सानुजं दैत्यं स्वर्गेपि च दिवस्पतेः ।
तनिष्यसि मुदं पुत्र पूर्वविरोधसंभृतम् ॥३८॥
अहमप्यागमिष्यामि प्रद्रष्टुं निधनं रिपोः ।
देवराजोपि तत्रैव गच्छ त्वमागमिष्यति ॥३९॥
हत्वा पापान् वधूं रत्नं द्वारिकां नीयतां सुत ।
भित्वा चक्रेण तत्सेतुं वाग्मतीं त्वं विमोक्ष्यसि ॥४०॥
वाग्मतीप्रभवे स्नात्वा शतरुद्रं प्रणम्य च ।
राजकन्यां समालोक्य गच्छ पुत्र जयाय च ॥४१॥

स्कन्द उवाच ।

इत्युक्त्वा भगवान् कृष्णो देवकार्यहितेरतः ।
विकशतपद्मनयनः पार्श्वस्थं मुनिमब्रवीन् ॥४२॥
सर्वं मद्वचनादत्र ब्रूहि सहस्राक्षाय नारद ।
ते शत्रोर्निधनं द्रष्टुमायातव्यमितीह वै ॥४३॥
इत्याकर्ण्य वचो विष्णोर्गत्वा स्वर्गं च नारद ।
तद्वार्तां कथयामास शक्राय त्वरितं तदा ॥४४॥
नारदस्य वचः श्रुत्वा मुमोद मघवा भृशं ।
आज्ञापयद्धि देवेभ्यो युद्धे संनह्यनाय च ॥४५॥
ततः पितुर्वचः श्रुत्वा झषध्वजो महामनाः ।
प्रययौ भ्रातृभिः सार्द्धं वाग्मतीप्रभवे गिरौ ॥४६।
कामोप्यवात्सीद्रजनीं समेकां,
स्नात्वा शिवे वाग्मवशंवरे वै ।
भक्त्या जयं प्रार्थयदीश्वरीं तां
रत्नं च भार्यांञ्च हृदा चिकीर्षुः ॥४७॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपाल माहात्म्ये प्रद्युम्नोत्तरे रत्नहरणं नाम ष्टसप्तत्युत्तरशततमो ध्यायः ॥१७८॥

स्कन्द उवाच ।

प्रद्युम्नो गिरिकन्दरे कुसुमिते भक्त्या भवानीं वने,
संस्नात्वा खलु वाग्मतीसुकमले दध्यौ परां कुम्भज ।
निर्देहोपि च कामिनां मनसिजो ह्यास्थाय तां मानसे,
वाक्कायोत्तममानसैः स्तुतिवरैर्ज्योपहारैर्मुदा ॥१॥
संतुष्टा वाग्मती तस्मिंस्तद्भक्तिं प्रेक्ष्य तत्क्षणात् ।
तद्यामिन्यवशेषे सा अञ्जसा मुमुदे भृशम् ॥२॥
ततो वागीश्वरी देवी सर्वाभरणभूषिता ।
विनिर्ययौ जलात्तूर्णं मालापुस्तकबिभ्रती ॥३॥
ईप्सितार्थप्रदा गौरी स्मिताननां त्रिलोचना ।
व्याजहार वचो देवी प्रद्युम्नाय शिवा मुने ॥४॥

वाग्मत्युवाच ।

अवश्यं लप्स्यसे काम रत्नं जयं च ते प्रियां ।
हनिष्यसि ह्यवश्यं त्वं दानवान् युद्धदुर्मदान् ॥५॥
शृणु त्वं मद्वचः काम येन जयं लभिष्यसि ।
आदौ दितिसुतान्वत्स नावमान्याः कदापि ते ॥६॥
ब्रह्मणो वरदानेन दानवा वरदर्पिताः ।
तपःक्षीणा भयेयुस्ते जानीहि दर्पकाऽधुना ॥७॥
शंखासुरो महासेतुं रक्षतिस्म सदा रहः ।
हन्तव्यः प्रथमं सोपि शंखध्वनमहाबली ॥८॥
ततो दानासुरो वीर हन्तव्यो यत्नतः पुनः ।
मायावी मायया क्रोधी कूटयुद्धविशारदः ॥९॥
शक्रतापो महावीरो हन्तव्यो युधि दुर्मदः ।
मायावी सर्वयुद्धज्ञो ब्रह्मणो वरदर्पितः ॥१०॥
आसीत्कूर्मो महावीरो रुद्रवरप्रदर्पितः ।
तत्संवरेण मां नित्यं कलुषीकृतविग्रहाम् ॥११॥
त्वयासौ हन्यतां पुत्र यत्नपूर्वं हि कच्छपः ।
न म्रियते जले कूर्मः कदापि वर्द्धते बलम् ॥१२॥
ततो भेत्स्यसि संभूत चक्रेण सूर्यवर्चसा ।
कृष्णस्ते जनको वत्स लोकोद्धारणहेतुकः ॥१३॥
ततः कूर्मं जलापाये तेन चक्रेण दर्पक ।
हनिष्यसि महाकायं शैलोपमं सुदुर्ल्लभम् ॥१४॥

१६१६८

ग्रहीष्यसि ततो रत्नं तस्य कुक्षिगतं पुनः ।
हते दैत्ये विराधे त्वं देवर्षिसिद्धसंसदि ॥१५॥
आगमिष्यति दैत्योत्र विलाच्चन्दनभूभृतः ।
सूर्यकेतुसुतां द्रष्टुं विरहातुरमानसः ॥१६॥
न प्रकटय देहं स्वं योद्धुं प्रेक्ष्य प्रियां च ताम् ।
शंखे जीवति यावत्ते न लभेत्कांक्षितं जयम् ॥१७॥
हते दैत्ये गमिष्यामि गंगाया मिलनं स्मर ।
मद्गंगसंभवायाश्च त्रिस्रोताया हि विष्णुना ॥१८॥

स्कन्द उवाच ।

इत्याकर्ण्य वचो देव्याः प्रद्युम्नो हि महामनाः ।
स्तोतुं प्रचक्रमे भक्त्या वाग्मत्यै त्रिविधैरितैः ॥१९॥

प्रद्युम्न उवाच ।

वागीश्वरि महाभागे वाग्विभूतिप्रदे शुभे ।
त्रैलोक्यवन्दिते देवि नमामि चरणौ तव ॥२०॥
सर्वेशवाग्भवे पुण्यवागीशे वाक्प्रदे शिवे ।
वाङ्मनोगोचरे मातस्त्वदङ्घ्र्यब्जौ नमाम्यहम् ॥२१॥
भक्तिनां वरदे मातर्भक्तिगम्ये हि वाग्मति ।
भक्तिहीनैः सुरैश्चापि अगोचरे नमोऽस्तु ते ॥२२॥
त्रैलोक्यपावनायार्ये अवततार वाग्मती ।
जलरूपेण देवीह हरमुखान्नमोऽस्तु ते ॥२३॥
सरस्वती महाभागे दुःखं संसारसंसृतिं ।
विनाशिनी स्वभक्तानां त्वदंघ्र्यब्जौ नमाम्यहम् ॥२४॥
वाणि ब्रह्मपरे देवि गोचरे ब्रह्मवादिभिः ।
नोनरैर्भक्तिभिस्ते च ब्रह्मेश्वरि नमोऽस्तु ते ॥२५॥
सर्वभूतानि रुद्राणि पञ्चात्मकैर्विधायिनि ।
स्वकर्मवशगाँश्चापि तारिणीशे नमोऽस्तु ते ॥२६॥
जनान्संस्नाप्य तोयैः स्वैः स्वच्छकल्लोलपंक्तिभिः ।
तारिणी दुःखसंसाराद्ज्ञानिनोपि ते नमः ॥२७॥
वाग्मति वाग्भवे शंभोर्भवानि भवतारिणि ।
भवेश्वरि महादेवि भववन्द्ये नमोऽस्तु ते ॥२८॥
वागीश्वरि शिवे दुर्गे सर्वेप्सितवरप्रदे ।
जानामि सिद्धकार्यं मे त्वच्चरणप्रदर्शनात् ॥२९॥
यदैव दर्शितं देवि त्वदङ्घ्रिकमलद्वयम् ।
सिद्धं मनोरथं मेने तदैव वाग्मवे शिवे ॥३०॥
अवश्यञ्च करिष्यामो भगवत्या वचो हि यत् ।
त्वत्प्रसादाद्धनिष्यामि शक्रतापं च सानुजं ॥३१॥

स्कन्द उवाच ।

आकर्ण्य संस्तुतं तेन प्रद्युम्नेनाशु वाग्मती ।
व्याजहार शुभं वाक्यं संतुष्टा स्तुतिभिः खलु ॥३२॥

वाग्मत्युवाच ।

स्तवेनानेन कामाहं त्रिविधोक्तैः प्रतोषिता ।
अधुना भवता भक्त्या दास्ये वरं स्तवाय च ॥३३॥
यश्च पठेत्स्तवं चेमं संकटे वा समुत्सुके ।
प्रीत्यर्थं मेऽथवा भक्त्या तस्य पुण्यफलं शृणु ॥३४॥
शत्रुभिर्नाभिभूयात्स संग्रामे विजयी भवेत् ।
असाध्यं साधयेत्कार्यं पठनाद्धि विकिल्विषः ॥३५॥
सर्वतीर्थेषु यत्स्नात्वा प्रलभेत्तत्फलं हि सः ।
गवां लक्षफलं प्राप्य रुद्रलोकं व्रजेत्परं ॥३६॥

स्कन्द उवाच ।

इत्युक्त्वाऽन्तर्दधे तोये प्रत्यक्षा वाग्मतीश्वरी ।
इत्यादिश्य वरं तस्मै स्तवायाशु घटोद्भव ॥३७॥
ततो देवीं परिक्रम्य स्तुतिभिर्दर्पकः पुनः ।
प्रणम्य दण्डवद्भूमौ शिवकूटाचलं ययौ ॥३८॥
प्रणम्य शिरसा भक्त्या शतरुद्रं च दर्पकः ।
सुवरं कांक्षितं तत्र तस्थौ हि प्रार्थयन्मुने ॥३९॥
तस्मिन्काले विलाद्दैत्यश्चन्दनाचलगह्वरात् ।
विनिःसृत्याशु कामार्तस्तत्रायया‍ौ हि निर्जनः ॥४०॥
सान्त्वयामास दैत्योसौ तां सखीवचनेन वै ।
सूर्यकेतुसुतां शैले बहुमानपुरःसरैः ॥४१॥
नैवं मेनेऽसुरं देवी सूर्यकेतुसुता तदा ।
व्रीडायुक्ता हि नम्रास्या अपश्यद्धि सखीं रुषा ॥४२॥
सुलोचना सखी दैत्यं कुशला समबोधयत् ।
वाचा मधुरया मान्या मधुरयन्मुहुर्मुहुः ॥४३॥
मा भव दूषको राजन्! कन्यायास्त्वं कदाचन ।
भवसि यदि कामार्तो लोकनिन्द्यां गमिष्यसि ॥४४॥
अवश्यं नृपतिस्तुभ्यमेनां कन्यां प्रदास्यति ।
ततो यदृच्छया राजन्! कामयतु यथा सुखम् ॥४५॥
शक्रतापस्ततोऽगस्त्य तथ्यं कृत्वाशु तद्वचः ।
प्रत्याययौ हि कामार्तो विरहातुरमानसः ॥४६॥
सूर्यकेतुसुतां प्रेक्ष्य रूपातिशालिनीं स्मरः ।
हर्षोत्फुल्लमना भूत्वा विवाहितुं मनो दधे ॥४७॥
दैत्यं प्रेक्ष्य रूपाविष्टो हन्तुं मनो दधे पुनः ।
समक्षं दर्पको वज्रं तादृशं विरहातुरम् ॥४८॥

स भ्राता वै सुकुसुमशरैः सेतुबन्धं दृढाद्यं
यानेनापि द्रुतमभिययौ यत्र शंखासुरस्थः ।
प्रोद्यम्यार्य्यः खलु रथपदं सूर्यसंकाशभानुं,
सेतुं प्राप्तः क्षणमपि च तद्यानगन्ताम्बराद्धि ॥४९॥
तत्रायायुश्च त्रिदशा हि यानै-
र्द्रष्टुं च युद्धं स्मरदैत्ययोर्वै ।

सिद्धर्षयस्ते पुरुहूतमुख्याः
कृष्णं पुरोधाय पुरन्दराद्रिम् ॥५०॥

इतिश्रीस्कंदपुराणे हिमवत्खण्डे नेपालमाहात्म्ये वाग्मतीवरदानं नामोनाशीत्युत्तरशततमोऽध्यायः॥१७६॥

—❀❀❀—

स्कन्द उवाच

शंखालयगिरेर्मूर्द्धिन अचतेरुर्विमानतः ।
प्रद्युम्नप्रमुखाः शीघ्रमुच्चच्छस्त्रास्त्रपाणयः ॥१॥
सेतुं विदारयामासुर्दृढवन्धं च यादवाः ।
धनुषां कोटिभिः पद्भिः सिंहनादं विनद्य च ॥२॥
ततः शंखासुरस्याशु तादृशान् सेवकोदृशत् ।
विलं प्रविश्य तत्सर्वं शंखाय समवर्णयत् ॥३॥
आकर्ण्य तद्रुतं शंखो विलाद्विनिर्ययौ रुषा ।
क तिष्ठन्तीति पापास्ते असिपाणिरिति ब्रुवन् ॥४॥
आभवैः पूरितः शंखो यादवान्प्रेक्ष्य सत्वरं ।
समाह्वयत्स्वकं सैन्यं अवोचद्यादवान्वचः ॥५॥

शंख उवाच

रेरे पापा दुराचारा निधने यत्र चोद्यताः ।
बद्धाः पाशेन दैवेन अत्रैवानीयतां खलु ॥६॥
मद्बलै रक्षितं सेतुं कथं विदरितं पदैः ।
अपि देवैरसाध्यं तद् विदारितास्थ किल्विषाः ॥७॥
के क्षुद्रबुद्धयो यूयं कस्यात्मजा वदन्तु मे ।
मद्धस्तपातनैः सद्यो गमिष्यथ यमालयम् ॥८॥

प्रद्युम्न उवाच

योहन्ता दानवान् शश्वद् युष्मत्कुलनिसूदनः ।
हिरण्याक्षं तथा चान्यं संह्रादं कशिपुं तथा ॥९॥
हन्ता कंसं जरासन्धं कालं च यवनं पुनः ।
अनुह्रादं मुरं चान्धं स्युर्हन्तुरात्मजा वयम् ॥१०॥
हन्ताहं शम्वरं पाप प्रद्युम्न इति विश्रुतः ।
हत्वा त्वां सानुजं चाद्य, मोदयिष्ये पुरन्दरम् ॥११॥

शंख उवाच

हन्ता मम गुरो हि त्वं प्रद्युम्न इति विश्रुतः ।
पोषकश्चाग्यतः पाप कृतघ्नोसि च पापभाक् ॥१२॥
अहो भाग्यमहो मेऽद्य इहानीताश्च शत्रवः ।
स्वं रक्षकस्य यो हन्ता दैवेनावध्य किल्विषैः ॥१३॥
अद्यैवाहं गमिष्यामि वैरान्तरं हि मद्गुरोः ।
हत्वा त्वां सानुजं पाप मोदयिष्ये च दानवान् ॥१४॥

स्कन्द उवाच ।

इत्युक्त्वा सहसा शंखो ज्यां समारोपयच्छरं ।
समुत्सार्य शरं गाढं चिक्षेप दर्पकं प्रति ॥१५॥
सहस्राणां मुखं वाणं शंखासुरो रुषान्वितः ।
उद्दिश्य केवलं काममाचिक्षेप लघुहस्तकः ॥१६॥
ततः शैन्यस्य शंखश्च समुद्दिश्याशु यादवान् ।
समन्ततश्च संभूय शरासारान् ववर्ष च ॥१७॥
तद्बाणेनार्दितः कामो विह्वलांगो ऽभवद्भृशम् ।
पपुश्च रुधिरं वाणाः प्रद्युम्नाङ्गेषु सर्वतः ॥१८॥
तं विह्वलाङ्गिनं प्रेक्ष्य यादवाः युद्धदुर्मदाः ।
ववर्षुश्च वशरासरान् दैत्यसैन्योपरि ध्रुवम् ॥१९॥
वीरो वलो रुषाविष्टः शत्रुभयङ्करोऽसुरान् ।
हलेनाशु समाकृष्य ताडयन् मुशलेन तान् ॥२०॥
गदो हि गदया दैत्यान् प्रजघान सहस्रशः ।
विनदत्सिंहनादं च प्रोद्दिश्यावयवान् भृशं ॥२१॥
परिघेनाशु शाम्बस्तान् जघान लघुहस्ततः ।
क्षेपयँश्चापरानस्त्रान् उद्दिश्य तत्पदांभृशम् ॥२२॥
ततोद्रिशेखरे तोये दैत्याः पेतुः समन्ततः ।
विच्छिन्नशिरसः केचित्केचित्पादाः करास्तथा ॥२३॥
टाङ्कारञ्च धनुः कृत्वा सारङ्गं कुसुमायुधः ।
ज्यामारोप्याशुगं क्रोधाच्छंखं हन्तुं समुद्यतः ॥२४॥
ततो व्योम्नि समुद्भूता अकलेवरवाक्तदा ।
अवध्यः काम शस्त्रास्त्रैर्मल्लयुद्धं विनेति सः ॥२५॥
श्रुत्वेरितं वचो व्योम्नः अशरीरेण दर्पकः ।
शस्त्रास्त्राणि च संत्यज्य मालयोधं तमाह्वयत् ॥२६॥
आलोक्य पतितान् शंखो निःशेषेण च दानवान् ।
त्यक्त्वा शस्त्राणि कन्दर्पो मुष्टिमुद्यम्य वेगवान् ॥२७॥
जघान मुष्टिना शंखः कामस्योरसि वै भृशं ।
अपतद्दर्पकः सेतौ व्यथाविह्वलविग्रहः ॥२८॥
प्रद्युम्नं पतितं प्रेक्ष्य तमभिद्रुत्य यादवाः ।
शस्त्रास्त्रैर्गदया तीव्रं जघ्नुः शंखासुरं भृशम् ॥२९॥
समाकृष्य गदां शंखः शाम्बहस्ताद्रुपाशु तान् ।
तानुद्दिश्याभिदुद्राव कृतान्त इव पापिन् ॥३०॥
तं ताड्य यादवान् शंख उद्भ्राम्य गदया रुषा ।
अपतत्स हली कूटे गदापातेन विह्वलः ॥३१॥
प्रद्युम्नस्तत्क्षणात्तत्र समुत्तीर्य्य व्यथां पुनः ।
जहाराशु किरीटं वै शंखासुरस्य शीर्षतः ॥३२॥
ततो युयुधतुस्तौ द्वौ परस्परजयैषिणौ ।
मुष्टिपादाहतैः क्रोधात्कामशंखौ महाहवे ॥३३॥
युयुधतुर्मिथस्तौ च वाहुयुद्धेन कोपतः ।
चिक्षेप च मिथस्तोये वाहुप्रहारतो मुहुः ॥३४॥
शंखस्तलेन कन्दर्पं शिरोदेशे जघान च ।
कामोपतज्जलेऽगस्त्य उदतिष्ठत्पुनः स्मरः ॥३५॥

वीरः कामोद्रिकूटे तं पातयामास वै रुषा ।
दोर्भ्यां प्रगृह्य तत्पादौ यथासुभृद्यमक्षये ॥३६॥
आक्रम्य जठरे कामः शंखस्य शिरसं रुषा ।
जघान मुष्टिना गाढं कृतान्तः पापिनं यथा ॥३७॥
ततः शंखासुरोऽगस्त्य काममुष्टिप्रहारतः ।
ननादातिशयं यत्र शंखध्वनं व्यसुर्भृशं ॥३८॥
तस्मिन्देवा गगनगतयः पात्यमाने च शंखे,
प्रद्युम्नाय प्रसभमसृजन्नन्दने संभवान् यान् ।
पुष्पासारानतिसुललितान् साधुसाध्वित्यवोच-
न्दुष्टोऽस्माकं प्रवर निहतोनु त्वयेत्यब्रुवन् वै ॥३९॥

इतिश्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये
प्रद्युम्नोत्तरे शंखासुरवधो नामाशीत्यधिक-
शततमोऽध्यायः ॥१८०॥

स्कन्द उवाच

शंखध्वनं समाकर्ण्य भीषणंविह्वलोदितं ।
उन्ममज्ज जलाच्छीघ्रं पिराधः किमिति ब्रुवन् ॥१॥
संप्रेक्ष्य पातितं शंखं प्रद्युम्नेनैव यादवान् ।
रोषात्प्रवर्द्धितः कूर्मः स शैलोपमोऽरीन्प्रति ॥२॥
संक्षोभ्य वाग्मतीतोयं नादेनाह्वयदाशु च ।
दानासुरं कनिष्ठं च मायाविनं धरोपमहः ॥३॥
ददर्श दर्पको दैत्यं कूर्मरूपंमहास्वनं ।
तुंगशैलोपमं भीष्मं कालरुद्र इव क्षये ॥४॥
रक्तास्यं रक्तमूर्द्धानं चक्रनेत्रं महद्भुजं ।
राजमानं ह्रदे श्यामं कौस्तुभेन विभूषितम् ॥५॥
रुषान्वितं स्मरः प्रेक्ष्य कौस्तुभं तद्गलावृतम् ।
शार्ङ्गं सशरं धृत्वा हन्तुं दैत्यान्तिकं ययौ ॥६॥
आकर्णं शरमुत्सार्य्य लक्षीकृत्य हि दर्पकः ।
संदश्य स्वाधरं दन्तैः कूर्मं जघान सायकैः ॥७॥
विननाद भृशं कूर्मः शराघातेन पीडितः ।
समुद्धृत्य शरं गाढं, निममज्ज जले पुनः ॥८॥
वाग्मत्याः कथनं स्मृत्वा जले स न मरिष्यति ।
कूर्मरूपः कदापीति चिन्ताकुलोभवत्स्मरः ॥९॥
ततो दानासुरः शीघ्रं तत्रागमद्रुषान्वितः ।
भ्रातुर्निनादमाकर्ण्य खड्गपाणिर्महाबली ॥१०॥
आलोक्य यादवान्दानो व्यथाश्रशितमग्रजं ।
खड्गमुद्यम्य दुद्राव हन्तुकामः स्मरं रुषा ॥११॥
ततः कामः शरेणैवं खड्गं तस्य करोद्यतं ।
चिच्छेद च द्विधा शीघ्रं बाणवर्षं ववर्ष च ॥१२॥
यादवास्त्वरितं जघ्नुः शिलाधौतैः शरैर्भृशं ।
बाणवर्षैः पूरितं दैत्यं समावृत्य समन्तत ॥१३॥
छिन्नखड्गं स संत्यज्य शालमुत्पाटयद्रुषा ।
यादवान् हन्तुकामोसौ चन्दनाचलसानुगम् ॥१४॥
समूलं सालमुद्यम्य दानासुरो रुषा द्रुतं ।
वारं वारं परिभ्राम्य अभिदुद्राव यादवान् ॥१५॥
तं प्रेक्ष्य यादवाः सद्यो दुद्रुवुर्नगगह्वरं ।
सेतोश्च पश्चिमे भागे संत्यज्य हलिनं पुनः ॥१६॥
ततो जघान दानोसौ लाङ्गलिनं रुषा भृशं ।
न चचार हली तत्र मत्तेभ इव दर्भकैः ॥१७॥
ततो रामो रुषा युक्तःसमाकृष्य हलेन तम् ।
अताडयद्भृशं तस्य मूर्द्धनि मुशलेन च ॥१८॥
ततोपतत्किरीटश्च भग्नस्तस्यैव मूर्द्ध्नः ।
तादृशं स्वं किरीटं स प्रेक्ष्य चुकोप तं प्रति ॥१९॥
गंडशैलं समादाय उत्पपाताम्बरेऽसुरः ।
यत्रैव यादवं गोष्ठं चिक्षेपाशु मुहुर्मुहुः ॥२०॥
सस्रुपुर्यादवाः शीघ्रं चन्दनाचलगह्वरम् ।
तादृशं प्रेक्ष्य शैलाग्रं ग्राववृष्टिं समन्ततः ॥२१॥
ववर्ष करकान् ग्रावाद् पांशून्सपवनांस्तथा ।
व्योमस्थः स जलान्दान उद्दिश्य यादवान् भृशं ॥२२॥
ततश्चिक्षेप कामोऽसौ मोहनास्त्रं च जृम्भणम् ।
समुद्दिश्य रुषा व्योम्नि मायामयं च मायिनं ॥२३॥
तेनास्त्रेण द्रुतं तत्र दानः संमोहितो भृशम् ।
जृंभित उन्मनीभावो निष्प्रपन्नोभवद्बुधि ॥२४॥
ततो व्योम्नोपतत्सद्यो दानासुरो विजृम्भणः ।
संक्षोभयन् ह्रदं तीव्रं कूर्मस्य चोत्तरान्तिके ॥२५॥
सीरपाणिस्ततः क्रोधात्तमुद्दिश्य द्रुतं पुनः ।
हलं चिक्षेप तत्रैव बधाय च महाबली ॥२६॥
हलोपि च तमाकृष्य आनिनाय बलान्तिकम् ।
जलोपरि तलाच्छीघ्रं गण्डग्रावं समुद्धृतं ॥२७॥
आकृष्य सहसा रामो हलेन तं रुषान्वितः ।
ताडयामास मूर्द्धानं मुशलेनाशु तस्य च ॥२८॥
भग्नशीर्षो व्यसुस्तत्र सोपतद्धि जलान्तरे ।
विनदंश्च महानादं दैत्यलोकभयावहं ॥२९॥
देवाः खिन्ना गगनगतयश्चान्तरिक्षाद्धि शश्व-
त्पुष्पासारांस्तमभिववृषुर्हन्यमाने च दाने ।
आलोक्यार्य्यं खलु मुशलिनं साधु साध्वित्यवोच
न्दुष्टोसौ नः प्रवर भवता पातितः पापनिष्ठः ॥३०॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे प्रद्युम्नोत्तरे-
दानासुरवधो नामैकाशीत्यधिकशततमो-
ऽध्यायः ॥१८१॥

स्कन्द उवाच ।
ततः प्रतिस्वनं तीव्रं तद्बिलेभूत्तदा मुने ।
दानभीक्ष्णध्वनोद्भूतैर्हर्षैस्तथाम्भोद्भवैस्तथा ॥१॥
वज्रनाभस्तदा प्रेक्ष्य तत्स्वनेन प्रकम्पितं ।
गृहान्तरे स्थितो दैत्यः किमिति कृतसंभ्रमः ॥२॥
परिशंक्य भयं किंचिद्रिपोर्वज्रो महाबलः ।
कवची निर्ययौ गेहात् खड्गपाणिर्धनुर्द्धरः ॥३॥
तस्य चानुययुर्दैत्याः कवचिनो धनुर्द्धराः ।
शस्त्रास्त्रप्रोद्यता योद्धुं रथैश्च युद्धलालसाः ॥४॥
ददर्श यादवान् वज्रः कूर्मान्तिके च यानगान् ।
रामं प्रहारयन्तञ्च दानं जलान्तरे मुहुः ॥५॥
तादृशान् यादवान्प्रेक्ष्य चुकोपासुरनायकः ।
शैलशृंगप्रतीकाशो भिन्नाञ्जनचयोपमः ॥६॥
प्रद्युम्नं स तदालोक्य व्याचष्ट वचनं रुषा ।
गंभीरघोषनादश्च गर्जत्कालघनोपमः ॥७॥

शक्रताप उवाच ।
रे क्षुद्राः प्राकृता मूर्खाः कुतश्चात्र समागताः ।
बद्धाः पाशैश्च दैवेन आनीता निधनाय च ॥८॥
के यूयं कस्य पुत्राश्च निधनं गन्तुमुद्यताः ।
तथ्यं वदत नोचेद्धि यो वा सो वा प्रहन्म्यहम् ॥९॥

प्रद्युम्न उवाच ।
रेरे पापिष्ठ मूढात्मन् युष्मान्न ज्ञायसे कथं ।
विदितुमुचनोसि त्वं यद्यपि शृणु नः कुलम् ॥१०॥
येन हतः पुरा मूलं वः कुलं प्रपितामहः ।
शत्रुगणास्तथा दैत्याः शश्वज्जन्मनि जन्मनि ॥११॥
तस्य भगवतो विष्णोरात्मजं विद्धि दानव ।
प्रद्युम्न इति विख्यातः प्राप्त इह तवान्तकः ॥१२॥
अयन्तु बलिनां श्रेष्ठो बलभद्र इति श्रुतः ।
जवीयाञ्जःपितुर्मान्यो दैत्यशत्रुर्निकृन्तकः ॥१३॥
अनेन निहतो दानस्ते भ्रातासौ ह्रदेऽधुना ।
मुशलेनैव मायावी पश्य पश्य चलान्तरे ॥१४॥
निपातितो मया शंखो दुष्टः सेतुप्ररक्षकः ।
हत्वा त्वां सान्वयं पाप हनिष्यामि च कच्छपं ॥१५॥
शंबरं निहतं पूर्वं देवानां च सुकण्टकम् ।
मान्येन च बलेनासौ दानवेभ्यो गरिष्ठकः ॥१६॥
लाञ्छनं त्वत्कृतं पूर्वं यद्यस्ति च दिवस्पतेः ।
तत्सर्वं नाशयिष्यामि हत्वा त्वां सान्वयं खलु ॥१७॥

शक्रताप उवाच
यद्यपि यादवा यूयं प्रद्युम्नस्त्वं विशेषतः ।
नोद्य चोपस्थितं भाग्यं चिरकालमुपेक्षितम् ॥१८॥
शम्बरो घातितो येन स ममाग्रमुपस्थितः ।
एतद्भाग्यात्परं भाग्यं किं विधेयमतः परम् ॥१९॥
अद्य त्वां सान्वयं हत्वा हलिनं केशवं पुनः ।
भुंदये त्रैलोक्यराज्यं वै निष्कण्टकं महत्सुखम् ॥२०॥
वैरान्तरं च भर्तारं गच्छामि सहसाप्यलम् ।
मत्पितॄणां हतानां च कृतान्तो मूढ वो विदुः ॥२१॥

स्कन्द उवाच
इत्याक्षिप्याशु कामाय शक्रतापो रुषा शरं ।
उत्ससार शरं गाढं चक्रीकृतो भृशं तदा ॥२२॥
मुमोच सहसा बाणं स्वर्णपुंखं मुहुर्मुहुः ।
तीक्ष्णमुखं शिलाधौतं काममुद्दिश्य यादवान् ॥२३॥
ववर्ष शरवर्षाणि यादवेषु च दानवाः ।
संभूय सहसा शश्वद्भृशं तेषां समन्ततः ॥२४॥
ततश्च रुक्मिणीसूनुर्गाण्डीवं हि समाददे ।
समुत्सार्याश्वं बाणं मुमोच दानवोपरि ॥२५॥
संभूय यादवाः सद्यः शरासारानवर्षयन् ।
स्वर्णपुंखाञ्छिलाधौताँल्लघुहस्तैः समीरितान् ॥२६॥
सीरपाणी रुषाविष्टो दन्तैः पीड्याधरं स्वकं ।
हलं चिक्षेप सद्योसौ उद्दिश्य दैत्यसैन्यकम् ॥२७॥
समाकृष्य हलेनाशु आनीय दैत्यसैन्यकम् ।
शक्रमार्गाद्रिसानौ च मुसलेन जघान सः ॥२८॥
एवमाकृष्य तानार्य्यानहनद्बहुशो मुहुः ।
शतं शतसहस्राणि कतिचिच्च जले तथा ॥२९॥
जघ्नुश्च यादवा दैत्यान् शस्त्रास्त्रैर्बहुशो बहुः ।
संभूय सहसा तत्र जले च शैलगह्वरे ॥३०॥
गदोऽपि गदया मूर्द्ध्नि कुंभोदरं जघान हि ।
विष्णुपद्युद्भवे शैले बहुवारं प्रयुध्य च ॥३१॥
पपात शैलसानौ स गदाप्रहारतो भृशम् ।
वमन्नसृङ्मुखाच्छ्वश्चदैत्यः कोलाहले व्यसुः ॥३२॥
आलोक्य भ्रातरं शैले पतनन्तं महोदरः ।
गदामुद्यम्य दुद्राव गदसताडयत्तया ॥३३॥
गदे गदाप्रहारश्च व्यथिते तनुविह्वले ।
गदयाताडयच्छाम्बो महोदरस्य मस्तकं ॥३४॥
वमन्नसृक्मुखात्तत्र महोदरो व्यसुस्तदा ।
निर्घातसदृशाद्गाढाच्छाम्बगदाप्रहारतः ॥३५॥
आलोक्य तादृशं दैत्या निकुंभो हि रुषा गदी ।
यादवानभिदुद्राव मृगयूथान्यथा हरिः ॥३६॥
यादवास्त्वरितं भीष्मात्तमभिप्रेक्ष्य दुर्द्रुवुः ।
आयोधनं परित्यज्य मृगेन्द्राचलकन्दरं ॥३७॥
युयुधुर्यादवास्तत्र निकुंभेन समं पुनः ।

गदाभिश्चद्रुमगैस्तीव्रं सर्वलोकभयङ्करैः ॥३८॥
निकुंभो निर्ज्जनः क्रोधाद्गदयाताडयद्धि तान् ।
शश्वत्पृथक्पृथग् भूय असिद्रुत्याशु गह्वरे ॥ ३९॥
यादवाश्चापि संभूय उत्तीर्य्य तव्द्यथां रुषा ।
निकुंभं च गदाभिस्ते प्रजग्मुस्तं समन्ततः ॥४०॥
हलायुधो रुषाविष्टो हलेनाकृष्य दानवं ।
निकुंभं मुशलेनाशु जघान तस्य मस्तके ॥४१॥

ततो निकुंभे पतिते यदा भृशं,
सुवाद्यमाने गगनात्प्रहर्षणात् ।
सुरेरितां तां खलु पुष्पसन्ततिं,
पपात तेषामुपरि ध्रुवं मुहुः ॥४२॥

इतिश्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमहात्म्ये प्रद्युम्नोत्तरे शक्रतापशैन्यवधो नाम व्यशीत्युत्तरशततमोऽध्यायः ॥१८२॥

—❀❀❀—

स्कन्द उवाच ।

एवं निपातितेष्वार्य सैन्येषु भ्रातृषु ध्रुवं ।
मायावी वीक्ष्य तान् क्रोधाच्छक्रारेर्वर्वृधे वपुः ॥१॥
उत्पपाताम्बरं सद्य अलक्षोसुभृतां तदा ।
पांशुवर्षं ववर्षादौ तेषामुपरि सोनिशं ॥२॥
सानिलांश्च जलासारान् करकान्सानलांस्तथा ।
आच्छाद्याशु दिशः सर्वा अंधीकृतेव शर्वरी ॥३॥
ववर्ष प्रस्तरासारान् स तेषामुपरि ध्रुवम् ।
नानास्यानहि शरासारान् सर्प्पासारांस्तथा पुनः ॥४॥
जलानिलानलग्रावबृष्टिभिश्च समन्ततः ।
पीड्यमाना ह्यभूवंस्ते निर्यत्ना यादवा मुने ॥५॥
ददंशुर्यादवानस्त्रैस्तत्प्रेरितैर्भृशं मुहुः ।
गृध्रोलूकविडालास्यैः सिंहव्याघ्राननैस्तथा ॥६॥
संदंश्य यादवान्सर्पा वबन्धुः सुदृढं पृथक् ।
आनिनाय विलं वज्रो हन्तुं तानचलात्स्वकम् ॥७॥
ददर्श तादृशं वज्रं नीयमानं च यादवान् ।
चुकोपातिशसयं कृष्ण ह्यवोचद्गरुडाय च ॥८॥

कृष्ण उवाच ।

पश्य पश्याशिवसां चेष्टां दुष्टस्य दानवस्य च ।
नागेन्द्रामरांस्तार्द्य तादृशान्यादवान्पुनः ॥९॥
यादवान्निःप्रयत्नान्स्वं नीयमानान् विलं प्रति ।
दुष्टदैत्येन चावध्य रक्षणीयान् स्वकान्बुधैः ॥१०॥
तारयेत्सङ्कटाद्धीरः स्वाप्तं वा शरणागतं ।
बुद्धिभिःपौरुषैर्नोचेत्किल्विषमश्नुते हि सः ॥११॥
तार्क्ष्यंसुंच ध्रुवं सर्पान् यादवानां हि वन्धकान् ।
शक्र जयन्त दिक्पाला युध्यास्वं तेन वै समम् ॥१२॥

स्कन्द उवाच ।

एवं प्रोक्तं समाकर्ण्य विभुना गरुडो द्रुतं ।
परिक्रम्य नमस्कृत्य कृष्णं ययौ तदन्तिकम् ॥१३॥
तार्द्यमालोक्य संत्रस्तः परित्यज्याशु यादवान् ।
पलानिलैस्तद्दृष्ट्वा फणिनो दुद्रुवुर्जलं ॥१४॥
जग्राह गरुडो दोष्णा शक्रारेर्मुकुटं द्रुतम् ।
निहत्य पक्षपातेन नयन्तन्तं च यादवान् ॥१५॥
शक्रतापो रुषाविष्टो मुक्तकेशो महाबली ।
तार्द्योपरि ववर्षाशु वह्निवृष्टिं च मायया ॥१६॥
ततोपतज्जले तार्द्यो दग्धपक्षो हि निर्बलः ।
गदया प्रेक्ष्य तार्द्यं स शक्रतापो जघान च ॥१७॥
हाहाकारो भवद्रावो व्योमभूशोभयोद्भवः ।
त्रिदशां मुनिसिद्धानां दुःखेरितस्तदामुने ॥१८॥
कृष्णःपुरःसरा देवा यादवानभिदुद्रुवुः ।
रक्षितुं त्वरितं यानैः शस्त्रास्त्राणि समुद्यताः ॥१९॥
यावच्चन्द्रो ववर्षाजौ पीयूषं गरुडोपरि ।
यावन्न त्रिदशाः प्राप्तास्तेषां चैवान्तिकं मुने ॥२०॥
ततो भ्रमत्पुनस्तार्द्यो जलाद्व्योम्नि च पूर्ववत् ।
ययौ चन्दनशैलं स सुधाप्ररोहितच्छदः ॥२१॥
युध्यमानेऽमरैःसार्द्धं दैत्यशस्त्रैः प्रहारिते ।
दोष्णादायाद्रिसानुं स वज्रोपर्यक्षिपद्रुषा ॥२२॥
दैत्योपि गदया व्योम्नो निहत्य त्वरितं रुषा ।
शकलीकृतवान्सानुं यावन्न प्राप्तमन्तिकम् ॥२३॥
तार्द्यारूढस्ततः कृष्णः शक्रतापोपरि ध्रुवम् ।
ववर्ष शरवर्षाणि शार्ङ्गच्युतानि सन्ततं ॥२४॥
शक्रो ववर्ष भूयोसौ शरासारांस्तथैव तम् ।
अशनिना जघानाशु पूर्ववैरमनुस्मरन् ॥२५॥
संभूय यादवा भूयो जघ्नुर्वज्रं शरैर्भृशम् ।
देवा दिग्पतयश्चैव तथापराः समन्ततः ॥२६॥
रोरावतो रुषा युक्तः पूर्ववैरं स्मरन्मुहुः ।
दन्ताभ्यां त्वरितं वज्रं शक्रतापो जघान वै ॥२७॥
आमर्षैः पूरितो वज्रो गदामुद्यम्य सत्वरम् ।
त्रिदशानभिदुद्राव ऐरावतमपातयत् ॥२८॥
त्रिदशा यादवा जग्मुः केशवं शरणं भयात् ।
भीष्मास्यं वज्रमालोक्य पायादीशं यथा क्षये ॥२९॥
शक्रस्य पतनं प्रेक्ष्य ऐरावतं च केशवः ।
सूर्यप्रतिमसंकाशं चक्रं कामाय वै ददौ ॥३०॥
प्रणम्य शिरसा तातं भक्त्या परिक्रमन्स्मरः ।
सुदर्शनञ्च जग्राह हर्षविस्फुल्लमानसः ॥३१॥

व्याजहार वचो ग्राह्यं शक्रतापो सपा तदा ।
अधिक्षिप्य च देवेभ्यः श्रावयन्सर्वदेवताः ॥३२॥
शक्रताप उवाच ।
केशव मित्रधुक्काम शक्र वलाधुना ह्यलं ।
हत्वा पापानरातींश्च व्रजामि तत्पदं मुदा ॥३३॥
मम गदाप्रहारं च सोढव्यं बोधितो ध्रुवं ।
यं सह्य वीरतां याथ सर्वलोकेषु पूजकाः ॥३४॥
शक्र स्मरसि पूर्वं यदिति गदा प्रहारितम् ।
तद्धि स नागतो भूयः कस्त्वं भ्राता वदाऽधुना ॥३५॥
मित्रद्रुहं महापापं हत्वा दर्पक सत्वरं ।
धर्मेश्वरसहायाद्वै व्रजाम्यहं परं पुरम् ॥३६॥
प्रद्युम्न उवाच ।
नवल्गसेधुना मूढ प्रयुध्यस्व मया समम् ।
दैत्यधर्मं पुरस्कृत्य दर्शयन् मां स्वपौरुषम् ॥३७॥
नवल्गन्ति च ये शूरा युधि शस्त्रपरैः सह ।
प्रयुध्यन्ति परां शक्तिं स्वां दर्शयंश्च नेतराः ॥३८॥
वृथा वल्गन्ति ये युद्धं संत्यज्य शूलमानिनः ।
युध्यन्ति दर्शन् शक्तिं शूरास्त एव विश्रुताः ॥३९॥
स्कन्द उवाच ।
एवं प्रोक्त्वा ततस्तौ च युयुधतुर्भृशं पुनः ।
शस्त्रास्त्रैः क्षेपणैः क्रोधात् परस्परं जयैषिणौ ॥४०॥
अभून्मुने महद्युद्धं प्रद्युम्नशक्रतापयोः ।
रथिनोः छिन्नशस्त्रास्त्रैस्तुमुलं लोमहर्षणम् ॥४१॥
जजापातिभृशं जीवो मुनिसिद्धगणैः समं ।
प्रद्युम्नजयकामेन जयोस्तु ते स्मर ब्रुवन् ॥४२॥
जजापेति भृशं शुक्रो दैत्यार्थैः सह चाम्बरे ।
जयकामेन शक्रारेर्वेत्र जयोऽस्तु ते वदन् ॥४३॥
चिक्षेप सुदर्शनं कामो भानुमन्तं च तं प्रति ।
अधावद्द्योतयन्काष्ठाश्चक्रं भानुरिव क्षये ॥४४॥
तदान्तकं समात्रज्य क्षुरनेमिसुदर्शनम् ।
अच्छिनोत् खलु दैत्यस्य शक्रारेः कन्धरं भृशम् ॥४५॥
छिन्नशिरस्तदा वक्रः खड्गमुद्यम्य सत्वरम् ।
यादवानभिदुद्राव कालान्तक इव क्षयः ॥४६॥
प्रद्युम्नोपि तमालोक्य खड्गहस्तं द्रुतं व्रजन् ।
भल्लैर्विभेद दैत्यार्थं स्वके सैन्ये पलायिते ॥४७॥
व्यसुः पपात तोये च शक्रतापी महाबली ।
शक्रमार्गजलं रुन्ध्य सच्छिन्नकन्धरो मुने ॥४८॥
भूयश्छेद कन्दर्पश्चक्रेण तत्कलेवरम् ।
द्विधा चक्रे पुनस्तत्र ततश्च कवलीकृतः ॥४९॥
ववर्षुः पुष्पवर्षाणि कामस्योपरि चाम्बरात् ।
नेदुर्दुन्दुभयो व्योम्नि तद्यशांसि जगुर्भृशम् ॥५०॥
अपूपुजन्मुदा देवाः कृष्णपुरःसराः स्मरम् ।
साधुसाध्विति संवाद्य नो रक्षिता इति ब्रुवन् ॥५१॥
कृष्णाय प्रददौ चक्रं प्रद्युम्नो हि प्रणम्य च ।
तत शक्रया हतः पापस्तातेति प्रवदन्मुदा ॥५२॥
अध्यायमेतच्छृणुयाद्धि योऽरयः
प्रयान्ति तस्याशु विनाशतां सदा ॥५३॥
जयं समाप्नोति युधि ब्रुवन् यशः
कठोरलभ्यं महतामपि श्रुतम् ॥५४॥

इतिश्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये प्रद्युम्नोत्तरे शक्रतापवधो नाम त्र्यशीत्यधिकशततमोऽध्यायः ॥१८३॥

—❀❀❀—

अगस्त्य उवाच ।
सानुजं शक्रतापञ्च निहत्य यदुनन्दनः ।
द्वारवत्यां प्रयाणे च सबले सानुजे हरौ ॥१॥
कथं ववाह वागीशा केनैव पूजिता पुनः ।
पञ्चवक्त्रश्च तत्क्षेत्रं तत्सर्वं वद मे विभो ॥२॥
लोमहर्षण उवाच
प्रश्नमानं घटोद्भूतं स्कन्दोऽब्रवीद्वचो मुदा ।
अभ्यर्च्य साधु चेत्युक्त्वा सर्वं तस्मै द्विजोत्तमाः ॥३॥
स्कन्द उवाच ।
सर्वदुरितकल्लोलहारिणी पुण्यमालिनी ।
हराङ्कस्थायिनी तस्यै वागीशायै नमोनिशम् ॥४॥
ज्योतिर्लिङ्गे स्थितौ व्यक्ते प्रव्यक्ता वाग्मती जले ।
तत्क्षेत्रे समिता व्यक्ते तत्राजग्मुः सुरोत्तमाः ॥५॥
भक्त्याराधितवन्तस्ते पशुपतिं च वाग्मतीं ।
ऋषिपुरःसरा विप्र ब्रह्मविष्णुपुरन्दराः ॥६॥
एकदा दिवसे देवा निषेदितेषु संसदि ।
ददृशुर्वाग्मतीं देवीं ज्योतिर्लिङ्गाङ्गनिःसृताम् ॥७॥
द्रवीभूतां महादेवीं स्वच्छकल्लोलशालिनीम् ।
चित्रास्तमनोऽमराः सर्वे तस्थुः किमिति संवदन् ॥८॥
प्रेक्ष्याश्चर्यां तादृशां रूपां दिव्याङ्गीं प्रणतो मुनिः ।
पप्रच्छ पद्मजं कासौ चित्रात्मेति सुभक्तितः ॥९॥
नारदः प्रश्नमानो हि ब्रह्माणं संसदि ध्रुवम् ।
व्याजहार वचो दिव्यं तद्वृत्तान्तं स्वसूनवे ॥१०॥
ब्रह्मोवाच ।
आद्यशीर्षे स्थिता देवी साद्याननविनिःसृता ।
याद्यास्यनिःसृता विद्या सैवेशाङ्गविनिःसृता ॥११॥

आषाढ़सितपक्षे च द्वादशीमैत्रयुग्बुधे ।
हरमूर्ध्नि स्थिता गङ्गा मुखादवततार वै ॥१२॥
तद्वाद्रे श्रवणाक्ते प्राक् सावित्री संभवा विधेः ।
कार्त्तिके रेवतीयुक्ते गायत्री प्रभवा तथा ॥१३॥
तन्मानसोद्भवा गङ्गा तासां योगाद्धि वाग्मती ।
वाग्मती शिवगंगा च ब्रह्मसरस्वती शिवा ॥१४॥
वाग्मती सरितां श्रेष्ठा वाग्मती लोकपावनी ।
वाग्मती हृद्यदात्री च वाग्मती दुःखतारिणी ॥१५॥
स्मरणादोर्निर्धीः(णात्सन्निधिः)सद्योमुच्यतेदर्शनात्पुनः।
नेत्रादिजैर्न्नरः पापैः स्पर्शनादंगजैस्तथा ॥१६॥
आचमनाद्वचोद्भूतैः स्नानाज्जन्मार्जिताशुभैः ।
सहस्रनामपाठाद्धि सहस्रजन्मजाशुभैः ॥१७॥
कदाचिद्दैवयोगेन स्नात्वा च वाग्मतीजले ।
तन्मनुस्मरणाद्भक्त्या नरो नारायणो भवेत् ॥१८॥
स्मरणाद्दर्शनं श्रेष्ठं दर्शनात्स्पर्शनं वरं ।
स्पर्शादाचमनं श्रेष्ठं स्नानं पाठः क्रमान्मनुः ॥१९॥
मन्त्ररूपा महादेवी नाभक्तिने प्रकाशयेत् ।
नामानि जलरूपाया भुक्तिमुक्तिप्रदानि च ॥२०॥
रहस्यं सर्वलोकानां कलिप्राप्ते विशेषतः ।
पत्यक्षं फलदा सद्यो मुमुक्षूणां च वाग्मती ॥२१॥
देव्याः पानीयरूपाया ध्येयं नाम्नः सहस्रकं ।
पाठाद्योगाल्लभेन्मोक्षं शृणु वक्ष्यामि नारद ॥२२॥
अखिलं प्रथमे विद्या वाग्रूपायै च हृन्मनुं ।
वागीश्वर्य्यै ह्यखण्डः प्राक् शिरोमन्त्रं प्रयोजयेत् ॥२३॥
सरस्वत्यै पुरो ब्रह्म अन्ते शिखामनुं न्यसेत् ।
शिवगंगा तथा विष्णुन्न्यसेद्धि कवचं मनुं ॥२४॥
वाग्मत्यै च पुरो रुद्रो नेत्रवीजं न्यसेत्पुनः ।
वागीशायै तथा सर्व्वमस्त्रमन्त्रं न्यसेत्ततः ॥२५॥
सर्व्वादौ योजयेत्तारमृषिच्छन्दश्च संन्यसेत् ।
ॐश्रीवाग्मत्याःसहस्रनामस्तोत्रस्य गायत्रीच्छन्दो ।
वागीश्वरीदेवता वाग्भवोविजं
कामराजः लज्जा कीलकंशिवगंगा
बुद्धिःब्रह्मसरस्वतीशक्तिश्चतुर्वर्गसाधने विनियोगः ॥२६॥
लज्जावीजं त्रिधालिख्य वाग्भवञ्च त्रयस्त्रिधा ।
धर्म्मवीजं त्रिधा ध्रीं ध्रीं नेत्रवन्हिसमायुतां ॥२७॥
लज्जात्रयं गणेशाख्यं ग्रीं ग्रीं ग्रीमिति पूर्ववत् ।
शारदायै नमश्चान्ते सिद्धं सारस्वतीमनुं ॥२८॥
सर्वोपरि तथोंकारं जपाद्वागीश्वरो भवेत् ।
प्रणवश्च त्रयं वाणीलज्जाधर्म्मत्रयांगणं ॥२९॥
शारदायै शुभे भार्य्या प्रजपाद्वाक्पतिर्भवेत् ।
करपुटे जलं धृत्वा त्रयोदश्यां निरामिषः ॥३०॥
वाग्मत्याः प्रजपन्यश्च कविराजो भवेद्द्रुतं ।
पुण्डरीकसमासीनां कर्प्पूरेन्दुसमोज्ज्वलां ॥३१॥
त्र्यक्षां स्मिताननां ध्येयां सर्व्वालंकारशोभनां ।
मालां वरं दधानाञ्च पुस्तकमभयं करैः ॥३२॥
वाग्देवीं वाग्मतीं ध्यायेचन्द्रकलाद्रवत्सुधां ।
ॐवाग्मती वाग्भवा वाणी वागीश्वरी वचोवरा ।३३।
वागीशा वरदा ब्राह्मी वाग्विभूतिश्च भारती ।
वागीशवल्लभा भाषा गीरूपा वाक्स्वरूपिणी ॥३४॥
वाग्रूपिणी च चैतन्या वाग्वागीश्वरवल्लभा ।
वाचोर्मिमालिनी वाहा अर्वाक्पापोर्मिनाशिनी ॥३५॥
वाग्देवेश्वरकण्ठस्था वाग्देवी वाग्मतीश्वरा ।
वाग्भूतार्णप्रवाहा च वागैश्वर्य्या सरस्वती ॥३६॥
अणिमारुन्धती अर्द्धा अगैश्वर्य्यावतारिणी ।
अशरीरार्द्धमात्रा च अन्नरूपाघहारिणी ॥३७॥
अतिसौम्याच्युताशोका अचिंताचलवाहिनी।
अत्युग्राचलसम्भिन्ना अच्छिन्नाच्छिन्नवाहिनी ॥३८॥
आनन्दिनी स्वभक्तानामात्मान्तस्था च जीविनां ।
आनन्दाऽमृतवर्णाभा आद्याननसमुद्भवा ॥३९॥
आनन्दोर्म्मिप्रवाहा च आपोदेवी पयोमयी ।
आकाशवाहिनी आर्य्या आकरा शर्मणोर्मिणां ।४०।
इच्छा शक्तिश्च इन्द्राणी इन्दिरा हरिवल्लभा ।
ईप्सितार्थप्रदा इन्दुरिङ्गितज्ञा शिवप्रिया ॥४१॥
ईश्वरी लोकईशानी ईश्वरमोदकारिणी ।
ईशानी शाङ्करी शान्ता ईशानमुखसंभवा ॥४२॥
उमाख्या उग्ररूपा च उग्रवरप्रदा उमा ।
उमार्द्धाङ्गनिषण्णा च उग्रशीर्षावतारिणीः ॥४३॥
ऊर्ध्वेश्वरी सदोर्ध्वस्था ऊनकिल्विषकारिणी ।
ऊशीरगन्धसुप्रीता ऊःचवरप्रदामणी ॥४४॥
ऊरूपा सर्वसंहारे ऊर्ध्वगतिप्रदर्शिनी ।
ऊर्ध्वगा ऊग्रभार्य्या च ऊर्ध्वस्थानप्रदायिनी ॥४५॥
ऋग्यजुरथ सामात्मा ऋवर्णा ऋद्धिरूपिणी ।
ऋकारा दितिरूपा च ऋणहन्त्री ऋतूत्सवा ॥४६॥
ॠकारमुखसंभूता ॠवर्णात्मामरप्रसूः ।
लृकारसंस्तुताऽनेका लृवर्णसेवितारिहा ॥४७॥
एकाचैकाररूपा च एकारा मदनोत्सवा ।
एकारस्था समैकाख्या एकाधारा बहुश्रिता ॥४८॥
ऐकारवल्लभा ऐन्द्री ऐकारा वामलोचना ।
ऐकारात्मा अनेकाध्वा ऐन्द्रीगणप्रसेविता ॥४९॥
ओंकारस्थातथोंकारा ॐकारा श्रुतिभूषणा ।

ॐकारवक्त्रसंभूता ॐकारपूर्वजप्रिया ॥५०॥
औद्र्ध्व रेतोर्चिता और्व्वी और्व्वदेहफलप्रदा ।
औत्तानपादसंप्रीता और्व्वीसमोर्व्वशीप्रिया ॥५१॥
अम्बिकाम्बालिकानन्ता अर्णवाध्वरशीर्षगा ।
अङ्कुशधारिणी अम्बा अन्नपूर्णान्नकारिणी ॥५२॥
अः रुद्रवक्त्रसंजाता अःरूपा शिववल्लभा ।
अःप्रोक्ता चैनसां शास्ता अनङ्गारिविनोदिनी ॥५३॥
कलाधारा कलारूपा कौमुदी कालभैरवी ।
कमला कामिनी काली कुल्लुका कुसुमप्रिया ॥५४॥
कलावती करालास्या कैलासस्था कलानिधिः ।
कामाख्या कुलकान्ता च कामदा कामचारिणी ॥५५॥
कामधेनुः कृशाङ्गी च कालिन्दी कुञ्जरेश्वरी ।
कान्तिकाया च काञ्चीस्था अलका कूटवाहिनी ।५६।
कुलवती कुटिलाङ्गी कोटराक्षी कपालिनी ।
कामेश्वरी च कङ्काली कीर्त्तिदा कामसुन्दरी ॥५७॥
कामार्त्ता कामरूपा च करुणा कुलदेवता ।
कुलिशाङ्गी कला काष्ठा कुमारी कमलेक्षणा ॥५८॥
कल्याणी कार्चिता कान्ती कालरात्री च कौशिकी ।
काम्या अलकनन्दा च कुलधर्म्मप्रकाशिनी ॥५९॥
कलुषघ्नी कृपास्वच्छा कृष्णा कृष्णसमर्चिता ।
कान्तकल्लोललोलाढ्या कृपाकल्लोलशालिनी ॥६०॥
खगेश्वरी खरूपा च खगा खगेन्द्रवाहिनी ।
खवर्णा खड्गहस्ता च खेचरी खेटकायुधा ॥६१॥
खाखोदरी खगेन्द्राभा खमणिद्युतिशोभना ।
खरदंष्ट्रा खगास्या च खण्डपरशुवल्लभा ॥६२॥
गजास्यास्वा च गुह्येशी गजेन्द्रदशनच्छविः ।
गजचर्म्मावृताजाया गजाननप्रसूतिका ॥६३॥
गौरी गोदावरी गङ्गा गन्धर्व्वगणसेविता ।
गणनीया गणाध्यक्षा गम्भीरनीरवाहिणी ॥६४॥
गणमाता च गान्धारी गगनमणिभूषणा ।
गोमती गगनेशानी गिरिजा गिरिशप्रिया ॥६५॥
गङ्गार्चिता च गायत्री गिरिस्था गिरिसंभवा ।
गण्डकी गरुडस्था च गोकर्णार्चा च गौतमी ॥६६॥
घनभक्तिप्रिया घोरा घनामरप्रसेविता ।
घृताचीसेविता घोरा घोराग्न्याघोरवल्लभा ॥६७॥
घनघनौघघोरास्या घनपापविनाशिनी ।
घनस्वना घना घोरा घोरतरा घनच्छविः ॥६८॥
ङेश्वरी घोरघोषा च घोरकिल्बिषघातिनी ।
चञ्चला चारुवाहा च चण्डेश्वरी च चित्तवित् ।६९।
प्रचण्डा चण्डरूपा च चामुण्डाः चतुरानना ।
चपला चण्डिका चण्डी षट्चक्रान्तर्न्निवासिनी ।७०।
चारुचारा च चार्व्वङ्गी चतुरा चारुहासिनी ।
चतुःषष्टिकला चित्रा चित्राङ्गी चारुलोचना ॥७१॥
चारुदेहा चतुर्बाहुश्चित्रभानुतनुप्रभा ।
चन्द्रभा चन्द्रभागा च चैतन्या चक्रधारिणी ॥७२॥
छन्दोरूपा च्छवर्णाभा प्रोच्छायाच्छन्नविग्रहा ।
छायासञ्छन्दितालोका च्छकाराच्छिन्नविग्रहा ।७३।
छत्रसञ्छादिता स्वच्छा लाञ्छनोर्म्मिषयश्छविः ।
छन्दोमयी श्रुतिञ्छन्दा इच्छात्मा छिन्नसंशया ॥७४॥
जगदानन्दिनी ज्वाला जाम्बवत्यर्चिताजिता ।
जगत्प्रिया जितक्रोधा जगद्धीरा जितेन्द्रिया ॥७५॥
जान्हवी जानकी जाप्या जननी जननन्दिनी ।
जगद्धात्री जगन्मान्या जन्तुजन्मान्तराश्रिता ॥७६॥
जगद्बपुर्ज्जगज्जीवा जातवेदापराजिताः ।
जयमूर्त्तिर्ज्जगन्माता जनस्वान्तन्निवासिनी ॥७७॥
जाम्बूनदप्रवाहा च जया च विजयाजया ।
जगज्जीवमयी माता जयन्ती जगदुच्छ्रिता ॥७८॥
जीवेश्वरी जनैश्वर्या जीवेशजनकारीणी ।
झंकेश्वरी झकारात्मा झंकारस्वनवाहिनी ॥७९॥
झर्झरानिपतन्ती च झंकेशार्द्धाङ्गहारिणी ।
झषावतारसुप्रीता झषवर्गप्रसेविता ॥८०॥
झर्झररवसंक्षिप्ता झकाररूपतोषिता ।
अट्टाट्टहासिनी क्रोधात्कोटिकोटितरङ्गिणी ॥८१॥
तटिनी करहाटाढ्या अटवीक्षितिगामिनी ।
हिमकूटतटोद्भूता कूटकटकवाहिनी ॥८२॥
शंखताटङ्करम्यास्या निधनोयतटङ्किनी ।
पीठेश्वरी च पीठार्य्या पीवराम्बुप्रवाहिणी ॥८३॥
डाकिनी डमरुहस्ता डकारेशा डनादिनी ।
डम्भहन्त्री च भेरुण्डा डामरा डण्डतर्ज्जनी ॥८४॥
ढरूपा ढस्वरा ढात्मा भङ्गाढ्या ढण्ढकारिणी ।
ढक्कावाद्यस्वनावीचीदृढधारा दृढारवा ॥८५॥
प्रणवेशी प्रणम्यार्य्या नम्या प्रणवसंभवा ।
तरङ्गिणी तरङ्गाढ्या तन्त्रीतरलगामिनी ॥८६॥
तामसी च तमोरूपा तमोगुणा तमःपरा ।
तीरवती त्रिरूपा च तुष्टिस्तीव्राद्रिहात्रया ॥८७॥
तीव्रगा तीव्रभङ्गी च तीव्रतोया तपोमयी ।
दुस्तारा दुस्तरत्राता तारेशीताररूपिणी ॥८८॥
तारिणी ताररूपा च तरलतरतारिणी ।
तपोनिष्ठा त्रिमात्रा च तपस्विनी त्रिलोचना ॥८९॥
त्रिदिवस्था त्रिधारा च तारेश्वरी त्रिविक्रमा ।

त्रिवर्गगामिनी त्रिस्था तत्त्वा त्रिपुरवासिनी ॥९०॥
त्रिलोकात्मा त्रिलोकस्था त्रैलोक्यतीर्थनन्दिनी ।
ताटङ्किनी च तारस्था तारा त्रिशूलधारिणी ॥९१॥
त्रिमूर्तिस्तरणी तापा त्र्यक्षरा त्रिविधाङ्गिनी ।
तीर्थवन्द्यालसत्तीर्था तीर्थराज्ञी च तीर्थदा ॥९२॥
तीर्थाद्या तीर्थज्येष्ठा च तीर्थार्घ्या तीर्थवाहिनी ।
तार्क्ष्यस्था तार्क्ष्यवन्द्या च तार्क्ष्यार्घ्या तार्क्ष्यवाहिणी ।
स्थानस्था स्थण्डिला स्थीरा स्थाणवीश्वरी स्थलाश्रिता
मधुरा मथुराख्याता स्थानीयस्था स्थला स्थिरा ॥९४॥
ज्येष्ठा च स्थविरा सन्था मैथिली प्रमथाधिपा ।
दुष्कृतघ्नी सुधादोग्ध्री देवमाता दधिप्रभा ॥९५॥
देवता देवमूर्तिश्च देवदेवप्रियोत्तमा ।
देवदूती च दीप्ताख्या देवकी दैत्यनाशिनी ॥९६॥
द्वीपिचर्म्मावृता दाक्ष्या दक्षयज्ञप्रमाथिनी ।
दारिद्रनाशिनी दान्ता दाक्षायणी च दुर्गहा ॥९७॥
दावाग्निदलना दक्षा दिग्वस्त्रा द्वादशानना ।
दशभुजा च दक्षिस्था दण्डिनी दण्डवत्प्रिया ॥९८॥
दुरितघ्नी दया दुर्गा दुराधर्षा दिगम्बरी ।
दाहप्रशमनी दीप्ता दुराराध्या च दारुणा ॥९९॥
अष्टादशभुजा चण्डा द्विपत्रवासिनी दया ।
दक्षकन्या द्रवा दिव्या दिव्यरूपा दरीस्तवा ।१००।
दिव्यार्चिता च दिव्याङ्गी देवसैन्या सुदीप्तिका ।
दायिनी द्रव्यरूपा च दानवघ्नी दयाकरा ॥१०१॥
दुर्गारूपा दुराराध्या दुर्ज्जया दुरतिक्रमा ।
देवेश्वरी दयाशीला दिव्यमोक्षप्रदायिनी ॥१०२॥
धीरा धीरप्रवाहा च धाराप्रवाहिणी सुधा ।
धरित्री धारिणी धात्री धरणीधरप्रवाहिणी ॥१०३॥
धन्या धान्यधरा धीरा धारणा धरणी धरा ।
धराधरानना धैर्य्या धर्म्मात्मा धर्म्मरूपिणी ।१०४।
धीरूपा धिषणा धात्री धूम्राक्षा धर्म्मविग्रहा ।
ध्यानगम्या निशि ध्येया ध्यानानना धराश्रिता ।१०५।
ध्यानरूपा बुधख्याता ध्यानस्था ध्यानरूपिणी ।
ध्यानातीतामरख्याता ध्यातव्या ध्यानतत्परा ॥१०६॥
ध्यानेक्षणा धिया ध्येया ध्यानास्या ध्यानसंश्रिता ।
धीरख्याता धराधाना धाराध्येया विधायिनी ॥१०७॥
नन्दिनी च नीराधारा निष्कला निर्गुणा नदी ।
नीलघनस्वना नग्ना नानाजातिनिवासिनी ॥१०८॥
नागोपवीतिनी नाट्यानन्दा नृमुण्डधारिणी ।
नीलघनाभदेहा च निर्द्वन्द्वा नागनायिका ॥१०९॥
नागेन्द्रदन्तसंकाशा नरकनाशिनी नया ।
निर्द्दया निर्द्दरा निष्ठा नारायणी निरञ्जना ॥११०॥
निष्ठुरा च निराकारा नारसिंही च नोपमा ।
निशीथिनी निशाहन्त्री नानादुःखनिवारिणी ।१११।
निर्म्मदा करतोया च निष्कलङ्का च नाशिनी ।
शतद्रुसिन्धुसंवाहा नित्यानन्दविधायिनी ॥११२॥
त्रिनयना नृसिंहार्य्या नानाकारप्रवाहिणी ।
पापघ्नी पाविनी पद्मा पवित्रा पद्मपूजिता ॥११३॥
पद्मारूपा प्रचण्डा च पद्मस्था पद्मसंभवा ।
पद्माक्षी पद्मिनी प्रीता प्रकटवासिनी परा ॥११४॥
प्रीतिभक्ता च पश्यन्ती परंब्रह्मावतारिणी ।
प्रभावती परात्मा च पद्मजा परमेश्वरी ॥११५॥
पातकघ्नी पराशक्तिः पञ्चमी पञ्चमारुता ।
पञ्चात्मा पञ्चतत्त्वा च पञ्चत्वस्था परापरा ।११६।
पञ्चपीठेश्वरी पूर्णा पूरका पञ्चमीप्रिया ।
पूर्णिमा पूर्णरूपा च पूर्णेश्वरी परात्परा ॥११७॥
फणीन्द्रभूषणा फेरुः स्फटिकाभा प्रवाहिणी ।
स्फीरा स्फोटप्रवाहा च स्नातकस्फोटनाशिनी ॥११८॥
फणिहारा फलाढ्यार्य्या स्फटिकार्णा फलप्रदा ।
फेरुस्था फेरुरावा च फेत्कारिणी तथा प्रभा ॥११९॥
वैष्णवी वामरूपा च वामेश्वरी वरप्रदा ।
वामस्था वाहिनी वामा वामेशा वामलोचना ।१२०।
वरेण्या वरदा वाला वरार्य्या वरदायिनी ।
विमला च विशालाक्षी विश्वाक्षी विन्दुवासिनी १२१
विश्वात्मा च विरूपाक्षी विभवा विन्ध्यवासिनी ।
बोधिनी वीरजा वीरा विश्वयोनिश्च वत्सला ॥१२२॥
विश्वा सर्व्वसुधा वीजा विशालामृतवाहिनी ।
विद्याधरी च विद्यात्मा वैखरी वामकेश्वरी ॥१२३॥
वेदरूपा च वेदान्ता वेदाङ्गवेदवल्लभा ।
वाराही वासवी वाणी वाराणसीनिवासिनी ॥१२४॥
भवानी भववन्द्या च भूमिस्था भूमिभूषणा ।
भागीरथी भवाराध्या भवमाता भवेश्वरी ॥१२५॥
भयापहा भवानन्दा भयङ्करी भयनाशिनी ।
प्रभादेवी भगेशी च भाविनी भवनाशिनी ॥१२६॥
भक्तिगम्या च भीतिघ्नी भास्करी भुवनेश्वरी ।
भक्तिवरप्रदा भव्या भ्रामरी भगमालिनी ॥१२७॥
भक्तितुष्टा च भेरुण्डा भुक्तिदा भवतोषिणी ।
भावना भुवनेशी च भक्तीशा भवलोचना ॥१२८॥
भास्वद्देहा च भव्यास्या भावती भवरञ्जनी ।
भूभूषणा च भूतस्था भूमिभूषणवाहिणी ॥१२९॥
भगवती भवात्मा च भवदुःखप्रभञ्जनी ।

भीमरूपा भवभ्रान्ती भव्या भव्यार्चितानना ॥१३०॥
भीमादेवी शुभा भद्रा भीमा भीमनिनादिनी ।
भूतेशी भूतधात्री च भूतस्था भूतभाविनी ॥१३१॥
माहेश्वरी माहामाया मुञ्जवदद्रिसङ्गमा ।
मशेखरी महामारी मान्या महेशनन्दिनी ॥१३२॥
महाज्योतिर्म्महामेधा मायापुरीनिवासिनी ।
मातङ्गिनी मनोरूपा महाभूता च मध्यमा ॥१३३॥
मणिपूरकमध्यस्था मोहिनी विश्वमोहिनी ।
महाधृतिर्म्महाकाली मदिरा मन्दितानना ॥१३४॥
महामतिर्म्महासूक्ष्मा मधुमती महोदरी ।
मेनकागर्भजा मास्था मङ्गला च सुमङ्गला ॥१३५॥
मन्दहासा महादंष्ट्रा मालिका च महोमखा ।
मदालसा मनोज्ञा च मनस्विनी मनोहरा ॥१३६॥
मन्दाकिनी महाभद्रा मोक्षदात्री च माधवी ।
मातरा मन्त्ररूपा च मन्त्रमाता मणिप्रभा ॥१३७॥
मुद्राप्रिया च मेरुस्था मन्त्रात्मिका मनोरमा ।
मृगेन्द्राद्रिप्रवाहा च महेशमुखसंभवा ॥१३८॥
मणिप्रतिर्म्महावेगा मणिमुकुटसंभवा ।
याज्ञेया यमुना ज्येष्ठा यज्ञमाता यशस्विनी ॥१३९॥
यज्ञाङ्गी यामरूपा च यज्ञरूपा यशोमयी ।
यज्ञप्रिया च यज्ञेशा यज्ञभोत्री यशःप्रिया ॥१४०॥
यशोदागर्भसञ्जाता यशःपूर्णा यशोबला ।
यादःप्रसेविता याम्या यातुधानप्रपूजिता ॥१४१॥
योगसारा युगाद्या च योगेश्वरी अयोनिजा ।
योगीशा योगरूपा च योगीन्द्रहृदयाश्रिता ॥१४२॥
योगिनीसेविता योग्या योगीश्वरा युगस्थिता ।
योगीश्वरास्यसंभूता योगसिद्धा यशोमयी ॥१४३॥
योगोद्भवा सुयोगाख्या योगेन जलवाहिनी ।
रसोत्तमप्रवाहा च रुद्रहृद्रमणा रसा ॥१४४॥
रावणभूलि... रम्भा राजराजेश्वरीवरा ।
रसवाहा च रम्भोरू रसभोक्त्री रसप्रिया ॥१४५॥
रागप्रिया रसज्ञा च रामा राधावतारिणी ।
रमणी राधिकाराध्या राज्यदा राज्यराजिता ॥१४६॥
राकिणी राज्यभोक्त्री च रौद्रीनामवरप्रदा ।
रोहिणी रक्तपद्मस्था रतिज्ञा ऋद्धिरूपिणी ॥१४७॥
रुद्रप्रिया च रुद्री च रथस्था रथगामिनी ।
रत्नाङ्गी रक्तवासा च रक्ताक्षी रक्तदन्तिका ॥१४८॥
रत्नगृहा च रत्नस्था रत्नपद्माश्रिता रमा ।
लम्बोदरप्रसूता च मृगलाञ्छनशेखरा ॥१४९॥
लम्बिका नलिनोल्लासा लाकिनी ललितालका ।
ललना ललजिह्वा च ललिता लोहिताङ्गिनी ॥१५०॥
लम्बोदरी सुलीलागा लोलकल्लोलमालिनी ।
लक्ष्मीर्लक्ष्मीप्रदा लक्ष्मा लक्षालक्षतरङ्गिणी ॥१५१॥
लक्ष्मीरूपा च लक्ष्मीस्था लक्ष्मीलक्ष्मावविश्रिता ।
वेणुर्वंशप्रिया ब्राह्मी वल्लकीवासमः प्रिया ॥१५२॥
वालीशा वालिका वाला ब्रह्मस्वच्छोर्म्मिमालिनी ।
ब्रह्मस्था ब्रह्मरूपा च ब्रह्मेशी ब्रह्मपूजिता ॥१५३॥
ब्रह्मातीता परं ब्राह्मी ब्रह्मेशाच्युतवन्दिता ।
शिवेश्वरी शिवावाहो शाम्भकरी शिवप्रिया ॥१५४॥
शर्वेश्वरी च शर्व्वाणी शान्ता शान्तप्रवाहिणी ।
शमना शक्तिरूपा च शार्ङ्गिणी सर्व्वमङ्गला ॥१५५॥
शतरुद्रा शची शीता शीला शीलप्रदा शुभा ।
शीलरूपा सुशीलस्था श्रीरूपा श्रीकरी शिवा ॥१५६॥
श्रीमयी श्रीनिवासा च श्रीमती श्रीधरार्चिता ।
श्रध्दाप्रिया सदाश्रद्धा श्रद्धात्मा च श्रुतिप्रिया ॥१५७॥
श्रुतिप्रज्ञा शशाङ्काभा श्रुतिरूपा शुचिस्मिता ।
श्रुतिनी श्रुतिनेत्रा च श्रुतिज्ञा श्रुतिपूजिता ॥१५८॥
षट्पत्रपद्ममध्यस्था षट्चक्राधारसंश्रिता ।
च तुःषष्टिकलोपेता षड्स्वरी षडङ्गिनी ॥१५९॥
षडास्यजननी षष्ठी षडानना षड्रूपिणी ।
षोडशी षोडशाधारा षोडशारनिषङ्गिणी ॥१६०॥
साक्षात्सारतरा सारा सत्त्वस्था सर्व्ववन्दिनी ।
सात्त्विकी सत्त्वरूपा च सर्वसत्वनिवासिनी ॥१६१॥
संसारसारहा स्वाहा सुभङ्गा साररूपिणी ।
संवर्त्तान्ता निमेषादिसंवत्सरावतारिणी ॥१६२॥
सहस्रास्या सहस्राक्षा सावित्री सारदेश्वरी ।
सर्व्वेश्वरी च सत्यात्मा सर्वविद्या च साकिनी ।१६३।
स्मृतिमयी च सूर्यात्मा सर्व्ववर्णान्तसारिणी ।
सर्व्वेन्द्रियाश्रिता सूक्ष्मा सर्वेन्द्रियाधिशी वरा ।१६४।
सिद्धात्मा सूक्ष्मरूपांशा सूक्ष्मस्था सोमभूषणा ।
संग्रामजयदा साध्वी सृष्टिस्थितिविनाशिनी ॥१६५॥
सर्व्वेशा सर्व्वरोगघ्नी सर्वग्रहविनाशिनी ।
सद्सद्रूपिणी सत्ता स्वरितरूपा सरस्वती ॥१६६॥
हर्दिनी हरवाग्जाता हरहासास्यनिःसृता ।
हृत्पद्मवासिनी हृष्टा ग्रहराक्षसनिग्रहा ॥१६७॥
हंसस्था हंसरूपा च हंसमूर्त्तिर्हरप्रिया ।
हिंगुला हंसदेवी च हाकिनी हरवल्लभा ॥१६८॥
हंसेश्वरी हकारात्मा हंसीगतिश्च हासिनी ।
हरवक्त्रोद्भवा हंसी हरिवन्द्या हरिप्रिया ॥१६९॥
हेमाभा हिमवत्पुत्री हिमकोटीतपस्विनी ।

हिमाद्रितुङ्गसानोर्हि पतन्ती हिमशीकरा ॥१७०॥
क्षौणीश्वरी क्षमारूपा क्षणदेश्वरशेखरा ।
क्षीणक्षेमङ्करी साक्षात्क्षोभिणी क्षितिवाहिनी ॥१७१॥
क्षामोदरी क्षमा क्षीणा यक्षेश्वरी सुदक्षिणा ।
क्षेमंकरी क्षणासाङ्गी क्षौमाम्बरी क्षणप्रभा ॥१७२॥
क्षेत्रज्ञा क्षेमदा क्षीणा अक्षयाक्षेयभृङ्गिणी ।
क्षेत्रस्था क्षेत्रदेहा च मोक्षदा क्षीप्रवाहिणी ॥१७३॥
इत्येतत्कथितं नाम्नां सहस्रं सुरदुर्ल्लभम् ।
पुण्यात्पुण्यतरन्नाम वाग्मत्या नारदाञ्जसा ॥१७४॥
वर्णितं त्रिदशैः पूर्व्वं ब्रह्मविष्णुमहेश्वरैः ।
सुधामयानि नामानि वाग्मत्या महिमानि च ॥१७५॥
सावधानपरो विप्र पाठकानां विशेषतः ।
दूरस्थानामशक्तानां वदयामि तज्जलासवं ॥१७६॥
एकधा पाठकस्तस्यां स्नानोद्भवफलं लभेत् ।
द्विधा च पठनात्स्नाता मनोवाञ्छाफलं लभेत् ॥१७७॥
त्रिधा अपठनात्स्नात्वा भोग्यार्थी भोग्यमाप्नुयात् ।
चतुर्धा पठनात्सौख्यं पञ्चधा धनमाप्नुयात् ॥१७८॥
षड्धा पाठाद्धि कीर्त्तिः स्यात्प्रभुत्वं सप्तधा तथा ।
अष्टधा पठनात्सद्य ऐश्वर्य्यत्वं फलं लभेत् ॥१७९॥
नवधा चैव वाक्सिद्धिं लोकमानपुरःसरां ।
दशधा च दिगीशत्वं एकादशाद्धरात्मकं ॥१८०॥
पूर्वेद्युः संयमस्तस्यां स्नानं कुर्य्यात्परेद्युतः ।
अन्योऽशक्तोऽपरो धीमान् यथोक्तं तत्फलं लभेत् ॥
दर्भपाणिः सुसंकल्पी यथेप्सितफलात्मकः ।
वाग्मतीजीवने स्नात्वा तदभिधानकं पठेत् ॥१८२॥
एकधा पाठकः पापैः सांवत्सरैः प्रमुच्यते ।
एवं दशोत्तरं वृद्धिं पाठात्किल्बिषनाशनं ॥१८३॥
अशक्तानां प्रभूतानं भक्त्या तच्छ्रवणात्फलम् ।
अन्याभिः सङ्गमे स्नात्वा वाग्मत्यां स्याद्दशोत्तरं ॥
सङ्गमे विष्णुपद्याश्च शतोत्तरं फलं लभेत् ।
मणिमतीसमाजे च सहस्रगुणितं लभेत् ॥१८५॥
गङ्गासमाजके स्नात्वा वाग्मत्यामयुताधिकं ।
गायत्री चैव सावित्री वाग्मती पाठकोऽपराः ॥१८६॥
तासां समाजके स्नात्वा नियुतं फलमाप्नुयात् ।
पूर्वजन्मविपाकैश्च विविधरोगसंकुलः ॥१८७॥
वाग्मत्यां स्नातकः पाठात्तत्तद्रोगैर्विमुच्यते ।
तस्यां स्नाता सकृत्पाठान्मुच्यते क्रिमिव ध्वजैः ॥१८८॥
तस्यां स्नानाद् द्विधापाठात्पक्षिहत्यां व्यपोहति ।
त्रिवारपाठतः स्नातुर्म्मृगवधोद्भवन्तथा ॥१८९॥
चतुर्द्धापाठकः स्नात्वा अश्वहत्यां व्यपोहति ।
पञ्चधा पाठकः स्नाता नरहत्यां व्यपोहति ॥१९०॥
षड्धा पाठाद्धि तत्स्नातुः स्त्रीहत्या प्रविनश्यति ।
सप्तधा बालहत्या च स्नातुस्तस्यां विनश्यति ॥१९१॥
मिथ्योक्तमष्टधा पाठात्तत्युत्कटं व्यपोहति ।
नवधा पाठतः स्नातुर्गोवधजो विनश्यति ॥१९२॥
दशधा पाठतः स्नातुर्ब्रह्महत्यां व्यपोहति ।
स्वर्णस्तेयसुरापानमगम्यागमनोद्भवं ॥१९३॥
अभक्ष्यभक्षजं तस्यां स्नाता पाठाद्विसर्ज्जति ।
कदाचिद्दैवयोगेन हरिवासे गिरौ व्रजन् ॥१९४॥
यत्र चासीद्रमातीर्थं सावित्री वाग्मती तथा ।
गायत्री संगमे धीमान् स्नात्वा नाम पठिष्यति ॥१९५॥
कोटिजन्मार्जितं पापं त्यक्त्वा याति परां गतिं ।
गिर्य्यारोहणमात्रेण अश्वमेधफलं लभेत् ॥१९६॥
संक्रान्त्यां पूर्णिमायाञ्च चतुर्दश्यां तथा कुहौ ।
द्वादश्यां च तृतीयायामष्टम्यां योगसंयुगे ॥१९७॥
नाम्नां सहस्रकं पाठाद्दशोत्तरफलं लभेत् ।
आतुरो मुच्यते रोगैः कुष्ठार्त्तः कुष्ठकैर्हुतं ॥१९८॥
ज्वरार्त्तो मुच्यते रुग्भिः श्रुत्वा सहस्रनामकं ।
प्रौढरोगप्रयुक्तोपि प्राणकण्ठाश्रिते यदा ॥१९९॥
नाम्नां सहस्रकं श्रुत्वा परात्परं गतिं लभेत् ।
ग्रहाः प्रशमनं यान्ति क्रूरा नाम्नां प्रपाठतः ॥२००॥
विद्यार्थी लभते विद्यां पुत्रार्थी लभते सुतं ।
गुर्विणी सूयते पुत्रमाकर्ण्य नामपाठतः ॥२०१॥
कुष्माण्डा राक्षसाः क्रूरा भूताः प्रेताश्च डाकिनी ।
नाम्नां पाठकमालोक्य पलायन्तेऽपसृत्यवः ॥२०२॥
सर्व्वयज्ञोद्भवं पुण्यं व्रतानां चैव यत्फलं ।
धर्म्माणामुपवासानां सर्व्वदानोद्भवं फलं ॥२०३॥
सर्व्वतीर्थोद्भवं पुण्यं प्रतिमादर्शनस्य च ।
तत्पुण्यं गुणितं लक्षं स्नात्वा च वाग्मतीजले ॥२०४॥
सहस्रनामपाठाद्वै मोक्षं परात्परं लभेत् ॥२०५॥
वाग्मत्या सलिले स्वकीयचरणौ संस्थाप्य रोगार्जितः,
प्राणैः कण्ठगतोपि पामरजनो मुञ्चत्यसूं स्तत्तटे ।
सोन्ते योगसुगम्यमानपदवीं प्राप्नोति ह्यवं शिवं,
वाञ्छन्ति त्रिदशा हि तादृशगतिं धीरा जनाः किं पुनः २०६

इति श्रीस्कन्दपुराणे हिमवत्खण्डे ब्रह्मनारदसंवादे
वाग्मतीसहस्रनाम चतुरशीत्यधिक-
शततमोऽध्यायः ॥ १८४ ॥

स्कन्द उवाच ।

ततश्च नारदोगत्य हर्षविस्फुल्लमानसः ।
केशवस्यान्तिकं प्राप शक्राचलाद्धि वेगमन् ॥१॥
संपूज्य कैशविं मान्यैर्भक्त्यावोचजनार्दनम् ।
बद्धाञ्जलिः पुरःस्मृत्वा बहुमानपुरःसरैः ॥२॥

नारद उवाच ।

भगवन् भवरदात्मन् शृणु वचो ममाधुना ।
रक्षितो भवता लोको मेने सर्व्वश्च सुस्थितः ॥३॥
भवता निहते पापे निष्कण्टकं यथासुखं ।
भुञ्जन्ति त्रिदिवे देवा भागधेयं नरा इह ॥४॥
वाग्मतीयं महादेवी गंगां यातुं समीहते ।
तेऽमे यथा पुरा प्रोक्तं भूमन्सस्मार तद्विभो ॥५॥
भिन्ने हि भवता सेतौ ह्रदीभूता च वाग्मती ।
गंगां प्रयास्यतीयञ्च भवद्भिसोचिता खलु ॥६॥

स्कन्द उवाच ।

ॐमित्याशु प्रतिश्रुत्य कृष्णस्तत्रैव संसदि ।
प्रोद्यत्सुदर्शनं गृह्य सेतुं ययौ खगासनः ॥७॥
चक्रेणाशु हरिः सेतुं विभेद बहुधा मुहुः ।
विनिःसृता नदी भूत्वा ह्रदीभूतापि वाग्मती ॥८॥
अद्यापि सालभद्रगङ्गासंगमं वाग्मती मुने ।
प्रववाह नदीभिश्च अन्याभिः सह वाग्मती ॥९॥
ददर्शाशु तदा कृष्णो ह्रदे कच्छपदानवं ।
मुकुटिनं महाकायं लेलिहानमिवाम्बरं ॥१०॥
व्याचष्ट वचनं कृष्णः प्रद्युम्नाय तदा मुने ।
प्रददौ सहसा चक्रं रिपुंहन्तुं सुताय च ॥११॥

कृष्ण उवाच ।

भोस्तार्क्ष्य तव पक्षेण प्रक्षेपय ह्रुतं जलं ।
अस्य चोत्तरदेशात्त्वं ततः क्षीणबलो भवेत् ॥१२॥
ततः सुनिर्जले पापः कूर्म्मः क्षीणबलो यदा ।
प्रद्युम्नोसौ महावीर चक्रेणाशु हनिष्यति ॥१३॥
जहीहि पापमेनं त्वं चक्रेणानेन दर्पक ।
हत्वा दुष्टं ततो रत्नं गृहाणाशु सजीविते ॥१४॥
रुद्रेण विहितः पूर्व्वमस्य मृत्युस्त्वमेव हि ।
मृत्युस्तपस्य तेनेशं त्वां विना याचितोऽमरात् ॥१५॥

स्कन्द उवाच ।

इत्युक्त्वा सहसा कृष्णः प्रद्युम्नाय महामनाः ।
ददौ सुदर्शनं भूयो विराधनिधनाय च ॥१६॥
जग्राह कैशविश्चक्रं भक्त्या प्रणम्य केशवम् ।
श्रुत्वा पितुर्व्वचः पथ्यं हर्षप्रवृद्धमानसः ॥१७॥
चिक्षेप पक्षपातेन वैनतेयो जलं तदा ।
कूर्म्मस्योत्तरदेशाद्वै यावदस्ति तदन्तिके ॥१८॥
तदुपाश्रित्य कन्दर्पः चक्रेणाशु जघान तं ।
चिच्छेद कन्धरं तस्य नर्दमानस्य वै मुहुः ॥१९॥
तस्य कुक्षिगतं रत्नं गृहीतुमुत्ससार सः ।
करं कामस्तदा कूर्म्मः प्रधर्षयद्भृशं स्मरं ॥२०॥
जघानाशु मुहुः शक्रो वज्रेण कूर्म्मरूपिणं ।
जयन्तश्च शरैस्तीक्ष्णैर्देवा दिग्पतयस्तथा ॥२१॥
निषेधितास्ततो देवाः कृष्णेन सहसा तदा ।
मामामराश्च हन्तव्यो भवद्भिरसुरः कदा ॥२२॥
अस्य मृत्युश्च कन्दर्पो विहितश्च पिनाकिना ।
तेन न प्राप्यते मृत्युरस्माभ्यो हि कदापि न ॥२३॥

स्कन्द उवाच ।

ततो जघान भूयोसौ सुदर्शनेन दर्पकः ।
प्राणशेषं हि यावत्तं तत्कन्धरं मुहुर्मुहुः ॥२४॥
जग्राह त्वरितं रत्नं यावत्प्राणं हि दर्पकः ।
कूर्म्मो व्यसुः पपातोर्व्यां वाग्मत्याः पश्चिमे तटे ॥२५॥
रत्नमादाय कन्दर्पो ददौ कृष्णाय सत्वरं ।
प्रणिपत्य मुहुर्मूर्ध्ना भक्त्या तातं परिक्रमन् ॥२६॥
सरितो मार्गवाहिन्यश्छेदिते कूर्मकन्दरे ।
अन्याभिरापगाभिः सा ववाह सह वाग्मती ॥२७॥
स्वष्टायां च रसायां वै प्रभावत्यां समं मुने ।
वाग्मत्याः संगमं प्रेक्ष्य मुमोद केशवो भृशं ॥२८॥
सस्नौ कृष्णो मुदा तत्र प्रभावत्यासुसंगमे ।
दत्वा वरं हि तीर्थाय लोकोद्धारणहेतुकं ॥२९॥
शक्रः सस्नौ जयन्तश्च दिक्पतयश्च यादवाः ।
नारद ऋषयः सस्नुर्व्बहुमानपुरःसरैः ॥३०॥
कृत्वा तीर्थवरं तीर्थाः प्रमोदाख्यं घटोद्भव ।
व्याजहार वचः कृष्णो देवेभ्यः संसदि ध्रुवं ॥३१॥

श्रीकृष्ण उवाच ।

यावन्तः स्रवितास्तोयाः कूर्म्मस्य प्रान्तरात्सुराः ।
तावन्तस्तीर्थतां यान्तु मम हस्तस्पृशात्सदा ॥३२॥
अनागसो हतः कूर्म्मो यस्मात्कामेन देवताः ।
तीर्थयात्रां गतो न्यायः कर्त्तव्यमत्र दर्प्पक ॥३३॥
अवतरन्तु देवा वै आरुह्यैनं पवित्रितुं ।
ततः प्रयततां याति कूर्म्मोयं मुनयस्तथा ॥३४॥
ततो लोका वदिष्यन्ति कूर्म्माद्रिमिति सन्ततं ।
स्थास्यति गणपः काले एतस्याधो दिशि ध्रुवम् ॥३५॥
एकदन्तो महादेवः सर्व्वसिद्धिप्रदायकः ।
नित्यं विराजते तत्र सर्व्वलोकैः प्रपूजितः ॥३६॥

बत्स्याम्यहं तथा चात्र लोकोद्धारणहेतुकः ।
दास्यामि पूजकेभ्यो मां सर्वेप्सितफलं वरं ॥३७॥
अत्रैवानन्तरूपेण स्थास्येहं सर्वदा वृषन् ।
सर्वपर्वसु यत्नेन नागलोकैः प्रसेव्यते ॥३८॥
यश्चात्र स्नायते मर्त्योज्ञानतोऽज्ञानतोपि वा ।
विमुच्य तस्य पंकानि उद्धरिष्याम्यहं च तं ॥३९॥
वासुक्यां प्रभया युक्ते मत्प्रिये तीर्थकेऽमराः ।
महिने स्नातकं भक्त्या उद्धरिष्याम्यहं ध्रुवं ॥४०॥
मत्तीर्थे स्नायते यो हि विशेषेण तिथौ मम ।
तस्य पापानि चोत्सृज्य उद्धरिष्यामि सान्वयं ॥४१॥

स्कन्द उवाच ।

आकर्ण्य वचनं विष्णोस्तदा देवर्षयः समं ।
स्नात्वारुह्याशु कूर्म्माङ्गमवतर्त्तुञ्च तेन वै ॥४२॥
प्रचक्रमे ततः शक्रः कृष्णेन सह सांप्रतं ।
कर्त्तुं नैपालतीर्थेषु जलाप्लवं मुनीश्वराः ॥४३॥
ऋषयो यादवाः देवाः सिद्धर्षिभिः समं पुनः ।
नैपालेषु च तिर्थेषु प्रचक्रिरे हि सर्वशः ॥४४॥
अद्यापि च न मुञ्चन्ति तन्नेपालं सुरर्षयः ।
तीर्थेषु स्नान्ति तेऽजस्रं समर्च्चयन्ति शंकरं ॥४५॥
योगिनो योगतस्तत्र विमुच्यार्य्याः कलेवरं ।
योनियन्त्राणि संत्यज्य प्रायन्ति परमं पदं ॥४६॥

अध्यायमेतच्छृणुयान्नराग्र्यो,
नश्यन्ति तस्यैवमरातयो वै ।
प्रमोदतीर्थस्य महानुभावं,
लभेद्धि तत्राप्लवनोद्भवं सः ॥४७॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे प्रद्युम्नोत्तरे कच्छपासुरवधो नाम पंचाशीत्यधिकशततमोध्यायः ॥१८५॥

—❁ ❁—

नारद उवाच ।

माहात्म्यं चैव तीर्थानां श्रोतुकामा वयं विभो ।
तीर्थानां नामधेयं च तीर्थभावं तथा पुनः ॥१॥
एतानि श्रोतुमिच्छामो नेपालसंभवानि च ।
येन सिद्धिं लभिष्यामो ज्ञात्वा तेषु जलाप्लवेत् ॥२॥

स्कन्द उवाच ।

इत्याकर्ण्य वचः कृष्णो नारदस्य च धीमतः ।
स्वीकारं कृतवांस्तत्र हर्षयन्मुनिदेवताः ॥३॥
आरुरोह हरिस्तार्क्ष्यमारोहयति दर्पकं ।
आदिदेशामरान्सिद्धान् रथान्यारोहणाया च ॥४॥
स्नात्वा प्रमोदतीर्थे च तार्क्ष्यासनोऽमरैः समं ।
माहेश्वरी जले स्नातुं ययौ स यादवैः समं ॥५॥
तस्यां स्नात्वा मुदा युक्तो व्याचष्ट वचनं हरिः ।
श्रावयंस्त्रिदशान्सिद्धान् तीर्थमाहात्म्यमादृतः ॥६॥

कृष्ण उवाच ।

तिस्रः कोट्यर्द्धकोटीनां प्रभवोथ समन्ततः ।
गरिष्ठानां यथा तेषां वच्मि नामानि तच्छृणु ॥७॥
भक्त्यादौ प्रणमेत्तीर्थं गंगाभावेन चेतसा ।
ततश्च स्नायते धीरः सर्वभावन्तथैव च ॥८॥
माहेश्वरीजले स्नातुः पुनर्ज्जन्म न विद्यते ।
इषे सितनवम्यां स मुक्तिभुक्तिफलं लभेत् ॥९॥
अस्मिन् भैरवतीर्थे च स्नातव्यं त्रिदशा मुने ।
चैत्रिकपूर्णिमायां च गवां लक्षफलं लभेत् ॥१०॥
ब्रह्मपद्यां समेतस्यां स्नातव्यं त्रिदशाः पुनः ।
श्रावणीपूर्णिमायाञ्च गोसहस्रफलं लभेत् ॥११॥
सिप्रवायां ततो देवा एतस्यां स्नायतां खलु ।
कृष्णाष्टम्यां मधोर्मासे गवां लक्षफलं लभेत् ॥१२॥
हिमश्रवामहानद्यामेतस्यां स्नायतां सुराः ।
शुक्लाष्टम्यां मधोः सौम्ये गवां शतफलं लभेत् ॥१३॥
रेविकायां समेतस्यां स्नाहि पुत्र मुनीश्वराः ।
राधकृष्णद्वितीयायां गवां लक्षफलं लभेत् ॥१४॥
पंचायां स्नायतामस्यां देवर्षयः सुराः पुनः ।
ज्येष्ठे सिततृतीयायां कपिलाशतजं लभेत् ॥१५॥
नीलकण्ठे महाकुण्डे स्नायतां विबुधाः पुनः ।
न पुनर्ज्जायते योनौ स्नाता विकिल्विषः पुमान् ॥१६॥
श्रावणीपूर्णिमायां यो यश्च कुण्डेषु चाप्लवेत् ।
सर्वैनोभिर्विनिर्म्मुक्तः स याति परमाङ्गतिं ॥१७॥
सप्तकुण्डेषु चैतेषु भक्त्या च स्नायतां सुराः ।
ज्येष्ठे सित[illegible]यां स्नाताप्नोति परात्परं ॥१८॥
रुद्रपद्यां चतुर्दश्यां तपसि तस्य देवताः ।
गवांकोटिफलंस्नातुरस्यां च स्नायतां भवेत् ॥१९॥
दुर्गाख्यायां च कौशिक्यां भक्त्या सुस्नायतां सुराः ।
स्नाता महानवम्यां च धान्यकोटिगुणं फलं ॥२०॥
देवा रत्नश्रवायां हि अस्याञ्च स्नायतां फलं ।
रत्नतुलाशतं सर्व्वं स्नाताप्नुयाद्दिवे कुहौ ॥२१॥
सूर्य्यदीप्त्यां स्मर स्नाहि सप्तम्योकरवौ दिवा ।
मार्ग्गसिते च संक्रान्त्यां स्नातुः पुत्र फलं शृणु ॥२२॥
तं पीडन्ति ग्रहा नैवं विषमेपि स्थिता भृशं ।
सूर्य्यपर्व्वायुतं प्राप्य सूर्यलोकं व्रजेत्परं ॥२३॥

मणिचूडाचलं पश्य स्नाहि मणिह्रदे स्मर ।
प्रणम्यतां च वज्राख्यां दण्डवत्पातयन्ततुं ॥२४॥
गिरिमारोहणादेनं सर्वपापैः प्रमुच्यते ।
स्नात्वा पश्यति यो देवीं योगगंगाजले शृणु ॥२५॥
गर्भवासं परित्यज्य स याति परमां गतिं ।
सर्वजन्मार्जितैः पापैर्विमुक्तस्तत्क्षणात्स्मर ॥२६॥
सप्तजन्मार्जितानां च सुकृतानां प्रभावतः ।
अत्र प्राप्नोति यश्चार्य आदिशक्तिं प्रपश्यति ॥२७॥
रत्नह्रदे सुत स्नाहि स्नात्वा यः पश्यतीश्वरं ।
रत्नभारशतं पुण्यं प्राप्य गच्छति शाङ्करं ॥२८॥
अस्मिन् शैलोद्भवेष्वार्य्यो नवधारासु दर्पक ।
श्रावणीपूर्णिमायां च स्नाता गोलक्षजं लभेत् ॥२९॥
शङ्खतीर्थे सुत स्नाहि चतुर्दश्यां हि चैत्रिके ।
स्नायते विधिना योऽत्र गवां शतफलं लभेत् ॥३०॥
रुद्रतीर्थे पुनः स्नाहि वैशाखीपूर्णिमादिने ।
गवां लक्षफलं प्राप्य रुद्रलोकं व्रजेत्सुधीः ॥३१॥
शचीतीर्थे सुत स्नाहि पूर्णिमायां शुचेः पुनः ।
शताश्वमेधजं प्राप्य शक्रलोकं स गच्छति ॥३२॥
गन्धर्वे स्नाहि तीर्थे त्वं तपसः पूर्णिमादिने ।
स्नात्वा पूजति लिङ्गं यो गवां लक्षफलं लभेत् ।३३।
सिद्धह्रदे सुत स्नाहि आषाढीपूर्णिमादिने ।
स्नायते विधिवद्धीरः कोटियज्ञफलं लभेत् ॥३४॥
चित्रह्रदे सुत स्नाहि फाल्गुणी पूर्णिमादिने ।
स्नाता पश्यति सप्तर्षिमार्कण्डेयान्तस्य फलं शृणु ३५
गिरिमारोहणात्सद्यः स निष्पापो भवेत्स्मर ।
स्नाता तत्र महापापैर्मुच्यते पातकैरपि ॥३६॥
आरुह्य गिरिराजेन्द्रं स्नातकोऽस्मिन् ह्रदे शिवां ।
योऽर्चति सततं शैवं निष्पापो याति तत्पदं ॥३७॥
कालतीर्थे पुनः स्नाहि कासुन्दाद्रिं समारुहन् ।
एनां पश्य भवानीं त्वं लिंगं कालेश्वरं स्मर ॥३८॥
कालतीर्थे जले स्नात्वा लिंगं पश्यति यः शिवां ।
माघासिते चतुर्दश्यां याति सविग्रहः परं ॥३९॥
ब्रह्मतीर्थे स्मर स्नात्वा नृत्येश्वरं प्रपूजय ।
गवां कोटिफलं लब्ध्वा व्रजेत्परं यतः कुहौ ॥४०॥
वाग्मत्या धर्मयोगे संक्रान्त्यां फाल्गुणस्य च ।
वैतरण्यान्तथा चाश्यां गवां शतफलं लभेत् ॥४१॥
स्नाहि सरस्वतीकुण्डे मनःश्रियां तथा स्मर ।
लभेत्फलं गवां लक्षं मकरस्थे दिवाकरे ॥४२॥
प्रभातीर्थे स्मर स्नाहि चैत्रिके पूर्णिमादिने ।
स्नाता गत्वा फलं लक्षं प्राप्य याति शिवालयं ॥४३॥

व्याघ्रतीर्थे हि यः स्नात्वा गोपालेशं प्रपश्यति ।
भाद्रस्य पूर्णिमायां स गवां कोटिफलं लभेत् ॥४४॥
मत्तीर्थे दर्पक स्नाहि संक्रान्त्यां मत्तिथौ तपः ।
स्नात्वा पश्यति मां भक्त्या तस्य पुण्यफलं शृणु ।४५।
न पुनर्जायते योनौ मरणं नास्ति चापरं ।
सहस्राणि गवां मेधं स लब्ध्वा याति मत्परं ॥४६॥
कनखले स्मर स्नाहि पौषकृष्णाष्टमीदिने ।
गवां लक्षफलं प्राप्य रुद्रलोकं स गच्छति ॥४७॥
नन्दितीर्थे पुनः स्नाहि नन्दीश्वरं प्रपश्यति ।
तपोसितचतुर्दश्यां गवांलक्षफलं लभेत् ॥४८॥
पद्मतीर्थे पुनः स्नाहि शुक्लाष्टम्यान्तपस्तिथौ ।
गवां लक्षफलं लब्ध्वा याति शंप्रेक्षकः परं ॥४९॥
असिताख्ये पुनः स्नाहि पौषसिताष्टमीतिथौ ।
स्नाता प्रेक्ष्येश्वरं लिंगं दशाश्वमेधजं लभेत् ॥५०॥
शक्रह्रदे स्मर स्नाहि भाद्रपूर्णिमायुते ।
त्रिवारं स्नायते योऽत्र तस्य पुण्यफलं शृणु ॥५१॥
भिन्नहत्यादिभिः पापैर्विमुक्तः सान्वयः शुचिः ।
वसेदिन्द्रासने तावद्यावन्मन्वन्तरं स्मर ॥५२॥
नवलिंगजले स्नाहि नवम्यां कार्त्तिकस्य च ।
शुक्लायां स्नातको लिंगं पश्यति तत्फलं शृणु ॥५३॥
अपमृत्युं परित्यज्य स शुचिः सान्वयः सुधीः ।
सर्वैर्नोभिर्विनिर्मुक्तः स यास्यति परां गतिं ॥५४॥
मातृतीर्थे सुत स्नाहि अमावास्यां मधोः स्मर ।
मातुः समुद्धरेत्स्नाता लब्ध्वा गोलक्षजं फलं ॥५५॥
मम प्रिये महातीर्थे भक्त्यात्र स्नायतां सुराः ।
आषाढस्य च शुक्लायां द्वादश्यां स्नायते शृणु ॥५६॥
स निःपापो भवेत्सद्यः स्नानादपि पुरा कृतैः ।
गोसहस्रफलं दत्वा उद्धरिष्यामि सान्वयं ॥५७॥
स्नाहि पुत्र सुरैः सार्द्धं कर्कोटकह्रदेऽत्र वै ।
श्रावणशुक्लपंचम्यां [illegible] फलं लभेत् ॥५८॥
रुद्रतीर्थे सुत स्नायाः कृष्णायां स्नातकः पुनः ।
कार्त्तिकस्य चतुर्दश्यां कपिलाशतजं लभेत् ॥५९॥
वाङ्मत्या रुद्रवत्याश्च सगुणनाम्नि संगमे ।
माघस्य पूर्णिमायां यः स्नाता गोशतजं लभेत् ॥६०॥
मन्मूर्त्तिम्पश्य लिंगं च स्नाहि तीर्थे तपोद्भुवे ।
यो द्वादशीयुते स्नाता गवां लक्षफलं लभेत् ॥६१॥
कुंतीतीर्थे कुहौ स्नात्वा उशीरवीजमारुहन् ।
गुप्तलिंगं नमेद्भक्त्या गवां लक्षफलं लभेत् ॥६२॥
स्नात्वा पीण्डारके तीर्थे पश्यति चण्डिकेश्वरं ।
गोकोटिजं समाप्यैशं तपसः संक्रमे व्रजेत् ॥६३॥

4

(2)

धर्मधारा, य., मि. प्रि.,

इ. श्रु. कं. स.

श्रुतश्रवा, भा. अद्यप्रती, महप्रभा, वारदा, दु. खमनि

सत्यवादिनी

विद्यापीठ-पुस्त

वाल्मीकि विद्यापीठ पुस्तकालयः

प्रत्यावर्तनतिथिः

२०४५।३।१८	
०४५।१।१८	
०४३।६।१२	२०५०।५।१६
२०४४.३०	

95958

95958

AUTHOR

TITLE हिमवत् खण्ड

DATE DUE	BORROWER'S NAME
२०-३-३०	हरि भण्डारी
८।२४	तेज प्र. सुवेदी

95958

~~R6235x~~
923:226
B4A

महेन्द्र संस्कृत विश्वविद्यालय
वाल्मीकि विद्यापीठ
पुस्तकालय